P. B. Dansk 22

W. F. Webster

कादम्बरी

पूर्व्वभागः

श्रीवाणभट्टविरचितः

कलिकाताराजकीयसंस्कृतविद्यालयाध्यापकेन

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण

संस्कृतः

वाल्मीकि यन्त्रे मुद्रितः

कलिकातायाम्

शकाब्दाः १७९३ । 1793
1871 AD.

कादम्बरी

प्रथमभागः

मङ्गलाचरणम् ।

रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥

जयन्ति वाणासुरमौलिलालिता
दशास्यचूड़ामणिचक्रचुम्बिनः ।
सुरासुराधीशशिखान्तशायिनो
भवच्छिदस्त्र्यम्बकपादपांशवः ॥

जयत्युपेन्द्रः स चकार दूरतो-
बिभित्सया यः क्षणलब्धलक्ष्यया ।
दृशैव कोपारुणया रिपोरुरः
स्वयं भयाद्भिन्नमिवास्रपाटलम् ॥

नमामि भर्वांञ्चरणाम्बुजद्वयं
सशेखरैर्मौखरिभिः कृतार्च्चनम् ।
समस्तसामन्तकिरीटवेदिका-
विटङ्कपीठोल्लुठितारुणाङ्गुलि ॥

दुर्ज्जननिन्दासज्जनस्तुतिः ।

अकारणाविष्कृतवैरदारुणा-
दसज्जनात् कस्य भयं न जायते ।
विषं महाहेरिव यस्य दुर्वचः
सुदुःसहं सन्निहितं सदा मुखे ॥
कटु क्वणन्तो मलदायकाः खला-
स्तुदन्त्यलं बन्धनशृङ्खला इव ।
मनस्तु साधुध्वनिभिः पदे पदे
हरन्ति सन्तो मणिनूपुरा इव ॥
सुभाषितं हारि विशत्यधोगला-
न्न दुर्ज्जनस्यार्करिपोरिवामृतम् ।
तदेव धत्ते हृदयेन सज्जनो-
हरिर्म्महारत्नमिवातिनिर्म्मलम् ॥

कथाप्रशंसा ।

स्फुरत्कलालापविलासकोमला
करोति रागं हृदि कौतुकाधिकम् ।

रसेन शय्यां स्वयमभ्युपागता
कथा जनस्याभिनवा वधूरिव ॥
हरन्ति कं नोज्ज्वलदीपकोपमै-
र्नवैः पदार्थैरुपपादिताः कथाः ।
निरन्तरश्लेषघनाः सुजातयो
महास्रजश्चम्पककुड्मलैरिव ॥

कविवंशवर्णनम् ।

बभूव वात्स्यायनवंशसम्भवो
द्विजोजगद्गीतगुणोऽग्रणीः सताम् ।
अनेकगुप्ताच्चितपादपङ्कजः
कुवेरनामांश इव स्वयम्भुवः ।
उवास यस्य श्रुतिशान्तकल्मषे
सदा पुरोडाशपवित्रिताधरे ।
सरस्वती सोमकषायितोदरे
समस्तशास्त्रस्मृतिबन्धुरे मुखे ॥
जगुर्गृहे ग्रस्तसमस्तवाङ्मयैः
ससारिकैः पञ्जरवर्त्तिभिः शुकैः ।
निगृह्यमाणा वटवः पदे पदे
यजूंसि सामानि च यस्य शङ्किताः ॥

हिरण्यगर्भो भुवनाण्डकादिव
क्षपाकरः क्षीरमहार्णवादिव ।
अभूत् सुपर्णो विनतोदरादिव
द्विजन्मनामर्ग्यपतिः पतिस्ततः ॥
विहृखतो यस्य विसारि वाङ्मयं
दिने दिने शिष्यगणा नवा नवाः ।
वयस्तु लग्नाः श्रवणेऽधिकां श्रियं
प्रचक्रिरे चन्दनपल्लवा इव ॥
विधानसम्पादितदानशोभितैः
स्फुरन्महावीरसनाथमूर्त्तिभिः ।
मखैरसंख्यै रजयत् सुरालयं
सुखेन यो यूपकरैर्गजैरिव ॥
स चित्रभानुं तनयं महात्मनां
सुतोत्तमानां श्रुतिशास्त्रशालिनाम् ।
अवाप मध्ये स्फटिकोपलामलं
क्रमेण कैलासमिव क्षमाभृताम् ॥
महात्मनो यस्य सुदूरनिर्गताः
कलङ्कमुक्तेन्दुकलामलत्विषः ।
द्विषन्मनः प्राविविशुः कृतान्तरा
गुणा नृसिंहस्य नखाङ्कुशा इव ॥

दिशामलीकालकभङ्गतां गत-
स्त्रयीवधूकर्णतमालपल्लवः ।
चकार यस्याध्वरधूमसञ्चयो
मलीमसः शुक्लतरं निजं यशः ॥

सरस्वतीपाणिसरोजसम्पुट-
प्रमृष्टहोमश्रमसीकराम्भसः ।
यशोंऽशुशुक्लीकृतसप्तविष्टपा-
त्ततः सुतो बाण इति व्यजायत ॥

द्विजेन तेनाक्षतकण्ठकौण्ठ्यया
महामनोमोहमलीमसान्धया ।
अलब्धवैदग्ध्यविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा ॥

कादम्बरी।

कथामुखम्।

आसीदशेषनरपतिशिरःसमभ्यर्च्चितशासनः पाकशासन इवापरः चतुरुदधिमालामेखलाया भुवो भर्त्ता, प्रतापानुरागावनतसमस्तसामन्तचक्रः चक्रवर्त्तिलक्षणोपेतः, चक्रधर इव करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनः, हर इव जितमन्मथः [१], गुहइवाप्रतिहतशक्तिः, [२] कमलयोनिरिव विमानीकृतराजहंसमण्डलः, [३] जलधिरिव लक्ष्मीप्रसूतिः, गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः, रविरिव प्रतिदिवसोपजायमानोदयः मेरु-

---

[१] कान्त्या वशित्वेन च पराभूतकामः।

[२] शक्तिरस्त्रविशेषः प्रभावादिकसामर्थ्यञ्च।

[३] राजानः हंसाइव मुख्यन्टपाः, हंसानां राजानः राजहंसा हंसविशेषाश्च, तेषां मण्डलं विमानीकृतं मानशून्यीकृतं, विमानरूपासनीकृतञ्च।

रिव सकलभुवनतलोपजीव्यमानपाद[१]च्छायः (क) दिग्गज इवानवरतप्रवृत्तदाना[२]र्द्रीकृतकरः, कर्त्ता महाश्चर्य्याणाम्, आहर्त्ता क्रतूनाम्, आदर्शः सर्व्वशास्त्राणाम्, उत्पत्तिः कलानां, कुलभवनं गुणानाम्, आगमः काव्यामृतरसानाम्, उदयशैलो मित्र[३]मण्डलस्य, उत्पातकेतुरहितजनस्य, प्रवर्त्तयिता गोष्ठीबन्धानाम् [४], आश्रयो रसिकानां, प्रत्यादेशो [५] धनुष्मताम्, धौरेयः साहसिकानाम्, अग्रणीर्विदग्धानां, वैनतेय इव विनतानन्दजननः [६] वैण्य इव (ख) चापकोटिसमुत्सारितसकलारातिकुलाचलो [७] राजा शूद्रको नाम।

(क) सकलोपजीव्यमानपादच्छायः इत्यतः परम् वृहस्पतिरिव सकलशास्त्रार्थतत्त्वज्ञ इत्यधिकपाठः।

(ख) वैण्य इत्यत्र पृथुरिति पाठान्तरम्।

[१] पादः चरणः प्रत्यन्तपर्वतश्च।

[२] दानं मदजलम् उत्सर्गश्च।

[३] मित्रं सुहृत्, मित्रः सूर्य्यश्च।

[४] गोष्ठीनां सभानां बन्धाः करणानि आसक्तयो वा।

[५] प्रत्यादेशः निराकरणसाधनं करणे घञ्।

[६] विनतायाः कश्यपपत्नीभेदस्य, विशेषेण नतानाञ्चानन्दजननः।

[७] अरातिकुलमचलइव। अरातय इव पृथिवीसमीकरणप्रतिबन्धकत्वात् कुलाचलाः पर्वतभेदाः "महेन्द्रः मलयः सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः" इत्युक्ताः

नाम्नैव [१] यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाड़म्बरम् एकविक्रमा[२]क्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवनत्रयं जहासेव वासुदेवम्। अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसम्पर्ककलङ्कमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः। यस्य मनसि धर्म्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति [३] भगवतो नारायणस्य। यस्य च मदकलकरिकुम्भपीठपाटनमाचरता लग्नस्थूलमुक्ताफलेन दृढ़मुष्टिनिष्पीड़ननिष्ठ्यूतधाराजलविन्दुदन्तुरेणेव कृपाणेनाकृष्यमाणा सुभटोरःकपाटघटितकवचसहस्रान्धकारमध्यवर्त्तिनी करिकरतटगलितमदजलासारदुर्द्दिनास्वभिसारिकेव समरनिशासु समीपमसकृदाजगाम राजलक्ष्मीः। यस्य च हृदयस्थिता-

---

सप्त। वेणपुत्रः पृथुर्हि पृथिवीसमीकरणार्थं कुलपर्वतानां धनुष्कोट्या अपसारणं कृतमिति पुराणप्रसिद्धम्।

[१] नाम्नैव नतु नखाद्यस्त्रैरतो नरसिंहाद्यतिरेकः।

[२] विक्रमः पौरुषम् पादश्च।

[३] मनःप्रभृतिषु वसता धर्मादिना सर्वदेवमयस्य नारायणस्यानुकरोति तमनुकरोति।

नपि पतीन् दिधक्षुरिव प्रतापानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल। यस्मिंश्च राजनि जितजगति परिपालयति महीं, चित्रकर्म्मसु वर्णसङ्कराः [१], रतेषु केशग्रहाः, [२] काव्येषु [३] दृढ़बन्धाः, शास्त्रेषु [४] चिन्ताः, स्वप्नेषु [५] विप्रलम्भाः, छत्रेषु [६] कनकदण्डाः, ध्वजेषु प्रकम्पाः, [७] गीतेषु रागविलसितानि, [८] करिषु

---

[१] चित्रेष्वेव वर्णानां शुक्लपीतादीनां सङ्करः नतु ब्राह्मणादीनां वर्णानां सङ्करः, सवर्णातिक्रमेणान्यजातिविवाहादिना दोषः।

[२] रतेषु नतु युद्धेषु, कामोद्दीपनार्थं केशग्रहः कामशास्त्रे प्रसिद्धः, केशाकर्षणञ्च।

[३] काव्येषु नतु नियम्येषु, सर्वेषां तद्भयेन स्वत एव नियतत्वात्। बन्धः ग्रन्थनम् कारादिरोधनञ्च।

[४] शास्त्रेषु नतु विषयान्तरेषु।

[५] स्वप्नेषु नतु शृङ्गाररसेषु विप्रलम्भो विसंवादः शृङ्गारभावभेदश्च।

[६] छत्रेषु नतु दण्ड्येषु, सर्वेषामनुशिष्टत्वात् कनकादिदण्डप्रसङ्गाभावात्। दण्डः छत्रधारणार्थः पदार्थः, दमनञ्च।

[७] ध्वजेषु नारिभयेषु।

[८] रागेषु नतु मद्यस्त्रीव्यसनादिषु रागोऽनुरागः माधवादिस्वरविशेषश्च।

मदविकाराः [१], चापेषु गुणच्छेदाः, [२] गवाक्षेषु जाल-मार्गाः, [३] शशिकृपाणकवचेषु कलङ्काः, [४] रतिकलहेषु [५] दूतसम्प्रेषणानि, सार्य्यक्षेषु [६] शून्यगृहाः, प्रजाना-मासन्। यस्य च परलोकाद्भयम्, [७] अन्तःपुरिका-लकेषु भङ्गः, [८] नूपुरेषु मुखरता, [९] विवाहेषु कर-

---

[१] करिषु न जनेषु मदः दानजलं, मादकद्रव्यसेवनजनित-मत्तता च।

[२] चापेषु नतु चित्तेषु गुणः मौर्वी, दयादाक्षिण्यादिश्च। छेदः भेदनं राहित्यञ्च।

[३] गवाक्षेषु न जलेषु जालमार्गः गवाक्षच्छिद्रपथविशेषः, मत्स्यधारणार्थं जालपातनञ्च।

[४] शशिनि कलङ्कः प्रसिद्धः कृपाणस्य कवचस्य च बहुकाल-स्वस्वकार्य्याकरणे मालिन्यरूपः कलङ्कः एतेष्वेव, न चित्तेषु कलङ्कः पापमपयशो वा।

[५] नतु युद्धार्थमरातिनिकटे दूतप्रेषणम्।

[६] सार्य्यक्षेषु द्यूतविशेषेषु, न लोकेषु। शून्याः सारी-रूपगुटिकाहीनाः धनादिशून्याश्च गृहाः स्थानविशेषाः भव-नानि च।

[७] परलोकात् न शत्रुतः।

[८] नतु युद्धेषु, भङ्गः कौटिल्यापादनव्यापारभेदः पलायनञ्च।

[९] नतु जनेषु, मुखरता शब्दायमानता चपलता च।

पीड़नम्, [१] अनवरतमखाग्निधूमेनाश्रुपातः, [२] तुरगेषु कशाभिघातः, [३] मकरध्वजे चापध्वनि[४]रभूत्।

तस्य च राज्ञः कलिकालभयपुञ्जीभूतकृतयुगानुकारिणी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालनजर्झरितोर्मिमालया जलावगाहनावतारितजयकुञ्जरकुम्भसिन्दूरसन्ध्यायमानसलिलया उन्मदकलहंसकुलकोलाहलमुखरितकूलया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्।

स तस्याञ्च विजिताशेषभुवनमण्डलतया विगतराज्यचिन्ताभारनिर्वृतो द्वीपान्तरागतानेकभूमिपालमौलिमालालालितचरणयुगलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन् अमरगुरुमपि प्रज्ञयोपहसद्भिरनेककुलक्रमागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालङ्कारैरनेकमूर्द्धाभिषिक्तपार्थिवकुलोद्गतैरखिलकलाकलापालोचनकठोर [५] मतिभिरतिप्रगल्भैः काल-

---

[१] विवाहेषु नतु लोकेषु करस्य पीड़नं ग्रहणं नतु करेण राजग्राह्येण पीड़नञ्च।

[२] नतु शोकादिना।

[३] तुरगेषु नतु दुष्टचौरादिषु।

[४] मकरध्वजे नतु युद्धे, अरातिशून्यत्वेन युद्धाप्रसङ्गात्।

[५] कठोरा सूक्ष्मार्थग्राहिणी।

विद्भिः प्रेमानुरक्तहृदयैरग्राम्यपरिहासकुशलैरिङ्गिताकारवेदिभिः काव्यनाटकाख्यानका [१] लेख्यव्याख्यानादिक्रियानिपुणैरतिकठिनपीवरस्कन्धोरुबाहुभिरसकृद्वदलितसमदरिपुगजघटापीठबन्धैः केसरिकिशोरकैरिव विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास। तस्य चातिविजिगीषुतया महासत्त्वतया च तृणमिव लघुवृत्ति स्त्रैण[२]माकलयतः प्रथमे वयसि वर्त्तमानस्यातिरूपवतोऽपि सन्तानार्थिभिरमात्यैरपेक्षितस्यापि सुरतसुखस्योपरि द्वेष इवासीत्। सत्यपि रूपविलासोपहसितरतिविभ्रमे लावण्यवति विनयवत्यन्वयवति हृदयहारिणि चावरोधजने स कदाचिदनवरतदोलायमानरत्नवलयो घर्घरिका[३]स्फालनप्रकम्पझणझणायमानमणिकर्णपूरः स्वयमारब्धमृदङ्गवाद्यः सङ्गीतकप्रसङ्गेन, कदाचिदविरलविमुक्तशरासार[४]शून्यीकृतकाननो मृगयाव्यापारेण, कदाचिदा-

---

[१] आख्यानकं कथाविशेषः।

[२] स्त्रिया वशीभूतत्वम् स्त्रीसम्बन्धित्वात् तत्सङ्गमस्य, लघ्वी वृत्तिः व्यवहारो यस्मिन् लघुवृत्ति।

[३] वाद्यभेदः।

[४] विमुक्तशराणाम् आसारेण अविरतवर्षणेन शून्यीकृतं मृगादिहीनीकृतं काननं येन।

बहुविदग्धमण्डलः काव्यप्रबन्धरचनेन, कदाचिच्छास्त्रालापेन, कदाचिदाख्यानकाख्या [१] यिकेतिहासपुराणाकर्णनेन, कदाचिदालेख्यविनोदेन, कदाचिद्वीणया, कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया, कदाचिदक्षरच्युतक[२]मात्राच्युतकबिन्दुमतीगूढ़चतुर्थपादप्रहेलिकाप्रदानादिभिः वनितासम्भोगसुखपराङ्मुखः सुहृत्परिवृतो दिवसमनयत्। यथैव च दिवसमेवमारब्धविविधक्रीड़ापरिहासचतुरैः सुहृद्भिरुपेतो निशामनैषीत्।

एकदा तु नातिदूरोदिते नवनलिनदलसम्पुटभिदि किञ्चिदुन्मुक्तपाटलिम्नि भगवति मरीचिमालिनि, राजानमास्थान[३]मण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिना कौक्षेयकेण [४] सन्निहितविषधरेव चन्दनलता, भीषणरमणीयाकृतिरविरलचन्दनानुलेपनधवलितस्तनतटा, उन्मज्जदैरावतकुम्भमण्डलेव मन्दाकिनी, चूड़ामणिसंक्रान्तप्रतिबिम्बच्छलेन राजाज्ञेव मूर्त्तिमती राजभिः शिरोभिरुह्यमाना, शरदिव कलहंसधवलाम्बरा, जामदग्न्यपरशुधारेव वशीकृतसकलराज-

---

[१] आख्यायिका उपलब्धार्था कथा।

[२] अक्षरच्युतकादयः शब्दालङ्कारभेदाः।

[३] आस्थानं सभा।

[४] कुक्षौ बद्धः कुक्षि-ढकञ्। खड्गः।

मण्डला, विन्ध्यवनभूमिरिव वेत्रलतावती, राज्याधिदेवतेव विग्रहिणी, प्रतिहारी समुपसृत्य क्षितितलनिहितजानुकर-कमला सविनयमब्रवीत्, देव! द्वारस्थिता सुरलोकमारो-हतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपतिता राजलक्ष्मी-र्दक्षिणापथादागता चण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति, "सकलभुवनतलसर्वरत्नानामुदधिरिवैकभाजनं देवः, विहङ्गमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूल[१]मादायागताहमिच्छामि देवदर्शन-सुखमनुभवितुमिति" एतदाकर्ण्य देवः प्रमाणमित्युक्त्वा विर-राम [२]।

उपजातकुतूहलस्तु राजा समीपवर्त्तिनां राज्ञामवलोक्य मुखानि, को दोषः, प्रवेश्यतामित्यादिदेश। अथ प्रतिहारी नर-पतिवचनानन्तरमुत्थाय तां मातङ्ग[३]कुमारीं प्रावेशयत्। प्रविश्य च सा नरपतिसहस्रमध्यवर्त्तिनम्, अशनिभयपुञ्जित-कुलशैल [४] मध्यगतमिव कनकशिखरिणम्, अनेकरत्ना-भरणकिरणजालकान्तरितावयवम् इन्द्रायुधसहस्रसंच्छादिता-

---

[१] मूलं समीपम्।

[२] प्रतीहारी विररामेत्यन्वयः।

[३] मातङ्गश्चण्डालः।

[४] कुलपर्वताः महेन्द्रादयः (२६०) उक्ताः।

ष्टदिग्भागमिव जलधरसमयदिवसम्, आलम्बितस्थूलमुक्ताकलापस्य कनकशृङ्खलानियमितमणिदण्डिकाचतुष्टयस्य गगनसिन्धु [१] फेनपटलपाण्डरस्य नातिमहतो दुकूलवितानस्याधस्तादिन्दुकान्तमणिपर्य्यङ्किका[२]निषणम्, उद्धूयमानकनकदण्डचामरकलापम् उन्मयूख[३]मुखकान्तिविजिते पराभवप्रणते शशिनीव स्फाटिके पादपीठे विन्यस्तवामपादम्, इन्द्रनीलमणिकुट्टिमप्रभासम्पर्कश्यामायमानैः प्रणतरिपुनिश्वासमलिनीकृतैरिव चरणनखमयूखजालकैरुपशोभमानम्, आसनोल्लसितपद्मरागकिरणपाटलीकृतेनाचिरमृतमधुकैटभरुधिरारुणेन हरिमिवोरुयुगलेन विराजमानम्, अमृतफेनधवले गोरोचनालिखितहंसमिथुनसनाथ [४] पर्य्यन्ते चामरपवनप्रणर्त्तितान्तदेशे दुकूले वसानम्, अतिसुरभिचन्दनानुलेपनधवलितोरःस्थलम्, उपरिविन्यस्तकुङ्कुमस्थासकम्, [५] अन्तरानिपतितबालातपच्छेदमिव [६] कैलासशिखरिणम्, अपरशशिशङ्कया नक्षत्रमालयेव हारलतया कृतमुखपरि-

---

[१] गगनसिन्धुः स्वर्गनदी मन्दाकिनी।

[२] क्षुद्रः पर्य्यङ्कः पर्य्यङ्किका।

[३] ऊर्द्धं गतः मयूखो यस्य तादृशं मुखम्।

[४] सनाथः सहचरः।

[५] स्थासकं तिलकविशेषः।

[६] छेदः खण्डः।

वेशम्, [१] अतिचपलराजलक्ष्मीबन्धननिगड़शङ्कामुपजनयतेन्द्रनीलकेयूरयुगलेन मलयज-रसगन्धलुब्धेन भुजङ्गद्वयेनेव वेष्टितबाहुशिखरम्, ईषदालम्बिकर्णोत्पलम्, उन्नतघोणम, [२] उत्फुल्लपुण्डरीकलोचनम्, अमलकलधौत[३] पट्टायितमष्टमीचन्द्रशकलाकारम्, अशेषभुवनराज्याभिषेकसलिलपूतम्, ऊर्णासनाथं, [४] ललाटदेशमुद्वहन्तम्, आमोदितमालतीकुसुमशेखरम्, [५] उषसि शिखरपर्य्यस्त[६]तारकापुञ्जमिव पश्चिमाचलम्, आभरणप्रभापिशङ्गिताङ्गतया लग्नहरहुताशमिव [७] मकरध्वजम्, आसन्नवर्त्तिनीभिः सर्वतः सेवासङ्गताभिरिव दिग्बधूभिर्वारविलासिनीभिः परिवृतम्,

---

[१] परिवेशः मण्डलाकारवेष्टनम्।

[२] उन्नतघोणमुन्नतनासिकम्।

[३] कलधौतं ललाटपक्षे स्वर्णं चन्द्रपक्षे रौप्यम्।

[४] "ऊर्णा मेषादिलोम्नि स्यादावर्त्ते चान्तरा भ्रुवोः" इत्युक्तः भ्रुवोर्मध्यवर्त्तिलोमावर्त्तः तद्युक्तम्।

[५] शेखरं शिखाप्रदेशः।

[६] प्रातररुणकिरणसंपर्कात् पूर्वाचलसन्निकृष्टताराणाम् निष्प्रभत्वेन पश्चिमाचलसन्निकृष्टताराणामेव द्युतिमत्त्वात्तथोक्तिः, पर्यस्तं समन्तात् क्षिप्तम्।

[७] हरहुताशः हरलोचनस्थाग्निः तस्य दाहकत्वेन तल्लग्नत्वम्।

अमलमणिकुट्टिम [१] संक्रान्तप्रतिविम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोह्यमानम्, अशेषजनभोग्यतामुपनीतयाप्यसाधारणया [२] राजलक्ष्म्या समालिङ्गितम्, अपरिमितपरिवारजनमप्यद्वितीयम्, [३] अनन्तगजतुरगसाधनमपि [४] खड्गमात्रसहायम्, एकदेशस्थितमपि व्याप्तभुवन [५] मण्डलम्, आसनगतमपि धनुषि निषणम्, [६] उत्सादिताशेषद्विषदिन्धनमपि [७] ज्वलत्प्रतापानलम्, आयतलोचनमपि [८] सूक्ष्मदर्शनं, महादोषमपि [९] सकल-

---

[१] मणिमयं कुट्टिमं [छात्] मणिकुट्टिमम्।

[२] सकलजनभोग्यत्वेनासाधारण्यमनुचितमिति विरोधः आश्रितजने भोगदानात् असाधारणया असदृश्येति तत्परिहारः एवमुत्तरत्र।

[३] सजातीयद्वितीयराहित्यात् विरोधपरिहारः।

[४] साधनं सेना कारणञ्च।

[५] देहेन प्रभावेण च व्याप्त्या विरोधतत्परिहारौ।

[६] निषणम् स्थितमासक्तञ्च।

[७] शत्रुरूपदाह्यकाष्ठाभावे प्रतापवह्नेः कारणाभावात् शमनमेवोचितं तच्च न जातमिति विभावनालङ्कारः।

[८] दर्शनं नेत्रं ज्ञानञ्च।

[९] दोर्हस्तः, दोषः शौर्य्यादिगुणविरोधी आलस्यादिश्च।

गुणाधिष्ठानं, कुपतिमपि [१] कलत्रचयवल्लभम्, अविरत-प्रवृत्तदान [२] मप्यमदम्, अतिशुद्धस्वभावमपि कृष्ण [३] चरितम्, अकरमपि [४] हस्तस्थितसकलभुवनतलम्, राजान-मद्राक्षीत्।

आलोक्य च सा दूरस्थितैव प्रचलितरत्नवलयेन रक्त-कुवलयदलकोमलेन पाणिना जर्ज्जरितमुखभागां वेणुलता-मादाय नरपतिप्रबोधनार्थं सकृत् सभाकुट्टिममाजघान येन सकलमेव तद्राजक[५]मेकपदे[६]वनकरियूथमिव तालशब्देन तेन वेणुलताध्वनिना युगपदावलितवदनमवनिपालमुखादा-कृष्य चक्षुस्तदभिमुखमासीत्।

अवनिपतिस्तु दूरादालोकयेत्यभिधाय प्रतीहार्य्या [७]

---

[१] कोः पृथिव्याः पतिः कुत्सितः प्रियारञ्जनाद्यचतुरश्च पतिः।

[२] दानं करिणां स्रवन्मदजलं वितरणञ्च मदो गर्वः दानजलञ्च।

[३] कृष्णं मलिनं चरितं यस्येति विरोधः कृष्णस्य वासु-देवस्येव चरितं यस्येति तत्परिहारः।

[४] करो हस्तः राजग्राह्यः बलिश्च। तस्य सार्वभौमत्वना-न्यस्मै बलिदानं नास्तीत्यर्थः।

[५] राजकं नृपतिसमुदायः।

[६] एकपदे अकस्मात् तत्क्षणादित्यर्थः।

[७] प्रतीहार्य्या दूरात् दूरे स्थित्वैव आलोकय राजानमिति शेषः, इत्यभिधाय निर्दिश्यमानाम् उपदिश्यमानाम्।

निर्द्दिश्यमानां तां वयःपरिणामपाण्डुरशिरसा[१]रक्तराजी-वेक्षणापाङ्गेनानवरतकृतव्यायामतया यौवनापगमेऽप्यशिथिल-शरीरसन्धिना सत्यपि मातङ्गत्वे नातिनृशंसाकृतिना अनुगृहीता-र्य्यवेशेन धवलवाससा पुरुषेणाधिष्ठितपुरोभागाम् आकुला-कुलकाकपक्षधारिणा [२] कनकशलाकानिर्मितमप्यन्तर्गतशुक-प्रभाश्यामायमानं मरकतमयमिव पञ्जरमुद्वहता चाण्डाल-दारके [३] णानुगम्यमानाम्, असुरगृहीतामृतापहरणकृत-कपटपटुविलासिनीवेशस्य [४] श्यामतया भगवतो हरेरिवा-नुकुर्वतीं, सञ्चारिणीमिवेन्द्रनीलमणिपुत्रिकाम्, आगुल्फाव-लम्बिना नीलकञ्चुकेनाच्छन्नशरीराम्, उपरि रक्तांशुकर-चितावगुण्ठनां, नीलोत्पलस्थलीमिव निपतितसन्ध्यातपाम्, एककर्णासक्तदन्तपत्रप्रभा [५] धवलितकपोलमण्डलाम्, उद्य-

---

[१] वयः परिणामेन जरसा पाण्डुरं शुभ्रं शिरः शिरःस्थ-केशो यस्य।

[२] अभीक्ष्णमाकुलः आभीक्ष्णाद्वृद्धिलब् काकपक्षः शिखण्डकः।

[३] दारकेण बालकेन।

[४] अमृताहरणकाले कृतः कपटे मायायां पटुः दैत्यमोहन-चतुरः विलासिनीवेशः मोहिनीरूपं येन।

[५] एककर्णे आमुक्तं परिहितं यद्दन्तपत्रं तस्य प्रभा। एको-त्यजातिभेदभूषासूचनार्थ।

दिन्दुविम्बकिरणच्छुरितमुखीमिव विभावरीम्, आकपिलगोरोचनारचिततिलकतृतीयलोचनाम्, ईशानुचरितकिरातवेशाम् (क) इव भवानीम्, उरःस्थलनिवाससंक्रान्तनारायणदेहप्रभाश्यामलितामिव श्रियं, कुपितहरहुताशनदह्यमानमदनधूममलिनीकृतामिव रतिम्, उन्मदहलि [१] हलापकर्षणभयप्रपलायितामिव यमुनाम्, अतिबहलपिण्डा लक्तकरसरागपल्लवितपादपङ्कजाम्, [२] अचिरमृदितमहिषासुर-[३] रुधिररक्तचरणामिव कात्यायनीम्, आलोहिताङ्गुलिप्रभापाटलितनखमयूखाम्, अतिकठिनमणिकुट्टिमस्पर्शमसहमानां, क्षितितले पल्लवभङ्गानिव [४] निधाय सञ्चरन्तीम् आपिञ्जरे [५] णोत्सर्पिणा नूपुरमणीनां प्रभाजालकेनानुरञ्जितशरीर

(क) ईशानाचरितानुचरितकिरातवेशाम् इति पाठान्तरम्।

[१] हली बलरामः "स आजुहाव यमुनां जलक्रीड़ार्थमीश्वरः। निजवाक्यमनादृत्य मत्त इत्यापगां बलः। अनागतां हलाग्रेण कुपितो विचकर्ष ह इति भागवते १० स्कन्धे ६५ अध्याये।

[२] अतिबहलः अतएव पिण्डः पिण्डाकारो योऽलक्तकरसस्तस्य रागेण पल्लवितं पल्लववदाचरितं पादपङ्कजं यस्याः।

[३] महिषप्रसूतस्तदाकारः असुरः महिषासुरः स हि निष्क्रमन्नेव दुर्गया पादेनाक्रम्य असिना निहत इति चण्ड्यां ४र्थ अध्याये।

[४] पल्लवभङ्गान् पल्लवखण्डान्।

[५] आपिञ्जरेण ईषत्पिङ्गलवर्णेन।

तया पावकेनेव भगवता रूपैकपक्ष [१] पातिना (क) प्रजापतिमप्रमाणीकुर्वता [२] जातिसंशोधनार्थमालिङ्गितदेहाम्, अनङ्गवारणशिरोनक्षत्रमालायमानेन [३] रोमराजिलतालवालकेन मेखलादाम्ना परिगतजघनस्थलाम्, अतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गङ्गास्रोतसेव कालिन्दी-[४] शङ्कया कृतकण्ठग्रहां, शरदमिव विकसितपुण्डरीकलोचनां, [५] प्रावृषमिव घनकेशजालां, [६] मलयमेखलामिव चन्दन [७] पल्लवावतंसां, नक्षत्रमालामिव चित्रश्रवणाभर-

---

(क) रूपे एव पक्षपातिना इति पाठान्तरम्।

[१] रूपं शब्दादिषु मध्ये नेत्रग्राह्यगुणविशेषः सौन्दर्यञ्च। वह्नेरेव कर्णादिषु मध्ये स्वजन्यनेत्रद्वारा रूपग्राहित्वरूपरूपपक्षपातिता लोकप्रसिद्धा।

[२] अप्रमाणीकुर्वता अनाद्रियमाणेन प्रजापतिरेव जातिनिर्माणे प्रभुः स च ईदृशीं रूपवतीम् अस्पृश्यां चकारेति तम् अनादृत्यैव तज्जातिशोधनार्थम् वह्निस्तद्देहे प्रवेश इत्युत्प्रेक्षा।

[३] वारणो हस्ती नक्षत्रमाला सप्तविंशतिमौक्तिकनिर्मिता।

[४] कालिन्दी यमुना। कृष्णवर्णत्वेन च मातङ्ग्यां तच्छङ्का।

[५] विकसितं पुण्डरीकमेव लोचनं तदिव लोचनञ्च यस्याः।

[६] घनाः मेघाः निविड़ाश्च।

[७] चन्दनवृक्षपल्लवएव चन्दनपल्लवेन च अवतंसो यस्याः।

णभूषितां, [१] श्रियमिव हस्तस्थितकमलशोभां, [२] मूर्च्छामिव मनोहराम्, [३] अरण्यभूमिमिव (क) अक्षत रूपसम्पन्नां, दिव्ययोषितमिवाकुलीनां, [४] निद्रामिव लोचनग्राहिणीम्, [५] अरण्यकमलिनीमिव मातङ्गकुल-[६] दूषिताम्, अमूर्त्तामिव स्पर्शवर्जिताम्, [७] आलेख्यगतामिव दर्शनमात्रफलां, मधुमासकुसुमसमृद्धिमिव विजातिम्, [८] अनङ्गकुसुमचापलेखामिव मुष्टिग्राह्यमध्यां, यक्षा-

---

(क) अन्यावृतवक्षशोभिरूपामिति पाठान्तरम्।

[१] चित्रं चतुर्दशसंख्याकं, श्रवणं द्वाविंशं, भरणं द्वितीयं, च नक्षत्रं तेन, चित्रेण आश्चर्य्येण कर्णाभरणेन च भूषिताम्।

[२] हस्तस्थितकमलेन तदाकारचिह्नेन च शोभा यस्याः।

[३] मनोहराम् मानसवृत्तिहारिणीं रम्याञ्च।

[४] अकुलीनां दुष्टकुलजातां पृथिव्यसंबद्धाञ्च।

[५] लोचनस्य नेत्रस्य सौन्दर्य्येण, तद्वृत्तेश्च निमीलनेन, ग्राहिणीं हारिणीम्।

[६] मातङ्गः चण्डालः हस्ती च। कुलं वंशः समूहश्च।

[७] स्पर्शः त्वगिन्द्रियग्राह्यगुणविशेषः स्पर्शयोग्यता च मूर्त्तिमतएव स्पर्शः त्वगिन्द्रियव्यापारसम्भवः नामूर्त्तस्य चण्डालजातित्वेन स्पर्शनयोग्यताशून्यत्वादस्याः स्पर्शराहित्यम्।

[८] विरुद्धजातिमतीम् जातिकुसुमरहिताञ्च।

धिपलक्ष्मीमिवालकोद्भासिनीम्, [१] अचिरोपरूढयौवनाम्, अतिशयरूपाकृतिम्, अनिमिषलोचनो ददर्श।

दृष्ट्वा च तां समुपजातविस्मयस्याभून्मनसि महीपतेः, अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः, तथाहि यदि नामेयमात्मरूपोपहसिताशेषरूपसम्पदुत्पादिता, किमर्थमपगतस्पर्शसम्भोगसुखे कृतं कुले जन्म? मन्ये च मातङ्गजातिस्पर्शदोषभयादस्पृशतेयमुत्पादिता प्रजापतिना, अन्यथा कथमियमक्लिष्टता लावण्यस्य, नहि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः, सर्वथा धिग्विधातारमसदृशसंयोगकारिणम्, अतिमनोहराकृतिरपि क्रूरजातिजा, (क) येनेयमसुरश्रीरिव सततनिन्दितसुरता [२] रमणीयाप्युद्वेजयतीति। एवमादि चिन्तयन्तमेव राजानमीषदवगलितकर्णपल्लवावतंसा प्रगल्भवनितेव कन्यका प्रणनाम। कृतप्रणामायाञ्च तस्यां, मणिकुट्टिमोपविष्टायां, स पुरुषस्तं विहङ्गमादाय पञ्जरगतमेव किञ्चिदुपसृत्य राज्ञे न्यवेदयदब्रवीच्च, देव! विदितसकलशास्त्रार्थो राजनीतिप्रयोगकुशलः, पुराणेतिहासकथालापनिपुणो, वेदिता गीतश्रुतीनां, काव्यनाटकाख्यानकप्रभृतीनामपरिमितानां सुभा-

---

(क) क्रूरजातितया इति पाठान्तरम्।

[१] अलकाः ललाटस्थचूर्णकुन्तलाः कुवेरपुरी चालका।

[२] सुरतं मैथुनव्यापारः, सुरता सुराणां समूहः।

षितानामध्येता, स्वयञ्च कर्त्ता, परिहासालापपेशलः, [१] वीणावेणुमुरजप्रभृतीनां वाद्यविशेषाणामसमः श्रोता, नृत्यप्रयोगदर्शननिपुणः, चित्रकर्मणि प्रवीणः, द्यूतव्यापारे प्रगल्भः, प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरः, गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः, सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः, सर्व्वरत्नानामुदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता तदयमात्मीयः (क) क्रियतामित्युक्त्वा नरपतेः पुरो निधाय पञ्जरमसावपससार।

अपसृते च तस्मिन् विहङ्गराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणमतिस्पष्टवर्णस्वर [२] संस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां पपाठ,—

स्तनयुगमश्रुस्नातं समीपतरवर्त्ति हृदयशोकाग्नेः।
चरति विमुक्ताहारं [३] व्रतमिव भवतो रिपुस्त्रीणाम्॥

राजा तु तां श्रुत्वा सञ्जातविस्मयः सहर्षमासन्नवर्त्तिनम्

(क) आत्मायत्तः इति पाठान्तरम्।

[१] पेशलः दक्षः।

[२] स्वरः उदात्तानुदात्तस्वरिताख्यः मधुरादिश्च।

[३] विगतो मुक्ताहारो यस्मात्, विमुक्तः त्यक्तः आहारो येन चेति।

अतिमहार्हासनोपविष्टम् (क) अमरगुरुमिवाशेषनीतिशास्त्र-पारगम् अतिवयसमग्रजन्मानमखिलमन्त्रिमण्डलप्रधानममात्यं कुमारपालितनामानमब्रवीत्, श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता। प्रथमं तावदिदमेव महत् (ख) आश्चर्यं, यदयमसङ्कीर्णवर्णप्रविभागामभिव्यक्त-मात्रानुस्वारस्वरसंयोग-विशेषसंयुक्तामतिपरिस्फुटाक्षरां गिरमुदीरयति। तत्र पुनरपरम् (ग) अभिमतविषये तिरश्चोऽपि मनुजस्येव संस्कारवती बुद्धिपूर्व्वा प्रवृत्तिः, तथाहि अनेन (घ) समुत्क्षिप्तदक्षिणचरणेनोच्चार्य्य जयशब्दमियमार्य्या मामुद्दिश्यातिपरिस्फुटाक्षरं गीता, प्रायेण हि पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्र (ङ) [१] वेदिनो भवन्ति, इदन्तु महच्चित्रम्। इत्युक्तवति भूभुजि कुमारपालितः किञ्चित् स्मितवदनो नृपमवादीत्, देव! किमत्र चित्रम्? एते हि शुकशारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतं वाच-

(क) महार्हहेमासनोपविष्टमिति पाठान्तरम्।

(ख) महत्तरम् इति पाठान्तरम्।

(ग) पुनर्यदियम् इति पाठान्तरम्।

(घ) एतेन इति पाठान्तरम्।

(ङ) निद्रामात्रवेदिन इति पाठान्तरम्।

[१] संज्ञा आहारादिदानायाज्ञानार्थं परिपोषकचेष्टाभेदः।

मुच्चारयन्तीत्यधिगतमेव देवेन, तत्राप्य (क) न्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम्। अन्यच्च एतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटा (ख) भिधाना वागासीत्, अग्निशापादपरिस्फुटालापता शुकानामुपजाता, करिणाञ्च (ग) जिह्वापरिवृत्तिः [१]। इत्येवमुच्चारयत्येव तस्मिन्नशिशिरकिरणमम्बरतलस्य मध्यमारूढ़मावेदयन् नाड़िकाच्छेद [२] प्रहतपटुपटहनादानुसारी मध्याह्नशङ्खध्वनिरुदतिष्ठत्। तमाकर्ण्य च समासन्नस्नानसमयो विसर्जितराजलोकः क्षितिपतिरास्थानमण्डपादुत्तस्थौ।

(क) तत्राप्यत्रान्यजन्मोपात्तेति पाठान्तरम्।

(ख) स्फुटाक्षरा इति पाठान्तरम्।

(ग) शारिकाणाञ्च इति पाठान्तरम्।

[१] जिह्वायाः परिवृत्तिः प्रतीपरूपतया उन्नताग्रतया स्थितिः। "अथ तान् द्विरदः कश्चित् सुरेन्द्रद्विरदोपमः। अश्वत्थस्थोऽग्निरित्येवमाह देवान् भृगूद्वह!। शशाप ज्वलनः सर्व्वान् द्विरदान् क्रोधमूर्च्छितः। प्रतीपा भवतां जिह्वा भवित्रीति भृगूद्वह!। आनुशासनिकपर्व्वणि ८५ अध्याये। तत्रैव स्थानान्तरे। अश्वत्थान्निःसृतश्चाग्निः शमीगर्भमुपाविशत्। शुकेन ख्यापितो विप्र! तं देवाः समुपाद्रवन्। शशाप शुकमग्निस्तु वाग्विहीनो भविष्यति जिह्वामावर्त्तयामासेति।

[२] नाड़िकायाः दण्डरूपकालभेदस्य च्छेदो विरतिः तत्र प्रहृतः।

अथ चलति महीपतावन्योन्यमतिरभससञ्चलनचालिताङ्गद[१]पत्रभङ्गमकरकोटिपाटितानेक(क)पटानाम् आक्षेपदोलायमानकण्ठदाम्नाम् अंसस्थलोल्लसितकुङ्कुमपटवास[२] धूलिपिञ्जरितदिशाम् आलोलमालती(ख)कुसुमशेखरोत्पतदलिकदम्बकानाम् अर्द्धावलम्बिभिः कर्णोत्पलैश्चुम्ब्यमानगण्डस्थलानां गमनप्रणाम (ग) लालसानामहमहमिकया [३] वक्षःस्थलप्रेङ्खोलित [४] हारलतानाम् उत्तिष्ठतामासीदतिमहान् सम्भ्रमो [५] महीपतीनाम्। इतश्चेतश्च निष्पतन्तीनां स्कन्धदेशावसक्तचामराणां चामरग्राहिणीनां कमलमधुपानमत्त(घ) जरत्कलहंसनादजर्ज्जरेण पदे पदे [६] रणितमणीनां मणिनूपुराणां निनादेन, वारविलासिनीजनस्य सञ्चरतो जघनस्थ-

---

(क) पाटितांशुकानामिति पाठान्तरम्।

(ख) आलोलकुसुमेति पाठान्तरम्।

(ग) प्रसरणसदेत्यधिकयुक्तं पाठान्तरम्।

(घ) पाननदमत्तेति पाठान्तरम्।

[१] अङ्गदं केयूरं पत्रभङ्गः पत्रखण्ड इव तस्य, मकरनामकर्णाभरणस्य च कोट्या अग्रेण पाटितः द्वैधीकृतः।

[२] पटवासः चूर्णीकृतगन्धद्रव्यविशेषः।

[३] परस्परस्याहङ्कारेण अहमेवाग्रे यास्यामीत्यन्योन्याभिमानेन

[४] प्रेङ्खोलिता दोलायमानतया चलिता।

[५] कार्य्यत्वराहेतुकः वेगविशेषः।

[६] पदे पदे प्रतिपादन्यासम्।

लास्फालनरक्षितरत्नमालिकानां मेखलानां मनोहारिणा झङ्कारेण, नूपुररवाकृष्टानाञ्च धवलितास्थानमण्डपसोपानफलकानां [१] भवनदीर्घिकाकलहंसकानां कोलाहलेन, रशनारशितोत्सुकानाञ्च [२] तारतरविराविणाकुलिख्यमानकांस्य (क)क्रेङ्कारदीर्घेण गृहसारसानां कूजितेन, सरभसप्रचलितसामन्त[३]शतचरणतलाभिहतस्य चास्थानमण्डपस्य निर्घातनिर्घोषगम्भीरेण कम्पयतेव वसुमतीं ध्वनिना, प्रतीहारिणाञ्च पुरःससम्भ्रमसमुत्सारितजानपदानां [४] दण्डिनां [५] समारब्धहेलमुच्चैरुच्चारयतामालोकयतालोकयतेति तारदीर्घेण भवनप्रासादकुञ्जेषूच्चरितप्रतिशब्दतया दीर्घतरतामुपगतेनालोकशब्देन, [६] राज्ञाञ्च ससम्भ्रमावर्ज्जितमौलिलोलचूड़ामणीनां

(क) काञ्ची इति पाठान्तरम्। तत्र काञ्चीक्रेङ्कारेण दीर्घः पक्षे क्रेङ्कारइव दीर्घः।

[१] सोपानानि फलकानीव दीर्घायामवत्त्वात्।

[२] रशनायाः स्त्रीकटीमेखलायाः रशिते शब्दभेदे उत्सुकानाम् उत्कण्ठितानाम्।

[३] सामन्ताः अधीनन्टपभेदाः।

[४] जनपदेभ्यः आगताः तत आगत इत्यण्। ते च राजदिदृक्षया कार्य्यान्तरोद्देशेन वा आगताः।

[५] दण्डिनां दण्डधारिणाम् अनुचरविशेषाणाम्।

[६] आलोकयतेति वक्तव्ये व्यग्रतया आलोकेति भागस्य स्पष्ट-

प्रणमताममलमणिशलाकादन्तुराभिः [१] किरीटकोटिभिरुल्लिख्यमानस्य मणिकुट्टिमस्य निस्वनेन, प्रणामपर्य्यस्तानामतिकठिनमणिकुट्टिमनिपतितरणरणा[२]यितानाञ्च मणिकर्णपूराणां निनादेन, मङ्गलपाठकानाञ्च पुरोयायिनाञ्च जय जीवेति (क) मङ्गलमधुरवचनानुपा(याते)तेन पठतां दिगन्तव्यापिना कलकलेन, प्रचलितजनचरणशतसङ्क्षोभभयादपहाय कुसुमप्रकरमुत्पतताञ्च मधुलिहां हुङ्कृतेन, सङ्क्षोभादतित्वरितपदं प्रवृत्तैः (ख) अवनिपतिभिः केयूरकोटिताड़ितानां क्वणितमुखररत्नदाम्नाञ्च मणिस्तम्भानां रणितेन, सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।

अथ विसर्जितराजलोको विश्रम्यतामिति स्वयमेवाभिधाय तां चण्डालकन्यकां, वैशम्पायनः प्रवेश्यतामभ्यन्तरमिति (ग)

(क) जय जयेति इति पाठान्तरम्।

(ख) प्रस्तैः इति पाठान्तरम्।

(ग) स्नानपानाशनादिना च सुखिनमेनं कारयेत्यधिकः पाठः। तयोश्चारणं तच्छब्दस्याव्यक्ततयोच्चारणं कृतमिति न तद्भागस्य प्रतिशब्द इत्येव द्योतयितुम् आलोकशब्देनेवेत्युक्तम्।

[१] दन्तुरा उन्नतदन्ताइव विषमाः।

[२] मणिकुट्टिमे निपतिताः अतएव रणरणायिताः रणः शब्दः आभीक्ष्ण्ये द्वित्वम् अतिशयशब्दायमानाः तेषाम्।

ताम्बूलकरङ्क(ण्ड) वाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत्। अपनीताशेषभूषणश्च दिवसकर इव विगलितकिरणजालः [१] चन्द्रतारकासमूहशून्य इव गगनाभोगः, समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत्। (क) तस्याञ्च समानवयोभिः सह राजपुत्रैः कृतमधुर व्यायामः, श्रमवशादुन्मिषन्तीभिः कपोलयोरीषदवगलितसितसिन्धुवार[२] कुसुममञ्जरीविभ्रमाभिः उरसि निर्दयरतिश्रमच्छिन्नहारविगलितमुक्ताफलप्रकरानुकारिणीभिः ललाटपट्टकेऽष्टमीचन्द्रशकलतलोल्लसदमृतबिन्दुविडम्बिनीभिः स्वेदजलकणिकासन्ततिभिरलंक्रियमाणमूर्त्तिः, इतस्ततः स्नानोपकरणसम्पादनसत्वरेण पुरःप्रधा "विना" (वता) परिजनेन तत्कालं विरल(जने)तरेऽपि राजकुले समुत्सारणाधिकारमुचितमाचरद्भिर्दण्डिभिरुपदिश्यमानमार्गः, विततसितवितानाम् अनेकचारण[३]गणाबध्यमानमण्डलां गन्धो [४]दकपूर्णकनकमय-

---

(क) स इत्यधिकः क्वचित् पाठः।

[१] सन्ध्यायामिति शेषः तत्रैव सूर्य्यस्य तथात्वसम्भवात्।

[२] सिन्धुवारं पुष्पभेदः तस्यैव मुक्ताफलतुल्यत्वात्तथोक्तिः।

[३] चारणाः अनुचराः।

[४] गन्धद्रव्यमिश्रितमुदकं गन्धोदकम् द्रोणी जलाधारपात्रभेदः [गामला] "द्रोणी काष्ठाम्बुवाहिन्यां गवाघासभुजिस्थितौ" इत्युक्तः। जलद्रोणीति पाठे जलपूर्णा द्रोणी जलद्रोणी।

(जल अ०) द्रोणीसनाथमध्याम् उपस्थापितस्फाटिकस्नानपीठाम् एकान्तनिहितैः अतिसुरभिगन्धसलिलपूर्णैः परिमलावकृष्टमधुकरकुलान्धकारितमुखैः आतपभयान्नीलकर्प[१]टावगुण्ठितमुखैरिव स्नानकलसैरुपशोभितां स्नानभूमिमगच्छत्। अवतीर्णस्य जलद्रोणीं वारविलासिनीकरम्रदितसुगन्धामलकोपलिप्तशिरसो राज्ञः समन्तात् समुपतस्थुरंशुक(निविड़ अ०) विनिबद्धस्तनपरिकराः, दूरसमुत्सारितवलयबाहुलताः, समुत्क्षिप्तचरणाभरणाः, कर्णोत्सङ्गोत्सारितालकाः, [२] गृहीतजलकलसाः, स्नानार्थमभिषेकदेवता इव वारयोषितः [३]। ताभिश्च समुन्नतकुचकुम्भमण्डलाभिर्वारिमध्यप्रविष्टः करिणीभिरिव वनकरी परिवृतस्तत्क्षणं रराज राजा। द्रोणीसलिलादुत्थाय च स्नानपीठममलस्फटिकधवलं वरुणइव राजहंसमारुरोह। ततस्ताः काश्चित् मरकतकलसप्रभाश्यामायमाना नलिन्यइव मूर्त्तिमत्यः पत्रपुटैः, काश्चिद्रजतकलसहस्ता रजन्यइव पूर्णचन्द्रमण्डलविनिर्गतेन ज्योत्स्नाप्रवाहेण, काश्चित् कलसोत्क्षेपश्रमस्वेदार्द्रशरीरा जलदेवता इव स्फाटिकैः कलसैस्तीर्थजलेन, काश्चित् मलयसरितइव चन्दनरसमिश्रेण

---

[१] नीलकर्पटं नीलवस्त्रम्।

[२] कर्णोत्सङ्गे कर्णोपरि उत्सारितालका विन्यस्तालकाः।

[३] समन्तात् समुपतस्थुर्वारयोषित इत्यन्वयः।

सलिलेन, काश्चिदुत्क्षिप्तकलसपार्श्वविन्यस्तहस्तपल्लवाः प्रकी-र्य्यमाणनखमयूखजालकाः प्रत्यङ्गुलिविवरविनिर्गतजलधाराः सलिलयन्त्रदेवता इव, काश्चित् जाड्यमपनेतुमाक्षिप्तबाला-तपेनेव दिवसश्रिय इव कनककलसहस्ताः कुङ्कुमजलेन, वाराङ्गनाः क्रमेण राजानमभिषिषिचुः। अनन्तरमुदपादि च स्फोटयन्निव श्रुतिपथमनेकप्रहतपटुपटहझल्लरीमृदङ्गवेणुवीणा-गीतनिनादानुगम्यमानो वन्दिवृन्दकोलाहला(हलो)कुलो भुवन-विवरव्यापी स्नानशङ्खानामापूर्य्यमाणानां मुखरो ध्वनिः।

एवञ्च क्रमेण निर्वर्त्तिताभिषेको विषधरनिर्मोक[१] परिलघुनी धवले परिधाय धौते वाससी शरदम्बरैकदेशइव जलाक्षालनविमलतनुरतिधवलजलधरच्छेदशुचिना दुकूलपट-पल्लवेन तुहिनगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः सम्पादितपितृजलक्रियो [२] मन्त्रपूतेन तोयाञ्जलिना दिवस-करमभिप्रणम्य देवगृहमगमत्। उपरचितपशुपतिपूजनश्च नि-ष्क्रम्य देवगृहात् निर्वर्त्तिताग्निकार्य्यो विलेपनभूमौ झङ्का-रिभिरलिकदम्बकैरनुबध्यमानपरिमलेन मृगमदकर्पूरकुङ्कुम-वाससुरभिणा [३] चन्दनेनानुलिप्तसर्व्वाङ्गो विरचितामोदि-

---

[१] समौ कञ्चुकनिर्मोकावित्यमरः [खोलस]

[२] जलैः क्रिया जलक्रिया सा च प्रकृते तर्पणम्।

[३] मृगनाभिजातत्वात् मृगनाभिर्मृगमदः तत्प्रभृतीनां वासेन तत्संसर्गजगन्धेन सुरभिणा कृतसौगन्ध्येन।

मालतीकुसुमशेखरः कृताम्बरपरीवर्त्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः [१] सह भूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपो निर्व्वर्त्तयामास।

परिपीतधूप (धूम) वर्त्तिरुपस्पृश्य च गृहीतताम्बूल[२]स्तस्मात् प्रमृष्टमणिकुट्टिमप्रदेशादुत्थाय नातिदूरवर्त्तिन्या ससम्भ्रमप्रधावितया प्रतीहार्य्या प्रसारितं बाहुमवलम्ब्यानवरतवेत्रलताग्रहणप्रसङ्गादतिजरठ[३]किसलयानुकारि करतलं करेण अभ्यन्तरसञ्चारसमुचितेन परिजनेनानुगम्यमानो धवलांशुकजवनिका[४]परिगतपर्य्यन्ततया स्फटिकमणिमयभित्तिबद्धमिवोपलक्ष्यमाणम् अतिसुरभिणा, मृगनाभिपरिमलेनामोदिना चन्दनवारिणा सिक्तशिशिरमणिभूमिम्, अविरलविप्रकीर्णेन [५] विमलमणिकुट्टिमं, गगनतलं तारागणेनेव

---

[१] समुचितं समं तुल्यमुचितं भोजनं येषां समशब्दस्य पृषोदरादित्वात् अन्तलोपः।

[२] उपस्पृश्य आचम्य गृहीतताम्बूलः परिपीतधूपवर्त्तिः परिपीता सुगन्धिताम्रकूटादिधूमवर्त्तिः। [चुरट्] येन इति अर्थक्रमेणैवान्वयः। धूमवर्त्तिरिति पाठान्तरे सुगमम्।

[३] अतिजरठः कठिनः किसलयः पल्लवमात्रं तदनुकारि तत्समम्।

[४] धवलांशुकजवनिका शुभ्रवस्त्रनिर्मिता तिरस्करिणी [परदा]।

[५] परिमलः विमर्दोत्थितः गन्धः तेनामोदिनातिदूरगगन्धेन।

कुसुमोपहारेण निरन्तरनिचितम्, उत्कीर्णशालभञ्जिका[१] निवहेन सन्निहितगृहदैवतेनेव गन्धसलिलक्षालितेन कलधौतमयेन स्तम्भसञ्चयेन विराजमानम्, अतिबहलागुरुधूपपरिमलम् अखिलविगलित (क) जलनिवहधवलजलधरशकलानुकारिणा कुसुमामोदवासितप्रच्छदपटेन, पट्टोपधाना [२] ध्यासितशिरोभागेण, मणिमयप्रतिपादुका [३] प्रतिष्ठितपादेन, पार्श्वस्थरत्न(मय)पीठेन, तुहिनगिरिशिलातलसदृशेन, शयनेन सनाथीकृतवेदिकं, भुक्तास्थानमण्डप [४]मयासीत्। तत्र च शयनतलनिषण्णः क्षितितलोपविष्टया शनैःशनैरुत्सङ्गनिहितासिलतया खड्गवाहिन्या नवनलिनदलकोमलेन करसम्पुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन् मुहूर्त्तमिवासाञ्चक्रे। ततोनातिदूरवर्त्तिनीम् "अन्तःपुराद्वैशम्पायनमादयागच्छेति" समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश। सा क्षितितलनिहतजानुकरतला "यथाज्ञापयति देव इति" शिरसि कृत्वाज्ञां यथादिष्टमकरोत्।

(क) अखिलविगलितेत्यत्र परिगलितेति पाठान्तरम्।

[१] शालभञ्जिका कृत्रिमपुत्तलिका।

[२]उपधानं शिरःस्थापनद्रव्यभेदः [वालिश]।

[३] प्रतिरूपा पादुकायाः पादुकाकृतिपदार्थभेदः।

[४] आस्थानमण्डपस्य विशेषणानि उपलक्ष्यमाणादीनि।

अथ मुहूर्त्तादेव वैशम्पायनः प्रतीहार्य्या गृहीतपञ्जरः कनकवेत्रलतावलम्बिना किञ्चिदवनतपूर्वकायेन सितकञ्चुकाच्छन्नवपुषा जराधवलितमौलिना गद्गदस्वरेण मन्दमन्दसञ्चारिणा विहङ्गजातिप्रीत्या जरत्कलहंसेनेव कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम। क्षितितलविहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत् देव! देव्यो विज्ञापयन्ति "देवादेशादेष वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्य्या नीतः" [१] इत्यभिधाय गते च तस्मिन् राजा वैशम्पायनमपृच्छत् "कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किञ्चिदशनजातमिति" स प्रत्युवाच देव! किं वा नास्वादितम् आमत्तकोकिललोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः हरिनखरभिन्नमत्तमातङ्गकुम्भमुक्तरक्तार्द्रमुक्ताफलत्वींषि खण्डितानि दाड़िमीबीजानि नलिनीदलहरिन्ति द्राक्षाफलस्वादूनि च दलितानि स्वेच्छया प्राचीनामलकीफलानि, किं वा प्रलपितेन बहुना सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायत इति। एवंवादिनोवचनमाक्षिप्य नरपतिरब्रवीत् आस्तां तावत् सर्वमेवेदम् अपनयतु नः कुतुहलम्, आवेदयतु भवानादितः प्रभृति कात्स्न्येनात्मनो जन्म, कस्मिन्? देशे, भवान्, कथं?

---

[१] नीतः नीयते वर्त्तमानसामीप्ये भूते क्तः।

जातः। केन? वा नाम कृतं का? माता क? स्ते पिता कथं? वेदानामागमः कथं? शास्त्राणां परिचयः कुतः? कलाः समासादिताः किं? जन्मान्तरानुस्मरणम् उत वरप्रदानम् अथ वा विहगवेशधारी कश्चिच्छन्नो निवससि,? क? पूर्वमुषितं, कियद्वा वयः? कथं? पञ्जरबन्धः कथं? चण्डालहस्तगमनम् इह वा कथमागमनमिति।

वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्त्तमिव ध्यात्वा सादरमब्रवीत्, देव! महतीयं कथा यदि कौतुकमाकर्णताम्।

अस्ति पूर्वापरजलनिधिवेलावलग्ना, मध्यदेशालङ्कारभूता, मेखलेव भुवः वनकरिकुलमदजलसेकसंवर्द्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता, मदकलकुररकुलदश्यमानमरिचपल्लवा, करिकलभ [१] करम्रदिततमालकिशलयामोदिनी, मधुमदोपरक्तकेरली [२] कपोलकोमलच्छविना सञ्चरद्वनदेवताचरणालक्तकरसरञ्जितेनेव पल्लवचयेन संछादिता, शुककुलदलितदाड़िमीफलद्रवार्द्रीकृततलैः अतिचपलकपिकुल-

---

[१] करिणः कलभः शावकः तस्य करेण शुण्डया म्रदितं यत्तमालकिशलयं तेन पत्रभङ्गवशात् निर्यासच्युत्या आमोदवत्त्वम्।

[२] केरली केरलदेशीया स्त्री।

कम्पितकम्पिल्ल [१] च्युतपल्लवफलशबलैः अनवरतनिपतित-कुसुमरेणुपांशुलैः पथिकजनरचितलवङ्गपल्लवसंस्तरैः [२] अतिकठोर[३]नारिकेल (क) केतकीपरिगतप्रान्तैः ताम्बूलीलता-वनद्धपूगषण्ड[४]मण्डितैः वनलक्ष्मीवासभवनैरिव विराजिता, लतामण्डपैः, उन्मदमातङ्गकपोलस्थलप्रस्रवणसलिलसिक्ते-नेव निरन्तरमेलालतावनेन मदगन्धिनान्धकारिता, नखमुख-लग्नेभकुम्भमुक्ताफललुब्धैः शबरसेनापतिभिरभिहन्यमानकेश-रिशता, प्रेताधिपनगरीव सदासन्निहितमृत्युभीषणा महि-षाधिष्ठिता च [५] समरोद्यतपताकिनीव बाणासनारोपित-शिलीमुखा विविक्तसिंहनादा [६] च कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालङ्कृता [७] च कर्णीसुत-

[क] नारिकेलेत्यत्र करिकेशरेति पाठे करिकेशरम् नागकेशरम् ।

[१] कम्पिल्लः करञ्जभेदः ।

[२] संस्तरः शय्या ।

[३] अतिकठोरा अतिवृद्धाः ।

[४] पूगषण्डः पूगसमूहः समूहे षण्डच् प्रत्ययः ।

[५] मृत्युः मृत्युसाधनञ्च । महिषः पशुभेदः यमवाहनञ्च ।

[६] बाणासनः, चापः, बाणः, नीलझिण्टी, असनः पीतशालः, [पियाशाल] च । शिलीमुखः बाणः भ्रमरश्च सिंहस्य नादः सिंहस्येव नादः वीरध्वनिश्च ।

[७] खड्गः अस्त्रभेदः गण्डकपशुश्च । रक्तचन्दनं तत्काष्ठरस-जानुलेपनं तद्वृक्षश्च ।

कथेव सन्निहितविपुलाचला शशोपगता [१]च, कल्पान्तप्रदोषसन्ध्येव प्रनृत्यन्नीलकण्ठा पल्लवारुणा [२] च अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता [३] च प्रावृड़िव घनश्यामला अनेकशतह्रदालङ्कृता [४] च चन्द्रमूर्त्तिरिव सततमृक्षसार्थानुगता [५] हरिणाध्यासिता च राज्यस्थितिरिव चमरमृगबालव्यजनोपशोभिता [६] समदगजघटापरिपालिता च गिरितनयेव स्थाणुसङ्गता [७] मृग-

[१] "कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः।
तस्य ख्यातौ सखायौ द्वौ विपुलाचलसंज्ञितौ। शशश्च मन्त्रिप्रवर इति,, वृहत्कथायां कर्णीसुतकथास्ति सेव। सन्निहितः निवेशितः निकटवर्त्ती च, विपुलाऽचलश्च [तन्नामा तस्य सखा] विपुलः पृथुलः अचलः पर्वतश्च यस्याम् शशेन तन्नाम्ना मन्त्रिवरेण पशुभेदेन च उपगता।

[२] नीलकण्ठः रुद्रः मयूरश्च। पल्लवइवारुणा पल्लवैररुणा च।

[३] श्रीर्लक्ष्मीर्द्रुमाः पारिजातादयश्च श्रीद्रुमाः विल्ववृक्षाश्च। वारुणी सुरा वरुणस्वामिका पश्चिमदिक् च।

[४] घनो मेघो निविड़श्च घनइव श्यामला घनं श्यामला च। शतह्रदा विद्युत् शतं ह्रदाः अगाधजलाशयाश्च।

[५] ऋक्षा नक्षत्राणि भल्लूकाश्च।

[६] चमराख्यो मृगः तस्य बालरूपं केशरूपं यद् व्यजनं तेन, चमरैः मृगबालैः व्यजनैस्तालवृन्तैश्च उपशोभिता।

[७] स्थाणुः शिवः शाखादिशून्यवृक्षश्च।

पतिसेविता च जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता [१] च कामिनीव चन्दनमृगमदपरिमलवाहिनी रुचिरागुरु-तिलकभूषिता च [२] सोत्कण्ठेव विविधपल्लवानिलवीजिता समदना [३] च बालग्रीवेव व्याघ्रनखपङ्क्तिमण्डिता गण्ड-काभरणा च [४] पानभूमिरिव प्रकटितमधुकोशशता [५] प्रकीर्णविविधकुसुमा च क्वचित्प्रलयवेलेव महावराहदंष्ट्रा-समुत्खातधरणिमण्डला क्वचिद्दशमुखनगरीव चटुलवानर-वृन्दभज्यमानतुङ्गशालाकुला [६] क्वचिदचिरनिर्वृत्तविवाह भूमिरिव हरितकुशसमित्कुसुमशमीपलाशशोभिता क्वचि-दुन्मत्तमृगपतिनादभीतेव कण्टकिता क्वचिन्मत्तेव कोकिल-कुलप्रलापिनी, क्वचिदुन्मत्तेव वायुवेगकृततालशब्दा, [७]

---

[१] कुशीलवस्च, कुशानां लवस्च परिगृहीता हृता आयत्ती-कृता च।

[२] अगुरुर्नाम वृक्षः। तिलकवृक्षः, पक्षे रुचिरम् अगुरु यत्र तादृशं तिलकस्च।

[३] मदनः [मयना] वृक्षभेदः कामस्च।

[४] बालग्रीवायां दैवोपद्रवनाशार्थं व्याघ्रनखपङ्क्तिर्बध्यते इति लोकाचारः। गण्डकः कण्ठभूषणभेदः पशुभेदस्च।

[५] मधु मद्यं पुष्परसस्च। कोशः मध्वाधारपात्रं पुष्पपुटस्च।

[६] तुङ्गमग्रम् शाला गृहं शालः वृक्षस्च।

[७] तालोवृक्षः करतलास्फालनजातस्च डलयोरैक्यात् तार-उस्च।

क्वचिद्विधवेव उन्मुक्ततालपत्रा, [१] क्वचित् समरभूमिरिव शरशतनिचिता, [२] क्वचिदमरपतितनुरिव नेत्रसहस्रसङ्कुला, [३] क्वचिन्नारायणमूर्त्तिरिव तमालनीला, [४] क्वचित् पार्थरथपताकेव वानराक्रान्ता, [५] क्वचिदवनिपतिद्वारभूमिरिव वेत्रलताशतदुष्प्रवेशा, [६] क्वचिद्विराटनगरीव कीचकावृता, [७] क्वचिदम्बरश्रीरिव व्याधानुगम्यमानतरलतारकमृगा, [८] क्वचित् गृहीतव्रतेव दर्भचीरजटावल्कलधारिणी, अपरि-

---

[१] तालानां पत्रं तालपत्रं कर्णाभरणञ्च।

[२] शरः तृणभेदः वाणश्च।

[३] "नेत्रं मन्थगुणे वस्त्रे तरुमूले विलोचने इत्युक्तेर्लोचनं वृक्षमूलञ्च।

[४] तमालेन नीला तमाल इव नीला च।

[५] विजयस्य रथस्थश्च नादान् मोक्ष्यामि दारुणान्। शत्रूणां ये प्राणहराः सुखं येन हनिष्यथ॥ इति वनपर्वणि १५१ अध्याये भीमं प्रति हनूमद्वरदानम्।

[६]वेत्रलता वेत्ररूपा लता वेत्रयष्टिश्च।

[७] कीचकः विराटनृपतिश्यालकः वायुपूरितरन्ध्रतया स्वयं शब्दायमानः वंशविशेषश्च।

[८] व्याधः मृगयुः, तदाकारवाणधारी मृगशिरानक्षत्रस्थः असुरविशेषश्च। तरला तारका अक्षिपुत्तलिका यस्याम् तरलं सर्वदा गतिमत्त्वात् चपलं तारकम् नक्षत्रं मृगो हरिणः मृगशीर्षाख्य नक्षत्रञ्च यस्याम्।

मितबहुलपत्रसञ्चयापि सप्तपर्णभूषिता [१] क्रूरसत्वापि मुनिजनसेविता पुष्पवत्यपि [२] पवित्रा विन्ध्याटवी [३] नाम।

तस्याञ्च दण्डकारण्यान्तःपाति सकलभुवनख्यातम् उत्पत्तिक्षेत्रमिव भगवतोधर्मस्य सुरपतिप्रार्थनानिपीतसकलसागरसलिलस्य [४] मेरु (क) मत्सरादम्बरतलप्रसारितविकटशिरःसहस्रेण [५] दिवसकररथगमनपथमपनेतुमभ्युद्यतेनावग-

(क) मेरुशिखरेति वा पाठः।

[१] सप्तपर्णैन [छातिम] वृक्षभेदेन, सप्तभिः पत्रैश्च।

[२] पुष्पं कुसुमं स्त्रीरजश्च तेनापवित्रत्वेऽपि पवित्रतेति चित्रम्।

[३] विन्ध्यस्य समीपस्था अटवी महारण्यं तन्नाम्ना प्रसिद्धा।

[४] एवं त्वयेच्छाम कृतं हि कर्म महार्णवं पीयमानं महात्मन्! ततो बधिष्याम सहानुबन्धान् कालेयसंज्ञान् सुरविद्विषस्तान् इति शक्रादिनोदितोऽगस्त्यः। अहं लोकहितार्थं वै पिबामि वरुणालयम्। भवद्भिर्यदनुष्ठेयम् तच्छीघ्रं संविधीयताम्। एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः। समुद्रमपिबत् क्रुद्धः सर्वलोकस्य पश्यत इति। भारते वनपर्वणि १०४ अध्याये।

[५] अद्रिराजं महाशैलं मेरुं कनकपर्वतम्। उदयास्तमने भानुः प्रदक्षिणमवर्त्तत। तन्तु दृष्ट्वा तथा विन्ध्यः शैलः सूर्य्यमथाब्रवीत्। यथा हि मेरुर्भवता नित्यशः परिगम्यते। प्रदक्षिणश्च क्रियते मामेवं कुरु भास्कर!। इत्युपक्रम्य। एवमुक्तस्ततः क्रोधात् प्रवृद्धः सहसाचलः। सूर्य्याचन्द्रमसोर्मार्गं रोद्धुमिच्छन् परन्तप!। इत्यभिधायो-

णितसकलसुरसमूहवचसा विन्ध्यगिरिणाप्यनुल्लङ्घिताज्ञस्य जठरानलजीर्णवातापिदानवस्य [१] सुरासुर (क) मुकुटतटघट्टितमरकतमयपत्रभङ्गकोटिचुम्बितचरणरजसो दक्षिणाशावधूमुखविशेषकस्य [२] सुरलोकादेकहुङ्कारनिपातित [ख]

(क) सुरासुरमुकुटमकरकोटिचुम्बितचरणरजस इति वा पाठः।

(ख) निपतितेति वा पाठः।

त्तं किञ्चिदतीत्य। "अथाभिजग्मुर्मुनिमाश्रमस्थं तपस्विनं धर्म्मभृतां वरिष्ठम्। अगस्त्यमत्यद्भुतवीर्य्यवन्तं तच्चार्थमूचुः सहिताः सुरास्ते।" एवं सुरप्रेरितोऽगस्त्यः। "तच्छ्रुत्वा वचनं विप्रः सुराणां शैलमभ्यगात्। सोऽभिगम्याब्रवीत् विन्ध्यं सदारः समुपस्थितम्। मार्गमिच्छाम्यहं दत्तं भवता पर्वतोत्तम!। दक्षिणामभिगन्तास्मि दिशं कार्य्येण केनचित्। यावदागमनं मह्यं तावत्त्वं प्रतिपालय। निवृत्ते मयि शैलेन्द्र! ततो वर्द्धस्व कामतः। एवं स समयं कृत्वा विन्ध्येनामित्रकर्षण!। अद्यापि दक्षिणाद्देशाद्वारुणिर्न निवर्त्तते।" भारते वनपर्वणि १०४ अध्याये।

[१] "तेषां ततोऽसुरश्रेष्ठस्त्वातिथ्यमकरोत्तदा। सुसंस्कृतेन कौरव्य! भ्रात्रा वातापिना तथा। इत्युपक्रम्य। अगस्त्य एव कृत्स्नन्तु वातापिं बुभुजे ततः। भुक्तवत्यसुरो ह्वानमकरोत्तस्य चेल्वलः। वातापे! निष्क्रमस्वेति पुनः पुनरुवाच ह। तं प्रहस्याब्रवीद्राजन्नगस्त्यो मुनिसत्तमः। कुतो निष्क्रमितुं शक्तो मया जीर्णस्तु सोऽसुरः इति" भारते वनपर्वणि ९९ अध्याये।

[२] विशेषकं तिलकम्।

नहुषप्रकटप्रभावस्य [१] भगवतो महामुनेरगस्त्यस्य भार्य्यया लोपामुद्रया (क) स्वयमुपरचितालवालकैः करपुटसलिलसेकसंवर्द्धितैः सुतनिर्विशेषैरुपशोभितं, पादपैः, तत्पुत्रेण च गृहीतव्रतेनाषाढ़िना [२] पवित्रभस्मविरचितत्रिपुण्ड्काभरणेन कुशचीर (ख) वाससा मौञ्जमेखला [३] कलितमध्येन गृहीतहरितपर्णपुटेन प्रत्युटजमटता भिक्षां दृढ़दस्युनाम्ना [४] पवित्रीकृतम्, दिशि दिशि शुकहरितैश्च कदलीवनैः श्यामलीकृतपरिसरं, सरिता च कलसयोनिपरिपीतसागरमार्गानुगतयेव

(क) लोपामुद्रया चेति वा पाठः।

(ख) कुशचीरवल्कलेति वा पाठः।

[१] "स महर्षियुक्तं वाहनमधिरूढ़ः शचीसमीपमुपागच्छत् अथ मैत्रावरुणिः कुम्भयोनिरगस्त्य ऋषिवरो महर्षीन् धिक्क्रियमाणांस्तान् नहुषेणापश्यत् पद्भ्याञ्च तमस्पृशत् ततः स नहुषमब्रवीत् अकार्य्यप्रवृत्त ! पाप ! पतस्व महीं सर्पो भवेति" महाभारते शान्तिपर्व्वणि ३४४ अध्यायस्थगद्यम्।

[२] आषाढ़ः पलाशदण्डस्तद्वता॥

[३] मुञ्जः शराकृतिस्तृणभेदस्तेन निर्मिता मौञ्जी, मेखला कटिवल्कलबन्धनार्थं चिराकृत्तसूत्रभेदः।

[४] [अतिप्रभूतेध्माहरणात् यस्येध्मवाह इति पिता द्वितीयं नाम चकार।] क्वचिदित्यधिकः पाठः।

बद्धवेणिकया [१] कावेर्य्या (क) परिगतम्, आश्रमपदमासीत्।

यत्र च [२] दशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मीविभ्रमविरामो रामोमहामुनिमगस्त्यमनुचरन् सह सीतया लक्ष्मणोपरचितरुचिरपर्णशालः पञ्चवट्यां कञ्चित्कालं सुखमुवास। चिरशून्येऽद्यापि यत्र शाखानिलीननिभृतपाण्डुकपोतपङ्क्तयः लग्नतापसाग्निहोत्रधूमराजय इव लक्ष्यन्ते तरवः। वलिकर्म्मकुसुमान्युद्धरन्त्याः सीतायाः करतलादिव संक्रान्तोयत्र रागः स्फुरति लताकिसलयेषु। यत्र च पीतोद्गीर्णं जलनिधिजलमिव मुनिना निखिलमाश्रमोपान्तवर्त्तिषु विभक्तं महाह्रदेषु। यत्र दशरथसुतनिशितशरनिकरनिपातनिहतरजनीचर-[३] बलबहुलरुधिरसिक्तमूलम्, अद्यापि

(क) गोदावर्य्यां इति पाठान्तरम्।

[१] वेणी स्त्रीणां केशविन्यासभेदः जलप्रवाहस्च मृतपतिकया हि स्त्रिया वेण्याः सर्वदा बन्धनात् कावेर्य्या अपि तथाचरितमित्युत्प्रेक्षा।

[२] यत्रेति सामीप्ये सप्तमी "इतो द्वियोजने तात! बहुमूलफलोदकः। देशो बहुमृगः श्रीमान् पञ्चवट्याभिविश्रुतः। तत्र गत्वाश्रमपदं कृत्वा सौमित्रिणा सह। रमस्व त्वमिति" रामायणे आरण्यकाण्डे १३ सर्गे रामं प्रति अगस्त्योपदेशात् तदाश्रमात् द्वियोजनान्तरित एव पञ्चबटीयुक्तदेश इत्यवगम्यते।

[३] "अर्द्धाधिकमुहूर्त्तेन रामेण निशितैः शरैः। चतुर्दश

तद्रागानुविद्धनिर्गतपलाशमिवाभाति नवकिसलयमरण्यम्। अधुनापि यत्र जलधरसमये गम्भीरमभिनवजलधरनिनादमाकर्ण्य भगवतोरामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य [१] स्मरन्तो न गृह्णन्ति शष्पकवलमजस्रमश्रुजलक्षुलितदीनदृष्टयोवीक्ष्य शून्याः [२] दश दिशो जराजर्ज्जरितविषाणकोटयो जानकीसंवर्द्धिता जीर्णमृगाः [३]। यस्मिन्ननवरतमृगया निहतनिःशेषवनहरिणप्रोत्साहितइव कृतसीताविप्रलम्भः, [४] कनकमृगो राघवमतिदूरं जहार। यत्र च मैथिलीवियोगदुःखदुःखितौ दशवदनविनाशपिशुनौ चन्द्रसूर्य्याविव कबन्धग्रस्तौ [५]

सहस्राणि रक्षसां कामरूपिणाम्। खरदूषणमुख्यानां निहतानि महामृधे" इति रामायणे अरण्यकाण्डे ३१ सर्गे।

[१] चापघोषस्येति कर्मणः शेषत्वविवक्षायां षष्ठी।

[२] शून्याः रामशून्याः।

[३] मृगाणां रामराज्यावधि शूद्रकराज्यकालपर्य्यन्तस्थायित्वाभावेऽपि तेषां जानक्या वर्द्धितत्वेन तत्सम्भव इत्यगत्यावसेयम्।

[४] विप्रलम्भः प्रतारणम्।

[५] कबन्धः तन्नामा दानवभेदः मूर्द्धशून्यराहुग्रहश्च। कबन्धमुपक्रम्य, "स महाबाहुरत्यर्थं प्रसार्य्य विपुलौ भुजौ। जग्राह सहितावेव राघवौ पीड़यन् बलादिति" रामायणे आरण्यकाण्डे ६९ अध्याये। अमावास्यासन्धौ हि सूर्य्याचन्द्रमसोरेकराशयवस्थितिः तदा च तयोः क्रान्तिसाम्ये द्वयोरपि कदाचित् ग्रासो भवति स च लोकानिष्टसूचक इति ज्योतिषप्रसिद्धम्।

समं रामलक्ष्मणौ त्रिभुवनभयं (क) महच्चक्रतुः। अत्यायतश्च यस्मिन् दशरथसुतशरनिपातितो योजनवाहोर्वाहुः [१] अगस्त्यप्रसादनागतनहुषाजगरकायशङ्कामकरोदृषिजनस्य। जनकतनया च भर्त्रा विरहविनोदनार्थमुटजाभ्यन्तरलिखिता यत्र रामनिवासदर्शनोत्सुका पुनरिव धरणीतलादुल्लसन्ती [२] वनचरैरद्याप्यालोक्यते।

तस्य चैवंविधस्य सम्प्रत्यपि प्रकटोपलक्ष्यमाणपूर्ववृत्तान्तस्यागस्त्याश्रमस्य नातिदूरे जलनिधिपानकुपितवरुणोत्साहितेनागस्त्यमत्सरात्तदाश्रमसमीपवर्त्ती अपरइव वेधसा महाजलनिधिरुत्पादितः, प्रलयकालविघटिताष्टदिग्भागसन्धिबन्धं गगनतलमिव भुवि निपतितम्, आदिवराहसमुद्धृतधरामण्डल-

(क) अतिमहत् इति पाठान्तरम्।

[१] कबन्धस्य योजनमितबाहुत्वात् योजनबाहुः "घोरौ भुजौ विकुर्वाणमभौ योजनमायतौ इति रामायणे आरण्यककाण्डे ६९ अध्याये स हि स्थूलशिरसा मुनिनाभिशप्तः इन्द्रेण सक्नी भक्का शरीरमध्ये प्रवेशितशिरस्कतया कबन्धरूपतां प्रापित इति आरण्यकाण्डे ७१ अध्याये रामायणस्था कथानुसन्धेया।

[२] आविर्भवन्तीव "अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः। क्षेत्रं शोधयता लब्धा कन्या सीतेति विश्रुता। भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजेति" रामायणे बालकाण्डे ६६ सर्गे।

स्थानमिव [१] सलिलपूरितम्, अनवरतमज्जदुन्मदशवरकामिनीकुचकलसलुलितजलम्, उत्फुल्लकुमुदकुवलयकह्लारम्, उन्निद्रारविन्दमधुविन्दुनिष्पन्दबद्धचन्द्रकम्, [२] अलिकुलपटलान्धकारितसौगन्धिकम्, [३] आरसितमदसारसम्, अम्बुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाहलम्, अनेकजलचरपतङ्गशतसञ्चलनचञ्चलितवाचालवीचिमालम्, [४] अनिलोल्लासितकल्लोलशिशिरशीकरारब्धदुर्द्दिनम्, अशङ्कितावतीर्णाभिरम्भःक्रीड़ारागिणीभिः स्नानसमये वनदेवताभिः केशकुसुमैः सुरभीकृतम्, एकदेशावतीर्णमुनिजनापूर्य्यमाणकमण्डलुकलध्वनिमनोहरम्, उन्मिषदुत्पलवनमध्यचारिभिः सवर्णतया रसितानुमेयैः कादम्ब [५] कदम्बकैरासेवितम्, अभिषेकाव-

---

[१] "भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशत् गुरुः।
अद्भिः संच्छादितामुर्व्वीं स तामार्च्छत् प्रजापतिः।
रसातलतले मग्नां रसातलतलं गतः।
प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार गाम्।"
हरिवंशे २२४ अध्याये।

[२] तैलघृतादीनां विन्दुः जले पतन् चन्द्राकारेण झटिति विसृमरः सन् यत्पदार्थरूपेणोदेति स एव प्रकृते चन्द्रकम्।

[३] सौगन्धिकं कृष्णवर्णः कह्लारविशेषः [सुंधि]।

[४] चञ्चलिता अतएव वाचाला मुखरा वीचिमाला यत्र।

[५] कादम्बाः कलहंसाः कृष्णवर्णहंसविशेषाः।

तीर्णपुलिन्दराजसुन्दरीकुचचन्दनधूलिधवलिततरङ्गम्, उपान्तजातकेतकीरजःपटलबद्धकूलपुलिनम्, आसन्नाश्रमागततापसक्षालितार्द्रवल्कलकषायपाटलतटजलम्, उपतटविटपिपल्लवपुटानिलवीजितम्, अविरलतमालवीथिकान्धकारिताभिः वालिनिर्वासितेन [१] च सञ्चरता प्रतिदिनमृष्यमूकवासिना सुग्रीवेणावलुप्तफल [२] परिलघुलताभिः, उद [३] वासितापसानां देवतार्च्चनोपयुक्तकुसुमाभिः, उत्पतज्जलचरपतङ्गपक्षपुटविगलितजलविन्दुसेकसुकुमारकिसलयाभिः लतामण्डपतलस्थितशिखण्डिमण्डलारब्धताण्डवाभिः अनेककुसुमपरिमलवाहिनीभिः वनदेवतानिश्वासवासिताभिरिव वनराजिभिरुपरुद्धतीरम्, अपरसागराशङ्किभिः सलिलमादातुमवतीर्णैर्जलधरैरिव बहलपङ्कमलिनैर्वनकरिभिरनवरतमापीयमानम्, (क) अगाधमनन्तमप्रतिमम्, (ख) अपां निधानं पम्पाभिधानं, पद्म-

---

(क) आपीयमानसलिलम् इति पाठान्तरम्।

(ख) अप्रतिष्ठमिति पाठान्तरम् सीमारहितमित्यर्थः।

[१] वालिना तन्नामकवानरेन्द्रेण निर्वासितः स्वभार्यां तद्भार्यां राज्यञ्च गृहीत्वा वहिष्कृतः।

[२] अवलुप्तानि निःशेषेण भक्षितानि फलानि यासाम् तादृश्यः अतएव परिलघ्व्यः फलशून्यत्वात् भारशून्या लताः यासु ताभिः।

[३] उदके वसतीति उदवासी वासिनि परे उदकस्योदः।

सरः। [१] यत्र च विकचकुवलयप्रभाश्यामायमानपक्षपुटान्यद्यापि मूर्त्तिमद्रामशापग्रस्तानीव मध्यचारिणामालोक्यन्ते चक्रनाम्नां मिथुनानि।

तस्यैव (क) पद्मसरसः पश्चिमे तीरे राघवशरप्रहारजर्जरितजीर्णताततरु [२] ष(ख)ण्डस्य, च समीपे दिग्गजकरदण्डानुकारिणा जरदजगरेण सततमावेष्टितमूलतया बद्धमहालवालइव, तुङ्गस्कन्धावलम्बिभिरनिलवेल्लितैरहिनिर्मोकैर्धृतोत्तरीयइव दिक्चक्रवालपरिमाणमिव गृह्णता भुवनान्तरालविप्रकीर्णेन शाखासञ्चयेन प्रलयकालताण्डवप्रसारितभुजसहस्रमुडुपतिशकलशेखरमिव विडम्बयितुमुद्यतः, पुराणतया पतनभयादिव गगनस्कन्धलग्नः, निखिलशरीरव्यापिनीभिरतिदूरोन्नताभिर्जीर्णतया शिराभिरिव परिगतो व्रततिभिः, जरातिलकविन्दुभिरिव कण्टकैराचिततनुः, इतस्ततः परिपीतसागरसलिलैर्गगनागतैः पत्ररथैरिव शाखान्तदेशेषु निलीयमानैः, क्षणमम्बुभाराल-

---

(क) एवंविधस्येत्यधिकः पाठः।

[१] पद्मप्रधानं सरः पद्मसरः। तच्च वेधसोत्पादितोऽपरो जलनिधिरिवेति पूर्वेणान्वयः।

[२] ताल(ख)षण्डः तालानां समूहः “स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः। भित्त्वा तालान् गिरिप्रस्थं सप्तभूमिं विवेश ह।” रामायण किष्किन्ध्याकाण्डे १२ सर्गे।

सैराद्रीकृतपल्लवैर्जलधरपटलैरप्यदृष्टशिखरदेशः, तुङ्गतया नन्दनवनश्रियमिवावलोकयितुमभ्युद्यतः, समीपवर्त्तिनामुपरि सञ्चरतामम्बरतलगमनखेदायासितानां रविरथतुरङ्गमाणां सृक्क[१]परिस्रुतैः फेनपटलैः सन्देहिततूलराशिभिर्धवलीकृतशिखरशाखः, वनगजकपोलकण्डूयनलग्नमद (क) निलीनमत्तमधुकरमालेन लोहशृङ्खलाबन्धनिश्चलेनेव कल्पस्थायिना मूलेन समुपेतः, कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः (ख) सजीवइव मधुकरपटलैः दुर्य्योधनइवोपलक्षितशकुनिपक्षपातः [२] नलिननाभइव वनमालोपगूढ़ः [३] नवजलधरव्यूह इव नभसि [४] दर्शितो(ग)न्नतिः अखिलभुवनतलावलोकनप्रासादइव वनदेवतानाम्, अधिपतिरिव दण्डकारण्यस्य, नायकइव सर्ववन-

(क) क्वचित् सलिलेर्य्यधिकः पाठः।

(ख) पतद्भिरिति पाठान्तरम्।

(ग) कृतोन्नतिः इति पाठान्तरम्।

[१] सृक्कणी ओष्ठप्रान्तौ।

[२] शकुनिः सुबलराजपुत्रः पक्षी च पक्षपातः गरुच्चालनमानुकूल्यञ्च।

[३] वनानां माला श्रेणिः "आजानुलम्बिनी माला सर्व्वर्त्तुकुसुमोज्ज्वला। मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्यते।" इत्युक्तमाल्यभेदश्च।

[४] नभसि आकाशे श्रावणे मासि च।

स्पतीनां, सखेव विन्ध्यस्य, शाखाबाहुभिरवगृह्येव विन्ध्याटवी-मवस्थितो महान् जीर्णः शाल्मलीवृक्षः।

तत्र शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसन्धिषु जीर्णवल्कलविवरेषु च महावकाशतया विश्रब्धविरचितकुलाय-सहस्राणि दुरारोहतया विगलितविनाशभयानि नानादेश-समागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म। यैः परि-णामविरलसंहतिरपि स वनस्पतिरविरलदलनिचयश्यामल इवोपलक्ष्यते दिवानिशनिलीनैः। ते च तस्मिन् वनस्पता-वतिवाह्य रजनीमात्मनोनीड़ेषु प्रतिदिनमुत्थायोत्थायाहारा-न्वेषणाय नभसि विरचितपङ्क्तयो मदकलहलधरहलमुखोत् (क) क्षेपविकीर्णबहुस्रोतसमम्बरतले कलिन्दकन्यामिव दर्श-यन्तः, सुरगजोन्मूलितविगलदाकाशगङ्गाकमलिनीशङ्कामुप-जनयन्तः, दिवसकररथतुरगप्रभानुलिप्तमिव गगनतलमुप-पादयन्तः, सञ्चारिणीमिव मरकतस्थलीं विड़म्बयन्तः, शैवल-पल्लवावलीमिवाम्बरसरसि प्रसारयन्तः, गगनविततैः पक्षपुटैः कदलीदलैरिव दिनकरकरनिकरपरिखेदितान्याशामुखानि वीजयन्तः, वियति विसारिणीं शष्पवीथीमिवारचयन्तः, सेन्द्रा-युधमिवान्तरिक्षमादधाना विचरन्ति स्म शुकशकुनयः। कृता-हारास्च पुनः प्रतिनिवृत्यात्मकुलायावस्थितेभ्यः शावकेभ्यो-

---

(क) हलमुखाक्षेपविप्रकीर्णेति पाठान्तरम्।

विविधान् फलरसान् कलममञ्जरी (क) विकारांश्च प्रहत-हरिणरुधिरानुरक्त (ख) शार्द्दूलनखकोटिपाटलेन चञ्चुपुटेन दत्त्वा दत्त्वा अधरीकृतसर्वस्नेहेनासाधारणेन शुकाणापत्यप्रेम्णा तस्मिन्नेव क्रोड़ान्तर्निहिततनयाः (ग) चपाः चपयन्ति स्म।

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्त्तमानस्य कथमपि पितुरहमेवैकोविधिवशात् सूनु-रभवम्। अतिप्रबलया (घ) चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत् (ङ)। अभिमत-जायाविनाशशोकदुःखितोऽपि खलु तातः सुतस्नेहादन्तर्निगृह्य पटुप्रसरमपि शोकमेकाकी मत्संवर्द्धनपरएवाभवत्। अति-परिणतवयाश्च कुशचीरानुकारिणीमल्पावशिष्टजीर्णपिच्छ[१]-जालजर्जरामवस्रस्तांसदेशशिथिलामपगतोत्पतनसंस्कारां [२] पक्षसंहतिमुद्वहन् उपारूढ़कम्पतया च सन्तापकारिणीमङ्गलग्नां

(क) कलमफलविकारांश्च इति पाठान्तरम्।

(ख) रुधिरप्रसक्तेति वा पाठः।

(ग) क्वचित् सुखमित्यधिकः पाठः।

(घ) प्रबलतया इति पाठान्तरम्।

(ङ) अगच्छदिति पाठान्तरम्।

[१] पिच्छं पुच्छम्।

[२] बहुदिनपर्य्यन्तगमनव्यापाररहितत्वात् लुप्तोत्पतनाभ्यासाम्।

जरामिव विधुन्वन् अकठोरशेफालिकाकुसुमनालपिञ्जरेण कलममञ्जरीदलनमसृणितचञ्चूपान्तलेखेन स्फुटिताग्रकोटिना चञ्चुपुटेन परनीड़निपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणानादायादाय तरुमूलनिपतितानि च शुककुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तोमह्यमाहारमदात् प्रतिदिवसमात्मना च मदुपयुक्तशेषमकरोदशनम् (क)।

एकदा तु प्रभातसन्ध्यारागलोहिते गगनतले (ख) कमलिनीमधुरक्तपक्षसम्पुटे वृद्धहंस इव मन्दाकिनीपुलिनादपरजलनिधितटमवतरति चन्द्रमसि परिणतरङ्कु[१]रोमपाण्डुनि व्रजति विशालतामाशाचक्रवाले गजरुधिर रक्तहरिसटालोमलोहिनीभिरातप्तलाक्षिक(ग)तन्तुपाटलाभिः [२] आयामिनोभि.(घ) अशिशिरकिरणदीधितिभिः पद्मरागरत्नशलाका[३]

(क) शेषमशनमकरोदिति क्वचित् पाठः।

(ख) प्रभातसन्ध्यालोहिते गगने च इति वा पाठः।

(ग) आतप्तलाक्षिकेत्यत्र सन्तप्तलाक्षेति पाठान्तरम्।

(घ) आगामिनीभिरिति पाठान्तरम् असङ्गतञ्चैतत्।

[१] रङ्कुर्मृगभेदः यस्य लोम्ना राङ्कवं वस्त्रमुत्पद्यते।

[२] लाक्षया रक्ताः तेन रक्तं रागादित्यधिकारे ठक्। आतप्ता निर्मला लाक्षिका ये तन्तवः। पाठान्तरे सन्तप्ताया अग्निसम्पर्कात् जातद्रवाया लाक्षायास्तन्तुरूपो योविकारस्तद्वत् पाटला।

[३] पद्मरागमणिशलाकामय्यः सम्मार्जन्यः शोधन्यः।

सम्मार्ज्जनीभिरिव समुत्सार्य्यमाणे गगनकुट्टिमकुसुमप्रकरे तारागणे सन्ध्यामुपासितुमुत्तराशावलम्बिनि मानससरस्तीरमिवा(क)वतरति सप्तर्षिमण्डले [१] तटगतविघटितशुक्तिसम्पुटविप्रकीर्णम्, अरुणकरप्रेरणाधोगलितमुडुगणमिव मुक्ताफलनिकरमुद्वहति, धवलितपुलिनतल(ट)मुदन्वति पूर्वेतरे, तुषारबिन्दुवर्षिणि विबुद्धशिखिकुले, विजृम्भमाणकेशरिणि, करिणीकदम्बकप्रबोध्यमानमदकरिणि, स्पष्टे च जाते प्रभाते, जपाजलजड़केसरं कुसुमनिकरमुदयगिरिशिखरस्थितं सवितारमिवोद्दिश्य पल्लवाञ्जलिभिः समुत्सृजति कानने, रासभरोमधूसरासु वनदेवताप्रासादानां तरूणां शिखरेषु पारावतमालायमानासु धर्म्मपताकास्विव समुन्मिषन्तीषु तपोवनाग्निहोत्रधूमलेखासु, अवश्यायशीकरिणि, लुलितकमलवने, रतिखिन्नशवरसीमन्तिनीस्वेदकणिकापहारिणि, वनमहिषरोमन्थफेनबिन्दुवाहिनि, चलितपल्लवलतालास्योपदेशव्यसनिनि, विघटमान[२]कमलष(ख)ण्डमधुशीकरासारवर्षिणि, कुसुमामोदतर्पितालिजाले, निशावसानजातजड़िम्नि, मन्दमन्दसञ्चा-

(क) मित्राम्बरादवतरति इति वा पाठः।

[१] सौरश्रावणमासे एव प्रातःसप्तर्षिमण्डलस्योदक्स्थत्वं ज्योतिषप्रसिद्धम्।

[२] विघटमानानां विदलितानां कमलानां समूहः।

रिणि, प्रवाति, प्राभातिके मातरिश्वनि, कमलवन(क)प्रबोधमङ्गलपाठकानाम् इभगण्डडिण्डिमानां [१] मधुलिहां (ख) कुमुदोदरेषु घटमानदल[२]पुटनिरुद्धपक्षसंहतीनाम् उच्चरत्सु झङ्कारेषु, प्रभातशिशिरमारुताहतमुक्तमजतुरसाश्लिष्टपक्ष्ममालमिव [३] सशेषनिद्राजिह्मिततारं (ग) चक्षुरुन्मीलयत्सु, शनैःशनैरूषरशय्याधूसरक्रोड़रोमराजिषु वनमृगेषु, इतस्ततः सञ्चरत्सु वनचरेषु, विजृम्भमाणे श्रोत्रहारिणि पम्पासरःकलहंसकोलाहले समुल्लसति, नर्त्तितशिखण्डिमण्डले मनोहरे वनगजकर्णतालशब्दे, क्रमेण च गगनमार्गमवतरतो दिवसकरवारणस्यावचूल[४](घ)चामरकलापइवोपलक्ष्यमाणे मञ्जिष्ठारागलोहिते किरणजाले, शनैःशनैरुदिते भगवति सवितरि,

---

(क) पुस्तकान्तरे वनेत्येतत् नास्ति।

(ख) पटलेषु इत्यधिकः क्वचित् पाठः।

(ग) सरोषनिद्राजिह्मिततारकमिति पाठान्तरम्।

(घ) अवधूतेति पाठान्तरम्।

[१] इभगण्डडिण्डिमानां दन्तिगण्डस्थलीयवाद्यभेदानाम्।

[२] घटमानदलानि निमीलितदलानि।

[३] तेन उन्मीलिततारमपि निमीलिततारमिव संयुक्तपुटतारकं भवतीत्यर्थः।

[४] अवचूलं ध्वजाग्रवस्त्रं तन्निबद्धचामरसमूहे।

पम्पासरःपर्य्यन्ततरुशिखरसञ्चारिणि अध्यासितगिरिशिखरे दिवसकरजन्मनि [१] हृततारे पुनरिव कपीश्वरे वनमभिपतति बालातपे, स्पष्टे जाते प्रत्यूषसि, नचिरादिव दिवसाष्टमभागभाजि स्पष्टभासि भास्वति भूते, प्रयातेषु च यथाभिमतानि दिगन्तराणि शुककुलेषु, कुलायनिलीननिभृतशावकसनाथेऽपि निःशब्दतया शून्यइव तस्मिन् वनस्पतौ स्वनीड़ावस्थितएव ताते, मयि च शैशवादसञ्जातबले समुन्मिषमानपक्षपुटे तातसमीपवर्त्तिनि कोटरगते, सहसैव तस्मिन् महावने संत्रासितसकलवनचरः, सरभसमुत्पतत्पतत्रिपक्षपुटशब्दसन्ततः, भीतकरिपोतचीत्कारपीवरः, प्रचलितमत्तालिकुलक्वणितमांसलः, परिभ्रमदुद्घोणवनवराहरवघर्घरः, गिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितः, कम्पयन्निव तरून्, भगीरथावार्य्यमाण [२] गङ्गाप्रवाहकलकलबहलः, भीतवनदेवताकर्णितः, मृगया-

---

[१] दिवसकरात् सूर्य्याज्जन्म यस्य तस्मिन् सूर्य्यातपे सूर्य्यपुत्रे च गिरिः उदयाद्रिः किष्किन्ध्यादिश्च। हृता तारा तारका नक्षत्रं वालिपत्नी च येन तादृशे। कपीश्वरे सुग्रीवे।

[२] भगीरथः सूर्य्यवंश्यो नृपभेदः तेनावार्य्यमाणस्य प्रतिरुध्यमानस्य गङ्गाप्रवाहस्येव कलकलबहलः। स हि गङ्गानयनकाले पथप्रदर्शनार्थं पुरोगतः तद्गतिवशाच्च अतिवेगस्यापि गङ्गास्रोतसः आवार्य्यमाणत्वम्।

कोलाहलध्वनिरुदचरत्। आकर्ण्य (क) तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्जरितकर्णविवरो भयविक्लवः समीपवर्त्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम्।

अनन्तरञ्च सरभसम् इतो गजयूथपतिलुलितकमलिनीपरिमलः, इतः क्रोड़कुलदश्यमानभद्र [१] मुस्तारसामोदः, इतः करिकलभभज्यमानशल्लकीकषायगन्धः, इतो निपतितशुष्कपत्रमर्मरध्वनिः, इतो वनमहिषविषाण [२] कोटिकुलिशभिद्यमानवल्मीकधूलिः, इतो मृगकदम्बकम्, इतो वनगजकुलम्, इतो वराहयूथम्, इतो वनमहिषवृन्दम्, इतः शिखण्डिमण्डलविरुतम्, इतः कपिञ्जल [३] कुलकलकूजितम्, इतः कुररकुलक्वणितम्, इतो मृगपतिनखभिद्यमानकुम्भकुञ्जररसितम्, (ख) इयमार्द्रपङ्कमलिना वराहकुलपद्धतिः, इयमभिनवशष्पकवलरसश्यामला हरिणरोमन्थफेनसंहतिः, इयमुन्मदगन्धगजगण्डकण्डूयनपरिमलालीनमुखर-

---

(क) अत्र तु च इत्यकः पाठः।

(ख) कुञ्जरालिरसितमिति पाठान्तरम्।

[१] क्रोड़ो वराहः भद्रमुस्ता मुस्तकभेदः।

[२] विषाणं शृङ्गं तस्य कोटिः कुलिशमिव दृढ़त्वात्।

[३] कपिञ्जलः पक्षिभेदः।

मधुकरविरुतिः, एषा निपतितरुधिरविन्दुसिक्तशुष्कपत्रपाटला रुरुपदवी, एतत् द्विरदचरणमृदितविटपपल्लवपटलम्, एतत् खड्गिकुल [१] (क), क्रीड़ितम् एष नखकोटिविलिखितविकटपत्रलेखोरुधिरपाटलः करिमौक्तिक (ख) दन्तुरो मृगपतिमार्गः, एषा प्रत्यग्रप्रसूतवनमृगीगर्भरुधिरलोहिनी भूमिः, इयमटवीवेणिका [२] नुकारिणी पक्षचरस्य (ग) यूथपतेर्मदजलमलिना सञ्चारवीथी, चमरी (घ) पङ्क्तिरियमनुगम्यताम् उच्छुष्कमृगकरीष [३] पांशुला त्वरिततरमध्यास्यतामियं वनस्थली, तरुशिखरमारुह्यताम्, आलोक्यतां दिगियम्, आकर्ण्यतामयं शब्दः, गृह्यतां धनुः, अवहितैः स्थीयतां, विमुच्यन्तां श्वानः, इत्यन्योऽन्यमभिदधतो मृगयासक्तस्य महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमशृणवम्।

(क) शिखण्डिकुलेति पाठान्तरम्।

[ख] क्वचित् दलेत्यधिकः पाठः।

(ग) एकचरस्य इति वा पाठः। पाठान्तरे संघचरस्येत्यर्थः।

[१] खड़्गिनः गण्डकाः पशुभेदाः। पाठान्तरे शिखण्डिनो मयूराः।

[२] अटव्याः स्त्रीत्वेन या वेणिका केशविन्यासः कार्ष्ण्यात्तत्साम्यम्।

[३] करीषः पशुपुरीषभेदः [घुटे]

अथ नातिचिरादेवानुलेपनार्द्र [१] मृदङ्गध्वनि(क)धीरेण, गिरिविवरविजृम्भितप्रतिनादगभीरेण, शवर(ख)शरताड़ितानां केशरिणां निनादेन, संत्रस्तयूथमुक्ताना [२] मेकाकिनाञ्च सञ्चरतामनवरतकरास्फोटमिश्रेण, जलधररसितानुकारिणा, गजयूथपतीनां, कण्ठगर्ज्जितेन, सरभससारमेय [३] विलुप्यमानावयवानामालोलकातरतरलतरतारकाणाम् एणकाना-[४] ञ्च करुणकूजितेन, निहतयूथपतीनां वियोगिनीनामनुगतकलभानाञ्च, खिन्नाखिन्ना समाकर्ण्य कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमन्तीनां, प्रत्यग्रपतिविनाशशोकदीर्घेण, करिणीनां चीत्कृतेन, कतिपयदिवसप्रसूतानाञ्च खड्गिधेनुकानां [५] त्रासपरिभ्रष्टपोता [६] न्वेषिणीनामुन्मुक्तकण्ठ

(क) ध्वानेति पाठान्तरम्।

(ख) शवरेति क्वचित् पुस्तके नास्ति।

[१] मृदङ्गस्य वामभागे सार्द्रगोधूमादिचूर्णलेपने स्वरगम्भीरता भवतीति वाद्यशास्त्रे प्रसिद्धा।

[२] संत्रस्तात् भीतात् यूथात् सजातीयसंघात् मुक्ताः परिभ्रष्टाः तेषामतएव एकाकिनामसहायानां गजयूथपतीनां विशेषणमिदम्।

[३] सरभसः सवेगः सारमेयः कुक्कुरः।

[४] एणाः हरिणविशेषाः अनुकम्पार्थे कन्।

[५] "खड्गिस्त्री धेनुका धेनौ इति,, विश्वः। गण्डकस्त्रीणाम्।

[६] त्रासेन भयेन परिभ्रष्टः यूथात् प्रचलितः पोतः शिशुः।

(क) करुणमारसन्तीनामाक्रन्दितेन, तरुशिखरमुत्पतितानामाकुलाकुलचारिणाञ्च [१] पञ्जरथानां कोलाहलेन रूपा-[२] नुसारप्रधावितानाञ्च, मृगयूणां [३] (ख) युगपदतिरभसपादपाताभिहताया भुवः कम्पमिव जनयता चरणशब्देन, कर्णान्ताकृष्टज्यानाञ्च (ग) मदकलकुररकामिनीकण्ठकूजितकलेन शरनिकरवर्षिणां धनुषां निनादेन, पवनाहति-[४] क्वणितधाराणामसीनाञ्च कठिनमहिषस्कन्धपीठपातिनां रणितेन, शुनाञ्च सरभसविमुक्तघर्घरध्वनीनां वनान्तरव्यापिना ध्वानेन, सर्वतः प्रचलितमिव तदरण्यमभवत्। अचिराच्च प्रशान्ते तस्मिन् मृगयाकलकले, निर्वृष्ट [५]

(क) करुणमतिकरुणमिति भिन्नविधः क्वचित् पाठः।

(ख) मृगयूथानामिति पाठान्तरम्।

(ग) ज्याघोषमदेति पाठान्तरम्।

[१] अभीक्ष्णाकुलचारिणां पञ्जरथानां पक्षिणाम्।

[२] रूपाः मृगाः पाठान्तरे आकारः। रूपमाकारेत्युपक्रम्य नाटकादौ मृगे ग्रन्थावृत्ताविति विश्वोक्तेः। तदनुधावनक्रमेण धावितानाम्।

[३] मृगयूणां व्याधानाम्।

[४] पवनाहत्या मारुताघातेनैव शब्दायमानधाराणां तेनातितीक्ष्णानामित्यर्थः।

[५] निःशेषवृष्टाः अतएव मूका आडम्बररवरहिता जलधराः।

मूकजलधरवृन्दानुकारिणि मथनावसानोपशान्तवारिणि सागर-इव स्तिमिततामुपागते कानने, मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थएव शिरोधरां [१] प्रसार्य्य संत्रासतरलतारकः शैशवात् किमिदमिति समुपजातविस्मयो दिदृक्षुस्तामेव दिशं चक्षुः प्राहिणवम्।

अभिमुखमापतितं तस्माद्वनान्तरादर्जुन [२] भुजदण्डसहस्रविप्रकीर्णमिव नर्मदाप्रवाहम्, अनिलबलचलितमिव तमालकाननम्, एकीभूतमिव कालरात्रीणां [३]यामसङ्घातम्, अञ्जनशिलास्तम्भसम्भारमिव चितिकम्पविघूर्णितम्, अन्धकारपूर(क)मिव रविकिरणाकुलितम्, अन्तकपरिवारमिव परिभ्रमन्तम्, अवदारितरसातलोद्गतमिव दानवलोकम्, अशुभकर्मसमूहमिवैकत्र समागतम्, अशेषदण्डकारण्यवासिमुनिजनशापसार्थमिव सञ्चरन्तम्, अनवरतशरनिकरवर्षिरामनिहतखरदूषणबलमिव, तदपध्यानात्, [४] पिशाचतामुपगतं कलिकालबन्धुवर्गमिव

(क) पुञ्जमिति पाठान्तरम्।

[१] शिरोधरां ग्रीवाम्।

[२] अर्जुनः सहस्रबाहुः कार्त्तवीर्य्यः हैहयाधिपः स हि भुजसहस्रेण नर्मदामाबध्य जलक्रीड़ाञ्चकारेति रामायणे उत्तरकाण्डे २१सर्गे।

[३] कालरूपाः सर्वेषां मृत्युरूपा रात्रयः ब्रह्मणो निशाः प्रलयकालः "यदा स्वपिति देवोऽसौ तदा सर्वं प्रलीयते" इत्युक्तेः।

[४] तस्य रामस्य अपध्यानात् अनिष्टचिन्तनात् तज्जन्यपापात्।

सङ्गतम्, अवगाह्योत्थितप्रस्थितमिव वनमहिषयूथम्, अचलशिखरस्थितकेशरिकराकृष्टिपतनशीर्णमिव कालमेघपटलम्, अखिलरूप [१] विनाशाय धूमकेतुजालमिव समुद्गतम्, अन्धकारिताशेषकाननम, अनेकसहस्रसंख्यमतिभयजननमुत्पातवेतालव्रातमिव शवरसैन्यमद्राक्षम्।

मध्ये च तस्यातिमहतः शवरसैन्यस्य प्रथमे वयसि वर्त्तमानम्, अतिकर्कशत्वादायसमयमिव निर्मितम्, एकलव्यमिव [२] जन्मान्तरागतम्, उद्भिद्यमानश्मश्रुराजितया प्रथममदलेखामण्ड्यमानगण्डभित्तिमिव गजयूथपतिकुमारम्, असितकुवलयश्यामलेन देहप्रभाप्रवाहेण कालिन्दीजलेनेव पूरयन्तमरण्यम्, आकुटिलाग्रेण स्कन्धावलम्बिना कुन्तलभारेण केशरिणमिव गजमदमलिनीकृतेन केशरकलापेनोपेतम्, आयतललाटम्, (क) अति(ख)तुङ्गघोरघोणम्, उपनीतस्यैककर्णाभरणतां भुजगफणामणेरापाटलैरंशुभिरालोहितीकृतेन पर्णशयनाभ्यासाल्लग्नपल्लव-

---

(क) आयतललाटभासिनमिति पुस्तकान्तरे दृश्यते।

(ख) पुस्तकान्तरे अतीत्येतत् नास्ति।

[१] रूपा मृगाः स्वभाववन्तः लोकाश्च।

[२] एकलव्यः हिरण्यधनुषः निषादाधिपस्य पुत्रः तत्कथा च भारते आदिपर्वणि १३२ अध्याये।

रागेणेव वामपार्श्वेन विराजमानम्, अचिराहतगजकपोलगृहीतेन सप्तच्छदपरिमलवाहिना कृष्णागुरुपङ्केनेव सुरभिणा मदेन कृताङ्गरागम्, उपरिपतत्परिमलान्धेन परिभ्रमता मायूरपिच्छातपत्रानुकारिणा मधुकरकुलेन तमालपल्लवेनेव निवारितातपम्, आलोलकर्णपल्लवव्याजेन भुजबलनिर्जितया भयप्रयुक्तसेवया विन्ध्याटव्येव करतलेनापमृज्यमानगण्डस्थलस्वेदलेखम्, आपाटलया हरिणकुलकालरात्रि-सन्ध्यायमानया शोणिताद्रयेव दृष्ट्या रञ्जयन्तमिवाशाविभागान्, आजानुलम्बिना वनकुञ्जरकरप्रमाणमिव गृहीत्वा निर्मितेन चण्डिकारुधिरबलिप्रदानार्थमसकृन्निशितशस्त्रोल्लेख[१] विषमितशिखरेण भुजयुगलेनोपशोभितम्, अन्तरान्तरालग्नाश्यान [२] हरिणरुधिरविन्दुना स्वेदजलकणचितेन, गुञ्जाफलमिश्रैः करिकुम्भमुक्ताफलैरिव विरचिताभरणेन विन्ध्यशिलातलविशालेन, वक्षःस्थलेनोद्भासमानम्, अविरतश्रमाभ्यासादुल्लिखितोदरम् इभमदमलिनमालान[३]स्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन, लाक्षालोहितकौशेयपरिधानम् [४] अकारणेऽपि क्रूरजातितया

---

[१] उल्लेखः घर्षणम्।

[२] आश्यानं घनीभूतम्।

[३] आलानं गजबन्धार्थः काष्ठादिपदार्थः।

[४] कौशेयं कृमिकोशोत्थं पट्टवस्त्रम्।

बद्धलिपताको [१] ग्रभ्रुकुटीकराले ललाटपट्टे (क) प्रबल-भक्त्याराधितया मत्परिग्रहोऽयमिति कात्यायन्या त्रिशूलेनेवाङ्कितम्, उपजातपरिचयैरनुगच्छद्भिः, श्रमवशाद्दूरविनिर्गताभिः स्वभावपाटलतया शुष्काभिरपि हरिणशोणितमिव क्षरन्तीभिर्जिह्वाभिरावेद्यमानखेदैः, विवृतमुखतया स्पष्टदृष्टदंष्ट्रांशून् दन्तान्तराललग्नकेशरिसटानिव सृक्कभागानुद्वहद्भिः, स्थूलवराटक [२] मालिकापरिगतकण्ठैः, महावराहदंष्ट्राप्रहारजर्जरैः, अल्पकायैरपि महाशक्तित्वादनुपजातकेशरैरिव केशरिकिशोरकैः मृगवधूवैधव्यदीक्षादानदक्षैः, अनेकवर्णैः, श्वभिः, अतिप्रमाणाभिश्च केशरिणामभयप्रदानयाचनार्थमागताभिः सिंहीभिरिव, कौलेयक [३] कुटुम्बिनीभिरनुगम्यमानं, कैश्चिदागृहीतचमरबालगजदन्तभारैः, कैश्चिदाच्छद्रपर्णबद्धमधुपुटैः, कैश्चिन्मृगपतिभिरिव गजकुम्भमुक्ताफलनिकरसनाथपाणिभिः, कैश्चिद्यातुधानैरिव गृहीतपिशिताहारैः, कैश्चित् प्रमथैरिव केशरिकृत्ति [४] धारिभिः,

(क) फलके इति पाठान्तरम्।

[१] त्रिस्रः पताका इव यत्र वलित्रययुक्तललाटम्।

[२] कपर्दकः वराटकस्तन्माला चिह्नार्थं भूषार्थं वा गले बद्धा।

[३] कौलेयकः कुक्कुरः।

[४] कृत्तिश्चर्म।

केश्चित् क्षपणकैरिव मयूरपिच्छ [१] वाहिभिः, कैश्चिच्छिशुभिरिव काकपक्ष [२] धरैः, कैश्चित् कृष्णचरितमिव दर्शयद्भिः, समुत्खातविधृतगज [३] दन्तैः कैश्चिज्जलदागमदिवसैरिव जलधरच्छायामलिनाम्बरै [४] रनेकवृत्तान्तैः [५] शवरवृन्दैः परिवृतम्, अरण्यमिव सखड्गधेनुकम् [६] अभिनवजलधरमिव मयूरपिच्छचित्रचाप [७] धारिणं, वकराक्षसमिव गृहीतैकचक्रम्, [८] अरुणानुजमिवोद्धृतानेकमहानागदशनं, [९] भीष्ममिव शिख-

---

[१] क्षपणका दिगम्बराः बौद्धभेदाः "लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बरा इति" तेषां मयूरादिपिच्छिधारित्वमुक्तम्।

[२] काकपक्षः शिखण्डकः काकानां पक्षश्च।

[३] गजो हस्ती कुवलयापीड़श्च तत्कथा च हरिवंशे ८६ अध्याये।

[४] जलधरस्य नीलमेघस्य छायया मलिनमम्बरमाकाशो यत्र पक्षे तत्कान्त्या समं मलिनं वस्त्रं यत्र।

[५] अनेकवृत्तान्तैः अनेकप्रकारैः।

[६] खड्गः गण्डकः तत्स्त्री धेनुका खड्गधेनुका छुरिका च।

[७] मयूरपिच्छमिव चित्रं तेन चित्रश्च चापं धनुः इन्द्रायुधञ्च।

[८] एकमुत्तमं चक्रमायुधभेदः एकचक्रा पुरीभेदश्च तत्कथा च महाभारते आदिपर्वणि १५७ अध्याये।

[९] अरुणानुजः गरुड़ः नागः हस्ती सर्पश्च।

ण्डिशत्रुं, [१] निदाघदिवसमिव सतताविर्भूतमृगतृष्णां, [२] विद्याधरमिव मानसवेगं, [३] पराशरमिव योजनगन्धानुसारिणं, [४] घटोत्कचमिव भीमरूपधारिणम्, [५] अचलराजकन्यकाकेशपाशमिव नीलकण्ठचन्द्रकाभरणं, [६] हिरण्याक्षदानवमिव महावराहदंष्ट्राविभिन्नवक्षस्थलम्, [७] अतिरागिणमिव कृतबहुवन्दिपरिग्रहं, [८] पिशिताशनमिव रक्त-

---

[१] शिखण्डी मयूरः द्रुपदराजपुत्रश्च। बहुव्रीहिस्तत्पुरुषश्च। तस्य भीष्मशत्रुताकथा च भारते उद्योगपर्वणि १८८ अध्याये।

[२] मृगेषु तृष्णा अभिलाषः, सूर्य्यमरीचौ जलभ्रान्तिश्च।

[३] मानसे सरोवरभेदे वेगो यस्य, मानसस्येव वेगो यस्येति च।

[४] योजनगन्धा कस्तूरी, व्यासमाता सत्यवती च ततकथा च "तस्या योजनगन्धेति ततो नामापरं स्मृतमिति आदिपर्वणि ६० अध्याये।

[५] घटोत्कचः भीमसेनेन हिडिम्बायां जनितः। भीमस्य सदृशम्, भीमं भयानकञ्च रूपम्। तत्कथा च भारतादिपर्वणि १५५ अध्याये।

[६] नीलकण्ठः शिवः, मयूरश्च चन्द्रकं मयूरपुच्छस्थचन्द्राकारः पदार्थः, चन्द्रश्च।

[७] महावराहेण हिरण्याक्षवधकथा हरिवंशे २२५ अध्याये।

[८] वन्दिः हठहृतस्त्री, वन्दिनः स्तुतिपाठकाश्च।

लुब्धकं, [१] गीतकलाविन्यासमिव (क) निषादानुगतम्, [२] अम्बिकात्रिशूलमिव महिषरुधिरार्द्रकायम्, अभिनवयौवनमपि क्षपितबहुवयसं [३] (ख) कृतसारमेयसंग्रहमपि [४] फलमूलाशिनं, कृष्णमप्यसुदर्शनं, [५] स्वच्छन्दप्रचारमपि दुर्गैकशरणं, [६] क्षितिभृत्पादानुवर्त्तिनमपि [७] राजसेवानभिज्ञम्, अपत्यमिव विन्ध्यस्य, अंशावतारमिव कृतान्तस्य, सहोदरमिव पापस्य, सारथिमिव कलिकालस्य, भीषणमपि महासत्त्वतया गम्भीरमिवोपलक्ष्यमाणम्

(क) कलाभिलाषमित्येवं पुस्तकान्तरे पाठः।

(ख) क्षपितवयस्कमिति पाठान्तरम्।

[१] रक्ते रुधिरे लुब्धः। रक्ता अनुरक्ता लुब्धा व्याधा यत्र च।

[२] निषादश्चण्डालभेदः, तन्त्रीकण्ठोत्थस्वरभेदश्च।

[३] वयः पक्षी आयुःकालश्च। यौवनस्थस्य क्षपितबहुवयस्कत्वेन विरोधः नाशितपक्षित्वेन परिहारः।

[४] सारमेयः कुक्कुरः, सारभूतो मेयः परिच्छेद्यः पदार्थश्च।

[५] सुदर्शनं, सुन्दरदर्शनं हरिचक्राख्यास्त्रभेदश्च सुदर्शनः।

[६] दुर्गं दुर्गमप्रदेशः [गड़] तदेकशरणं, दुर्गा अम्बिका तन्मात्रशरणं च तद्भक्तत्वात्।

[७] क्षितिभृत् राजा, पर्वतश्च। पादश्चरणः, प्रत्यन्तपर्वतश्च।

अनभिभवनीयाकृतिं मातङ्गकनामानं शवरसेनापतिमपश्यम्। अभिधानन्तु तस्य पश्चादहमश्रौषम्।

आसीच्च मे मनसि अहो मोहप्रायमेषां जीवितं, साधुजन-विगर्हितञ्च चरितं, तथा हि पुरुषपिशितोपहारे धर्मबुद्धिः, आहारः साधुजनविगर्हितो मधुमांसादिः, अमोऽम्टगया, शास्त्रं शिवारुतम्, [१] उपदेष्टारः सदसतां कौशिकाः, [२] प्रज्ञा शकुनिज्ञानं, [३] परिचिताः श्वानः, राज्यं शून्यास्वटवीषु, आपानक [४] मुत्सवः, मित्राणि क्रूरकर्म्माणि (क) धनूंषि, सहाया विषदिग्धमुखा भुजङ्गमाइव सायकाः, गीतमुत्सा-

---

(क) क्रूरकर्मसाधनानि इति पाठान्तरम्।

[१] "वामे शिवारुतं शस्तं दक्षिणेऽरिष्टसूचकम्" इत्यादि-शकुनशास्त्रम्।

[२] कौशिकाः पेचकाः ते हि यथा स्वप्नसमये वायसरूपरिपोः वैरनिर्यातनाय प्रयतन्ते न च तत्र धर्माधर्मविवेकं कुर्वन्ति तेषां तथाचरणदर्शनेन तथैवेतेऽपि प्रवर्त्तन्ते इति एतेषामुपदेष्टृत्वम्। पेचकस्य तथाचरणकथा च भारते सौप्तिकपर्वणि १ अध्याये।

[३] शकुनिः शकुनिचेष्टा तदनुसारेणैव शुभाशुभनिश्चयात् क्रियासु प्रवृत्तिरेतेषाम्। तज्ज्ञानमेव प्रज्ञा। शकुनिचेष्टायाः शुभा-शुभसूचकत्वञ्च शकुनशास्त्रसिद्धम् अथवा शकुनेः सौबलस्य ज्ञानं कापट्यमेव प्रज्ञा।

[४] आपानकं पानगोष्ठी।

दकारि मुग्धमृगाणाम्, कलत्राणि बन्दिगृहीताः परयोषितः, क्रूरात्मभिः शार्दूलैः सह संवासः, पशुरुधिरेणैव देवतार्च्चनम्, मांसेन बलिकर्म्म [१] चौर्य्येण जीवितम्, भूषणानि भुजङ्ग-फणामणयः, वनगजमदैरङ्गरागः, यस्मिन्नेव कानने निवसन्ति तदेवोतखातमूलमशेषतः कुर्वन्तीति-चिन्तयत्येव मयि शवरसेनापतिरटवीपरिभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलितरोरधश्छायायामवतारितकोदण्डस्त्वरितपरिजनोपनीते पल्लवासने समुपाविशत्। अन्यतमस्तु शवरयुवा [२] ससम्भ्रममवतीर्य्य तस्मात् करयुगलपरिक्षोभिताम्भसः सरसो वैदूर्य्यद्रवानुकारि [३] प्रलयदिवसकरकिरणोपतापादम्बरैकदेशमिव विलीनम्, [४] इन्दुमण्डलादिव प्रस्यन्दितं, द्रुतमिव मुक्ताफलनिकरम्, अत्यच्छतया स्पर्शानुमेयं,

---

[१] बलिः पूजोपहारः "सुरामांसाद्युपहारैर्जपयज्ञैर्विना तु या। विना मन्त्रैस्तामसी स्यात् किरातानान्तु सम्मतेति" तिथितत्त्वधृतस्कान्दवचनात्तेषां मांसेन पूजनं विहितम्।

[२] शवरयुवा तरुणशवरः युवखलतीत्यादिना परनिपातः।

[३] विदूरे पर्वतभेदे भवः ञ्यः। द्रवतीति द्रवः घनीभूतहिमखण्डादि, तत्समम्। नतु वैदूर्य्यो मणिस्तस्य विडालचक्षुषा तुल्यवर्णत्वेन स्वच्छत्वाभावात्।

[४] विलीनं गलितं द्रवीभूतमित्यर्थः।

हिमजड़म् [१] अरविन्दकोषरजःकषायमम्भः, कमलिनीपत्र-सम्पुटेन, प्रत्यग्रोद्धृताश्च धौतपङ्कनिर्म्मला मृणालिकाः स मुपाहरत्। आपीतसलिलश्च शवरसेनापतिस्ता मृणालिकाः शशिकलाइव सैंहिकेयः क्रमेणादशत्। अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शवरसैन्येनानुगम्यमानः शनैःशनैरभिमतं दिगन्तरमयासीत्।

एकतरस्तु [२] जरच्छवरस्तस्मात् पुलिन्दवृन्दादनासादितहरिणपिशितः पिशिताशन [३] इवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुमूले मुहूर्त्तमिव व्यलम्बत। अन्तरिते च तस्मिन् शवरसेनापतौ स जीर्णशवरः पिबन्निवास्माकमायूंषि रुधिरविन्दुपाटलया कपिलभ्रूलतापरिवेश- [४] भीषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि श्येन इव विहगामिषास्वादलालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत्। उत्क्रान्तमिव तस्मिन् क्षणे तदालो-

[१] स्पर्शानुमेयमतिस्वच्छत्वात् दर्शनायोग्यं स्पर्शयोग्यत्वे हेतुः हिमजड़ं हिमखण्डमिव शीतलम्।

[२] अन्यतरादिवत् एकतरशब्दोऽपि अव्युत्पन्नः तेन बहुषु मध्ये एकत्वेन निर्द्धारणात् तमपः विषयेऽप्यस्य प्रवृत्तिः। एकतम इति पाठस्तु सम्यक्।

[३] पिशिताशनः राक्षसः।

[४] परिवेशो मण्डलाकारं वेष्टनम्।

कृतभीतानां शुककुलानामसुभिः। किमिव हि दुष्कर-मकरुणानां, यतः स तमनेकतालतुङ्गमभ्रङ्कषशाखाशिखरमपि सोपानैरिवायत्नेनैव पादपमधिरुह्य ताननुपजातोत्पतन-शक्तीन् कांश्चिदल्पदिवसजातान् गर्भच्छविपाटलान् शा-ल्मलिकुसुमशङ्कामुपजनयतः, कांश्चिदुद्भिद्यमानपक्षतया न-लिनीसंवर्त्तिका [१] नुकारिणः, कांश्चिदर्कफलसदृशान्, कां-श्चिल्लोहितायमानचञ्चुकोटीनीषद्विघटितदलपुटपाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः, कांश्चिदनवरतशिरःकम्प-व्याजेन निवारयत इव प्रतीकारासमर्थान्, एकैकशः फलानीव तस्य वनस्पतेः शाखासन्धिभ्यः कोटरान्तरेभ्यश्च शुकशावकानग्रहीत् अपगतासूंश्च कृत्वा क्षितावपातयत्।

तातस्तु तं महान्तमकाण्डएव [२] प्राणहरमप्रतीकारमुपप्लव मुपनतमवलोक्य द्विगुणतरोपजातवेपथुः मरणभयादुद्भ्रान्त-तरलतारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततोदिक्षु विक्षिपन्, उच्छुष्कतालुरात्मप्रतीकाराक्षमः, त्रासस्रस्तसन्धिशि-थिलेन पक्षपुटेनाच्छाद्य मां तत्कालोचितप्रतीकारं मन्यमानः स्नेहपरवशो, मद्रक्षाकुलः, किंकर्त्तव्यताविमूढ़ः, क्रोड़भागेन मामवष्टभ्य तस्थौ। असावपि पापः क्रमेण शाखान्तरैः

---

[१] "संवर्त्तिका नवदल"मित्युक्तेः अभिनवदलम्।

[२] अकाण्डे अनवसरे उपनतमुपस्थितमुपप्लवमुपद्रवम्।

सञ्चरमाणः, कोटरद्वारमागत्य जीर्णासितभुजङ्गभोगभीषणं प्रसार्य्य विविधवनवराहवसाविस्र [१] (क) गन्धिकरतलम्, अनवरतकोदण्डगुणाकर्षणव्रणाङ्कितप्रकोष्ठम्, अन्तकदण्डानुकारिणं, वामबाहुमतिनृशंसोमुहुर्मुहुर्दत्तचञ्चुप्रहारमुत्कूजन्तं तमाकृष्य तातमपगतासुमकरोत्। मान्तु स्वल्पशरीर (ख) त्वात् भयसम्पिण्डिताङ्गत्वात् सावशेषत्वाच्चायुषः कथमपि तत्पक्षपुटान्तरगतं नालक्षयत्। उपरतञ्च तातमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्। अहमपि तच्चरणान्तराले प्रवेशितशिरोधरोनिभृतमङ्कदेश (ग) निलीनस्तेनैव सहापतम्। आयुषोऽवशिष्टतया तु पवनवशात् पुञ्जितस्य (घ) महतः शुष्कपर्णराशेरुपरि निपतितमात्मानमपश्यम्। अङ्गानि मे येन नावाशीर्य्यन्त। यावच्चासौ तस्मात्तरुशिखरान्नावतरति तावदहमवशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्त्तिः पितरमुपरतमुत्सृज्य नृशंसइव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञोजन्मसहभुवा भयेनैव केवलमभिभूयमानः किञ्चिदुप-

---

(क) विमिश्रेति पाठान्तरम्।

(ख) शरीरेत्येतत् पुस्तकान्तरे नास्ति।

(ग) अङ्कविलीन इति पाठान्तरम्।

(घ) अवशिष्टपुण्यतया तु पवनवशात् पुञ्जितस्य इति पाठान्तरम्।

[१] वसा मेदः विस्रगन्धि आमगन्धि।

जाताभ्यां पक्षाभ्यामीषत्कृतगमनावष्टम्भोल्लुठन्नितस्ततः कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानोनातिदूरवर्त्तिनः, शवरसुन्दरीकर्णपूररचनोपयुक्तपल्लवस्य, सङ्कर्षण [१] पटनीलदलच्छाययोपहसत इव गदाधरच्छवि, मच्छैः कालिन्दीजलच्छेदैरिव विरचितच्छदस्य, [२] वनकरिमदसलिलैरिव संसिक्तकिसलयस्य, विन्ध्याटवीकेशपाशश्रियमुद्वहतो, दिवाप्यन्धकारितशाखान्तरस्य, अप्रविष्टसूर्य्यकिरणमतिगहनमपरस्येव पितुरुत्सङ्गमतिमहत,स्तमालविटपिनोमूलदेशमविशम्।

अवतीर्य्य च स तेन समयेन क्षितितलविप्रकीर्णान् संहृत्य तान् शुकशिशूननेकलतापाशसंयतानाबध्य पर्णपुटेऽतित्वरितगमनः सेनापतिगतेनैव वर्त्मना तामेव दिशमन्वगच्छत्। मान्तु लब्धजीविताशं प्रत्यग्रपितृमरणशोकशुष्कहृदयमतिदूरपातादायासितशरीरं सन्त्रासजातवेपथुं सर्वाङ्गोपतापिनी बलवती पिपासा परवशमकरोत्। अनया च कालकलया [३] सुदूरमतिक्रान्तः स पापकृदिति परिकलय्य किञ्चिदुन्नमितकन्धरो, भयचकितया दृशा दिशोऽवलोक्य तृणेऽपि चलति पुनः प्रतिनिवृत्त इति तमेव पदेपदे पापकारिणमुत्प्रेक्षमाणो,

---

[१] सङ्कर्षणः बलरामः। तस्य नीलाम्बरत्वं पुराणप्रसिद्धम्।

[२] छदः दलम्।

[३] कालकला कालविभागः।

निष्क्रम्य तस्मात्तमालतरुमूलात् सलिलसमीपमुपसर्त्तुं प्रयत्नमकरवम्।

अनुपजातपक्षतया नातिस्थिरचरणसञ्चारस्य, मुहुर्मुहुरधोमुखेनापततो, मुहुस्तिर्य्यङ्निपतन्तमात्मानमेकया पक्षपाल्या [१] सन्धारयतः, क्षितितलसंसर्पणश्रमातुरस्य, अनभ्यासवशादेकमपि दत्त्वा पदमनवरतमुन्मुखस्य, स्थूलस्थूलं [२] निश्वसतो, धूलिधूषरस्य, संसर्पतो, ममाभून्मनसि "अतिकष्टासु दशास्वपि जीवितनिरपेक्षा न भवन्ति खलु जगति प्राणिनां वृत्तयः नास्ति जीवितादन्यदभिमततरमिह जगति जन्तूनाम् एवमुपरते सुगृहीतनाम्नि [३] ताते यदहमविकलेन्द्रियः पुनरेव प्राणिमि, धिङ्मामकरुणमतिनिष्ठुरं विसोढ़पितृमरणशोकदारुणं, येन मया जीव्यते, उपकृतमपि नापेक्षते खलं हि खलु मे हृदयम्। अहं हि लोकान्तरमुपगतायामम्बायां नियम्य शोकावेगमाप्रसवदिवसात् परिणतवयसापि, सता तातेन, तैस्तैरुपायैः संवर्द्धनक्लेशमतिमहान्तमपि स्नेहवशादगणयता, यत् परिपालितस्तत्सर्वमेकपदे [४] विस्मृतमिति।" "अतिकृपणाः

---

[१] पक्षपाली पक्षकोटिः।

[२] स्थूलस्थूलं दीर्घदीर्घमतिदीर्घम्।

[३] "स सुगृहीतनामा स्यात् यः प्रातरनुचिन्त्यते"।

[४] एकपदे तत्क्षणात्।

खल्वमी प्राणाः यदुपकारिणमपि तातमद्यातिगच्छन्तं नानुगच्छन्ति। सर्वथा न कञ्चिन्न खलीकरोति [१] जीवितटष्णा यदीदृशावस्थमपि मामायासयति जलाभिलाषः। मन्ये चागणितपितृमरणशोकस्य निर्घृणतयैव केवलमियं मम सलिलपानबुद्धिः। अद्यापि दूरतएव सरः। तथाहि जलदेवतानूपुररवानुकारि दूरेऽद्यापि कलहंसविरुतम्, अस्फुटानि श्रूयन्ते सारसरसितानि, अयञ्च विप्रकर्षादाशामुखविसर्पणविरलः, सञ्चरति नलिनीषण्डपरिमलः। दिवसस्येयमतिकष्टा च दशा वर्त्तते तथाहि रविरम्बरतलमध्यवर्त्ती स्फुरन्तमातपमनवरतमनलधूलिनिकरमिव विकिरति करैः, अधिकामुपजनयति टषम्, आतपस्पर्शसन्तप्तपांशुपटलदुर्गमा भूमिः, अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि, अलमप्रभुरस्म्यात्मनः, सीदति मे हृदयम्, अन्धकारतामुपयाति चक्षुः अपि नाम खलोविधिरनिच्छतोऽपि मे मरणमद्यैवोपपादयेदिति।"

एवं चिन्तयत्येव मयि तस्मात् सरसो नातिदूरवर्त्तिनि तपोवने जाबालिर्नाम महातपा मुनिः प्रतिवसति। तत्तनयश्च हारीतनामा, मुनिकुमारकः, सनत्कुमारइव सर्वविद्यावदातचेताः, समानवयोभिरपरैस्तपोधनकुमारैरनुगम्यमानः, तेनैव

---

[१] खलीकरोति वशीकरोति असम्भावनानिरासार्थं नञ्द्वयम्।

यथा द्वितीयइव भगवान् विभावसु [१] रतितेजस्वितया दुर्निरीक्ष्यमूर्त्तिः, उद्यतोदिवसकरमण्डलादिवोत्कीर्णः, तडिद्भिरिव विरचितावयवः, तप्तकनकद्रवेणेव बहिरुपलिप्तमूर्त्तिः, आपिशङ्गावदातया देहप्रभया स्फुरन्त्या सबालातपमिव दिवसं, सदावानलमिव वनमुपदर्शयन्, उत्तप्तलोहलोहिनी-[२] नामनेकतीर्थाभिषेकपूतानामंसस्थलावलम्बिनीनां जटानां निकरेणोपेतः, स्तम्भितशिखाकलापः खाण्डववनदिधक्षया [३] क्तकपटवटुवेशइव भगवान् पावकः, तपोवनदेवतानूपुरानुकारिणा धर्मशासनकटकेनेव स्फाटिकेनाक्षवलयेन दक्षिणश्रवणानुलम्बिना विराजमानः, सकलविषयोपभोगनिवृत्त्यर्थमुपपादितेन ललाटपट्टके त्रिसत्येनेव [४] भस्मलिपुण्ड्रकेणालङ्कृतः, गगनगमनोन्मुखबलाकानुकारिणा स्वर्गमार्गमिव दर्शयता, सततमुद्ग्रीवेण, स्फाटिककमण्डलुनाध्यासितवामकरतलः, स्कन्धदेशावलम्बिना कृष्णाजि-

---

[१] विभावसुः सूर्य्यः।

[२] उत्तप्तलोहमिव लोहिन्यः रक्तवर्णाः।

[३] खाण्डववनदाहेच्छुवह्नेः विप्ररूपेण पार्थानुसरणकथा भारते आदिपर्वणि २२२ अध्याये।

[४] त्रिः कृतं सत्यं, त्रिभिर्वाचा मनसा कायेन च वा कृतं त्रिसत्यम्।

नेन [१] नीलपाण्डुभासा तपस्तृष्णानिपीतेना [२] न्तरपगच्छता धूमपटलेनेव परीतमूर्त्तिः, अभिनवविसस्त्रनिर्मितेनेव परिलघुतया पवनलोलेन निर्मांसविरलपार्श्वपञ्जरमिव गणयता वामांसावलम्बिना यज्ञोपवीतेनोद्भासमानः, देवतार्च्चनार्थमागृहीतवनलताकुसुमपूर्णपर्णपुटसनाथशिखरेणाषाढ़दण्डेन, व्यापृतसव्येतरपाणिः विषाण [३] शिखरोत्खातामुद्दहता स्नानमृदमुपजातपरिचयेन नीवारमुष्टिसंवर्द्धितेन कुशकुसुमलतोपास्यमानलोलदृष्टिना [४] तपोवनमृगेणानुगम्यमानः, विटप इव कोमलवल्कलाहृतशरीरः, गिरिरिव समेखलः, [५] राहुरिवासकृदास्वादितसोमः [६] पद्मनिकर इव दिवसकरमरी-

---

[१] कृष्णाजिनं कृष्णसारमृगचर्म।

[२] तपसि या तृष्णा अतिलालसा तया निपीतेन। मुनिना अधोमुखतया धूमसेवनात् धूमस्यान्तर्गतत्वम्। तस्य च उदरे एकान्तराहित्यासम्भवाद्बहिरपगमनमुत्प्रेक्षितम्।

[३] विषाणं शृङ्गं तस्य शिखरमग्रम्। मृगस्य चिरपरिचितत्वात् तदीयस्नानार्थमृत्खनने प्रयत्नः।

[४] कुशकुसुमलतासु क्रियार्थमाक्रियमाणासु उपास्यमाना सामीप्येन दीयमाना तदास्वादनाभिलाषात् लोला दृष्टिश्चक्षुर्येन तेन।

[५] मेखला शैलनितम्बः, कटिबन्धनसूत्रञ्च।

[६] सोमः चन्द्रः, तदाख्यलतारसश्च।

चिपः [१] नदीतटतरुरिव सततजलक्षालनविरलजटः [२] करि-करभइव विकचकुमुददलशकलसितदशनः द्रौणिरिव कृपानुगतः [३] नक्षत्रराशिरिव चित्रमृगकृत्तिकाश्लेषोपशोभितः [४] घर्म्म-कालदिवसइव क्षयितदोषः [५] जलधरसमयइव प्रशमितरजः-प्रसरः [६] वरुणइव कृतोदवासः [७] हरिरिव अपनीतनरक-भयः [८] प्रदोषारम्भ इव सन्ध्यापिङ्गलतारकः प्रभातकालइव बालातपकपिलः रविरथइव दृढ़नियमिताक्षचक्रः [९] सुरा-जेव निगूढ़मन्त्रसाधनक्षयितविग्रहः [१०] जलधिरिव कराल-

---

[१] ऊर्द्ध्वमुखतया तपश्चरणात् मुनेः सूर्य्यरश्मिपानम् ।

[२] जटा परस्परसंबद्धकेशाः वृक्षमूलञ्च ।

[३] कृपा दया कृपः कृपाचार्य्यः शारद्वतः । द्रौणिरश्वत्थामा ।

[४] चित्रमृगस्य कृत्तिकायाश्चर्म्मणा आश्लेषेण, चित्रं चतुर्दशं, मृगः मृगशिराः पञ्चमं, कृत्तिका तृतीयम्, अश्लेषा नवमञ्च नक्षत्रं, ताभिश्च ।

[५] दोषा रात्रिः दोषाः अविनयादयश्च ।

[६] रजः धूलिः कामादिहेतुः रजोगुणश्च ।

[७] उदके वासः उदवासः मुनिपक्षे तु सः तपस्यार्थः ।

[८] नरकं पातकहेतुकलोकभेदः नरकासुरश्च तत्कथा हरिवंशे १२२ अध्याये ।

[९] अक्षं चक्रं रथाङ्गभेदः, अक्षाणामिन्द्रियाणां चक्रं संघश्च ।

[१०] निगूढ़ेन गुप्तेन अभीष्टदेवमन्त्रसाधनेन कृशीकृततनुः षाड़्गुण्यप्रयोगरूपमन्त्रणारूपकारणेन निवारितयुद्धश्च ।

शङ्खमण्डलावर्त्तनाभिगर्त्तः [१] भगीरथइव दृष्टगङ्गावतारः, [२] मधुकरइवासकृदनुभूतपुष्करवनवासः [३] वनचरोऽपि कृतमहालयप्रवेशः [४] असंयतोपि मोक्षार्थी [५] सामप्रयोग-परोऽपि [६] सततावलम्बितदण्डः, सुप्तोऽपि प्रबुद्धः [७] सन्नि-

---

[१] शङ्खः ललाटास्थि तन्मण्डले आवर्त्तते इत्यावर्त्तः नाभि-रिव गर्त्तः ककुन्दररूपश्चिह्नभेदो यस्य पक्षे करालं शङ्खमण्डलं यत्र तादृशः आवर्त्तः अम्भसां स्रुतो भ्रमणं सः नाभिगर्त्त इव यत्र।

[२] गङ्गावतारस्तीर्थविशेषः, गङ्गाया अवतरणं स्वर्गात् भूमौ निपतनञ्च।

[३] पुष्करं पद्मं तद्वने तत्समूहे वासः, पुष्करे, तीर्थभेदे वनेऽरण्ये च वासः।

[४] आलयो गृहम्, आलीयतेऽस्मिन् आलयः लयस्थानम् महालयः परमात्मा च।

[५] असंयतः बन्धनशून्यः अकारे विश्लेषे संयत इति च। मोक्षो-बन्धनराहित्यं, निःश्रेयसञ्च।

[६] सामवेदगानाभिज्ञः सामरूपगुणप्रयोक्ता च। दण्डः पालाशः, दमनोपायश्च।

[७] प्रबुद्धः जागरितः, आत्मस्वरूपाभिज्ञश्च स्वप्नावस्थायामपि तस्य तथात्वात् सुप्तोपीत्युक्तम्।

ऽहितनेत्रद्वयोऽपि परित्यक्तवामलोचनस्तदेव [१] कमलसरः सिस्नासुरुपागमत्।

प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि सतां खलु भवन्ति सदा चेतांसि। अतः स मां तदवस्थमालोक्य समुपजातदयः समीपतरवर्त्तिनमृषिकुमारकमन्यतममब्रवीत्, "अयं कथमपि शुकशिशुरसञ्जातपक्षपुट एव तरुशिखरादस्मात् परिच्युतः, श्येनमुखपरिभ्रष्टेन वाऽनेन प्रायोभवितव्यम्। तथाह्यस्याल्पशेषं जीवितम्, अयमामीलितलोचनो मुहुर्मुहुरत्युल्बणं निश्वसिति, मुहुर्मुहुर्मुखेन पतति, मुहुर्मुहुश्चञ्चुपुटं विवृणोति, न शक्नोति शिरोधरां धारयितुं, तदेहि यावदेवायमसुभिर्न विमुच्यते, तावदेव गृहाणैनमवतारय सलिलसमीपमिति" अभिधाय तेन [२] मां सरस्तीरमनाययत्। उपसृत्य च जलसमीपमेकदेशनिहित-दण्डकमण्डलुरादाय स्वयं मां मुक्तप्रयत्न [३] मुत्तानितमुखमङ्गुल्या कतिचित्सलिलविन्दूनपाययत्। अम्भःचोदकृतसेकञ्च समुपजातप्रज्ञमुपतटप्ररूढ़स्य नलिनीपलाशस्य जलशिशिरायां छायायां निधाय यथासमुचितमकरोत् स्नानविधिम्। अभि-

---

[१] नेत्रं लोचनं वस्त्रञ्च। वामं सव्यं विपरीतञ्च लोचनं नेत्रं आलोचनञ्च।

[२] तेन सहचारिणा मुनिवयस्येन प्रयोज्यकर्त्रा।

[३] अपरिचितग्रहणेनातिभयेन आतपसन्तापेन वा निश्चेष्टम्।

षेकावसाने च अनेकप्राणायाम [१] पूतोऽपि जपन्नघमर्षणानि [२]प्रत्यग्रभग्नैरम्बुरुहारविन्दैर्नलिनीपत्रपुटेन भगवते सवित्रे दत्त्वार्घमुदतिष्ठत्। आगृहीतधवलवल्कलस्सन्ध्येव तमहमिव सन्ध्यातपः, करतलनिर्धूत [३] विशदजटः कमण्डलुमापूर्य, कमलकिञ्जल्कसुरभिणा शुचिना सरोवारिणा प्रत्यग्रस्नानार्द्रजटेन सकलेन तेन मुनिकुमारककदम्बकेनानुगम्यमानो मां गृहीत्वा तपोवनाभिमुखं शनैःशनैरगच्छत्।

अनतिदूरमिव गत्वा दिशिदिशि सदासन्निहितकुसुमपटलैः, तालतिलकतालीतमालहिन्तालबकुलबहुलैः, एलालताकुलितनारिकेलकलापैः, आलोललोध्रलवलीलवङ्गपल्लवैः, उल्लसच्चूतरेणुपटलैः, अलिकुलझङ्कारमुखरसहकारैः [४] उन्मदकोकिलकुलकलालापकोलाहलिभिः, उत्फुल्लकेतकीकुसुममञ्जरीरजः-

---

[१] "गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम्। प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः" इति याज्ञवल्क्येन पूरणकुम्भकरेचनरूपप्राणायामस्य त्रिवारस्य विधानात् अनेकेत्युक्तम्।

[२] अघमर्षणानि आपोहिष्ठेत्यादिमन्त्रत्रयाणि तानि च ऋग्वेदे १० मण्डले ९ सूक्ते।

[३] निर्धूता निर्मृष्टा निःशेषितजलेत्यर्थः।

[४] भ्रमरझङ्कारेण मुखराः शब्दायमानाः सहकारा अलिसौरभाम्रा येषु।

पुञ्जपिञ्जरैः, [१] पूगीलतादोलाधिरूढ़वनदेवतैः, तारकावर्षमिवाधर्मविनाशपिशुनं [२] कुसुमनिकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिः, संसक्तपादपैः, काननैरुपगूढ़म्, अचकितप्रचलितकृष्णसारशतशवलाभिः, उत्फुल्लस्थलकमलिनीलोहिनीभिः, मारीच [३] मायामृगावलूनप्ररूढ़वीरुद्दलाभिः, दाशरथिचापकोटिक्षतकन्दरगर्त्त [४] विषमिततलाभिः, दण्डकारण्यस्थलीभिः, उपशोभितप्रान्तम्, आगृहीतसमित्कुशकुसुम-

---

[१] पिञ्जरैः मिश्रितवर्णैः।

[२] तारा इव जलमयमूर्त्तिमन्तोऽपि सूर्य्यकिरणेन दीप्तत्वात् तारकाः तस्यावर्षं पतनम्। नास्ति धर्मो यस्य अधर्मा क्षीणपुण्यः, तस्य विनाशश्चन्द्रलोकात् पतनं तस्य पिशुनं सूचकम्। जलमयमूर्त्तिमन्तः कर्मिणो हि यावत् पुण्यक्षयं चन्द्रलोके स्थित्वा कृशीभूता वायुवशतामवाप्य तच्चलिताः मर्त्यलोके पतन्ति "स यावत्सम्पातमुषित्वा क्षीणे पुण्ये वायोर्वशमेतीत्यादिछान्दोग्यश्रुतौ तेषां भूमौ पतनमुक्तम्" क्षीणे पुण्ये मर्त्यलोके विशन्तीति, स्मृतौ च तत्संवादितं तदनुसृत्योक्तम्। कर्मिणाञ्च जलमयमूर्त्तित्वेन शुभ्रत्वात् धवलकुसुमनिकरतुल्यत्वेन तथोत्प्रेक्षा। अनिलचलितमिति विशेषणञ्च कर्मिणां धर्मक्षयात् वायोर्वशताभिधानात् प्रपञ्चस्तु शारीरके ३ अध्याये।

[३] मारीचः ताड़कापुत्रः राक्षसभेदः स एव मायया मृगः मृगरूपः। तत्कथा च रामायणे आरण्यकाण्डे ४२ सर्गे।

[४] कन्दराकारः गर्त्तः कन्दरगर्त्तः।

न्द्भिः, अध्ययनमुखरशिष्यानुगतैः सर्वतः प्रचरद्भिः, मुनिभिरध्युष्योपकण्ठम्, उत्कण्ठितशिखण्डिमण्डलश्रूयमाणजलकलसपूरणध्वानम्, अनवरताज्याहुतिप्रीतैः, चित्रभानुभिः, [१] सशरीरमेव मुनिजनममरलोकं निनीषुभिः, उद्धूयमानधूमलेखाच्छलेनाबध्यमानस्वर्गमार्गगमनसोपानसेतु [२] मिवोपलक्ष्यमाणम्, आसन्नवर्त्तिनीभिः, तपोधनसम्पर्कादिवापगतकालुष्याभिः, तरङ्गपरम्परासंक्रान्तरविबिम्बपङ्क्तिभिः, तापसदर्शनागतसप्तर्षिमालाविगाह्यमानाभिरिव, अतिविकचकुमुदवनम्हषिजनमुपासितुमवतीर्णं, ग्रहगणमिव निशासूद्वहन्तीभिः, दीर्घिकाभिः, परिवृतम्, अनिलावनमितशिखाभिः प्रणम्यमानमिव, वनलताभिः, अनवरतशुक्लकुसुमैरभ्यर्च्यमानमिव पादपैः, आबद्धपल्लवपुटाञ्जलिभिरुपास्यमानमिव विटपैः, उटजाजिरप्रकीर्णशुष्यच्छ्यामाकम्, उपसंगृहीतामलकलवलीलवङ्गकर्कन्धूकदलीलकुचचूततालफलम्, अध्ययनमुखरवटुजनम्, अनवरतश्रवणगृहीतवषट्कारवाचालशुककुलम्, अनेकसारिकोद्घुष्यमाणसुब्रह्मण्यम्, अरण्यकुक्कुटोपभुज्यमानवैश्वदेव [३]

---

[१] चित्रभानुभिः वह्निभिः दक्षिणाग्निगार्हपत्याहवनीयैः।

[२] आबध्यमानः सोपानसेतुर्यत्र सेतुभिरिवेति पाठः सम्यक्।

[३] विश्वेदेवा देवता अस्य अण् पञ्चयज्ञान्तर्गतभूतोद्देश्यकान्नादिदानरूपः गृहस्थकृत्यभेदः।

बलिपिण्डम्, आसन्नवापीकलहंसपोतभुज्यमाननीवारबलिम्, एणीजिह्वापल्लवैरपलिह्यमानमुनिबालकम्, अग्निकार्य्यार्द्धदग्धशिमशिमायमानकुशसमित्कुसुमम्, उपलभग्ननारिकेलरसस्निग्धशिलातलम्, अचिरक्षुण्णवल्कलरसपाटलभूतलं, रक्तचन्दनोपलिप्तादित्यमण्डलनिहितकरवीरकुसुमम्, इतस्ततो विक्षिप्तभस्मरेखालङ्कृतमुनिजनभोजनभूमिभागं, परिचितशाखामृगकराकृष्टयष्टिनिष्क्राम्यमाणप्रवेश्यमानजरदन्धतापसम्, [१] इभकरभकार्द्धोपभुक्तपतितैः सरस्वतीभुजलताविगलितैः शङ्खवलयैरिव मृणालशकलैः कल्माषितम्, [२] ऋषिजनार्थमेणकैर्विषाणशिखरोत्खन्यमानविविधकन्दमूलम्, अम्बुपूर्णपुष्करपुटैर्वनकरिभिरापूर्य्यमाणविटपालवालकम्, ऋषिकुमारकाकृष्यमाणवनवराहदंष्ट्रान्तरालग्नशालूकम्, उपजातपरिचयैः कलापिभिः पक्षपुटपवनसन्धुक्ष्यमाणमुनिहोमहुताशनम्, आरब्धामृतचरुचारुगन्धम्, अर्द्धपक्वपुरोडाश [३] पुण्यपरिमलामोदितम्, अविच्छिन्नाज्यधाराहुतिहुतभुग्घङ्कारमुखरितम्, उपचर्य्यमाणातिथिवर्गं, पूज्यमानपितृदैवतम्,

---

[१] यत्राश्रमे जरतां वृद्धानामन्धानाञ्च मुनीनां निष्क्रामणप्रवेशौ वानरैरेव कराकृष्टयष्ट्या क्रियेते अन्येषां स्वस्वधर्मव्यासङ्गात् ।

[२] कल्माषितम् चित्रवर्णीकृतम् ।

[३] तण्डुलादिपक्वहवनीयभेदः पुरोडाशः ।

अर्च्यमानहरिहरपितामहम्, उपदिश्यमानश्राद्धकल्पं [१] व्याख्यायमानयज्ञविद्यम् [२] आलोच्यमानधर्मशास्त्रं, पठ्यमानविविधपुस्तकं, विचार्य्यमाणसकलशास्त्रार्थम्, आरभ्यमाणपर्णशालम्, उपलिप्यमानाजिरम्, अपमृज्यमानोटजाभ्यन्तरम्, आबध्यमानध्यानं, साध्यमानमन्त्रम्, अभ्यस्यमानयोगम्, [३] उपह्रियमाणवनदेवताबलिं, निर्व्वर्त्त्यमानमुञ्जमेखलं, प्रक्षाल्यमानवल्कलम्, उपसंगृह्यमाणसमिधं, संस्क्रियमाणकृष्णाजिनं, गृह्यमाणगवेधुकं, [४] शोष्यमाणपुष्करवीजं, ग्रथ्यमानाक्षमालं, [५] गृह्यमाणत्रिपुण्ड्रकं [६] न्यस्यमानत्रिदण्डकम्, [७] आपूर्य्यमाणकमण्डलुम्, अदृष्टपूर्व्वं कलिकालस्य, अपरिचितम-

---

[१] श्राद्धकल्पः श्राद्धानुष्ठानतद्देवतादिज्ञापकशास्त्रम्।

[२] यज्ञविद्या अश्वमेधादियज्ञविधायकशास्त्रम्।

[३] योगश्चित्तवृत्तिनिरोधः।

[४] गवेधुका धान्यभेदः (गड़गड़े)

[५] अक्षमाला जपमाला सा चाकारादिक्षकारपर्य्यन्तवर्णोच्चारणेन ग्रथितत्वादक्षमालेति संज्ञिता।

[६] पुण्ड्र इक्षुभेदः स इव पुण्ड्रकम् ललाटे तिर्य्यक् त्रिपुण्ड्राकारेण तिलकभेदः।

[७] त्रयाणां कायवाक्चित्तानां दण्डः त्रिदण्डः न्यस्यमानः अभ्यमानस्त्रिदण्डो यत्र कम्।

न्तस्य, अश्रुतपूर्व्वमनङ्गस्य, अब्जयोनिमिव त्रिभुवनवन्दितम्, असुराअरिमिव प्रकटितवराहनरसिंहरूपं [१] सांख्यमिव कपिलाधिष्ठितं, [२] मथुरोपवनमिव बलावलीढ़दर्पितधेनुकम् [३] उदयनमिवानन्दितवत्सकुलं, [४] किम्पुरुषाधिराज्यमिव मुनिजनगृहीतजलकलसाभिषिच्यमानद्रुमं, [५] निदाघसमयावसानमिव आसन्नजलप्रपातं, [६] जलधरसमयमिव वनगहनमध्यसुखप्रसुप्तहरिम्, [७] अनिलसुतमिव शिलाशकलप्रहारसंचूर्णिताक्षास्थिसञ्चयं, [८] खाण्डवविनाशोद्यतार्ज्जुनमिव प्रा-

---

[१] आश्रमपक्षे वराहाः नराः सिंहाः रूपाः मृगाश्च एतेषां परस्परविरोधित्वेऽपि एकत्रावस्थानात् शान्तत्वं वर्णितम्।

[२] कपिलो भगवदवतारभेदः। कपिला सततदोह्या धेनुभेदश्च।

[३] बलो बलभद्रः तपःसामर्थ्यत्वाच्च धेनुका गण्डकस्त्री धेनुकः असुरभेदश्च तत्कथा हरिवंशे ७० अध्याये।

[४] उदयनः वत्सराजः। वत्सः क्षत्रियवंशभेदः गोशावकश्च।

[५] द्रुमः वृक्षः किंपुरुषाधीश्वरभेदश्च।

[६] प्रपातः पतनम्। प्रत्यासन्नं जलं भृगुप्रदेशश्च यस्य "प्रपातस्त्वतटो भृगु"रित्यमरः।

[७] वनं काननं वर्षाजलञ्च। हरिः सिंहः विष्णुश्च "शेते विष्णुः सदाषाढ़े" इत्यादि स्मृतेस्तस्य तदानीं सुप्तता।

[८] अनिलसुतं हनुमन्तम्। अक्षो बिभीतकः रावणसुतभेदश्च तत्कथा रामायणे सुन्दरकाण्डे ४७ सर्ग।

रश्याग्निकार्य्यं, [१] सुरभिविलेपनधरमपि सतताविर्भूतधूम्र-गन्धं, मातङ्गकुलाध्यासितमपि [२] पवित्रम् उल्लसितधूमकेतु-शतमपि [३] प्रशान्तोपद्रवं, परिपूर्णद्विजपति [४] मण्डल सनाथमपि सदासन्निहितमलग्गहनान्धकारम्, अतिरमणीय-मपरमिव ब्रह्मलोकमाश्रममपश्यम्।

यत्र च मलिनता [५] हविर्धूमेषु, न चरितेषु, मुखरागः [६] शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्च-लता कदलीदलेषु न मनःसु, चक्षूरागः [७] कोकिलेषु न पर-कलत्रेषु, कण्ठग्रहः कमण्डलुषु न सुरतेषु, मेखलाबन्धो व्रतेषु, नेर्ष्याकलहेषु [८] स्तनस्पर्शो होमधेनुषु, न वनितासु पक्ष-

---

[१] अग्नौ कार्य्यं होमादि अग्नेः कार्य्यं खाण्डवदाहनञ्च भार-तादिपर्वणि २२३ अध्याये तत्कथा।

[२] मातङ्गः चण्डालः हस्ती च।

[३] धूमः केतुरिव, लोकोपप्लवसूचकः ताराभेदश्च।

[४] द्विजपतिः चन्द्रः विप्रश्रेष्ठश्च मण्डलं चक्रवालं समूहश्च।

[५] मलिनता कृष्णता पापादिदोषवत्त्वञ्च।

[६] मुखे रागो रक्तवर्णता।

[७] चक्षुषि रागः रक्तवर्णता नेत्राकर्षकानुरागश्च।

[८] मौञ्ज्या मेखलाया बन्धः ब्रह्मचर्य्यहेतुकः मेखलया स्त्रीकटिकाञ्च्या च बन्धः।

पातः [१] क्षकवाकुषु, न विद्याविवादेषु, भ्रान्ति [२]रनलप्रदक्षिणेषु न शास्त्रेषु, वसु [३] सङ्कीर्त्तनं दिव्यकथासु न धनतृष्णासु, गणना [४] रुद्राक्षवलयेषु न शरीरेषु, मुनिबालनाशः [५] क्रतुदीक्षया न मृत्युना, रामानुरागो [६] रामायणेन न यौवनेन, मुखभङ्गविकारो [७] जरया न धनाभिमानेन। यत्र च महाभारते शकुनिबधः, [८] पुराणे वायुप्रलपितं, [९] वयःपरिणामे द्विजपतनम्, [१०] उपवनचन्दनेषु

---

[१] पक्षेण पातः पतनं वादिप्रतिवादिनोरेकतरपक्षे आनुकूल्यकरणञ्च।

[२] भ्रान्तिः भ्रमणं, अतथाभूते तथारूपेण ज्ञानञ्च।

[३] वसूनि धनानि, वसवः देवगणभेदाश्च।

[४] गणना जपार्थसंख्याकरणम् "असंख्यातञ्च यज्जप्तं निष्फलं तत् प्रकीर्त्तितम्" इत्युक्तेः तत्संख्याकरणम्, गणना आदरश्च।

[५] बालः केशः शिशुश्च। दीक्षया व्रतधारणनियमभेदेन तत्र च पूर्वदिवसे केशवपनं शास्त्रविहितम्।

[६] रामो दाशरथिः रामा वनिता च।

[७] मुखस्य भङ्गः अवयववैशेष्यम् अवमाननासूचकचेष्टाविशेषश्च।

[८] शकुनिः सुबलराजपुत्रः, पक्षी च।

[९] वायुना देवभेदेन प्रलपितं वायुनैव वायुपुराणप्रणयनात् अनर्थकं वचनञ्च।

[१०] द्विजपतनं दन्तपतनं ब्राह्मणपातित्यं च।

जाद्यम् [१] अग्नीनां भूतिमत्त्वम् [२] एणकानां गीतव्यसनं शिखण्डिनां नृत्यपक्षपातः [३] भुजङ्गमानां भोगः [४] कपीनां श्रीफलाभिलाषः [५] मूलाना मधोगतिः [६]।

तस्य चैवंविधस्य, मध्यभागमलंकुर्व्वाणस्य अलक्तकालोहित-लोलपल्लवस्य, मुनिजनावलम्बितकृष्णाजिनजलकरङ्कसनाथ-शाखस्य, तापसकन्यकाभिर्मूलभागदत्तपीतपिष्टातकानेकपञ्चाङ्गु-ल[७]स्य, हरिणशिशुभिः परिपीयमाणावालसलिलस्य, मुनिकु-मारकाबद्धकुशचीरदाम्नः, हरितगोमयोपलिप्तविविक्तभूतलस्य, तत्क्षणरचितकुसुमोपहाररमणीयस्य, नातिमहतः परिमण्डल-तया विस्तीर्णावकाशस्य, रक्ताशोकतरोरधश्छायायामुपविष्टम्, अत्युग्रतपोभिर्भुवनमिव सागरैः कनकगिरिमिव कुलाचलैः, [८] क्रतुमिव वैतानवह्निभिः, [९] कल्पान्तदिवसमिव रविभिः, का-

---

[१] जाद्यं शीतलता। अतिमूर्खता च तत्तु न चित्तेषु।

[२] भूतिर्भस्म सम्पदश्च।

[३] पक्षस्य गरुतः पातः विस्तारणं, पक्षपातः आसक्तिश्च।

[४] भोगः फणकायादिः स्त्र्यादिसुखानुभवश्च।

[५] श्रीफलं विल्वफलं श्रियाः लक्ष्म्याः फलञ्च।

[६] अधोगतिः भूमेरधोगमनं नरकगमनञ्च।

[७] मङ्गलाकारश्चिह्नभेदः (आलिपना)

[८] कुलाचलः २ पृष्ठे प्रागुक्ताः।

[९] वैतानैर्यज्ञसम्बन्धिभिः वह्निभिः।

लमिव कल्पैः, [१] समन्तान्महर्षिभिः परिवृतम्, उग्रशापभीतयेव कम्पितदेहया, प्रणयिन्येव विहितकेशग्रहया, क्रुद्धयेव कृतभ्रूभङ्गया, मत्तयेवाकुलितगमनया, प्रसाधितयेव प्रकटिततिलकया [२] जरया, गृहीतव्रतयेव भस्मधवलया, धवलीकृतविग्रहम्, आयामिनीभिः पलितपाण्डुराभिः, तपोभिर्विजित्य मुनिजनमखिलं धर्म्मपताकाभिरिवोपार्ज्जिताभिः, अमरलोकमारोढुं पुण्ये रज्जुभिरिवोपसंगृहीताभिः, अतिदूरप्रवृद्धस्य तपस्तरोः कुसुममञ्जरीभिरिवोद्गताभिर्जटाभिरुपशोभमानम्, उपरचितभस्मत्रिपुण्ड्रकेण तिर्य्यक्प्रवृत्तगङ्गास्रोतस्त्रयेण हिमगिरिशिलातलेनेव ललाटपट्टेनोपेतम्, अधोमुखचन्द्रकलाकाराभ्यामवलम्बितबलिशिथिलाभ्यां भ्रूलताभ्यामवष्टभ्यमानदृष्टिम्, अनवरतमन्त्राभ्यासविवृताधरपुटतया निष्पतद्भिरतिशुचिभिः सत्यप्ररोहैरिव स्वच्छेन्द्रियवृत्तिभिरिव विद्यागुणैरिव करुणारसप्रवाहैरिव दशनमयूखैर्धवलितपुरोभागम्, उद्वमदमलगङ्गाप्रवाहमिव[३] जह्नुम्, अविरलसोमोद्गारसुगन्धिनिश्वासावकृष्टैर्म-

[१] कल्पाः ब्रह्मणो दिनानि प्रलयकालाः।

[२] तिलकं अनुलेपनभेदः, स्त्रता गात्रोत्थितविकृतचिह्नभेदश्च (तिल)

[३] उद्वमन् दक्षकर्णरन्ध्रेण निःसार्य्यमाणत्वेन उद्गच्छन् गङ्गाप्रवाहो यस्य। "वैशाखशुक्लसप्तम्यां मुनिना जह्नुना पुरा। आदौ पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणादिति।"

र्त्तिमद्भिः शापाक्षरैरिव [१] सदा मुखभागसन्निहितैः परिस्फुरद्भिरलिभिरविरहितम्, अतिकृशतया निम्नतरगण्डगर्त्तत्वमुन्नतहनुघोणम्, आकरालतारकम्, अवशीर्य्यमाणविरलनयनपक्ष्ममालम्, उद्गतदीर्घरोमरुद्धश्रवणविवरम्, आनाभिलम्बितकूर्च्च [२] कलापमाननमादधानम्, अतिचपलानामिन्द्रियाणामन्तःसंयमनरज्जुभिरिवाततताभिः कण्ठनाड़ीभिर्निरन्तरावनद्धकन्धरम्, उन्नतविरलास्थिपञ्जरम्, अंसालम्बितधवलयज्ञोपवीतम्, अनिलवशजनिततनुतरङ्गभङ्गम् [३] उत्प्लवमाननवमृणालमिव मन्दाकिनीप्रवाहमकलुषमङ्गमुद्वहन्तम्, अमलस्फटिकशकलघटिताक्षवलयमुज्ज्वलस्थूलमुक्ताफलग्रथितं सरस्वतीहारमिव चलदङ्गुलिविवरगतमावर्त्तयन्तम्, अनवरतभ्रमिततारकाचक्रमपरमिव ध्रुवम्, [४] उल्लसता शिराजालकेन जरत्कल्पतरुमिव परिणतलतासञ्चयेन निरन्तरनिचितम्, अमलेन चन्द्रांशुभिरि-

---

[१] शापाक्षराणां तपोभ्रंशहेतुकतया पापजनकत्वात् मालिन्यम्। तेनालीनां तथात्वेनोत्प्रेक्षा।

[२] कूर्चकलापः श्मश्रुसञ्चयः।

[३] वायुबलजनितेन स्वल्पतरङ्गेण भङ्गो द्वैधीभावो यस्य उत्प्लवमानं जलोपरि तरत् नवमृणालं यत्र।

[४] ध्रुवतारकं नेमीकृत्य प्रवहानिलेन तारकासंघाश्रितचक्रस्य सदा भ्रमणम् ज्योतिषे प्रसिद्धम्।

वामृतफेनैरिव गुणसन्तानतन्तुभिरिव निर्मितेन मानससरो-
जलक्षालनशुचिना दुकूलवल्कलेन द्वितीयेनेव जराजालकेन
संच्छादितम्, आसन्नवर्त्तिना मन्दाकिनीसलिलपूर्णेन त्रिदण्डो-
पविष्टेन स्फाटिककमण्डलुना विकचकमलराशिमिव राजहंसे-
नोपशोभमानम्, अवनेः स्थैर्य्येण, सागराणां गाम्भीर्य्येण, तेजसा
सवितुः, प्रशमेन तुषाररश्मेः, निर्मलतयाम्बरतलस्य, संविभाग-
[१]मिव कुर्व्वाणं, वैनतेयमिव स्वप्रभावोपात्तसकलद्विजाधिपत्यं,
[२]कमलासनमिवाश्रमगुरुं, [३] जरच्चन्दनतरुमिव भुजगनि-
र्मोकधवलजटाकुलं, [४] प्रशस्तवारणमिव प्रलम्बकर्णतलं, बृह-
स्पतिमिव आजन्मसंवर्द्धितकचं, [५] दिवसमिवोद्यदर्कविम्बभा-
स्वरमुखं, [६] शरत्कालमिव क्षीणवर्षं, [७] शान्तनुमिव प्रिय-

---

[१] संविभागं प्रतिस्पर्द्धितां कुर्वाणं तुल्यमित्यर्थात्।

[२] द्विजाः ब्राह्मणाः पक्षिणश्च।

[३] आश्रमाः ब्रह्मचर्य्यादयः मुन्याद्याधारमठाश्च।

[४] निर्मोकः कञ्चुकं धवलशिफाश्च ताभिः, निर्मोकइव धवला-
जटास्ताभिश्चाकुलम्।

[५] कचः केशः बृहस्पतितनयश्च। तत्कथा भारते आदिपर्वणि
७६ अध्याये।

[६] मुखमाननं प्रथमभागश्च।

[७] वर्षा जलवर्षणं वर्षाः आयुःप्रमाणवत्सराश्च।

सत्यव्रतम्, [१] अम्बिकाकरतलमिव रुद्राक्षग्रहणनिपुणं, [२] शिशिरसमयसूर्य्यमिव कृतोत्तरासङ्गम्, [३] और्व्वानलमिव सततपयोभक्ष्यं, [४] शून्यनगरमिव दीनानाथविपन्नशरणं, [५] पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं, [६] भगवन्तं जाबालिमपश्यम्।

अवलोक्य चाहमचिन्तयम्। अहो प्रभावस्तपसाम्, इयमस्य शान्तापि मूर्त्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामनीव चक्षुषः प्रतिहन्ति तेजांसि, सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य। शुष्कनलकाशकुसुमनिपति

---

[१] सत्यव्रतो भीष्मः सत्यरूपं व्रतञ्च।

[२] रुद्रस्य अक्षि चक्षुः रुद्राक्षम् तन्नामकवृक्षवीजञ्च ग्रहणं रु आच्छादनार्थं, जपार्थञ्च धारणम्।

[३] उत्तरासङ्गमुत्तरीयम् उत्तरस्यां दिशि आसङ्गः आसक्ति शिशिरसमये माघे एव रवेः उत्तरायणं ज्योतिषे प्रसिद्धम्।

[४] पयः दुग्धं व्रतार्थे तत्पानमेव सततमनुष्ठीयते भक्ष्यान्तराभावात्तदेव भक्ष्यस्थानीयम्, पयः जलञ्च वाड़वाग्नेः तत्कथा भारते आदिपर्व्वणि १८० अध्याये।

[५] शरणं गृहम् आश्रयम् शरण्यं त्राणकर्त्तारञ्च।

[६] भस्मनेव भस्मना वा पाण्डुभिः रोमभिः, भस्मपाण्डुरा उमया च।

तानलचटुल [१] वृत्ति नित्यमसहिष्णु तपस्विनां प्रतनुतपसामपि तेजः प्रकृत्या दुःसहं भवति, किमुत सकलभुवनवन्दितचरणानामनवरततपःसलिलक्षालितमलानां, (क) करकमलतलामलकफलवद्(ख)खिलं जगदालोकयतां दिव्येन चक्षुषा, भगवतामेवंविधानामघक्षयकारणानि (ग) पुण्यानि (घ) नामग्रहणान्यपि महा(ङ)मुनीनां, किं पुनर्दर्शनानि, धन्यमिदमाश्रमपदमयमधिपतिर्यत्र। अथ वा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना। पुण्यभाजः खल्वमी मुनयः, यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारामुखकमलावलोकननिश्चलदृष्टयः पुण्याः कथाः शृण्वन्तः पर्य्युपासते। सरस्वत्यपि धन्या, यदस्मिन् (च) सततमतिप्रसन्ने [२]

(क) तपःक्षपितमलानामिति पाठान्तरम्।

(ख) फलेति पुस्तकान्तरे नास्ति।

(ग) कारणानीति पाठान्तरम्।

(घ) पुस्तकान्तरे हि इत्येतदधिकं दृश्यते।

(ङ) पुस्तकान्तरे महेत्येतत् नास्ति।

(च) या तु अस्य इति पाठान्तरम्।

[१] नलस्तृणभेदः काष्ठः प्रसिद्धः। चटुलः उग्रः।

[२] अतिप्रसादयुक्ते कालुष्यरहिते, दयादाक्षिण्यादयः चित्तस्य प्रसादाः ईर्ष्यादि च कालुष्यम्।

करुणाजलनिस्यन्दिन्यगाधगाम्भीर्य्ये [१] रुचिरद्विजकुलपरिचये [२] (क) मुखकमलसम्पर्कसुखम(ख)नुभवन्ती निवसति राजहंसीव मानसे। चतुर्मुखमुखकमलवासिभिर्वेदैः (ग) सुचिरादिदमपर(घ)मुचितमासादितं स्थानम्, एनमासाद्य शरत्कालमिव कलिकालजलधर(ङ)समयकलुषिताः [३] प्रसाद[४]मुपगताः पुनरपि जगति सरितइव सर्व्वविद्याः। नियतमिह सर्व्वात्मना कृतावस्थितिना भगवता परिभूतकलिकालविलसितेन धर्म्मेण न स्मर्य्यते कृतयुगस्य। धरणीतलमनेनाधिष्ठितमालक्ष्य न वहति नूनमिदानीं सप्तर्षि-

---

(क) परिचये इत्यत्र परिवार इतिपाठान्तरम्।

(ख) पुस्तकान्तरे सुखमित्येतत् नास्ति।

(ग) चतुर्भिर्वेदैरिति क्वचित्पाठः।

(घ) सुचिरादिव द्वितीयमपरमिति च पाठः।

(ङ) जलसमय इति च पाठः।

[१] गाम्भीर्य्यं दुरवबोधाशयता निम्नत्वञ्च।

[२] द्विजाः ब्राह्मणाः पक्षिणश्च।

[३] कलिकालः जलधरइव मालिन्यात्। कालुष्यमस्वच्छता ईर्ष्यादिदोषवत्त्वञ्च।

[४] "प्रससारोदयादम्भः कुम्भयोनेर्महौजस" इत्यभिधानात् शरदि सरितां जलप्रसादः कविसम्प्रदायप्रसिद्धः।

मण्डलनिवासाभिमानमम्बरतलम्। अहो महासत्त्वेयं जरा यास्य प्रलयरविकर(क)निकरदुर्निरीक्ष्ये रजनिकरनिकरपाण्डुरे (ख) जटाभारे फेनपुञ्जधवला गङ्गेव पशुपतेः क्षीराहुति-रिव शिखाकलापे विभावसोर्निष्पतन्ती न भीता। बहु-लाज्यधूमपटलमलिनीकृताश्रमपदस्य भगवतः प्राभावा-ङ्गीतभीतमिव रविकिरणजालकमपि दूरतः परिहरति तपोवनम्। एते च पवनलोलशिखाजटिला रचिता(ग)ञ्जल-यइवात्र मन्त्रपूतानि हवींषि प्रतिगृह्णन्त्येतत्प्रीत्याशुशुक्ष-णयः [१] (घ)। तरलितदुकूलवल्कलोऽयमाश्रमलताकुसुमसु-रभिपरिमलोमन्दमन्दसञ्चारी (ङ) सशङ्क इवास्य समीपमुप-सर्पति गन्धवाहः। प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि, यतः सर्वतेजस्विनामयमग्रणीः द्वित्त्व-र्य्यमिवाभाति जगदनेनाधिष्ठितं महात्मना, निष्कम्पेव (च)

(क) प्रलयरविरश्मीति पाठान्तरम्।

(ख) रजनिकरनिकरपाण्डुरे इति पुस्तकान्तरे नास्ति।

(ग) लोलपुञ्जितशिखाकलापारचितेति वा पाठः।

(घ) एतत्प्रदत्तानि आशुशुक्षणयः इति पाठान्तरम्।

(ङ) सञ्चार इति वा पाठः।

(च) निष्कण्टकेवेति पाठः।

[१] आशुशुक्षणयः दक्षिणाग्निप्रभृतयः वह्नयः।

क्षितिरेतदवष्टम्भात् (क)। एष प्रवाहः (ख) करुणारसस्य, सन्तरणसेतुः संसारसिन्धोः, आधारः क्षमाम्भसां, परशु-स्तृष्णालतागहनस्य, सागरः सन्तोषामृतस्य उपदेष्टा सिद्धि-[१] मार्गस्य, अस्तगिरिरसद्ग्रहस्य, मूलमुपशमतरोः, नाभिः [२] प्रज्ञाचक्रस्य, प्रासादो (ग) धर्मध्वजस्य, तीर्थः [३] सर्वविद्यावताराणां, वाड़वानलो लोभार्णवस्य, निकषो-पलः शास्त्ररत्नानां, दावानलो रागपल्लवस्य, महामन्त्रः क्रोधभुजङ्गमस्य, दिवसकरो मोहान्धकारस्य, अर्गलबन्धो नरक-द्वाराणां, कुलभवन [४] माचाराणाम्, आयतनं मङ्गलानाम्, अभूमिर्मदविकाराणां, दर्शकः सत्पथानाम्, उत्पत्तिः

(क) एव इत्यधिकः पाठः।

(ख) प्रभवः इति पाठः।

(ग) स्थितिवंशस्य इति पाठः। स्थितिर्मर्य्यादा

[१] "ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः, दानञ्च सिद्धयोऽष्टाविति मुख्याः साङ्ख्यशास्त्रोक्ताः, अणिमाद्यष्टविधाश्च शास्त्रे वा सिद्धयः तन्मार्गस्य तद्धेतोर्यमनियमादेः।

[२] प्रज्ञा चक्रमिव सततगतिमत्त्वात् नाभिर्नेमिरिवाश्रय इत्यर्थः।

[३] तीर्थः जलाशय इव पावनम् सर्वविद्याः अवतारा जलावत-रणसोपानानीव तेषाम्।

[४] कुलरूपं भवनम् आचाराणां यथा कुलमेव निदानमेवं सर्वा-चाराणां स निदानमिति।

साधुतायाः, नेमिः [१] उत्साहचक्रस्य, आश्रयः सत्त्वस्य, [२] चेत्रमार्ज्जवस्य, प्रभवः (क) पुण्यसञ्चयस्य, अदत्तावकाशो मत्सरस्य, अरातिर्विपत्तेः, अस्थानं परिभूतेः, अननुकूलोऽभिमानस्य, असम्मतो दैन्यस्य, अनायत्तो रोषस्य, अनवकाशो विषयाणाम् [३] अनभिमुखः सुखानाम्।

अस्य भगवतः प्रभावादेवो(ख)पशान्तवैरमपगतमत्सरं तपोवनम् अहो प्रभावः महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तान्तरात्मानस्तिर्य्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति। तथाहि एष विकचोत्पलवनरचना(ग)नुकारिणमुत्पतच्चारुचन्द्रक[४]शतं हरिणलोचनद्युतिशवलमभिनवशाद्वलमिवाधिवसति शिखिनः कलापमातपाहतो निःशङ्कमहिः, अयमुत्सृज्य मातरमनुपजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः

(क) प्रसवः इति वा पाठः।

(ख) प्रभावादेतदपीति वा पाठः।

(ग) उत्पलिनीवनानुकारिणमिति वा पाठः।

[१] उत्साहस्चक्रमिव सततमावृत्तत्वात् तस्य नेमिर्नाभिस्थानमिवाश्रय इत्यर्थः।

[२] सत्त्वं ज्ञानादिसाधनं बुद्धिगुणभेदः।

[३] विषयाः शब्दस्पर्शरूपरसगन्धभोगाः।

[४] चन्द्रकं मयूरपुच्छादिस्थचन्द्राकारः पदार्थः (चाँद)

प्रस्नुतक्षीरधारमापिबति कुरङ्गशावकः सिंहीस्तनम्। एष मृणालकलापाशङ्किभिः शिशिरकर(क)धवलं जटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमाणं मृगपतिः। इदमिह कपिकुलमपगतचापलमुपनयति मुनिकुमारकेभ्यः स्नातेभ्यः फलानि। एते च न निवारयन्ति मदान्धा अपि गण्डस्थलीभाञ्जि मदजलपाननिश्चलानि मधुकरकुलानि जातदयाः कर्णतालैः करिणः। किं बहुना तापसाग्निहोत्रधूमलेखाभिः सर्पन्तीभिरहर्निशमुपपादितकृष्णाजिनोत्तरासङ्गशोभनाः फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इवास्य भगवतः समीपवर्तिनोऽत्र लक्ष्यन्ते किं पुनः सचेतनाः प्राणिनः।

इत्येवं चिन्तयन्तमेव मां तस्यैव रक्ताशोकतरोश्छायायामेकदेशे स्थापयित्वा हारीतः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीपवर्त्तिनि कुशासने समुपाविशत्। आलोक्य तु मां ते मुनयः सर्वएव कुतोऽयमासादितः शुकशिशुरिति तमासीनमपृच्छन्। असौ तु तानब्रवीत्। अयं मया स्नातुमितो गतेन कमलिनी[१]सरस्तीरतरुनीड़पतितः शुकशिशुरातपजनितक्लान्तिरुत्तप्तपांशुपटलमध्यगतो दूरनिपतितविकलतनुरल्पा-

(क) मृणालशङ्किभिः शिशिरकलापकरेति पाठान्तरम्।

[१] कमलिनीप्रधानं सरः पद्मसरइत्यर्थः कमलवत्त्वात् पम्पेवेह कमलिनी तदन्तर्गतं सरो वा।

वशेषायुरासादितः, तपस्विदुरारोहतया च तस्य वनस्पतेर्न शक्यते स्वनीड़ [१] मारोपयितुमिति जातदयेनानीतः, तद्यावदयमप्ररूढ़पक्षतिरक्षमोऽन्तरीक्षमुत्पतितुं, तावदत्रैव कस्मिंश्चिदाश्रमतरुकोटरे मुनिकुमारकैरस्माभिश्चोपनीतेन नीवारकणनिकरेण विविधफलरसेन च संवर्द्ध्यमानो, धारयतु जीवितम्। अनाथपरिपालनं हि धर्मोऽस्मद्विधानाम्। उद्भिन्नपक्षतिस्तु गगनतलसञ्चरणसमर्थो यास्यति यत्रास्मै रोचिष्यते, इहैव वा समुपजातपरिचयः स्थास्यति। इत्येवमादिकमस्मत्सम्बद्धालापमाकर्ण्य किञ्चिदुपजातकुतूहलो भगवान् जाबालिरीषदावलितकन्धरः पुण्यजलैः प्रक्षालयन्निव मामतिप्रशान्तया दृष्ट्या सुचिरमभिजातप्रत्यभिज्ञ [२] इव पुनः पुनर्विलोक्य स्वस्यैवाविनयस्य फलमनेनानुभूयत इत्यवोचत्। स हि भगवान् कालत्रयदर्शी तपःप्रभावाद्दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदालोकयति, वेत्ति च जन्मान्तराण्यप्यतीतानि, कथयत्यागामिनमप्यर्थम्, ईक्षणगोचरगतानाञ्च प्राणिनामायुषः प्रमाणमावेदयति। ततः सर्वैव तापसपरिषत् श्रुत्वा विदिततत्प्रभावा कोदृशोऽनेनाविनयः कृतः किमर्थं? वा कृतः, क? वा

---

[१] स्वस्य शुकस्य नीड़ं वासस्थानम्।

[२] प्रत्यभिज्ञा पूर्वानुभूतस्य चक्षुरादिसन्निकर्षे सोऽयमित्याकारकज्ञानम्।

कृतो, जन्मान्तरे वा कोऽयमासीदिति कुतूहलिन्यभवत्, असकृदुपयाचितवती च तं भगवन्तम्, आवेदय प्रसीद भगवन्! कीदृशस्याविनयस्य फलमनेनानुभूयते कश्चायमासीज्जन्मान्तरे, विहगजातौ वा कथमस्य सम्भवः, किमभिधानो वायम्, अपनयतु नः कुतूहलम् आश्चर्य्याणां हि सर्व्वेषां भगवान् प्रभवः।

इत्येवमुपयाचितस्तपोधनपरिषदा स महामुनिरवदत् अतिमहदिदमाश्चर्य्यमाख्यातव्यम् अल्पशेषमहः प्रत्यासीदति च नः स्नानसमयो भवतामप्यतिक्रामति देवार्च्चनविधिवेला तदुत्तिष्ठन्तु भवन्तः सर्व्वएव तावदाचरन्तु यथोचितं दिवसव्यापारम्, अपराह्णसमये भवतां पुनः कृतफलमूलाशनानां विश्रब्धोपविष्टानामादितः प्रभृति सर्व्वमावेदयिष्यामः। योऽयं, यच्च कृतमनेनापरस्मिन् जन्मनि, इह लोके च, यथास्य सम्भूतिः। अयञ्च तावदपगतक्लमः क्रियतामाहारेण। नियतमयमप्यात्मनो जन्मान्तरवृत्तं स्वप्नोपलब्धमिव मयि कथयति सर्व्वमशेषतः स्मरिष्यतीत्यभिदधदेवोत्थाय सह तैर्मुनिभिः स्नानादिकं दिवसव्यापारमकरोत्।

अनेन समयेन परिणतो दिवसः। स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयता यः क्षितितले दत्तस्तमम्बरतलगतः साक्षादिव रक्तचन्दनाङ्गरागं रविरुद्वहत्। ऊर्द्ध्वमुखैरर्कबिम्बनिहितदृष्टिभिरूष्मपैः [१] स्तपोधनैरिव परिपीयमाणतेजःप्रसरो

[१] उष्मं सूर्य्यकिरणं पिबन्ति उष्मपाः भृगुपुत्रभेदाः।

विरलातप(क)स्तनिमान [१] मभजत्। उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेव संहृतपादः [२] पारावतचरणपाटलरागो रविरम्बरतलादलम्बत। आलोहितांशुजालं, जलशयनमध्यगतस्य मधुभिदो विगलन्मधुधारमिव नाभिनलिनं, प्रतिमागतमपरार्णवे, सूर्य्यमण्डलमालच्यत (ख)। विहाय धरातलमुन्मुच्य कमलिनीवनानि शकुनयइव दिवसावसाने तपोवनतरुशिखरेषु पर्वताग्रेषु च रविकिरणाः स्थितिमकुर्व्वत। आलग्नरक्तातप(ग)च्छेदा मुनिभिरालम्बितलोहितवल्कलाइवाश्रमतरवः क्षणमशोभन्त (घ)। अस्तमुपगते च भगवति सहस्रदीधितावपरार्णवतटादुल्लसन्ती (ङ) विद्रुमलतेवापाटला सन्ध्या समदृश्यत। यस्यामाबध्यमानध्यानम्, एकदेशदुह्यमानहोमधेनुदुग्धधाराध्वनिमनोहरम्, अग्निहोत्रवेदिविप्रकीर्य्यमाणहरित्कुशम्, ऋषिकुमारिकाभिरितस्ततो विक्षिप्यमाणदिग्दे-

---

(क) तपदिवस इति च पाठः।

(ख) अवैच्यत इति च पाठः।

(ग) गभस्तीत्यधिकः पाठः।

(घ) अलच्यन्तेति च पाठः।

(ङ) उपसर्पन्तीति पाठान्तरम्।

[१] तनिमानं कृशत्वम्।

[२] पादः किरणः चरणश्च।

वतार्च्चनबलिसिक्थकम् (क) [१] आश्रमपदमभवत्। क्वापि वि-हृत्य दिवावसाने लोहिततारका [२] तपोवनधेनुरिव कपिला परिवर्त्तमाना सन्ध्या (ख) मुदितैस्तपोधनैरदृश्यत। अचिरप्रोषिते च (ग) सवितरि शोकविधुरा कमलमुकुलकमण्डलु-धारिणी, हंससितदुकूलपरिधाना, मृणालधवलयज्ञोपवी-तिनी, मधुकरमण्डलाक्षमालावलयमुद्वहन्ती, कमलिनी रवि(घ)समागमव्रतमिवाचरत्। अपरसागराम्भसि पतिते दिवसकरे (ङ) पतङ्ग[३]वेगोत्थितमम्भःशीकरनिकरमिव तारा-गणमम्बर(च)मधारयत्। अचिराच्च सिद्धकन्यकाविक्षिप्तसन्ध्या-र्च्चनकुसुमशबलमिव सतारं वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोर्द्ध्वविकीर्णैः प्रणामाञ्जलिसलिलैः प्रक्षाल्यमानदूवा-गलदखिलः सन्ध्यारागः।

(क) सिक्तमिति पाठः।

(ख) घनेत्यधिकः पाठः।

(ग) चेति क्वचिन्नास्ति।

(घ) दिनपतीति वा पाठः।

(ङ) तत्पतनेति पाठान्तरम्।

(च) अम्बर तलमिति वा पाठः।

[१] सिक्थकम् भक्तग्रासः।

[२] तारकाः नक्षत्रं नेत्रपुत्तलिका च।

[३] पतङ्गः सूर्य्यः पक्षी च। पाठान्तरे तस्य सूर्य्यस्य पतनम्।

क्षयमुपगतायाञ्च सन्ध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवमवहत्। अपहाय (क) मुनिहृदयानि सर्वमन्यदन्धकारतां तिमिरमनयत्। क्रमेण च रविरस्तमुपागत इत्युदन्तमुपलभ्य समुपजातवैराग्यो[१] धौतदुकूलवल्कलधवलाम्बरः [२] सतारान्तःपुरः, [३] पर्य्यन्तस्थिततनुतिमिरतमालवनलेखं, सप्तर्षिमण्डलाध्युषितम्, अरुन्धतीसञ्चरणपवित्रम्, उपहिताषाढ़म् [४] आलक्ष्यमाण(ख)मूलम् [५] एकान्तस्थितचारुतारकमृगम् [६] अमरलोका-

---

(क) प्रायदग्धमिव भयाद्विहायेव इति पाठान्तरम्।

(ख) उपलक्ष्यमाणेति वा पाठः।

[१] वैराग्यं विषयतृष्णाशून्यत्वं लौहित्याभावश्च।

[२] दुकूलमेव वल्कलं तदिव धवलं तेन वा धवलं अम्बरं वस्त्रं आकाशश्च।

[३] ताराः दाक्षायण्यश्चन्द्रपत्न्यस्ता एव अन्तःपुरम् ताराख्यदारसहितः "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वे"त्युक्तेस्ताभिः सहवनगमनम्।

[४] आषाढ़ः पालाशो दण्डः पूर्वोत्तराषाढ़ानक्षत्रभेदश्च।

[५] मूलं महदादिसृष्टिकारणम्, प्रधानं नक्षत्रभेदश्च।

[६] चारुः मनोहरा तारका अक्षिपुत्तलिका यस्य तादृशोमृगो-यत्र पक्षे तारकरूपो मृगोमृगशीर्षः।

श्रममिव [१] गगनम(क)मृतदीधितिरध्यतिष्ठत्। चन्द्राभरणभूतस्तारकाकपालशकलालङ्कृतादम्बरतलात् त्र्यम्बकोत्तमाङ्गादिव गङ्गा [२] सागरमापूरयन्ती हंसधवला धरण्यामपतत् ज्योत्स्ना। हिमकरसरसि विकचपुण्डरीकसिते [३] चन्द्रिकाजलपानलोभादवतीर्णो निश्चलमूर्त्तिरमृतपङ्कलग्नइवालक्ष्यत हरिणः। तिमिरजलधरसमया(ख)पगमानन्तरमभिनवसितसिन्धुवारकुसुमपाण्डरैरर्णवा(ग)गतैरगटह्यन्त हंसैरिव कुमुदसरांसि चन्द्रपादैः। विगलितसकलोदयरागं रजनिकरबिम्बम् अम्बरापगावगाहधौतसिन्दूरमैरावतकुम्भस्थलमिव तत्क्षणमलक्ष्यत। शनैः शनैश्च दूरोदिते भगवति हिमस्रुति, (घ) सुधाधूलिपटलेनेव धवलीकृते चन्द्रातपेन जगति, अवश्यायजलबिन्दुपतनशीतेषु मन्दगतिषु विघटमानकुमुदवनकषायपरिमलेषु, [४]

(क) गगनतलमिति पाठः।

(ख) समयादनन्तरेति च पाठः।

(ग) पाण्डरैर्गगनागतैः इति च पाठः।

(घ) हिम दीधितौ इति च पाठः।

[१] अमरलोकानां देवानामाश्रमम् मुन्यादिजनावासस्थानभेदम्।

[२] हरमूर्द्ध्नि पतित्वा गङ्गायाः सागरपूरणकथा भारतवनपर्वणि १०९ अध्याये।

[३] पुण्डरीकमिव सितम् पुण्डरीकेण सितञ्च।

[४] कषायः सुरभिः परिमलो गन्धमात्रम्।

समुपोढ़[१] निद्राभरालसतारकैरन्योन्यग्रथितपक्ष्मपुटैरारब्धरोमन्थ[२] मन्थरमुखैः सुखासीनैराश्रममृगैरभिनन्दितागमनेषु, प्रवहत्सु निशामुखसमीरेषु, अर्द्धयाममात्रावखण्डितायां विभावर्य्यां हारीतः कृताहारं मामादाय सर्वैस्तैः सह मुनिभिरुपसृत्य चन्द्रातपोद्भासिनि तपोवनैकदेशे वेत्रासने सुखोपविष्टमनतिदूरवर्त्तिना जालपादनाम्ना शिष्येण दर्भपवित्र[४]-धवित्रपाणिना मन्दमन्दमुपवीज्यमानं पितरमुवाच (क)। तात! सकलेयमाश्चर्य्यश्रवणकुतूहलाकुलितहृदया समुपस्थिता तापसपरिषदाबद्धमण्डला प्रतीक्षते, व्यपनीतश्रमश्च कृतोऽयं पतत्रिपोतस्तदावेद्यतां किमनेन कृतमन्यस्मिन् जन्मनि कोऽवायमभूत्, भविष्यति वेति। एवमुक्तस्तु स महामुनिरग्रतःस्थितं मामवलोक्य तांश्च सर्वानेकाग्रान् श्रवणतत्परान्मुनीन् बुद्धा शनैरब्रवीत् श्रूयतां यदि कुतूहलम्।

(क) अवोचदिति च पाठः।

[१] समुपोढ़ः संजातः निद्राभरः निद्रातिशयः।

[२] रोमन्थः निगीर्णस्य उद्गीर्य्य चर्वणम्।

[३] दर्भेण पवित्रं धवित्रं व्यजनं पाणौ यस्य।

कथारम्भः ।

अस्ति सकलत्रिभुवनललामभूता प्रसवभूमिरिव, क्रतयुगस्य आत्मनिवासोचिता, महाकालाभिधानेन भुवनत्रयसर्गस्थितिसंहारकारणेन (क) प्रमथनाथेनापरेव पृथिवी समुत्पादिता, द्वितीयपृथिवीशङ्कया च जलनिधिनेव रसातलगम्भीरेण जलपरिखावलयेन परिवृता, पशुपतिनिवासप्रीत्या च गगनतलोल्लेखिशिखरमालेन कैलासगिरिणेव सुधासितेन प्राकारमण्डलेन परिगता, प्रकटशङ्खशुक्तिमुक्ताप्रवालमरकतमणिराशिभिश्चामीकरचूर्णबालुकानिकरनिचितैरायामिभिर-गस्त्यपरिपीतसलिलैः सागरैरिव महाविपणिपथैरुपशोभिता, सुरासुरसिद्धगन्धर्व्वविद्याधरोरगाध्यासिताभिश्चित्रशालाभिरनवरतोत्सवावलोकनकुतूहलादम्बरतलादवतीर्णाभिर्दिव्यविमानपङ्क्तिभिरिवालङ्कृता, मन्थनोद्धुतदुग्धसिन्धुधवलमन्दरद्युतिभिः कनकमयामलकलशशिखरैः अनिलदोलायितसितध्वजैरुपरिपतदभ्रगङ्गैरिव तुषारगिरिशिखरैरमरमन्दिरैर्विराजित-

---

(क) संहारकारिणा इति च पाठः ।

शृङ्गाटका [१] सुधा[२]वेदिकोपशोभितोदपानैरनवरतचलित-जलघटीयन्त्रसिच्यमानहरितोपवनान्धकारैः केतकीधूलिधूसरै-रुपशल्यकै[३]रुपशोभिता, मदमुखरमधुकरपटलान्धकारित-निष्कुटा [४] स्फुरदुपवनलताकुसुमपरिमलसुरभिसमीरणा-हणितसौभाग्य[५] घण्टैरालोहितांशुकपताकैराबद्धरक्तचामरै-र्विद्रुममयैः प्रतिभवनमुच्छ्रितैर्मकराङ्कैर्मदन[६]यष्टिकेतुभिः प्रकाशितमकरध्वजपूजा, सततप्रवृत्ताध्ययनध्वनिधौतकल्मषा, स्तिमितमुरजरवगम्भीरगर्जितेषु सलिलशीकरासाररचितदुर्दि-नेषु पर्यस्तदिवसकरकिरणस्तवकरचितसुरचापचारुषु धारा-गृहेषु मत्तमयूरमण्डलैरामण्डलीकृतशिखण्डैस्ताण्डवव्यसनि-भिराबध्यमानकेकारवकोलाहला, विकचकुवलयकान्तैरुत्फु-

---

[१] शृङ्गाटकं चतुष्पथम्।

[२] सुधा लेपनद्रव्यं तल्लिप्ता वेदिका सुधावेदिका, उदपानं कूपसमीपस्थजलाश्रयः।

[३] ग्रामान्त उपशल्यं स्यादित्यमरोक्तेः ग्रामसीमास्थानम्।

[४] गृहारामास्तु निष्कुटा इत्युक्तेः गृहसमीपोद्यानम्।

[५] सौभाग्यसूचिका घण्टा सौभाग्यघण्टा।

[६] मदनो वृक्षभेदः (मयना) तन्निर्मिता यष्टिः मदनः कामस्य तत्पूजार्था च यष्टिः।

कुमुदधवलोदरैरनिमिष[१]दर्शनरमणीयैराखण्डललोचनैरिव सहस्रसंख्यैरङ्गासिता सरोभिः, अविरलकदलीवनकलिताभिरमृतफेनपुञ्जपाण्डुराभिर्दिशि दिशि दन्तवलभिकाभि[२]र्धवलीकृता, यौवनमदमत्तमालवीकुचकलसक्षुभितसलिलया भगवतोमहाकालस्य शिरसि सुरसरितमालोक्य समुपजातेर्ष्ययेव सततावद्धतरङ्गभ्रुकुटीलेखया खमिव क्षालयन्त्या शिप्रया परिक्षिप्ता, निखिलभुवनतलख्यातयशसा हरजटाचन्द्रेणेव कोटिसारेण[३]मैनाकेनेवाविदितपक्षपातेन [४] मन्दाकिनीप्रवाहेणेव प्रकटितकनकपद्मराशिना [५] स्मृतिशास्त्रेणेव सभावसथकूपप्रपारामसुरसदनसेतुयन्त्रप्रवर्त्तकेन [६] मन्दरेणेवोद्धृतसमस्तसागररत्नसारेण [७] संगृहीतगारुड़ेनापि भुजङ्गसङ्ग-

---

[१] अनिमिषा मत्स्यास्तेषामिव दर्शनं येषाम् अनिमिषं नेत्रस्पन्दनशून्यञ्च।

[२] गोपानसी तु वलभी छादने वक्रदारुणीत्यमरः।

[३] कोटिरग्रम् शतलक्षसंख्यञ्च सारः स्थिरांशः धनञ्च।

[४] पक्षस्य गरुतः पातश्छेदनम् पक्षपातः वादिनोरानुकूल्यकरणञ्च।

[५] कनकमयकमलानां राशिः, कनकानां पद्मसंख्योवा राशिश्च।

[६] प्रवर्त्तकः प्रवृत्तिसम्पादनद्वारा बोधकः कारकश्च।

[७] उद्धृत उत्क्षिप्तः परिहृतश्च।

भीरुणा [१] सकलोपजीविनापि [२] प्रणयिजनोपजीव्यमान-विभवेन, वीरेणापि [३] विनयवता प्रियंवदेनापि [४] सत्य-वादिना, अभिरूपेणापि [५] स्वदारसन्तुष्टेन, अतिथिजनाभ्या-गमार्थिनापि, परप्रार्थनानभिज्ञेन [६] कामार्थपरेणापि, धर्मप्रधानेन [७] महासत्वेनापि, परलोकभीरुणा [८] सकल-विज्ञानविशेषविदा, विद्यावदातेन, दानशीलेमादीनेन, दक्षेण, स्मितपूर्वाभिभाषिणा, परिहासपेशलेनोज्ज्वलवेषेण, शिक्षिता-शेषदेशभाषेण, वक्रोक्तिनिपुणेन, आख्यायिकाख्यानपरिचय-चतुरेण, सर्वलिपिज्ञेन, महाभारतपुराणरामायणानुरागिणा,

---

[१] "गारुडं स्यात् मरकते विषमन्त्रे च गारुडमि"त्युक्तेः मर-कतमणिः विषमन्त्रश्च। भुजङ्गः षिड़्गसर्पयोरिति।

[२] सकलः समस्तः शिल्पादिकलासहितश्च।

[३] विशिष्टान् ईरयति क्षिपति वीरः तुच्छताकारकः शूरश्च।

[४] प्रियवादिनः प्रायेणासत्यवादित्वं लोकप्रसिद्धम् तद्वि-लासिजनस्य नास्तीत्यर्थः।

[५] अभिमतं रूपमस्य अभिरूपः सौन्दर्य्यपक्षपाती रम्यश्च।

[६] परकर्त्तृका परकर्म्मिका च प्रार्थना परप्रार्थना।

[७] कामार्थौ परौ उत्कृष्टौ इतरौ च यस्य कामार्थासक्तः त्यक्तकामार्थश्च।

[८] परलोकः पुण्यापुण्यकृतफलभोगः शत्रुलोकश्च।

बृहत्कथाकुशलेन, [१] द्यूतादिकलाकलापपारगेण, श्रुतरागिणा, सुभाषितव्यसनिना, प्रशान्तेन, सुरभिमासमारुतेनेव सततदक्षिणेन [२] हिमगिरिकाननेनेवान्तःसरलेन [३] लक्ष्मणेनेव रामाराधननिपुणेन [४] शत्रुघ्नेनेवाविष्कृतभरतपरिचयेन [५] दिवसेनेव मित्रानुवर्त्तिना [६] बौद्धेनेव सर्वदानास्तिवादशूरेण [७] सांख्यागमेनेव प्रधानपुरुषगुणोपेतेन, [८] विलासिजनेनाधिष्ठिता, सशैलेव प्रासादैः, सशाखानगरेव महाभवनैः, सकल्पवृक्षेव सत्पुरुषैः, दर्शितविश्वरूपेव चित्रभित्तिभिः, अमराधिपमूर्त्तिरिव मखशतानलधूमपूता, पशु-

---

[१] बृहत्कथा कात्यायनेन काणभूतये श्राविता सप्तलक्षमिता कथा।

[२] दक्षिणः दक्षिणदिगागतः अनुकूलश्च।

[३] सरलः अकुटिलः वृक्षभेदश्च।

[४] रामस्य रामायाः स्त्रियश्च आराधने निपुणः।

[५] भरतः कैकयीतनयः भरतमुनिप्रणीतशास्त्रञ्च।

[६] मित्रं सुहृत् मित्रः सूर्य्यश्च।

[७] सर्वदा नास्ति परलोकइति वादः सर्वदानास्तिवादः सर्वदाने अस्तीति वादश्च तत्र शूरः विख्यातः।

[८] प्रधानं साम्यावस्थापन्नसत्त्वादिगुणत्रयरूपा प्रकृतिः पुरुषः प्रधानादिभ्यः भिन्नः असङ्गश्चेतनः, गुणाः सत्वरजस्तमांसि च तैः। प्रधानपुरुषस्य उत्कृष्टनरस्य गुणाः विनयादयश्च तैश्च।

धतिलास्यक्रीड़ेव सुधाधवलाट्टहासा [१] वृद्धेव जातरूपक्षया [२] गरुड़मूर्त्तिरिवाच्युतस्थिति [३] रमणीया, सन्ध्येव पद्म-रागारुणा, [४] प्रभातवेलेव प्रबुद्धसर्वलोका, [५]शबरवसतिरिव अवलम्बितचारुचामरनागदन्त[६]धवलगृहा, शेषतनुरिव सदा-सन्नवसुधाधरा, [७] जलनिधिमथनवेलेव महाघोष[८]पूरित-दिगन्तरा, प्रस्तुताभिषेकवेलेव सदासन्निहितकनककलशसहस्रा, गौरीव महासिंहासनोचित[९]मूर्त्तिः, अदितिरिव देवकुल[१०]

---

[१] सुधा लेपनद्रव्यम् (कलिचुन) तद्वत् तेन वा धवलः शुभ्रः अट्टः अट्टालिका हास इव यत्र अट्टहासः उच्चैर्हासश्च यत्र।

[२] जातरूपस्य स्वर्णस्य क्षयो निवासो यत्र। जाता रूपस्य लावण्यस्य क्षयो विनाशोयस्याश्च।

[३] अच्युतस्य विष्णोः स्थितिरवस्थानम् अच्युता अचञ्चला स्थिति-मर्य्यदा च।

[४] पद्मरागो रक्तवर्णमणिभेदः पद्मस्य रागोनुरागो रक्तता वा।

[५] प्रबुद्धः जागरितः ज्ञानी च।

[६] नागदन्तो हस्तिदन्तः गृहान्निर्गतकाष्ठभेदश्च।

[७] सदा आसन्नाया वसुधाया धरा। सदा सती नवा च या सुधा लेपनद्रव्यं तद्धरा च।

[८] घोषः शब्दः आभीरपल्ली च।

[९] महासिंहरूपमासनं महासिंहासनं राजासनभेदश्च।

[१०] देवकुलं देवसमूहः देवगृहञ्च।

सहस्रसेव्या महावराहलीलेव दर्शितहिरण्याक्षपाता [१] आस्तीकतनुरिवानन्दितभुजङ्ग[२]लोका, हरिवंशकथेवानेक-बालक्रीड़ारमणीया प्रकटाङ्गना [३] पभोगाप्यखण्डितचरित्रा, रक्तवर्णापि [४] सुधाधवला, अवलम्बितमुक्ताकलापापि विहा-रभूषणा [५] बहुप्रकृतिरपि [६] स्थिरा विजितामरलोक-द्युतिरवन्तीषूज्जयिनी नाम नगरी।

यस्यामुत्तुङ्गसौधोत्सङ्गसङ्गिनीनामङ्गनानामतिमधुरेण गीत-रवेण कृष्यमाणाधोमुखतुरङ्गः पुरःपर्य्यस्तरथपताकापटः कृतमहाकालप्रणामइव प्रतिदिवसमालक्ष्यते भगवान् दिवस-करः। यस्याञ्च सन्ध्यारागारुणाइव सिन्दूरमणिकुट्टिमेषु, प्रा-रब्धनीलकमलिनीपरिमलना [७] इव मरकतवेदिकासु, गगन-

---

[१] हिरण्याक्षस्यासुरभेदस्य पातः विनाशः स्वर्णमयपाशकस्य पातनञ्च।

[२] भुजङ्गः विड़्गः सर्पश्च तत्कथा च भारतादिपर्व्वणि ५८ अध्याये।

[३] अङ्गनमजिरम् अङ्गना स्त्री च।

[४] रक्तः लोहितः अनुरक्तश्च वर्णः ब्राह्मणादिः रूपञ्च।

[५] विहारो उत्सवचेष्टा हारशून्यश्च।

[६] प्रकृतिः स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलप्रजारूपा स्वभावश्च।

[७] परिमलनं सम्पर्कः।

नलप्रसूताइव वैदूर्य्यमणिभूमिषु, तिमिरपटलविघटनोद्य-[१]-ताइव कृष्णागुरुधूममण्डलेषु, अभिभूततारकापङ्क्तयइव मुक्ताफलप्रालम्बेषु, [२] विकचकमलचुम्बिनइव नितम्बिनीमुखेषु, प्रभातचन्द्रिकानभ्यपतिताइव स्फटिकमणिभित्तिप्रभासु, गगनसिन्धुतरङ्गसङ्गिनइव सितपताकांशुकेषु, पल्लविताइव सूर्य्यकान्तोपलेषु, राहुमुखकुहरप्रविष्टाइव इन्द्रनीलवातायनविवरेषु, विराजन्ते रविगभस्तयः। यस्याञ्चानुपजाततिमिरत्वादविघटितचक्रवाकमिथुना व्यर्थीकृतसुरतप्रदीपाः स्खलातमदनानलदिग्दाहाइव यान्ति कामिनीनां भूषणप्रभाभिर्बालातपपिञ्जरा [३] रजन्यः। याञ्च सन्निहितविषमलोचनामनवरतमतिमधुरो रतिप्रलापइव प्रतिवासरं प्रसर्पन् मुखरीकरोति मकरकेतुदाहहेतुभूतो भवनकलहंसकोलाहलः। यस्याञ्च निशिनिशि पवनवशविलोलैर्दुकूलपल्लवैः कलसङ्गिर्मालवीमुखकमलकान्तिलज्जितस्येन्दोः कलङ्कमिवापनयन्तो दूरप्रसारितोर्द्धध्वजभुजाः प्रासादा लक्ष्यन्ते। यस्याञ्च सौधशिखरोत्सङ्गशायिनीनां पश्यन् मुखानि पुरसुन्दरीणां मदनपर-

[१] पटलं समूहः विघटनं वियोजनम् विदारणमित्यर्थः।

[२] प्रालम्बो हारभेदः।

[३] बालातपेनेव पिञ्जराः।

वंशइव पतितः प्रतिमाच्छलेन लुठति बहलचन्दनजलसेक-शिशिरेषु मृगलाञ्छनः। यस्याञ्च निशावसाने प्रबुद्धस्य तार-तरमतिपठतः पञ्जरभाजः शुकशारिकासमूहस्य रवेणाभिभूता गृहसारसविरुतेन विस्तारिणा विलासिनीभूषणरवेण चाभिभा-व्यमाना व्यर्थीभवन्ति प्रभातमङ्गलगीतयः। यस्याञ्चानिवृत्तिः [१] मणिदीपानां, तरलता [२] हारलतानाम्, अस्थितिः [३] सङ्गीतमुरजध्वनीनां, द्वन्द्ववियोगश्चक्रनाम्नां, वर्णपरीक्षा, [४] कनकानाम्, अस्थिरत्वं [५] ध्वजानां, मित्रद्वेषः [६] कुमुदानाम्, कोषगुप्तिरसीनाम् [७]। किं बहुना यस्याञ्च सुरासुरचूड़ा-मणिमरीचिचयचुम्बितचरणनखमयूखो, निशितत्रिशूलदारि-तान्धकमहासुरो [८] गौरीनूपुरकोटिघृष्टशेखरचन्द्रशकलः, त्रि-पुरभस्मरजःकृताङ्गरागो, मकरध्वजध्वंसविधुरया रत्या प्रसाद-

---

[१] अन्येषान्तु विषयेभ्यो निवृत्तिः।

[२] तरलता हारभेदत्वं चञ्चलता च मनसस्तु सा नास्तीत्यर्थः।

[३] अस्थितिः अनवस्था अन्येषाममर्यादा न।

[४] वर्णो हेमशुद्ध्यशुद्धिप्रयोजकरूपभेदः ब्राह्मणादिश्च।

[५] अस्थिरत्वं चाञ्चल्यं नान्येषामित्यर्थः।

[६] मित्रं सुहृत् मित्रः सूर्य्यश्च।

[७] कोषः चर्म्मादिमयखड्गावरकभेदः कुड्मलश्च।

[८] हरेणान्धकवधकथा च हरिवंशे १४६ अध्याये।

यन्त्या प्रसारितकरयुगलविगलितवलयनिकरार्चितचरणः, प्रलयानलशिखाकलापकपिलजटाभारभ्रान्तामरसिन्धुरन्धकारिर्भगवान् उत्सृष्टकैलासवासप्रीतिर्महाकालाभिधानः स्वयं प्रतिवसति।

तस्याञ्चैवंविधायां नगर्य्यां नृगनलनहुषययातिधुन्धुमारभरतभगीरथदशरथजनमेजयार्जुन [१] प्रतिमो भुजबलोपार्जितभूमण्डलः, फलितशक्तित्रयो, [२] मतिमान्, उत्साहसम्पन्नो, नीतिशास्त्राखिन्नबुद्धिः, अधीतधर्म्मशास्त्रः, तृतीयइव तेजसा कान्त्या च सूर्य्याचन्द्रमसोः, अनेकसप्ततन्तुपूतमूर्त्तिः [३] उपशमितसकलजगदुपप्लवो विहाय कमलवनानि, अविगणय्य नारायणवक्षःस्थलवसतिसुखम्, उत्फुल्लारविन्दहस्तया शूरसमागमव्यसनिन्या निर्व्याजमालिङ्गितो लक्ष्म्या। महामुनिजनसंसेवितस्य मधुसूदनचरणइव सुरसरित्प्रवाहस्य प्रभवः सत्यस्य, शिशिरस्यापि [४] रिपुजनसन्तापकारिणः, स्थिरस्या[५]प्यविरतं भ्रमतः, निर्मलस्यापि मलिनीकृतारातिवनितामुखकमलद्युतेः,

[१] अर्जुनः हैहयाधिपः कार्त्तवीर्य्यः।

[२] प्रभावोत्साहमन्त्रजास्तिस्रः शक्तयः।

[३] सप्ततन्तुः यज्ञः।

[४] शिशिरस्य शीतलस्य प्रजानामनुद्वेगकरस्य च यशस इत्यस्य विशेषणम्।

[५] स्थिरम् अचञ्चलम् अनश्वरतया स्थितञ्च।

अतिधवलस्यापि सर्वजनराग [१] कारिणः, सुधासूतेरिव जलनिधिरुद्भवो यशसः, पातालइवाश्रितो निजपक्ष[२]क्षतिभीतैः क्षितिभृतां [३] कुलैः, ग्रहगणइव बुधा [४] नुगतः, मकरध्वजइवोत्पन्नविग्रहः, [५] दशरथइव सुमित्रोपेतः, [६] पशुपतिरिव महासेना[७]नुगतः, भुजगराजइव क्षमाभरगुरुः, [८] नर्मदाप्रवाहइव महावंशप्रभवः [९] अवतारइव धर्मस्य, प्रतिनिधिरिव पुरुषोत्तमस्य, परिहृतप्रजापीड़ो राजा तारापीड़ोऽभवत्।

यस्तमःप्रसरमलिनवपुषा पापबहुलेन चालितमामूलतोधर्मं दशाननेनेव कैलासं पशुपतिरिवावष्टभ्य पुनरपि [१०] स्थिरीचकार। यश्च रतिप्रलापोपजनितदयार्द्रहृदयहरनि-

---

[१] रागोऽनुरागः रक्तता च।

[२] पक्षः गरुत् सहायश्च।

[३] क्षितिभृत् राजा पर्वतश्च।

[४] बुधः सोमपुत्रः पण्डितश्च।

[५] उत्पन्नः शिवेन दग्धः, रिपुनाशात् नष्टश्च विग्रहो देहोयुद्धञ्च।

[६] सुमित्रं सुहृत् सुमित्रा लक्ष्मणमाता च।

[७] महती सेना महासेनः कार्त्तिकेयश्च।

[८] क्षमा भूमिः तितिक्षा च भरोभारोऽतिशयश्च।

[९] महावंशः महाकुलं वेणुभेदश्च।

[१०] रावणेनोत्पाटितकैलासस्य स्वस्थाने शिवपादाङ्गुष्ठेन पुनः स्थापनकथाः रामायणे उत्तरकाण्डे १६ सर्गे।

र्म्मितमपरमिव मकरकेतुममंस्त लोकः । यश्च जलनिधितरङ्गधौतमेखलात्, पत्रान्तरविचारिततारागणद्विगुणिततटतरुकुसुमप्रकरात्, उद्यदिन्दुबिम्बविगलदमृतबिन्दुदुर्द्दिनार्द्रचन्दनात्, अशिशिरकररथतुरङ्गखुरशिखरोल्लेखखण्डितोत्सन्नलवङ्गपल्लवात्, ऐरावतकरलून(क)सल्लकीकवलात्, आ शैलादुदयनाम्नः, कपिबलविलुप्तविरललवलीलताफलात्,(ख) उदधिविनिर्गतजलदेवताभिवन्द्यमानराघवपादात्, अचलनिपातदलितशङ्खकुलशकलतारकितशिलातलात्, नल, [१] करतलाकलितशैलसहस्रसम्भूतात्, आ सेतुबन्धात्, अच्छनिर्झरजलधौततारकापथात्, अमृतमथनोद्यतवैकुण्ठ [२] केयूरपत्रमकरकोटिकषणमसृणितग्रावणः, सुरासुरहेलावलयितवासुकि [३] समाकर्षणारम्भचलचरणभरदलितनितम्बात्, अमृतसीकरसिक्तसानोः, आ मन्दराचलात्, नरनारायणचरणमुद्राङ्कितबदरिकाश्रमरमणीयात्, कुबेरपुरसुन्दरीनूपुररवमुखरशिखरात्, सप्तर्षिसन्ध्योपासनापू-

(क) अत्र तु रोधः इत्यधिकः क्वचित् पाठो दृश्यते ।

(ख) कपिकुलविलुप्तविरललवलीलतागुल्मात् इति पाठः ।

[१] नलो विश्वकर्म्मपुत्रः वानरभेदः। तेन सेतुबन्धकथा च महाभारते वनपर्व्वणि २८२ अध्याये ।

[२] वैकुण्ठो नारायणः ।

[३] समुद्रमन्थने सुरासुरैः वासुकिसमाकर्षणकथा च महाभारतादिपर्वणि १८ अध्याये ।

तप्रस्रवणाम्भसः, वृकोदरोद्दलितसौगन्धिक [१] षण्डसुगन्धि-मेखलात्, आ गन्धमादनात्, सेवाञ्जलिकमलमुकुलदन्तुरैः शिरोभिश्चरणनखमयूखाग्रग्रथितमुकुटपल्लवताग्रन्थयो, भय-चकिततरलतारकदृशो, भुजबलविजिताः प्रणेमुरवनीप-तयः। येन च अनेकरत्नांशुजालपल्लविते व्यालम्बिमुक्ता-फलजालके दिग्गजेनेव कल्पतरौ आक्रान्ते सिंहासने भरेण शिलीमुख [२] व्यतिकरकम्पिता लताइव नेमुरायामिन्यः सर्वा दिशः। यस्मै च मन्येऽनन्यसाधारणशक्तिसम्पदे सुर-पतिरपि स्पृहयाञ्चकार। यस्माच्च धवलीकृतभुवनतलः, सकललोकहृदयानन्दकारी, क्रौञ्चादिव [३] हंसनिवहो निर्जगाम गुणगणः। यस्य च अमृतामोदसुरभिपरिमलया, मन्दरोद्धूतबहुलदुग्धसिन्धुफेनलेखयेव, धवलीकृतसुरासुरलो-कया, दशसु दिक्षु मुखरितभुवनमभ्रम्यत कीर्त्त्या। यस्य च अतिदुःसहप्रतापसन्तापखिद्यमानेव क्षणमपि न मुमोचात-पत्रच्छायां राजलक्ष्मीः। तथाचास्य दिष्टिवृद्धिमिव [४] शुश्राव, उपदेशमिव जग्राह, बहुमङ्गलमिव मेने, मन्त्रमिव

---

[१] सौगन्धिकं जलजसुरभिपुष्पभेदः तत्षण्डः तत्समूहः। भीमेन तदाहरणकथा च भारते वनपर्वणि १५० अध्याये।

[२] शिलीमुखः भ्रमरः वाणश्च।

[३] क्रौञ्चः तन्नामा पर्वतभेदः।

[४] दिष्टिः उत्सवः।

जजाप, आगममिव न विसस्मार चरितं जनः। यस्मिंश्च राजनि गिरीणां विपक्षता, [१] प्रत्ययानां परत्वम्, [२] दर्पणानामभिमुखावस्थानम्, [३] शूलपाणिप्रतिमानां दुर्गाश्लेषः, [४] जलधराणाञ्चापधारणम्, [५] पद्मानां जलदिव्यम्, [६] प्रतीहाराणामसिधारणम्, तैक्ष्ण्य [७] मसिधाराणाम्, ध्वजानामुन्नतिः, [८] धनुषामवनतिः, [९] वंशानां शिलीमुखक्षतिः, [१०] देवतानां यात्रा, [११] कुसुमानां बन्धनस्थितिः, [१२] इन्द्रियाणां नि-

---

[१] विपक्षता पक्षराहित्यं शत्रुता च।

[२] प्रत्ययाः सुबादयः परत्वं प्रकृत्युत्तरवर्त्तित्वं शत्रुत्वञ्च।

[३] युद्धार्थमभिमुखेऽवस्थानं नेत्यर्थात्।

[४] दुर्गा पार्वती शत्रुराहित्याद् जलादिदुर्गादिर्नास्तीत्यर्थः।

[५] चाप इन्द्रायुधं न तु युद्धार्थं धनुर्द्धारणं लब्धप्रशमनत्वात्।

[६] जलेषु निमज्जनं तत उन्मज्जनञ्च अन्येषां पापकारित्वाभावात् दिव्यरूपशपथप्रसक्तिर्नास्तीत्यर्थः।

[७] तैक्ष्ण्यं शाणितत्वं परमर्म्मभेत्तृत्वेन उग्रता चान्येषां न।

[८] ध्वजानाम् उन्नतिरुच्चता न त्वन्येषां तदपेक्षया उत्कर्षः।

[९] अवनतिः नम्रता नतु शत्रुसकाशे नमनम्।

[१०] शिलीमुखेन भ्रमरेण नत्वन्येषां वाणेन क्षतिः।

[११] उत्सवार्थं देवानां यात्रा न युद्धार्थं बलानाम्।

[१२] बन्धनम् पुष्पादिवृन्तम् कारादिषु बन्धनं तु नान्येषां पापकारित्वाभावात्।

ग्रहः, [१] वनकरिणां वारिप्रवेशः, [२] ग्रहाणां तुलारोहणम्, [३] अगस्त्योदये विषविशुद्धिः, [४] केशनखानामायतिभङ्गः, [५] जलधरदिवसानां मलिनाम्बरत्वम्, [६] रत्नोपलानां भेदः, [७] मुनीनां योगधारणम्, [८] कुमारस्तुतिषु तारकोद्धरणम्, [९] उष्णरश्मेर्ग्रहणाशङ्का, [१०] शशिनोऽभ्यु-

---

[१] निग्रहो दमनं नान्येषां लोकानां स्वतःशिष्टत्वात्।

[२] वारिः गजबन्धनस्थानं नान्येषां वारिषु दिव्यप्रपथार्थं प्रवेशः।

[३] तुला सप्तमराशिः। नान्येषां दिव्यप्रमाणार्थं तुलादण्डारोहणम्।

[४] विषस्य जलस्य विशुद्धिः निर्मलता नतु विषेण तत्पानरूपेण दिव्येन लोकानां विशुद्धिः स्वतःपापकारित्वाभावात्।

[५] आयतिः आयामः नान्येषामायतेरुत्तरकालस्य भेदः।

[६] मलिनाम्बरत्वं नीलाकाशत्वं नान्येषां मलिनवस्त्रत्वम्।

[७] रत्नानामुपलानां च परस्परं भेदः वैलक्षण्यं नान्येषां भेदनं तस्य शत्रोरभावात् न तदुपायावलम्बनम्।

[८] योगश्चित्तवृत्तिनिरोधः। नतु सन्नद्धगणोपायरूपयोगधारणम्।

[९] तारकस्यासुरभेदस्य उद्धरणम् नतु दण्डे तारकाया नेत्रपुत्तलिकाया उत्पाटनम्।

[१०] ग्रहणं ग्रासः नतु पलायमानस्य अन्यकर्तृकधारणम्।

ष्ठातिक्रमः, [१] महाभारते दुःशासनापराधाकर्षनम्, [२] वयःपरिणामे दण्डग्रहणम्, [३] असिधारासु कोषगुप्तिः, [४] कामिनीकुचपल्लभङ्गेषु वक्रता, [५] करिणां दानविच्छित्तिः, [६] अक्षक्रीड़ासु शून्यगृहदर्शनं [७] पृथिव्यामासीत्। तस्य राज्ञो निखिलशास्त्रकलाकलापावगाहनगभीरबुद्धिः, आ शैशवादुपारूढ़निर्भरप्रेमरसो, नीतिशास्त्रप्रयोगकुशलो, भुवनराज्यभारैकनौकर्णधारो, महत्स्वपि कार्य्यसङ्कटेष्वविषण्णधीः, धाम धैर्य्यस्य, स्थानं स्थितेः, सिन्धुः सत्यस्य, गुरुर्गुणानाम्, आचार्य्य आचाराणाम्, धाता धर्मस्य, शेषाहिरिव सक-

---

[१] ज्येष्ठा पूर्वजादयः अष्टादशनक्षत्रञ्च।

[२] दुःशासनस्य धार्त्तराष्ट्रस्य द्रौपदीकेशाम्बरकर्षणरूपापराधस्याकर्षणम् नतु दुष्टशासनेन लोकानामपराधाकर्षणम्।

[३] दण्डः सन्यासिधार्य्यः पालाशादिः। नतु प्रजादमनार्थद्रव्यरूपदण्डग्रहणम्।

[४] कोषे चर्मावरणे गुप्तिः नतु धनागारस्य गुप्तिश्चौराभावात्।

[५] वक्रता कौटिल्यं नतु आचारादौ।

[६] दानं मदजलं नतु दानस्य वितरणस्य विच्छेदः।

[७] शून्यगृहं सारिकारहितगृहं नतु धनादिशून्यगृहस्य दर्शनम्।

न्नमहीभारधारणक्षमः, [१] सलिलनिधिरिव महासत्त्वनिवासः, [२] जरासन्धइव घटितसन्धिविग्रहः, [३] त्र्यम्बकइव प्रसाधितदुर्गः, [४] युधिष्ठिरइव धर्मप्रभवः, [५] सकलवेदवेदाङ्गवित्, अशेषराज्यमण्डलैकधारी, बृहस्पतिरिव सुनासीरस्य, कविरिव वृषपर्वणः, वशिष्ठइव दशरथस्य, विश्वामित्रइव रामस्य, धौम्यइवाजातशत्रोः, दमनकइव भीमस्य, [६] सुमतिरिव नलस्य, सर्वकार्य्येष्वप्रतिहतमतिरमात्यो ब्राह्मणः शुकनासो नामाभवत्। यो नरकासुर [७] शस्त्रप्रहारभीषणे भ्रमन्मन्दरनितम्बनिर्दयनिष्पेषकठिनांसपीठे नारायणवक्षःस्थलेऽपि

---

[१] भारः गुरुत्वरूपधर्मभेदः रक्षणचिन्ता च।

[२] सत्वं जलजन्तुप्रभृतिभूतजातं ज्ञानादिहेतुसत्वगुणश्च।

[३] घटितेन योजितेन सन्धिना विग्रहो यस्य, घटितौ यथायथं प्रयुक्तौ सन्धिविग्रहौ राजगुणभेदौ येन च जरासन्धकथा च "जरया-सन्धितो यस्मात् जरासन्धोभवत्वयमिति" भारत सभापर्वणि १७ अध्याये।

[४] प्रसाधिता अलङ्कृता दुर्गा येन। प्रसाधितं सम्पादितं दुर्गं येन च

[५] प्रभवत्यस्मात् प्रभव धर्म्मः देवभेदः प्रभवोयस्य धर्मस्य पुण्यस्य प्रभव उत्पत्तिस्थानञ्च युधिष्ठिरधर्मप्रभवकथा च भारतादि पर्वणि १२२ अध्याये।

[६] भीमो विदर्भाधिपो दमयन्तीपिता।

[७] हरेर्नरकासुरयुद्धकथा च हरिवंशे १२२ अध्याये।

स्थितामदुष्करलाभाममन्यत प्रज्ञाबलेन लक्ष्मीम्। यस्य समासाद्य दर्शितानेकराज्यफला लतेव महापादपमनेकप्रतान [१] गहना विस्तारमुपययौ प्रज्ञा। यस्य चानेकचारपुरुषसहस्रसञ्चारनिचिते, चतुरुदधिवलयपरिखाप्रमाणे, धरणितले, भवनद्वाविदितमहरहः समुच्छ्वसितमपि राज्ञां नासीत्।

स राजा बालएव सुरकुञ्जरपीवरेण, राजलक्ष्मीलीलोपधानेन, [२] सकलजगदभयप्रदानशौण्डेन, [३] रणयज्ञदीक्षायूपेन, [४] स्फुरदसिलतामरीचिजालजटिलेन, निखिलारातिकुलप्रलयधूमकेतुना, बाहुदण्डेन विजित्य सकलद्वीपवलयां वसुन्धरां तस्मिन् शुकनासनाम्नि मन्त्रिणि सुहृदीव राज्यभारमारोप्य सुस्थिताः प्रजाः कृत्वा कर्त्तव्यशेषमपरमपश्यन् प्रशमिताशेषविपक्षतया विगलिताशङ्कः शिथिलितपृथ्वीव्यापारः प्रायशोयौवनसुखमनुबभूव। तथाहि कदाचिदुल्लसत्कठोरकपोलपुलकजर्जरितकर्णपल्लवानां प्रणयिनीनां चन्दनजलच्छटाभिरिव स्मितसुधाच्छ-

---

[१] प्रतानः विस्तारः।

[२] उपधानम् शिरःस्थापनयोग्यः द्रव्यभेदः (बालिस)

[३] शौण्डः प्रवीणः।

[४] दीक्षा यज्ञाय व्रतधारणम् यूपः यज्ञाङ्गपश्वादिमारणार्थं संस्कृतकाष्ठभेदः।

विभिरभिषिच्यमानः, कर्णोत्पलैरिव लोचनांशुभिस्ताड्यमानः, कुङ्कुमपटवास [१] धूलिभिरिवाभरणप्रभाभिराकुलीक्रियमाणलोललोचनः धवलांशुकैरिव करनखरमयूखजालैराहन्यमानः, चम्पककुसुमदलमालिकाभिरिव भुजलताभिराबध्यमानः, दष्टाधरधुतकरतलचलन्मणिवलयकलकलरवरमणीयं, रतिरभसदलितदन्तपत्रदलदन्तुरितशयनम्, उत्क्षिप्तचरणतलगलदलक्तकरक्तशेखरं, सरभसकचग्रहचूर्णितमणिकर्णपूरम्, उल्लसितकुचकृष्णागुरुपङ्कपत्रलताङ्कितप्रच्छदपटम्, अच्छश्रमजलकणिकालुलितगोरोचनातिलकपत्रभङ्गम्, अनङ्गपरवशः सुरतमातताम। कदाचिन्मकरकेतुकनकनाराचपरम्पराभिरिव कामिनीकरपुटविनिर्गताभिः कुङ्कुमजलधाराभिः पिञ्जरीक्रियमाणकायो लाक्षाजलच्छटाप्रहारपाटलीकृतदुकूलो मृगमदजलबिन्दुशबलचन्दनस्थासकः [२] कनकशृङ्गकोषै[३]श्चिरं चिक्रीड़। कदाचित् कुचचन्दनचूर्णधवलितोर्मिमालं, चटुलतुलाकोटि[४] वाचालचरणालक्तकसिक्तहंसमिथुनम्, अलकनिपतितकुसुमनिकरशारं, [५] प्लवमानकर्णकुवलयदलम्, उन्नतनितम्बसंक्षोभ-

---

[१] पटवासः चूर्णद्रव्यभेदः (आवीर)

[२] स्थासकं तिलकभेदः।

[३] शृङ्गाकारः कोषः जलगुप्तिस्थानम् (पिचकारी)

[४] तुलाकोटिः नूपुरम्।

[५] शारं चित्रवर्णम्।

अजर्जरिततरङ्गम्, उद्दलितनालपर्य्यस्तनलिननिपतितधूलिपटलम्, अनवरतकरतलास्फालनविस्फुरत्फेनबिन्दुचन्द्रकितं, [१] सावरोधजनो जलक्रीड़या गृहदीर्घिकाणामम्भश्चकार। कदाचित् सङ्केतवञ्चिताभि, प्रणयिनीभिराबद्धभङ्गुरभ्रूकुटिभिरारणितमणिपारिहार्य्यै [२] मुखरभुजलताभिः बकुलकुसुमावलीसंयतचरणो, नखकिरणविमिश्रैः कुसुमदामभिः कृतापराधो दिवसमताड्यत। कदाचिद्वकुलतरुरिव कामिनीगण्डूष [३] सीधुधारास्वादमुदितो विकाशमभजत। कदाचिदशोकपादप इव [४] युवतिचरणतलप्रहारसंक्रान्तालक्तकरसो रागमुवाह। कदाचिन्मुषलायुध इव चन्दनधवलः कण्ठावसक्तलोलकुसुममालः पानमसेवत। कदाचिद्वन्यगजइव मदरक्तकपोलदोलायमानकर्णपल्लवो मदकलः काननं विकचवनलताकुसुमसुरभिपरिमलं जगाहे। कदाचित् क्वणन्मणिनूपुरनिनादानन्दितमानसो हंसइव कमलवनेषु रेमे। कदाचिन्मृग-

---

[१] चन्द्रकं जातमस्य इतच् प्रत्ययः बिन्दुना चन्द्रिकितम्।

[२] परिहार्य्यः वलयः।

[३] दिव्यस्त्रिया तु बकुलो मधुसीधुसिक्त आलोकितः कुरुवकः कुरुते विकाशमित्युक्तिमनुसृत्याह बकुलेत्यादि।

[४] "सनूपुररवेण स्त्रीचरणेनाभिताड़नम्।
दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्॥

पतिरिव स्कन्धावलम्बितकेशर [१] मालः क्रीड़ापर्वतेषु विचचार। कदाचिन्मधुकरइव विजृम्भमाणकुसुममुकुलदन्तुरेषु लतागृहेषु बभ्राम। कदाचिन्नीलपटरचितावगुण्ठनो बहुलनिशाप्रदोषदत्तसङ्केताः सुन्दरीरभिससार। कदाचिच्च विघट्टितकनककपाटप्रकटवातायनेष्वनवरतदह्यमानकृष्णागुरुधूमरकैरिव पारावतैरध्यासितविटङ्केषु [२] महाप्रासादकुक्षिषु कतिपयाप्तसुहृत्परिवृतो वीणावेणुमुरजमनोहरमन्तःपुरसङ्गीतकं, [३] ददर्श। किं बहुना यद्यदतिरमणीयमभिमतमविरुद्धमायत्यां [४] तदात्वे च तत्तदनाक्षिप्तचेताः परिसमाप्तत्वादन्येषां पृथ्वीव्यापाराणां सिषेवे नतु व्यसनितया। प्रमुदितप्रजस्य हि परिसमाप्तसकलमहीमण्डलप्रयोजनस्य नरपतेर्विषयसम्भोगलीला भूषणमितरस्य तु विड़म्बना। प्रजानुरागहेतोस्त्वान्तरा दर्शनं ददौ सिंहासनञ्च निमित्तेष्वारुरोह।

शुकनासोऽपि महान्तं (क) तं राज्यभारमनायासेनैव प्रज्ञाबलेन बभार। यथैव राजा सर्वकार्य्याण्यकार्षीत् तद्वदसावपि

(क) महान्तमपि राज्यभारमिति च पाठः।

[१] केशरः नागकेशरः सिंहजटा च।

[२] विटङ्कः कपोतपालिका।

[३] सङ्गीयतेऽत्र सङ्गीतं नाट्यम् न तु गीतं तस्य दर्शनासम्भवात्।

[४] आयतिः उत्तरकालः तदात्वं तत्कालः।

द्विगुणीकृतप्रजानुरागश्चकार (क)। तमपि चावलित (ख) चूड़ामणिमरीचिमञ्जरीजालिभिर्मौलिभिरावर्जितकुसुमशेखरच्युतमधुशीकरसिक्तसभं दूरावनतिप्रेङ्खित-मणिकुण्डलकोटिसङ्घटिताङ्गदं राजकमाननाम। तस्मिन्नपि चलति (ग) चटुलतुरङ्गबलसुखरखुररवबधिरीकृतभुवनान्तराला, (घ) बलभरप्रचलवसुधातलदोलायमानगिरयो, गलन्मदान्धगन्धगजदानधारान्धकाराः, संसर्पदतिबहलधूलिपटलधूसरितसिन्धवः, प्रचलपदातिबलकलकलस्फोटितकर्णविवराः, (ङ) सरभसोद्घुष्यमाणजयशब्दनिरन्तराः, प्रोद्धूयमानधवलचामरसहस्रसंछादिताः, पुञ्जितनरेन्द्रवृन्दकनकदण्डातपत्रसंघट्टनष्टदिवसाः, दश दिशो बभुवुः।

एवं तस्य राज्ञो मन्त्रिनिवेशितराज्यभारस्य यौवनसुखमनुभवतः (च) कालो जगाम। भूयसा च कालेनान्येषामपि जीव-

---

(क) चक्रे इति च पाठः।

(ख) चलितेति वा पाठः।

(ग) चलिते इति चलति चलितचटुलेति च वा पाठः।

(घ) भुवनाइत्येव पाठः।

(ङ) प्रचलपदातिकलकलरवस्फोटितश्रवणविवरा इति क्वचित् पाठः।

(च) क्वचित् "कश्चिदिति" अधिकः पाठो दृश्यते।

लोकसुखानां प्रायः सर्वेषामन्तं ययौ, एकन्तु तनयमुखदर्शन-सुखं न लेभे। तथा सम्भुज्यमानमपि निष्फलपुष्पदर्शनं शरवणमिवान्तःपुरमभवत् यथा यथा च यौवनमतिचक्राम तथा तथा विफलमनोरथस्यानपत्यताजन्मा महानवर्द्धतास्य सन्तापः। विषयोपभोगसुखेच्छाभिश्च मनो विजहे। नरपति-सहस्रपरिवृतमप्यसहायमिव चक्षुष्मन्तमप्यन्धमिव भुवनावलम्ब-नमपि निरालम्बनमिवात्मानमनपत्यममन्यत।

अथास्य चन्द्रलेखेव हरजटाकलापस्य, कौस्तुभप्रभेव कैट-भारिवक्षःस्थलस्य, वनमालेव, [१] मुषलायुधस्य, वेलेव साग-रस्य, मदलेखेव दिग्गजस्य, लतेव कल्पपादपस्य, (क) कुसुमो-न्नतिरिव सुरभिमासस्य [२] चन्द्रिकेव चन्द्रमसः, कमलिनीव सरसः, तारकापङ्क्तिरिव नभसः, हंसमालेव मानसस्य, चन्दनवनराजिरिव मलयस्य, फणामणिशिखेव शेषस्य, भूषण-मभूत् त्रिभुववविस्मयजननी जननीव वनिताविभ्रमाणां सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम।

एकदा च स तदावासम् (ख) उपगतस्तां चिन्तास्तिमितदीन-

(क) लतेव पादपस्येति पाठः।

(ख) एकदा च राजा राज्ञीनिवासम् इति पाठः।

[१] "आपादलम्बिनीं मालां वनमालां विदुर्बुधा" इत्युक्तमालेव।

[२] सुरभिर्वसन्तः।

दृष्टिना शोकमूकेन परिजनेन परिवृताम्, आरादवस्थितैश्च ध्यानानिमिषलोचनैः कञ्चुकिभिरुपास्यमानाम्, अनतिदूरवर्त्तिनीभिश्चान्तःपुरवृद्धाभिराश्वास्यमानाम्, अविरलाश्रुविन्दुपाताद्रींकृतदुकूलाम्, अनलङ्कृताम्, वामकरतलविनिहितमुखकमलाम्, असंयताकुलालकां, निविड़पर्य्यङ्किकोपविष्टां, (क) देवीं ददर्श। कृतप्रत्यभ्युत्थानाञ्च तां तस्यामेव पर्य्यङ्किकायामुपवेश्य स्वयञ्चोपविश्य अविज्ञातबाष्पवेगकारणो भीतभीतइव करतलेन विगतबाष्पाम्भःकणौ (ख) कुर्वन् कपोलौ भूमिपालस्तामवादीत्। "देवि! किमर्थम्? अन्तर्गतगुरुशोकभारमन्थरमशब्दं रुद्यते, यद्घ्नन्ति हि मुक्ताफलजालकमिव बाष्पविन्दुनिकरमेतास्तव पक्ष्मपङ्क्तयः, किमर्थञ्च? कृशोदरि! नालङ्कृतासि, बालातपइव रक्तारविन्दकोषयोः किमिति? न पातितश्चरणयोरलक्तकरसः, कुसुमशरसरःकलहंसकौ कस्मात्? पादपङ्कजस्पर्शेन नानुगृहीतौ मणिनूपुरौ, किं निमित्तम्? अयमपगतमेखलाकलापमूको मध्यभागः, किमिति? च हरिणइव हरिणलाञ्छने न लिखितः कृष्णागुरुपत्रभङ्गः (ग) पयोधरभारे, केन? कारणेन तन्वीयं हरमुकुटचन्द्रलेखेव गङ्गा-

(क) अत्र तु रुदतीमित्यधिकः पाठो दृश्यते।

(ख) बाष्पाम्बुकणौ इति वा पाठः।

(ग) कृष्णागुरुपङ्कपत्रभङ्गः इति वा पाठः।

स्रोतसा न भूषिता हारेण, वरारोहे! शिरोधरा, [१] किं? वृथा वहसि विलासिनि! स्रवदस्रुजललवधौतकुङ्कुमपत्त्रलतं कपोलयुगलम्, इदञ्च कोमलाङ्गुलिदलनिकरं रक्तोत्पलमिव करतलं किमिति? कर्णपूरतामारोपितम्, इमाञ्च केन? हेतुना मानिनि! धारयस्यनुपरचितगोरोचनाविन्दुतिलकामसंस्कृतालकिनीमलिक [२] लेखाम्, (क) अयञ्च ते बहुलपक्षप्रदोषइव चन्द्रलेखाविरहितः करोति मे दृष्टिखेदमतिबहुलतिमिरपटलान्धकारः केशपाशः, प्रसीद निवेदय देवि! दुःखनिमित्तम्, एते हि पल्लवमिव सरागं [३] मम हृदयं कम्पयन्ति तरलीकृतस्तनांशुकास्तवायता निश्वासमारुताः, कच्चित्? मयापराद्धमन्येन वा केन? चिदस्मदुपजीविना (ख) परिजनेन, अतिनिपुणमपि चिन्तयन्न पश्यामि खलु स्खलितमल्पमप्यात्मनस्त्वद्विषये, त्वदायत्तं हि मे जीवितं राज्यञ्च, कथ्यतां सुन्दरि! शुचः कारणम्" इत्येवमभिधीयमानापि यदा न किञ्चित् प्रतिवचनं प्रपेदे विलासवती। तदा विवृद्धबाष्पहेतुमस्याः परिजनमपृच्छत्।

(क) असंयमितालकिनीम् ललाटरेखामिति वा पाठः।

(ख) अनुयायिनेति वा पाठः।

[१] शिरोधरा ग्रीवा।

[२] अलिकं ललाटम्।

[३] रागोऽनुरागो लोहितवर्णता च।

अथ तस्यास्ताम्बूलकरङ्कवाहिनी सततप्रत्यासन्ना मकरिका नाम राजानमुवाच । "देव! कुतो ? देवादल्पमपि परिस्खलितम्, अभिमुखे च देवे का ? शक्तिः परिजनस्यान्यस्य वा कस्य ? चिदपराङ्मुम्, "किन्तु महाग्राहग्रस्तेव विफलनरेन्द्रसमागमास्मि" इत्ययमस्या देव्याः सन्तापः सुमहांस्र कालः सन्तप्यमानायाः, प्रथममपि स्वामिनी दानवश्रीरिव सततनिन्दितसुरता, [१] शयनासनस्नानभोजनभूषणपरिग्रहादिषु समुचितेषु दिवसव्यापारेषु कथं कथमपि परिजनप्रयत्नात् प्रवर्त्तमाना, सशोकेवासीत्, देवहृदयपीड़ापरिजिहीर्षया च न दर्शितवती विकारम्, अद्य तु चतुर्द्दशीति भगवन्तं महाकालमर्च्चितुमितो गतया तत्र महाभारते वाच्यमाने श्रुतम् "अपुत्राणां किल गतिर्नास्ति न वा सन्ति लोकाः शुभाः पुन्नाम्नो नरकात्त्रायत इति पुत्त्र इति" एतत् श्रुत्वा भवनमागत्य परिजनेन सशिरःप्रणाममभ्यर्थ्यमानापि नाहारमभिनन्दति, न भूषणपरिग्रहमाचरति, नोत्तरं प्रतिपद्यते, केवलमविरलबाष्पविन्दु (क) दुर्द्दिनान्धकारितमुखी रोदिति, एतदाकर्ण्य देवः प्रमाणम्" इत्येतदभिधाय विरराम।

विरतवचनायां तस्यां भूमिपालस्तूष्णीं मुहूर्त्तमिव स्थित्वा

(क) पुस्तकान्तरे विन्द्वित्येतन्नास्ति।

[१] सुरतं रमणं, सुरता देवसमूहश्च।

दीर्घमुष्णञ्च निश्वस्य निजगाद। "देवि! किमत्र? क्रियतां दैवायत्ते वस्तुन्ययत्नमतिरुदितेन, न वयमनुग्राह्याः प्रायोदेवतानाम्, आत्मजपरिष्वङ्गामृतास्वादसुखस्य नूनमभाजनमस्माकं हृदयम्, अन्यस्मिन् जन्मनि न कृतमवदातं [१] कर्म, जन्मान्तरविहितं हि कर्म फलमुपनयति पुरुषस्येह जन्मनि, न हि शक्यं दैवमन्यथा कर्त्तुम् अभियुक्तेनापि, [२] यावत्तु मानुष्यके [३] शक्यमुपपादयितुं तावत् सर्वमुपपाद्यताम्, अधिकां कुरु देवि! गुरुषु भक्तिम्, द्विगुणामुपपादय देवतासु पूजाम्, ऋषिजनपरिचर्य्यासु दर्शितादरा भव, परं हि दैवतमृषयो यत्नेनाराधिता यथासमीहितफलानामतिदुर्लभानामपि वराणां दातारो भवन्ति, श्रूयते हि पुरा चण्डकौशिकप्रसादात् (क) मगधेशो बृहद्रथो नाम राजा जनार्द्दनस्य जेतारमतुलबलपराक्रमं (ख) जरासन्धं [४] नाम तनयं लेभे, दशरथश्च राजा परिणतवया अपि विभाण्डकमहामुनिसुतस्य

(क) प्रसादप्रभावात् इति च पाठः।

(ख) जनार्द्दनप्रतिममतुलभुजबलमप्रतिरथमिति च पाठः।

[१] अवदातं विशुद्धं पुण्यजनकम्।

[२] अभियुक्तेन अभिनिविष्टेनाग्रहवतेत्यर्थः।

[३] मानुष्यके मानवलोके।

[४] तत्कथा च भारते सभापर्वणि १६ अध्याये।

ऋष्यशृङ्गस्य [१] प्रसादान्नारायणभुजानिव अप्रतिहतान् उदधीनिवाक्षोभ्यानवाप चतुरः पुत्रान्, अन्ये च राजर्षयस्तपोधनानाराध्य पुत्रदर्शनामृतस्वादसुखभाजो बभूवुः, अमोघफला हि (क) महामुनिजनसेवा, अहमपि खलु कदा ? समुपारूढ़गर्भभरालसामापाण्डुरमुखीमासन्नचन्द्रोदयामिव पौर्णमासीनिशां देवीं द्रक्ष्यामि, कदा ? मे तनयजन्ममहोत्सवानन्दनिर्भरो हरिष्यति पूर्णपात्रं [२] परिजनः, कदा ? हारिद्रवसनधारिणी सुतसनाथोत्सङ्गा द्यौरिवोदितरविमण्डला(ख)सबालातपा मामानन्दयिष्यति देवी, कदा ? सर्वौषधि [३] पिञ्जरजटिलकेशो, निहितरक्षाघृतमधुविन्दुतालुविन्यस्तगौरसर्षपोन्मिश्रभूतिलेखो,(ग) गोरोचनाचित्रितकण्ठसूत्रग्रन्थिः, उत्तानशयो, दश-

---

(क) अत्र तु भवतीत्यधिकः पाठोऽपि क्वचित् दृश्यते।

(ख) द्यौरिवोद्यतरविमण्डला इति च पाठः।

(ग) लेश इति च पाठः।

[१] तत्कथा रामायणे आदिकाण्डे १५ सर्गे।

[२] पूर्णपात्रं वस्तुपूर्णं, पात्रे वर्द्धापकेऽपि चेत्युक्तेः वृद्ध्यर्थं वस्तुपूर्णं पात्रम्। हरिष्यति अग्रे स्थापयिष्यति।

[३] "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः। मुराचन्दनकर्पूरैर्मुस्तैः सर्वौषधिः स्मृतः" इत्युक्तः (कुङ्कुमजटामांसीप्रभृति) ओषधिराशिभेदः।

नशून्यस्मितानन:, पुत्त्रको जनयिष्यति मे हृदयाह्लादम्, कदा ? गोरचनाकपिलद्युतिरन्तःपुरिकाकरतलपरम्परासञ्चार्य्यमाणमूर्त्तिरशेषजनाभिनन्दितो मङ्गलप्रदीप इव मे शोकान्धकारमुन्मूलयिष्यति चक्षुषोः, कदा ? च क्षितितलरेणुधूसरो मण्डयिष्यति मम हृदयेन दृष्ट्या च सह परिभ्रमन् भवनाङ्गनम्, कदा ? केशरिकिशोरकइव सञ्जातजानुचङ्क्रमणारम्भः(क)सञ्चरिष्यतीतस्ततः स्फटिकमणिमयभित्त्यन्तरितान् भवनगृहशावकानाजिघृक्षुः, कदा ? ऽन्तःपुरिकानूपुरनिनादसङ्गतान् गृहकलहंसकाननुसरन् कक्षान्तरप्रधावितः कनकमेखलाघण्टिकारवानुसारिणीमायासयिष्यति धात्रीम्, कदा ? कृष्णागुरुपङ्कलिखितमदलेखालङ्कृतगण्डस्थलः कोमलमुखरवडिण्डिमध्वनिजातप्रीतिरूर्द्धकरविप्रकीर्णचन्दनचूर्णधूलिधूसरः कुञ्चिताङ्गुलिशिखराङ्कुशाकर्षणविधूतशिराः करिष्यति मदमत्तगजराजलीलाम्, (ख) कदा ? मातुश्चरणरागोपयुक्तशेषेण पिण्डालक्त[१] करसेन वृद्धकञ्चुकिनां विडम्बयिष्यति मुखानि, कदा ? कुतूहललोललोचनो मणिकुट्टिमेष्वधोदत्तदृष्टिरनुसरिष्यति स्खलद्गतिरात्मनः

(क) चङ्क्रमणावस्थ इति वा पाठः।

(ख) मत्तगजक्रीड़ामिति वा पाठः।

[१] पिण्डः घनीभूतः अलक्तकरसः पिण्डालक्तकरसः।

प्रतिबिम्बानि, कदा? नरेन्द्रबहस्तप्रसारितभुजयुगलाभिनन्द्यमानागमनो भूषणमणिमयूखलेखाकुलीक्रियमाणलोलदृष्टिः आस्थान [१] स्थितस्य मम पुरः पर्य्यटिष्यति सभान्तरेषु, इत्येतानि चान्यानि मनोरथशतानि चिन्तयतः अन्तःसन्तप्यमानस्य यान्ति रजन्यः, मामपि दहत्येवायमहर्निशमनलइवानपत्यतासमुद्भवः शोकः, शून्यमेव मे प्रतिभाति जगत्, अफलमिवाखिलं पश्यामि जीवितं राज्यञ्च, अप्रतिविधेये [२] तु विधातरि किं? करोमि, तन्मुच्यतां देवि! शोकानुबन्धः, आधीयतां धैर्य्ये धर्मे च धीः, धर्म्मपरायणानां हि सदा समीपसञ्चारिण्यः कल्याणसम्पदोभवन्ति" एवमभिधाय (क)सलिलमादाय स्वयं करतलेनाभिनवपल्लवेनेव विकचकमलतुल्यमाननमस्याः साश्रुलेखं ममार्ज्ज। पुनः पुनश्च प्रियशतमधुराभिः शोकापनोदननिपुणाभिर्धर्म्मोपदेशगर्भाभिर्वाग्भिराश्वास्य सुचिरं नरेन्द्रो निर्जगाम।

निर्गते च तस्मिन् मन्दीभूतशोकावेगा विलासवती यथाक्रियमाणाभरण(ख)परिग्रहादिकं समुचितं वासरव्यापारमक-

---

(क) इत्यमभिधायेति वा पाठः।

(ख) पुस्तकान्तरे यथाक्रियमाणमित्येतत् असमस्तपदं दृश्यते।

[१] आस्थानं सभा।

[२] अप्रतिविधेये अस्वतन्त्रे अवशीभूते।

रोत्। ततः प्रभृति सुतरां देवताराधनेषु ब्राह्मणपूजासु गुरुजनपरिचर्य्यासु च आदरवती बभूव। यद्यच्च किञ्चित् कुतश्चित् शुश्राव व्रतं, तत्तद्‌गर्भकतृष्णया सर्व्वं चकार, न महान्तमपि क्लेशमजीगणत्। अनवरतदह्यमानगुग्गुलबहुल (क) धूपान्धकारितेषु चण्डिकागृहेषु धवलाम्बरा शुचिमूर्त्तिरुपोषिता हरितकुशोपच्छन्नेषु भूतलशयनेषु सुष्वाप। पुण्यसलिलपूरितैर्विविधकुसुमफलोपेतैः क्षीरतरुपल्लवलाञ्छनैः सर्वरत्नगर्भैः शातकुम्भकुम्भैर्गोकुलेषु वृद्धगोपवनिताकृतमङ्गला लक्षणसम्पन्नानां गवामधः सस्नौ। प्रतिदिवसमुत्थायोत्थाय सर्वरत्नोपेतानि हैमानि तिलपात्राणि ब्राह्मणेभ्यो ददौ। महानरेन्द्र [१] लिखितमण्डलमध्यवर्त्तिनी विविधबलिदानानन्दितदिग्देवतानि बहुलचतुर्द्दशीनिशासु(ख)चतुष्पथेषु स्नानमङ्गलानि भेजे। सिद्धायतनानि कृतविविधदैवतोपयाचितकानि [२] सिषेवे। दर्शितप्रत्यादेशानि [३] सन्निधाममातृभवनानि जगाम(ग)प्रसि-

---

(क) बहुलेति वा पाठः।

(ख) बहुलपक्षचतुर्द्दशीनिशासु इति वा पाठः।

(ग) सन्निहितमातृभवनानि आजगाम इति वा पाठः।

[१] महानरेन्द्रः महाविषवैद्यः।

[२] स्वाभीष्टसिद्धये देवाय देयः पश्वादिर्बलिरुपयाचितकम्।

[३] प्रत्यादेश आविर्भावः।

ङ्केषु नागकुलह्रदेषु ममज्ज। अश्वत्थप्रभृतीनुपपादितपूजान्महा वनस्पतीन् कृतप्रदक्षिणा ववन्दे। दोलायमानमणिवलयेन पाणियुगलेन कृतस्नाना(क)स्वयमखण्डितसिक्थ[१] कुसुमसम्पादितं (ख) रजतपात्रपरिगृहीतं वायसेभ्योदध्योदनबलिमदात्। अपरिमितकुसुमधूपविलेपापूपपललपायसलाजकलितामहरहर्ज्येष्ठादेवीसपर्य्या [२] मालतान्, स्वयमुपाहितपिण्डपातान् [३] भक्तिप्रवणेन मनसा सिद्धादेशान्नग्नक्षपणकान् [४] पप्रच्छ, विप्रश्निकादेश [५] वचनानि बहु मेने, निमित्त [६] ज्ञानुपचचार, शकुनज्ञान [७] विदामादरमदर्शयत्, अनेकवृद्धपरम्परासमागतानि रहस्यानि [८] चकार। दर्शनागतद्विजगणनात्म-

---

(क) स्नातेत्येव क्वचित् पाठः।

(ख) स्वयमखण्डसिक्थसम्पादितम् इति च पाठः।

[१] सिक्थः भक्तम्।

[२] ज्येष्ठादेवी दुर्गामूर्त्तिभेदस्तस्याः सपर्य्या पूजा।

[३] पिण्डः ग्रासस्तत्पूर्णपात्रम्।

[४] नग्ना दिगम्बरा बौद्धभेदाः तेषु क्षपणकः सन्न्यासी।

[५] विप्रश्निको दैवज्ञः।

[६] निमित्तं शुभाशुभसूचकम् अक्षिस्पन्दनादि।

[७] शकुनं वायसादिशकुनचेष्टादिरूपं शुभासूचकं निमित्तम्।

[८] रहस्यानि नरेङ्गितप्रभृतीनि शुभाशुभसूचकनिमित्तानि।

जदर्शनोत्सुका वेदस्मृती [१] रकारयत्, अनवरतवाच्यमानाः पुण्याः कथाः शुश्राव, गोरोचनालिखितभूर्ज्जपत्रगर्भान्मन्त्रगण्डकान् [२] उवाह, रक्षापरिसरो [३] पेतान्योषधिसूत्राणि बबन्ध। परिजनोऽपि चास्याः सततमुपश्रुत्यै [४] निर्जगाम तन्निमित्तानि च जग्राह, शिवाभ्योनिशि मांसबलिपिण्डमनुदिनं समुत्ससर्ज्ज, स्वप्नदर्शनाश्चर्य्याण्याचार्य्याणामाचचक्षे, चत्वरेषु, शिवाबलिमुपजहार।

एवं गच्छति काले कदाचिद्राजा क्षीणभूयिष्ठायां रजन्यामल्पावशेषपाण्डुतारके जरत्पारावतपक्षधूसरे नभसि स्वप्ने सौध-(क) शिखरस्थिताया विलासवत्याः करिण्या इव बिसपल्लवमानने सकलकलापरिपूर्णमण्डलं शशिनं प्रविशन्तमद्राक्षीत्। प्रबुद्धस्सोत्थाय हर्षविकाशस्फीततरेण चक्षुषा धवलीकृतवासभवनस्तस्मिन्नेव क्षणे सबहुमानं शुकनासमाहूय तं स्वप्नमकथयत्। समुपजातहर्षः स तं प्रत्युवाच "देव! सम्पन्नाः

(क) सितप्रासादेत्यधिकः पाठः।

[१] वेदस्मृतिः वेदापरायणम्। द्विजगणानिति प्रयोज्य कर्त्तुः कर्म्मत्वम्।

[२] मन्त्रलिखितः ग्रन्थिभेदः गण्डकः।

[३] परिसरो विधानम् ओषधिबन्धनसूत्रमोषधिसूत्रम्।

[४] दैवशुभाशुभप्रश्नः उपश्रुतिः।

सुचिरादस्माकं मनोरथाः, कतिपयैरेवाहोभिरसंशयमनुभविष्यति स्वामी सुतमुखकमलावलोकनसुखम्, अद्य खलु मयापि निशि स्वप्ने धौतधवल (क) वाससा प्रशान्तमूर्त्तिना दिव्याकृतिना द्विजेन विकचचन्द्रकलावदातदलशतम्, आलोलकेशरसहस्रजटिलमकरन्दबिन्दुसन्दोहवर्षि पुण्डरीकमु(ख)त्सङ्गे देव्या मनोरमाया [१] निहितं दृष्टम्, आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रजातानि (ग) शुभानि निमित्तानि, किं वान्यत्प्रियतरं परमानन्दकारणमतो विद्यते, अवितथफला हि प्रायो निशावसानसमये दृष्टा भवन्ति स्वप्नाः, सर्व्वथा नचिरेणैव मान्धातारमिव धौरेयं (घ) राजर्षीणां, भुवनानन्दहेतुमात्मजं जनयिष्यति देवी शरत्क (ङ) मलिनीवाभिनवकमलोद्गमेन गन्धगजमाह्लादयिष्यति देवम्, येनेयं दिग्गजमदलेखेवाविच्छिन्नसन्ताना क्षितिभारधारणोचिता भविष्यति कुलसन्ततिः स्वामिनः,, इत्येवमभिदधानमेव तं करेण गृहीत्वा नरेन्द्रः प्रविश्याभ्यन्तरमुभाभ्यामपि ताभ्यां स्वप्नाभ्यां विलासवतीमानन्दयाञ्चकार।

(क) धौतसकलधवलेति वा पाठः।

(ख) मधुशीकरवर्षिसित पुण्डरीकम् इति च पाठः।

(ग) आनन्दपातीनि इति वा पाठः।

(घ) सर्व्वराजर्षीणामिति वा पाठः।

(ङ) शरत्कालकमलिनीति वा पाठः।

[१] मनोरमा शुकनाशपत्नी ब्राह्मणजातित्वेन तस्या देवीत्वम्।

कतिपयदिवसापगमे च देवताप्रसादात् सरसीमिव प्रतिमाशशी गर्भो विवेश विलासवतीम्। येन च नन्दनवनराजिरिव पारिजातेन, मधुसूदनवक्षःस्थलीव कौस्तुभमणिना, सुतरामराजत देवी, दर्पणश्रीरिव च गर्भच्छलेन संक्रान्तमवनिपालप्रतिबिम्बमुवाह, शनैःशनैश्च प्रतिदिवसमुपचीयमानगर्भा (क) निर्भरपरिपीतसागरसलिलभरमन्थरेव मेघमाला मन्दं मन्दं संचचार, मुहुर्मुहुरनुबद्धजृम्भिक [१] माजिह्मितलोचनं (ख) सालसं निशश्वास। तथावस्थाञ्च तामनभिनन्दितपानभोजनां (ग) प्रावृषमिव, श्यामायमानपयोधर [२] मुखीं केतकीमिव गर्भ [३] (घ) पाण्डुरामालोक्येङ्गितकुशलः परिजनो विज्ञातवान्।

अथ तस्याः सर्व्वपरिजनप्रधानभूता सदा राजकुलसंवास-

(क) सा शनैः शनैश्च प्रतिदिनमुग्धा द्विप्रमाणगर्भेति वा पाठः।

(ख) आमीलितलोचनमिति वा पाठः।

(ग) अहरहः स्वयमनेकारसवञ्चितपानभोजनामिति वा पाठः।

(घ) छवीत्यधिकः क्वचित् पाठः।

[१] जृम्भैव जृम्भिका अनुबद्धा निद्रावेशेन जायमाना जृम्भिका यत्र अतएव आजिह्मिते ईषत् कुटिलिते लोचने यत्र।

[२] पयोधरः स्तनः मेघश्च।

[३] गर्भामध्यं गर्भस्थसत्त्वश्च गर्भे गर्भेण वा पाण्डुरा।

(क) चतुरा सर्व्वदा च राजसन्निकर्षप्रगल्भा सर्व्वमङ्गलकुशला कुलवर्द्धना नाम महत्तरिका [१] प्रशस्ते दिवसे प्रदोषवेलाया-मभ्यन्तरास्थानमण्डपगतं, गन्धतैलाभिषेकज्वलितदीपिकासहस्र-परिवृतम्, उडुनिकरमध्यवर्त्तिनमिव पौर्णमासीशशिनम्, उरग-राजफणामणिसहस्रान्तरालस्थितमिव नारायणम्, मूर्द्धाभिषिक्तैः प्रधाननरेन्द्रैः परिमितैः परिवृतम्, अनतिदूरावस्थितपरिजनम्, अनन्तरसुशुक्लवेत्रासनोपविष्टेन धौतधवलाम्बरपरिधानेन नात्युज्ज्वलवेषेण जलनिधिनेवागाधगाम्भीर्य्येण समुपारूढविश्रम्भनिर्भरालापाः कथाः शुकनासेन सह कुर्व्वाणं भूमिपालमुपसृत्य रहः कर्णमूले विदितविलासवतीगर्भवृत्तान्तमकार्षीत्।

तेन तु तस्यावचनेनाश्रुतपूर्व्वेणासम्भाव्येनामृतरसेनेव सिक्तसर्व्वाङ्गस्य, सद्यःप्रकट (ख) रोमाङ्कुरनिकरकण्टकिततनोः, आनन्दरसेन विक्लवीक्रियमाणस्य, स्मितविकसितकपोलमूलस्य, परिपूरितहृदयातिरिक्तहर्षमिव दशनांशुवितानच्छलेन विकिरतो राज्ञः शुकनासमुखे लोलतारकमानन्दजलबिन्दुक्लिन्नपक्ष्ममालं तत्क्षणं पपात चक्षुः। अनालोकितपूर्व्वं तु हर्षप्रकर्षमभिसंवीक्ष्य भूपतेः, कुलवर्द्धनाञ्च स्मितविकसितमुखीमागतां

(क) सञ्चारेत्यधिकः क्वचित् पाठः।

(ख) प्रहृष्टेत्यधिकः क्वचित् पाठः।

[१] महत्तरिका ग्रामसमूहे विख्यातमाहात्म्या।

दृष्ट्वा तस्य चार्थस्य सततं मनसि वर्त्तमानत्वादविदितवृत्तान्तोऽपि तत्कालोचितमपरमतिमहतो हर्षस्य कारणमपश्यन् शुकनासः स्वयमुत्प्रेक्ष्य समुत्सर्पितासनः समीपतरमुपसृत्य नातिप्रकाशमाबभाषे। "देव! किमस्ति? किञ्चित्(क)स्वप्नदर्शने सत्यम्, उत्फुल्ललोचना(ख)हि कुलवर्द्धना दृश्यते, देवस्यापीदं प्रियवचनश्रवणकुतूहलादिव श्रवणमूलमुपसर्पदुपरचयदिव नीलकुवलयकर्णपूरशोभामानन्दजलपरिप्लुतं तरलतारकं विकसदावेदयति महत्प्रहर्षकारणमीक्षणयुगलम्, उपारूढ़महोत्सवश्रवणकुतूहलमुत्सुकं क्लाम्यति मे मनः, तदावेदयतु देवः किमिदम्," इत्युक्तवति तस्मिन् राजा विहस्याब्रवीत् "यदि सत्यमनया यथा कथितं तदा सर्व्वमवितथं स्वप्नदर्शनम्, अहन्तु न श्रद्दधे, कुतोऽस्माकमियती भाग्यसम्पत्, अभाजनं हि वयमीदृशानां प्रियवचनश्रवणानाम्, अवितथवादिनीमप्यहं कुलवर्द्धनाम् एवंविधानां कल्याणानामसम्भावितमात्मानं मन्यमानो विपरीतामिवाद्य पश्यामि, तदुत्तिष्ठ स्वयमेव गत्वा किमत्र सत्यमिति देवीं पृष्ट्वा ज्ञास्यामि," इत्यभिधाय विसर्ज्य सकलनरेन्द्रलोकम् उन्मुच्य स्वाङ्गेभ्यो भूषणानि कुलवर्द्धनायै दत्त्वा तया च दत्तप्रसादानन्तरमवनितलाश्लिष्टललाटलेखया शिरःप्रणामेनाभ्यर्च्चितः, सह शुकनासेनोत्थाय, हर्षविशेषनिर्भरेण त्वर्य्य-

(क) तस्मिन्नित्यधिकः क्वचि पाठः।

(ख) अत्यन्तोत्फुल्ललोचन इति क्वचित् पाठः।

माणो (क)मनसा, पवनचलितनीलकुवलयदललीलाविडम्बकेन दक्षिणेनाक्ष्णा परिस्फुरताभिनन्द्यमानः, तत्कालसेवासमुचितेन विरलविरलेन परिजनेनानुगम्यमानः, पुरःसर्पिणीनामनिललोलस्थूलशिखानां प्रदीपिकानामालोकेन समुत्सार्यमाणकक्षान्तरतिमिरमन्तःपुरमयासीत्।

तत्र बहुकृतरक्षासंविधाने [१] नवसुधानुलेपनधवलिते, प्रज्वलितमङ्गलप्रदीपे पूर्णकलसाधिष्ठितद्वारपक्षके [२] प्रत्यग्रलिखितमङ्गल्यालेख्योज्ज्वलभित्तिभागमनोहारिणि, समुपरचितसितवितानपर्य्यन्तावबद्धमुक्तागुणे, (ख) मणिप्रदीपप्रहत(ग)तिमिरे, वासभवने, भूमिलिखितपत्रलताकृतरक्षापरिक्षेपं, शयनशिरोभागविन्यस्तरत्नधवलनिद्रामङ्गल(घ) कलसम् आबद्धविविधौषधिमूलमन्त्रपवित्रम्, अवस्थापितरक्षाशक्तिवलयम्, इतस्ततोविप्रकीर्णगौरसर्षपम्, अवलम्बितबालयोक्त्रग्रथितलोहपिप्पलपत्रम्, (ङ) आसक्तहरितारिष्ट[३]पल्लवम्, उत्तुङ्गपाद-

(क) पूर्य्यमाण इति वा पाठः।

(ख) पर्य्यन्तस्थितमुक्तागुणे इति वा पाठः।

(ग) प्रतिहतेति वा पाठः।

(घ) क्वचित् मङ्गलमित्येव पाठः।

(ङ) दलमिति वा पाठः।

[१] रक्षायाः संविधानमुपायकरणम्।

[२] द्वारपक्षौ द्वारपार्श्वौ।

[३] अरिष्टो निम्बः।

पीठप्रतिष्ठितम्, इन्दुदीधितिधवलप्रच्छदपटम् [१] अचलराजशिलातलविशालं, गर्भोचितं, शयनतलमधिशयानां कनकपात्रपरिगृहीतैरविच्छिन्नविरलावस्थितदधिलवैः, जलतरङ्गतरलस्थितशालिसिक्थनिकरैः, अग्रथितकुसुमाञ्जलिसनाथैः, पूर्णभाजनैः, अखण्डितानन्नमत्स्यपटलैश्च, प्रत्यग्रपिशितपिण्डमिश्रैः, अविच्छिन्नसलिलधारानुगम्यमानमार्गैः, पटलक [२] प्रज्वलितैश्च शीतलप्रदीपैः, गोरोचनामिश्रगौरसर्षपैश्च सलिलाञ्जलिभिश्च आचार (क) कुशलेनान्तःपुरजरतीजनेन क्रियमाणावतारणकमङ्गलाम्, [३] धवलाम्बरविविक्तवेषेण प्रमुदितेन प्रस्तुतमङ्गलप्रायालापेन परिजनेनोपास्यमानाम्, उपारूढगर्भतयान्तर्गतकुलशैलामिव क्षितिं, सलिलनिमग्नैरावतामिव मन्दाकिनीं, गुहागतसिंहामिव गिरिराजमेखलां, जलधरपटलान्तरितदिनकरामिव दिवसश्रियम्, उदयगिरितिरोहितशशिमण्डलामिव विभावरीम्, अभ्यर्णब्रह्मकमलविनिर्गमामिव नारायणनाभिम्, आसन्नागस्त्योदयामिव

(क) अभिचारेति पाठः। अभिचारः श्येनयागादि।

[१] प्रच्छदपटः शय्याच्छादकवस्त्रम्।

[२] पटलं छदिस्तत्पर्य्यन्तं प्रज्वलिताः उच्छिखा इत्यर्थः।

[३] अवतारणे शय्यादितोऽधोगमनकाले विहितं यत् मङ्गलं तत् क्रियमाणं यस्याः।

दक्षिणाभां, फेणाहृतामृतकलशामिव चीरोदवेलां, गोरोचना-(क)चित्रितदशमनुपहत[१]मतिधवलं(ख)दुकूलयुगलं वसानां, विलासवतीं ददर्श। ससम्भ्रमपरिजनप्रसारितकरतलावलम्बनावष्टम्भेन वामजानुविन्यस्तहस्तपल्लवां प्रचलितभूषणमणिरवमुखरमुत्तिष्ठन्तीं विलासवतीम् "अलमलमत्यादरेण देवि! नोत्थातव्यम्, इत्यभिधाय सह तया तस्मिन्नेव शयनीये पार्थिवः समुपाविशत्। अस्पृष्टचामीकरचारुपदे धवलोपच्छदे चासन्ने शयनान्तरे शुकनासोऽपि न्यषीदत्।

अथ तामुपारूढगर्भामालोक्य हर्षभरमन्थरेण मनसा प्रस्तुतपरिहासो राजा "देवि! शुकनासः पृच्छति, यदाह कुलवर्द्धना, किमपि? तत् किं? तथैव?,, इत्युवाच अथाव्यक्तस्मितच्छुरितकपोलाधरलोचना लज्जया दशनांशुजालकव्याजेनांशुकेनेव मुखमाच्छादयन्ती विलासवती तत्क्षणमधोमुखी तस्थौ पुनःपुनश्चानुरुध्यमाना (ग) "किं नाम मामतिमात्रं त्रपापरवशां करोषि? नाहं किञ्चिदपि वेद्मि,, इत्यभिदधाना तिर्य्यग्वलिततारकेण चक्षुषा अव-

---

(क) तिलकेत्यधिकः क्वचित् पाठः।

(ख) अनुपहतं मणिधवलमिति वा पाठः।

(ग) अनुबध्यमाना इति वा पाठः।

[१] अनुपहतम् अच्छिन्नदशं नवम्राखण्डमित्यर्थः।

नतमुखी राजानं साभ्यसूयमिवापश्यत्। अपरिस्फुटहासज्योत्स्नाविशदेन मुखशशिना भूभुजां पतिरेनां भूयो बभाषे। "सुतनु! यदि मदीयेन वचसा तव त्रपा वितन्यते, तदयमहं स्थितो निभृतम्, अस्य तु किं प्रतिविधास्यसि [१] विघटमानदलकोशविशदचम्पकद्युतेः सवर्णतया परिमलानुमीयमानकुङ्कुमाङ्गरागस्य पाण्डुरतामापद्यमानस्य वर्णस्य, अनयोश्च गर्भसम्भवामृतावसेकनिर्व्वाप्यमाणहृदयशोकानलप्रभवं धूममिव वमतोः गृहीत (क) नीलोत्पलयोरिव चक्रवाकयोः तमालपल्लवलाञ्छितमुखयोरिव कनककलसयोः सकृदिवालिखितकृष्णागुरुपङ्कपत्रलतयोः श्यामायमानचूचुकयोः पयोधरयोः, अस्य च प्रतिदिनमतिगाढ़तामापद्यमानेन काञ्चीकलापेन दूयमानस्य नश्यत्त्रिवलिलेखावलयस्य कृशिमानमुज्झतो (ख) मध्यभागस्य," इत्येवं ब्रुवाणमवनिपालमन्तर्मुखविनिगूढ़हासः शुकनासः "देव! किमायासयसि? देवीम् इयमनयाकथयापि लज्जते, त्यज कुलवर्द्धनाकथितवार्त्तासम्बद्धमालापम्," इत्यब्रवीत्। एवंविधाभिश्च नर्म्मप्रायाभिः कथाभिः सुचिरं स्थित्वा शुकनासः स्वभवनमयासीत्। नरेन्द्रोऽपि तस्मिन्नेव वासगृहे तया सह तां निशामत्यवाहयत्।

(क) वहतोः आननगृहीतेति पाठः।

(ख) उद्वहतः इति पाठः।

[१] प्रतिविधानं प्रकृते गोपनार्थमुपायालम्बनम्।

ततः क्रमेण यथासमीहितगर्भदोहद [१]सम्पादनप्रमुदिता पूर्णे प्रसवसमये पुण्येऽहनि अनवरतगलन्नाड़िकाकलितकाल-कले, [२] बहिराग्टहीत[३] च्छायैर्गणकैर्ग्टहीते लग्ने प्रशस्तायां वेलायामिरम्मदमिव [४] जलधरमाला सकललोकहृदयानन्द-कारिणं विलासवती सुतमसूत। तस्मिन् जाते सरभससमितस्ततः प्रधावितस्य परिजनस्य चरणघातसंक्षोभचलितक्षितितलो, भूपालाभिमुखप्रसृतस्खलद्गतिविकलकञ्चुकिवृन्दो, जनसम्मर्द्दनिष्पिष्यमाणपतितकुब्जवामनकिरातगणो, विस्फार्य्यमाणान्तःपुरजनाभरणझङ्कारमनोहरः, पूर्णपात्रहरण [५] विलुप्यमानवसनभूषणः, संक्षोभितनगरो, राजकुले दिष्टि [६]

---

[१] गर्भिणीमनोरथः गर्भदोहदम्।

[२] गलन्तीभिः आधारपात्रात् पतन्तीभिर्नाड़िकाभिर्नाड़ीबोधकवालुकाभिराकलिता ज्ञाता कालकला कालांशो यत्र लग्ने।

[३] छाया शङ्कुच्छाया "सद्व्यूनं द्विघ्नतं हीनं मध्यपादैश्च षड्गुणैः छायापादैस्तु मध्योनैः षड्युतैर्द्विगुणैर्हरेदित्यादि" प्राञ्चश्च छायापादेनापि दिवसप्रमाणज्ञानं ज्योतिषे प्रसिद्धम्।

[४] इरया जलेन माद्यति इति इरम्मदं मेघज्योतिः।

[५] पूर्णपात्रं हृद्यार्थं वस्तुपूर्णं पात्रं तस्य हरणं दर्श्यमानान्तिके स्थापनं तेन लुप्यमानं वसनभूषणं यत्र।

[६] दिष्टिरुत्सवो भाग्यं वा।

वृद्धिसम्भ्रमोऽतिमहानभूत्। अनन्तरञ्च मन्दरमथ्यमानजलनिधिघोषगम्भीरदुन्दुभिध्वानपुरःसरेण, प्रहतमृदुमृदङ्गशङ्खकाहलानक-[१]-निवहनिनादनिर्भरेण, मङ्गलपटहपटुरवसंवर्द्धितेनानेकजनसहस्रकलकलबहुलेन, त्रिभुवनमापूरयता, उत्सवकोलाहलेन, सामन्ताः सान्तःपुराः सप्रकृतयः सराजलोकाः सवेश्याम्भृतयः सबालवृद्धाः ननृतुः, आगोपालमुन्मत्ताइव हर्षनिर्भराः प्रजाः। प्रतिक्षणमवर्द्धत चन्द्रोदयेनेव जलनिधिः कुलकलनुकरो राजसूनोर्जन्मनो महोत्सवः।

पार्थिवस्तु तनयाननदर्शनोत्सवहृतहृदयोऽपि दिवसवशेन मौहूर्त्तिकगणोपदिष्टे प्रशस्ते मुहूर्त्ते निवारितनिखिलपरिजनः शुकनासद्वितीयो, भखिरयमङ्गलकलसयुगलाशून्येन, आसक्तबहुपुत्रिकालङ्कृतेन, विविधवनपल्लवनिवहनिरन्तरनिचितेन, सन्निहितकनककलसफलमुषलयुगेन, विरलग्रथितसितकुसुममिश्रदूर्व्वाप्रवालमालालङ्कृतेन, आलम्बिताविरलव्याघ्रचर्म्मणा, वन्दन [२]मालान्तरालघटितघण्टागणेन द्वारदेशेन विराजमानम्, उभयतश्च द्वारपक्षकयोः मर्य्यादानिपुणेन गोमयमयीभिः, उत्तानजिनिहितवराटकप्रकरदन्तुराभिः, अन्तरान्तराबद्धविविधवर्णरागरुचिरकर्पासकुसुमलेशलाञ्छिताभिः, कुसु-

---

[१] काहलानकादयो वाद्यभेदाः।

[२] वन्दनमाला पल्लवपुष्पाद्यैः ग्रथितमाला (वन्देवार)।

अङ्गाररत्नवालेयलोहिताभिः, लेखाभिरालिखितस्वस्तिकभक्तिजालमुपरचयता, हारिद्रद्रवनिचयपरिपिञ्जराम्बरधारिणीं भगवतीं षष्ठीदेवीं कुर्व्वता, विकचपक्षपुटविकटशिखिपृष्ठमण्डलाधिरूढम्, आलोललोहितपटघटितपताकम्, उल्लसितशक्तिदण्डप्रचण्डं कार्त्तिकेयं सङ्घटयता, विन्यस्तालक्तकपटलपाटलमध्यभागौ सूर्य्याचन्द्रमसावाबध्नता, कुङ्कुमपङ्कपिञ्जरीकृतामूर्द्ध्वपीतकनकमययवनिकरकण्टकितामविरलखड्गगौरसिद्धार्थकप्रकरतया काञ्चनरसखचितामिव हृण्मयगुटिकाकदम्बमालां विन्यस्यता, चन्दनजलधवलितेषु भित्तिशिखरभागेषु पद्मरागविचित्रचेलचीरकलापलिङ्गाम् आपीतपिष्टातक[१] पङ्काङ्कितां वर्द्धमानक[२]परम्पराम् अन्यानि च प्रसवगृहमण्डनमङ्गलानि सम्पादयता पुरन्ध्रिवर्गेण समधिष्ठितम्, उपद्वारसंयतविविधगन्धकुसुममालालङ्कृतजरच्छागम्, अखिलव्रीहिमध्यावस्थापिता(क)र्घ्यबुद्धाध्यासितशयनशिरोभागम् अनवरतदह्यमानाज्यमिश्रभुजगनिर्मोकमेषविषाणोदरम्, अनलप्लुष्यमाणारिष्ट (ख) तरुपल्लवोल्लसितरक्षाधूमगन्धम्, अध्ययनमुखरद्विजगणविप्रकीर्य्यमाण-

(क) स्थापितेत्यत्र स्थितेति च पाठः ।

(ख) निम्बतरुपल्लवेति च पाठः ।

[१] पिष्टातः पटवासकः गन्धद्रव्यचूर्णम् ।

[२] दध्यर्थं संविधानकं वर्द्धमानकम् ।

श्रान्त्युदकलवम्, अभिनवलिखितमातृपटपूजाव्यग्रधात्रीजनम्, अनेकवृद्धाङ्गनारब्धसूतिकामङ्गलगीतिकामनोहरम्, उपपाद्यमानस्वस्त्ययनं, क्रियमाणशिशुरक्षाबलिविधानम्, आबध्यमानधवलकुसुमदामशतम्, अविच्छिन्नपठ्यमाननारायणनामसहस्रम्, अमलहाटकयष्टिप्रतिष्ठापितैरन्तःशुभ्रशतानीव निश्चलशिखैर्ध्यायद्भिर्मङ्गलप्रदीपैरुद्भासितम्, उत्खाता (क) सिलतासनाथपाणिभिः सर्वतोरक्षापुरुषैः परिवृतं सूतिकागृहमपश्यत्। अम्भः पावकञ्च स्पृष्ट्वा विवेश।

प्रविश्य च प्रसवपरिक्षामपाण्डुरमूर्त्तेरुत्सङ्गगतं विलासवत्याः स्वप्रभासमुदयोपहतगर्भगृहप्रदीपप्रभम्, अपरित्यक्तगर्भरागत्वादुदयपरिपाटलमण्डलमिव सवितारम्, अपरसन्ध्यालोहितबिम्बमिव चन्द्रमसम्, अनुपजातकाठिन्यमिव कल्पतरुपल्लवम्, उत्फुल्लमिव रक्तारविन्दराशिम्, अवनिदर्शनावतीर्णमिव लोहिताङ्गं, [१] विद्रुमकिशलयदलैरिव बालातपच्छेदैरिव पद्मरागरश्मिभिरिव विरचितावयवम्, अनभिव्यक्तमुखपञ्चकमिव महासेनं, [२] सुरवनिताकरतलपरिभ्रष्टमिवामर-

---

(क) उद्यतासिलतेति च पाठः।

[१] लोहिताङ्गं मङ्गलं तस्य रक्ताङ्गत्वेन सादृश्यम्।

[२] महासेनस्य षडाननतयास्य पञ्चकस्यानाविर्भावेन सादृश्यम्।

पतिकुमारम्, (क) उत्तप्तकल्याणकार्त्तस्वर[१]भास्वरया स्वदेह-प्रभया पूरयन्तमिव वासभवनम्, उद्भासमानैः सहजभूषणैरिव महापुरुषलक्षणैरुपेतम्, आगामिकालपालनप्रहृष्टया श्रिया समालिङ्गितम्, आह्लादहेतुमात्मजं ददर्श। विगतनिमेष-निश्चलपक्ष्मणा च मुहुर्मुहुः प्रमृष्टसङ्घट्टितानन्दबाष्पपटल-(ख) प्लुततारकेण दूर-(ग) विस्फारितेन स्निग्धेन चक्षुषा पिबन्निवालपन्निव स्पृशन्निव मनोरथसहस्रप्राप्तदर्शनं सस्पृहमीक्षमाणस्तनयाननं मुमुदे, कृतकृत्यञ्चात्मानं मेने। समृद्धमनोरथः शुकनासस्तु शनैःशनैरङ्गप्रत्यङ्गान्यस्य निरूपयन् प्रीतिविस्फारितलोचनो भूमिपालमवादीत्। "देव! पश्य पश्यास्य कुमारस्य गर्भसम्पीड़नवशादपरिस्फुटावयवशोभस्यापि माहात्म्यमाविर्भावयन्ति चक्रवर्त्तिचिह्नानि, तथाह्यस्य सन्ध्यांशुरक्तबालशशिकलाकारे ललाटपट्टे नवनलिननालभङ्गतन्तुतन्वीयमूर्णा [२] परिस्फुरति, एतद्विकचपुण्डरीकधवलं कर्णान्तायतं मुहुर्मुहुरुन्मिषितैर्धवलयतीव वासभवनम् अरालपक्ष्म लोचनयुगलम्, विजृम्भमाणकमलकोषपरिमलमनोहरमियमस्य सहजमान-

(क) अमरकुमारकमिति पाठः।

(ख) बाष्पविन्दुपटलेति पाठः।

(ग) पुस्तकान्तरे दूरमिति भिन्नं पदम्।

[१] कार्त्तस्वरं स्वर्णम्।

[२] ऊर्णा ललाटस्थः लोमसमूहात्मकश्चिह्नभेदः।

नामोदमाजिघ्रतीव दूरायता कनकलेखेव नासिका, रक्तोत्पलनिकरमुद्वहतीव चास्याधरकम् (क) रक्तोत्पलकलिकालोहिततलौ भगवतो विष्टरश्रवस [१] इव शङ्खचक्रचिह्नौ प्रशस्तलेखालाञ्छितौ करौ, अभिनवकल्पतरुपल्लवकोमलं लेखामयैर्ध्वजरथतुरगातपत्रकमलैरलङ्कृतम् अनेकनरेन्द्रसहस्रचूड़ामणिचक्रचुम्बनोचितं चरणयुगलम्, एष च दुन्दुभेरिवातिगम्भीरः स्वरयोगोऽस्य रुदतः श्रूयते"

इत्येवं कथयत्येव तस्मिन् ससम्भ्रमापसृतेन राजलोकेन द्वारि स्थितेन दत्तमार्गस्त्वरितगतिरागत्य प्रहर्षोद्गमपुलकिततनुः, स्फारीभवल्लोचनो, मङ्गलकनामा प्रहृष्टवदनः पुरुषः पादयोः प्रणम्य राजानं व्यजिज्ञपत्। "देव! दिष्ट्या वर्द्धसे, प्रतिहतास्ते शत्रवः, चिरं जीव, जय पृथिवीं, त्वत्प्रसादादत्रभवतः शुकनासस्यापि ज्येष्ठायां ब्राह्मण्यां मनोरमाभिधानायां राम इव रेणुकायां तनयो जातः श्रुत्वा देवः प्रमाणमिति"

अथ नृपतिरमृतवृष्टिप्रतिममाकर्ण्य तद्वचनं प्रीतिविस्फारिताक्षः प्रत्यवदत् "अहो कल्याणपरम्परा! सत्योऽयं जनप्रवादः, "यद्विपद्विपदं, स सम्पदमनुबध्नातीति" सर्व्वथा समानसुखदुःखतां दर्शयता विधिनापि भवतैव वयमनुवर्त्तिताः,, इत्यभिधाय प्रीतिविकसितमुखः सरभसमालिङ्ग्य विहसन् स्वय-

(क) अधरपुटकमिति च पाठः।

[१] विष्टरश्रवसः विष्णोः।

नेव शुकनासस्योत्तरीयं पूर्णपात्रं जहार। तस्मै च प्रीतमनाः प्रियवचनश्रवणानुरूपं पुरुषायापरिमितं पारितोषिकमादिदेश, उत्थाय च तथैव तेन चरणविघट्टनक्वणितनूपुरसहस्रमुखरितदिगन्तरेण, सरभसोत्क्षेपवलितमणिवलयावलीवाचालितभुजलतेन, ऊर्द्धीकृतैरुत्तानतलैः करपुटैरनिललुण्ठिता (क) माकाश-(ख)-कमलिनीमिव दर्शयता, पर्य्यस्तमृदितकर्ण-(ग) पल्लवेन परस्पराङ्गदकोटिसङ्घट्टदष्टपाटितोत्तरीयांशुकेन, श्रमजलधौताङ्गरागरञ्जितचीनवाससा किञ्चिदवशिष्टतमालपत्त्रेण, विलसद्दारविलासिनीहसितैरुन्निद्रकैरववनानुकारं प्रथयता, सरभसवल्गनस्खलल्लोलहारलतास्फालितकुचस्थलेन, सिन्दूरतिलकलुलिता-(घ)लकलेखेन, विप्रकीर्णपिष्टातकपांशुपिञ्जरितकेशपाशेन, प्रनृत्यविकलमूककुब्जकिरातवामनबधिरजड़जनपुरःसरेण, उत्तरीयांशुकग्रीवावद्धावकृष्टविलम्बितजरत्कञ्चुकिकदम्बेन वीणावेणुमुरजकांस्यतालल‌यानुगतेन, कलमधुरमुद्गायता, हर्षनिर्भरतया मत्तेनेवोन्मत्तेनेव, ग्रहगृहीतेनेव, [१]

(क) लुलितामिति च पाठः।

(ख) आकाशगङ्गाकमलिनीमिति च पाठः।

(ग) कर्णपूरेति च पाठः।

(घ) लोलितेति च पाठः।

[१] ग्रहगृहीतेन ग्रहाविष्टेन।

व्यपगतवाच्यावाच्यविवेकेन, नृत्यगीतक्रीड़ाप्रसक्तेनान्तःपुरिकाजनेन, प्रचल(क)मणिकुण्डलोद्वट्टितकपोलभित्तिना च विघूर्णमानकर्णोत्पलेनाधोगलितविलोलशेखरेण, दोलायमानवैकक[१]कुसुममालेन, निर्दयप्रहतभेरीमृदङ्गमर्द्दलपटहनिनादानुगतकाहलाशङ्खरवजनितरभसेन, चरणसन्निपातैर्विदारयतेव वसुधां राजपरिजनेन प्रवृत्तनृत्येन च चारणगणेन विविधमुखवाद्यकृतकोलाहलेन पठता गायता वल्गता चानुगम्यमानः शुकनास ुवनं गत्वा द्विगुणतरमुत्सवमकारयत्।

अतिक्रान्ते च षष्ठीजागरे [२] प्राप्ते दशमेऽहनि [३] पुण्ये

(क) प्रचलितमणिकुण्डलेति च पाठः।

[१] "वैकक्षकं तु तत् तिर्य्यक् यत् क्षिप्तमुरसि स्थितमित्युक्तमाल्यभेदः।

[२] सूतिका वासनिलया जन्मदा नाम देवताः।

तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता॥

षष्ठेऽह्नि रात्रियामन्तु जन्मदानान्तु कारयेत्।

राम! जागरणं कार्य्यं जन्मदानां तथा बलिः॥

इति विष्णुधर्म्मोत्तरम्। जन्मावधि षष्ठदिवसस्य रात्रौ षष्ठीप्रभृतिजन्मदादेवतापूजार्थं जागरः जागरणम्।

[३] दशमेऽहनि प्राप्ते गते इत्यर्थः "जननात् दशरात्रे व्युष्टे नामधेयकरणमिति" गोभिलस्मरणात् "एकादशे द्वादशे वा पिता नाम कुर्य्यात् इति" श्रुतेश्च दशमेऽहनि गते नाम चकारेत्यन्वयः।

मुहूर्त्ते गाः सुवर्णञ्च कोटिशो ब्राह्मणसात् कृत्वा "मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन् दृष्ट इति,, स्वप्नानुरूपमेव राजा सूनोश्चन्द्रापीड़ इति नाम चकार। अपरेद्युः शुकनासोऽपि कृत्वा ब्राह्मणोचिताः सकलाः क्रियाः राजानुमतमात्मजस्य विप्रजनोचितं वैशम्पायन इति नाम चक्रे। क्रमेण कृतचूड़ाकरणादिबालक्रियाकलापस्य शैशवमतिचक्राम चन्द्रापीड़स्य।

तारापीड़ः क्रीड़ाव्यासङ्गविघातार्थं वहिर्नगरादनुशिप्रमर्द्धक्रोशमात्रायामम्, अतिमहता तुहिनगिरिशिखरानुकारिणा सुधाधवलेन प्राकारमण्डलेन परिवृतम्, अनुप्राकार[१]मायितेन महता परिखावलयेन परिवेष्टितम्, अतिदृढ़कपाटसम्पुटम्, उद्घाटितैकद्वारप्रवेशम्, एकान्तोपरचिततुरगवाह्याली[२]विभागम्, अधःकल्पितव्यायामशालम्, अमरागाराकारं विद्यामन्दिरमकारयत्। सर्वविद्याचार्य्याणाञ्च संग्रहे यत्नमतिमहान्तमन्वतिष्ठत्।

ततश्च तं केशरिकिशोरकमिव पञ्जरगतं कृत्वा, प्रतिषिद्धनिर्गमम्, आचार्य्यकुलपुत्रप्रायपरिजनपरिवारम्, अपनी-

---

[१] अनुप्राकारम् प्राकारतुल्यदैर्घ्योपलक्षितेनेत्यर्थः।

[२] एकान्ते उपरचितः तुरगवाहिनाम् अश्वारोहिणामाली-तद्भ्रमणपथपङ्क्तिस्तस्याः विभागो यत्र तुरगवाहनयोग्यस्थलीसहित-मित्यर्थः।

ताशेषशिशुजनक्रीड़नव्यासङ्गम्, अनन्यमनसम्, अखिलविद्योपादानार्थमाचार्य्येभ्यश्चन्द्रापीड़ं शोभने दिवसे वैशम्पायनद्वितीयमर्पयाम्बभूव। प्रतिदिनञ्चोत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव गत्वैनमालोकयामास राजा।

चन्द्रापीड़ोऽप्यनन्यहृदयतया यथानियन्त्रितो राज्ञा अचिरेणैव कालेन यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैराचार्य्यैरुपदिश्यमानः सर्व्वा विद्या जग्राह। मणिदर्पण इवातिनिर्म्मले तस्मिन् सञ्चक्राम सकलः कला[१]कलापः। तथाहि पदे, [२] वाक्ये, [३] प्रमाणे, [४] धर्म्मशास्त्रे, राजनीतिषु, व्यायामविद्यासु, चापचक्रचर्म्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्व्वेष्वायुधविशेषेषु, रथचर्य्यासु, गजपृष्ठेषु, तुरङ्गमेषु वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषु वाद्येषु भरतादिप्रणीतेषु नृत्यशास्त्रेषु, नारदीयप्रभृतिषु गान्धर्व्ववेदविशेषेषु, हस्तिशिक्षायां, तुरगवयोज्ञानेषु, पुरुषलक्षणेषु[५]

---

[१] चतुःषष्टिप्रकाराणां गीतवादित्राशिल्पानाम् कलापः समूहः।

[२] सुप्तिङन्तं पदं तद्बोधकव्याकरणशास्त्रे एवमन्यदपि शास्त्रपरम्।

[३] वाक्यमाकाङ्क्षादियुक्तपदसमूहस्तद्बोधके मीमांसाशास्त्रे।

[४] प्रमाणं प्रमाहेतुः पक्षधर्मतादिविशिष्टहेतुप्रतिपादकरूपन्याययुक्तन्यायवैशेषिकसाङ्ख्यपातञ्जलबौद्धादिशास्त्रं तस्मिन्।

[५] पुरुषस्य शुभाशुभसूचकलक्षणबोधकशास्त्रे।

चित्रकर्मणि, पत्रच्छेद्ये, पुस्तकव्यापारे, लेख्यकर्मणि, सर्व्वासु द्यूतकलासु, गन्धशास्त्रेषु, शकुनिरुतज्ञाने, [१] ग्रहगणिते, [२] रत्नपरीक्षासु, [३] दारुकर्मणि, दन्तव्यापारे, [४] वास्तुविद्यासु, [५] आयुर्वेदे, [६] मन्त्रप्रयोगे, [७] विषापहरणे, सुरङ्गोपभेदे, तरणे लङ्घने, प्लुतिषु, आरोहणे, रतितन्त्रेषु, इन्द्रजाले, कथासु, नाटकेषु, आख्यायिकासु, काव्येषु, महाभारतपुराणेतिहासरामायणेषु, सर्वलिपिषु, सर्वदेशभाषासु, सर्वसंज्ञासु [८] शिल्पेषु, छन्दःस्वन्येष्वपि कलाविशेषेषु परं कौशलमवाप।

सहजा चास्याभ्यस्यतो वृकोदरस्येव शैशवएवाविर्बभूव सर्वलोकविस्मयजननी महाप्राणता [९]। यदृच्छया क्रीड़ताप्यनेन

---

[१] शकुनीनां वायसादीनां चेष्टाविशेषेण शुभाशुभज्ञापकशास्त्रे।

[२] ग्रहाणां गतिज्ञानसाधने सूर्य्यसिद्धान्तादिशास्त्रे।

[३] रत्नानां लक्षणशुभाशुभज्ञापकशास्त्रेषु।

[४] दन्तस्य मार्जनादिपाटवज्ञानसाधने शास्त्रे।

[५] वास्तुविद्यासु विश्वकर्मादिप्रणीतवास्तुलक्षणतच्छुभाशुभपरिमाणादिज्ञापकेषु शास्त्रेषु।

[६] आयुष्यरक्षके चिकित्साशास्त्रे चरकसुश्रुतादिप्रणीते।

[७] मन्त्रप्रयोगे तन्त्रशास्त्रे।

[८] पारिभाषिकशब्दसंकेतज्ञापकेषु शास्त्रेषु।

[९] सहजा स्वाभाविकी महाप्राणता महाबलता।

करतलालम्बितकर्णपल्लवावनताङ्गाः सिंहकिशोरकक्रमा[१] क्रान्ताइव गजकलभकाश्चलितुमपि न शेकुः। एकैकेन कृपाण-प्रहारेण बालएव तालतरून् मृणालदण्डानिव लुलाव। सकल-राजन्यवंशवनदावानलस्य [२] परशुरामस्येवास्य नाराचाः शिखरिशिलातलभिदो बभूवुः। दशपुरुषसंवाहनयोग्येन चायो-दण्डेन श्रममकरोत्। ऋते च महाप्राणतायाः सर्वाभिरन्याभिः कलाभिरनुचकार तं वैशम्पायनः। चन्द्रापीड़स्य तु सकलकला-कलापपरिचयबहुमानेन शुकनासगौरवेण सहपांशुक्रीड़न-तया सहसंवृद्धतया च सर्वविश्रम्भस्थानं द्वितीयमिव हृदयं वैशम्पायनः परं मित्रमासीत्। निमेषमपि तेन विना स्थातु-मेकाकी न शशाक। वैशम्पायनोऽपि तमुष्णाकरमिव वासरोऽ-नुगच्छन् क्षणमपि विरहयाञ्चकार [३]।

एवं तस्य सर्वविद्यापरिचयमाचरतश्चन्द्रापीड़स्य त्रिभुवन-विलोभनीयोऽमृतरस इव सागरस्य, सकललोकहृदयनयना-नन्दजननश्चन्द्रोदय इव प्रदोषस्य, बहुविधरागविकारभङ्गुरः सुरधनुःकलापइव जलधरसमयस्य, मकरध्वजायुधभूतः कुसुम-

---

[१] क्रमः आक्रमणम् पादो वा।

[२] जामदग्न्येन राजन्यवंशस्योच्छेदकथा च भारतवनपर्वणि ११७ अध्याये।

[३] रह त्यागे अदन्तचुरादिः।

प्रसव इव कल्पपादपस्य, अभिनवाभिव्यज्यमानरागरमणीयः सूर्य्योदयइव कमलवनस्य, विविधलास्यविलासयोग्यः कलाप इव शिखण्डिनो, यौवनारम्भः प्रादुर्भवन्, रमणीयस्यापि द्विगुणां रमणीयतां पुपोष। लब्धावसरोऽनुसेवक इव निकटीबभूवास्य मन्मथः। लक्ष्म्या सह वितस्तार वक्षःस्थलम्। बन्धुजनमनोरथैः सहापूर्य्यतोरुदण्डद्वयम्। अरिजनेन सह तनिमानमभजत मध्यभागः। त्यागेन सह प्रथिमानमाततान नितम्बभागः। प्रतापेन सहारुरोह रोमराजिः। अहितकलत्रालकलताभिः सह प्रालम्बतामुपययौ भुजयुगलम्। चरितेन सह धवलतामभजत लोचनयुगलम्। आज्ञया सह गुरुर्बभूव शिखरदेशः। स्वरेण सह गम्भीरतामाजगाम हृदयम्।

एवञ्च क्रमेण समारूढ़यौवनारम्भं परिसमाप्तसकलकलाविज्ञानमधीताशेषविद्यञ्चावगम्यानुमोदितमाचार्य्यैश्चन्द्रापीड़मानेतुं राजा बलाधिकृतं वलाहकनामानमाहूय वृहत्तुरगबलपदातिपरिवृतमतिप्रशस्तेऽहनि प्राहिणोत्। स गत्वा विद्यागृहं द्वारपैः (क) समावेदितः प्रविश्य क्षितितलविलम्बितचूड़ामणिना शिरसा प्रणम्य स्वभूमिसमुचिते राजसमीपइव सविनयमासने राजपुत्रानुमतो न्यषीदत्। स्थित्वा च मुहूर्त्तमात्रं वलाहकश्चन्द्रापीड़मुपसृत्य दर्शितविनयो व्यजिज्ञपत्। "कुमार! महाराजः समाज्ञापयति" पूर्णा नो मनोरथाः, अधी-

---

(क) पुस्तकान्तरे द्वारस्थैर्विद्यागृहमिति पाठः।

तानि शास्त्राणि, शिक्षिताः सकलाः कलाः, गतोऽसि सर्वायुधविद्यासु परां प्रतिष्ठाम्, अनुमतोऽसि निर्गमाय विद्यागृहात्, सर्वाचार्य्यैः उपगृहीतशिक्षं, गन्धगजकुमारकमिव वारि[१]बन्धादिनिर्गतम्, अधिगत[२]सकलकलाकलापकं, पौर्णमासीशशिनमिवोद्गतं पश्यतु त्वां जनः, व्रजन्तु सफलतामतिचिरदर्शनोत्कण्ठितानि लोकलोचनानि, दर्शनं प्रति ते समुत्सुकान्यतीव सर्व्वाण्यन्तःपुराणि, अयमत्र भवतो दशमोवत्सरो विद्यागृहनधिवसतः, प्रविष्टोऽसि षष्ठमनुभवन् वर्षम्, एवं संपिण्डितेनाधुना षोड़शेन प्रवर्द्धसे, तदद्यप्रभृति निर्गत्य दर्शनोत्सुकाभ्यो दत्त्वा दर्शनसुखलाभ्यो मातृभ्यः अभिवाद्य च गुरून् अपगतनियन्त्रणो यथासुखमनुभव राज्यसुखानि नवयौवनललितानि च सम्मानय राजलोकं, पूजय द्विजातीन्, परिपालय प्रजाः, आनन्दय बन्धुवर्गम्,, अयञ्च ते त्रिभुवनैकरत्नमनिलगरुड़समजवइन्द्रायुधनामा तुरङ्गमः प्रेषितो महाराजेन द्वारि तिष्ठति। एष खलु देवस्य पारसीकाधिपतिना त्रिभुवनाश्चर्य्यमिति कृत्वा "जलनिधिजलादुत्थितमयोनिजमिदमश्वरत्नमासादितं मया, महाराजाधिरोहणयोग्यम्,, इति सन्दिश्य प्रहितो, दृष्ट्वा निवेदितञ्च लक्षणविद्भिः, देव ! यान्युच्चैश्रवसः श्रूयन्ते लक्षणानि,

---

[१] वारिः गजबन्धनस्थानम्।

[२] अधिगताः प्राप्ताः ज्ञातास्र कलाः मण्डलषोड़शभागाः चतुःषष्टिप्रकाराः शिल्पादिविद्याश्च।

तैरयमुपेतो, नैवंविधो भूतो भावी वा तुरङ्गम इति। तदयमनुगृह्यतामधिरोहणेन। इदञ्च मूर्द्धाभिषिक्त(क)पार्थिवकुलप्रसूतानां विनयोपपन्नानां शूराणामभिरूपाणां कलावताञ्च कुलक्रमागतानां राजपुत्राणां सहस्रं परिचारार्थमनुप्रेषितं तुरङ्गमाधिरूढ़ं द्वारि प्रणामलालसं प्रतिपालयति"

इत्यभिधाय विरतवचसि (ख) वलाहके चन्द्रापीड़ः पितुराज्ञां शिरसि कृत्वा नवजलधरध्वानगम्भीरया गिरा "प्रवेश्यतामिन्द्रायुध इति" निर्गमिषुरादिदेश।

अथ वचनानन्तरमेव प्रवेशितम्, उभयतः खलीन[१] कनककटकावलम्बाभ्यां पदे पदे कृताकुञ्चनप्रयत्नाभ्यां, पुरुषाभ्यामवकृष्यमाणम्, अतिप्रमाणम्, ऊर्द्धकरपुरुषप्राप्यपृष्ठभागम्, आपिबन्तमिव सम्मुखागतमखिलमाकाशम्, अतिनिष्ठुरेण मुहुर्मुहुः प्रकम्पितोदररन्ध्रेण हेषारवेण पूरितभुवनोदरविवरेण निर्भर्त्सयन्तमिवालोकवेगदुर्विदग्धं [२] गरुत्मन्तम् अतिदूरमवनमता प्रतिक्षण(ग)मतिदूरमुन्नमता च जवनिरोधस्फोत-

(क) पुस्तकान्तरेषु मूर्द्धाभिषिक्तानामिति भिन्नं पदम्।

(ख) विरराममेत्यधिकः पाठो दृश्यते।

(ग) प्रदक्षिणमिति च पाठः।

[१] "कविका तु खलीनोऽस्त्री"त्यमरः कविका (कड़ियाल)।

[२] दुर्विदग्धं गर्वितमित्यर्थः।

रोषघुरघुरायमाणघोरघोणेन [१] शिरोभागेण (क) निजजव दर्पवशा(ख)दुल्लङ्घनार्थमाकलयन्तमिव त्रिभुवनम्, असितपीत-हरितपाटलाभिराखण्डलचापानुकारिणीभिर्लेखाभिः कल्माषि-तशरीरम्, आस्तीर्ण(ग)कम्बलमिव कुञ्जरकलभं, कैलासतटा-घात [२] धातुधूलिपाटलमिव हरवृषभम्, असुररुधिरपङ्क-लेखालोहितसटमिव पार्वतीसिंहं, रंहःसङ्घातमिव मूर्त्तिमन्तम्, अनवरतपरिस्फुरत्प्रोथ [३] पुटोन्मुक्तफुत्कारेण(घ)अतिजवापी-तमनिलमिव नासिकाविवरेणोद्वमन्तम्, अन्तःस्खलितमुखर-खलीनखरशिखर[४]क्षोभजन्मनो लालाजलभुवः फेनपल्लवान् उदधिनिवासपरिपीताम्रृतरसगण्डूषानिवोद्गिरन्तम्, अत्या-यतं, (ङ) निर्मांसतया समुत्कीर्णमिव वदनमुद्वहन्तम् आनन-

---

(क) मुखेन इति वा पाठः।

(ख) दर्पावेशात् इति वा पाठः।

(ग) अत्र तु विचित्रवर्णेत्यधिकः पाठो दृश्यते।

(घ) प्रोथोन्मुक्तफूत्कारेणेति च पाठः।

(ङ) अतिनिर्मांसतयेति च पाठः।

[१] "घोणा तु प्रोथमस्त्रियां" मित्यमरः अश्वनासिका।

[२] तटाघातः "उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीड़ा निगद्यते" इति शब्दार्णवः शृङ्गदन्ताद्यैर्भूमिखननरूपा वप्रक्रीड़ा।

[३] प्रोथं वाजिनासिका।

[४] खरशिखरं तीक्ष्णाग्रम्।

मण्डलनिहितारुणमणिसमुद्गतैरंशुकलापैरुपेतेनावसक्तरक्तचामरेणेव निश्चलशिखरेन कर्णयुगलेन विराजमानम्, उज्ज्वलकनकशृङ्खलारचितरश्मिकलापकलितया लाक्षालोहितलम्बलोलसटासन्तानया जलनिधिसञ्चरणलग्नविद्रुमपल्लवयेव शिरोधरयोपशोभितम्, अतिकुटिलकनकपत्रलताप्रतानभङ्गुरेण पदेपदे रणितरत्नमालेन स्थूलमुक्ताफलप्रायेण तारागणेनेव (क) सन्ध्यारागम्, अरुणेनाश्वालङ्कारेणालङ्कृतम्, अश्वालङ्कारनिहितमरकतरत्नप्रभाश्यामायमानदेहतया गगनतलनिपतितदिवसकर[१]रथतुरगशङ्कामिवोपजनयन्तम्, अतितेजस्वितया जवनिरोधरोषवशात् प्रतिरोमकूपात् समुद्गतानि सागरपरिचयलग्नानि मुक्ताफलानीव स्वेदजललवजालकानि वर्षन्तम्, इन्द्रनीलमणिपादपीठानुकारिभिरञ्जनशिलाघटितैरिव अनवरतपतनोत्पतनजनितविषमस्वरमुखरवैः (ख) पृथुभिः खुरपुटैर्जर्जरितवसुन्धरैर्मुरजवाद्यमिवाभ्यस्यन्तम्, उत्कीर्णमिव जङ्घासु, विस्तारितमिवोरसि श्लक्ष्णीकृतमिव मुखे, प्रसारितमिव कन्धरायाम्, उल्लिखितमिव पार्श्वयोः, द्विगुणीकृतमिव जघनभागे, जयप्रतिपक्षमिव गरुत्मतः, त्रैलोक्यसञ्चरणसहायमिव

(क) तारागणेनेव च इति च पाठः।

(ख) विषमसुखरवैरिति च पाठः!

[१] रवेः हरिदश्वतया तदश्वानां श्यामवर्णत्वम्।

मारुतस्य, अंशावतारमिवोच्चैःश्रवसः, वेगसब्रह्मचारिण-[१] मिव मनसः, हरिचरणमिव [२] सकलवसुन्धरोल्लङ्घनक्षमं, वरुणहंसमिव मानस [३] प्रचारं मधुमासदिवसमिव विकाशिताशोक [४] पाटलं व्रतिनमिव भस्मसितपुण्ड्रका [५] ङ्कितमुखं, कमलवनमिव मधुपङ्कपिङ्गकेशरं, ग्रीष्मदिवसमिव महायाम [६] मुग्रतेजसञ्च, [७] भुजङ्गमिव सदागत्यभिमुखम्, [८] उदधिपुलिनमिव शङ्खमालिकाभरणं, [९] भीतमिव

---

[१] वेगशिक्षायां सहाध्यायिनं तेन सदृशमित्यर्थः।

[२] हरिर्वामनः तस्य एकपादेन सकलधराक्रमणकथा च हरिवंशे २६२ अध्याये।

[३] मानसे सरोवरभेदे मानसस्येव शीघ्रः च प्रचारोगतिर्यस्य।

[४] विकसितः अशोकः पाटला च यत्र विकसिताशोकइव पाटलवर्णश्च।

[५] भस्मना सितं यत् पुण्ड्रकं तिलकभेदः तेन तदिव च अलङ्कृतं मुखं यस्य।

[६] महान् यामः प्रहरः महान् आयामो दैर्घ्यञ्च।

[७] तेजः रौद्रम् शीघ्रधावनादिहेतुविक्रमभेदश्च।

[८] सदागतिर्वायुः सर्वदा गतिर्गमनञ्च।

[९] शङ्खानां जलजन्तुभेदानां माला समूहः शङ्खमाला कण्ठस्थः वाजिनां रोमावर्त्तभेदश्च।

लक्षकर्णं, विद्याधरराज्यमिव चक्रवर्त्तिनरवाहनोचितं, [१] सूर्य्योदयमिव सकलभुवनार्घार्हं [२] मश्वातिशयमिन्द्रायुधमद्राक्षीत्।

दृष्ट्वा च तमदृष्टपूर्वममानुषलोकोचिताकारमखिलत्रिभुवनराज्योचितमशेषलक्षणोपपन्नमश्वरूपातिशयमतिधीरप्रकृतेरपि चन्द्रापीड़स्य पस्पर्श विस्मयो हृदयम्। आसीच्चास्य मनसि सरभसविवर्त्तनवलितवासुकिभ्रमितमन्दरेण मथ्नता जलनिधिजलम् इदमश्वरत्नमनुद्धरता पूर्वं (क)किन्नाम? रत्नमुद्धृतं सुरासुरलोकेन अनारोहता च मेरुशिलातलविशालमस्य पृष्ठम् आखण्डलेन किमासादितं त्रैलोक्यराज्यफलम्, उच्चैःश्रवसा विस्मितहृदयो वञ्चितः खलु जलनिधिना शतमखः। मन्ये च भगवतो नारायणस्य चक्षुर्गोचरमियतापि कालेन नायमुपगतः, येनाद्यापि तं गरुड़ारोहणव्यसनिता (ख) न परित्यजति। अहो खल्वतिशयितत्रिदशराजसम्पद्धिरियं

(क) पुस्तकान्तरेषु पूर्वमित्येतदत्र नास्ति।

(ख) तां गरुड़ाधिरोहणव्यसनितामिति च पाठः।

[१] चक्रवर्त्तिनः सार्वभौमस्य नरस्य वाहने उचितः, चक्रवर्त्ती नरवाहनो नाम विद्याधरभेदः उचितो यस्य च।

[२] "मूल्ये पूजाविधावर्घ इत्यमरः" मूल्यं पूजाद्रव्यञ्च।

तातस्य राज्यलक्ष्मीः, यद्देवंविधान्यपि सकलत्रिभुवनदुर्लभानि रत्नान्युपकरणतामागच्छन्ति। अतितेजस्वितया महाप्राणतया च सदैवतेवेयमस्याकृतिः, यत्सत्यमारोहणे शङ्कामिव मे जनयति। नहि सामान्यवाजिनामम्मानुषलोकोचिताः सकलत्रिभुवनविस्मयजनन्य ईदृश्यो भवन्त्याकृतयः दैवतान्यपि हि मुनिशापवशादुज्झितनिजशरीरकाणि शापवचनबलोपनीतान्येतानि शरीरान्तराण्यध्यासत एव। श्रूयते हि पुरा स्थूलशिरा नाम महातपा मुनिरखिलभुवनललामभूतामप्सरसं [१] रम्भाभिधानां शशाप, सा सुरलोकमपहायाश्वहृदये निवेश्यात्मानमश्वहृदयेति विख्याता वडवा भूत्वा म्रत्तिकावत्यां (क) शतधन्वानं नाम राजानमुपसेवमाना मर्त्यलोके महान्तं कालमुवास। अन्ये च महात्मानो मुनिजनशापपरिपीतप्रभावा नानाकारा भूत्वा बभ्रमुरिमं लोकम्, असंशयमनेनापि महात्मना केनापि शापभाजा भवितव्यम्, आवेदयतीव मदन्तःकरणमस्य दिव्यताम्।

इति विचिन्तयन्नेवारुरुक्षुरासनादुदतिष्ठत्। मनसा च तं तुरङ्गमसुपसृत्य "महात्मन्नर्वन्! योऽसि सोऽसि, नमोऽस्तु

(क) मूर्त्तिकावत्यामिति च पाठः।

[१] "आपः सुमनसो वर्षा अप्सरःसिकतासमाः। एताः स्त्रियां बहुत्वे स्युरेकत्वेऽपि क्वचित् मताः" इत्युक्तेरेकत्वम्।

ते, सर्वथा (क) मर्षणीयोऽयमारोहणातिक्रमोऽस्माकम्, अपरिगतानि दैवतान्यप्यनुचितपरिभवभाञ्जि भवन्ति” इत्यामन्त्रयाम्बभूव। विदिताभिप्राय इव स तमिन्द्रायुधस्तुङ्गशिरःकेसरसटाहतिकूणिता [१] केकरतारकेण तिर्यक् चक्षुषा विलोक्य मुहुर्मुहुस्ताड़यता क्षितितलम् उत्खातधूलिधूसरितक्रोड़रोमराजिना दक्षिणखुरेणारोहणायाकर्षन्निव स्फुरितघ्राणविवरघर्घरध्वनिमिश्रं मधुरमपरुषहुङ्कारपरम्परानुबद्धमतिमनोहरहेषारवमकरोत्। अथानेन मधुरह्रेषितेन दत्तारोहणाभ्यनुज्ञ इव इन्द्रायुधमारुरोह चन्द्रापीड़ः। समारुह्य तं प्रादेशमात्रमिव त्रैलोक्यमखिलं मन्यमानो निर्गत्य प्रलयजलधरविमुक्तोपला[२]सारपरुषेण (ख) जर्जरयतेव रसातलमतिनिष्ठुरेण खुरपुटानां रवेण, खुररजोनिरुद्धघ्राणघोरघोषेण च ह्रेषितेन बधिरीकृतसकलभुवनविवरम्, अशिशिरकिरणदीधिति-

---

(क) अत्र तु स्थितेन इत्यधिकः पाठो दृश्यते।

(ख) उपलसारपातपरुषेणेति च पाठः।

[१] आकूणिताकेकरतारकेण आकूणिता आकुञ्चिता “दृष्टिराकेकरा किञ्चित्स्फुटापाङ्गे प्रसारिता निमीलितार्द्धा या लोके ताराव्यावर्त्तनोत्तरेत्युक्ता„ आकेकरा दृष्टिर्यया तादृशतारकवतेत्यर्थः।

[२] प्रलयकालिकैर्जलधरैर्विमुक्तः उपलासारः पाषाणधारावर्षणम्।

परामर्शस्फुरितविमलफलकेन ऊर्द्धीकृतेन कुन्तलतावनेनो-न्नालनीलोत्पलकलिकावनगहनं सरइव गगनतलमलङ्कुर्वाणम्, उद्दण्डमायूरातपत्रसहस्रान्धकारिताष्टदिङ्मुखतया स्फुरितशतमन्युचापकलापकल्माषमिव (क)जलधरवृन्दम्, उद्वमत्फेनपुञ्जधवलितमुखतया अनवरतवल्गनचटुलतया च प्रलयसागरजलकल्लोलसङ्घातमिव समुद्गतम्, अदृष्टपर्य्यन्तमप्रमेयमश्वसैन्यम(ख)पश्यत्। तच्च सागरजलमिव चन्द्रोदयेनेव चन्द्रापीड़निर्गमेण सकलमेव सञ्चचालाश्वीयम् [१] अहमहमिकया च प्रणामलालसाः सरभसापनीतातपत्रशून्यशिरसः परस्परोत्पीड़नकुपिततुरङ्गमनिवारणायस्ता (ग) राजपुत्रास्तं पर्य्यवारयन्त। एकैकशश्च प्रतिनामग्रहणमावेद्यमाना वलाहकेन विप्रचलितमुकुटपद्मरागकिरणोद्गमच्छलेनानुरागमिवोन्नमद्भिः सङ्घट्टित(घ)सेवाञ्जलिमुकुलतया यौवराज्याभिषेककलशावर्ज्जितसलिललग्नकमलैरिव दूरावनतैः शिरोभिः प्रणेमुः।

चन्द्रापीड़स्तु तान् सर्व्वान् मानयित्वा यथोचितमनन्तरं

(क) कल्माषितमिति च पाठः।

(ख) अदृष्टपूर्व्वं तमश्वसैन्यमिति च पाठः।

(ग) निवारणायासितहस्ता इति च पाठः।

(घ) संघटितेति च पाठः।

[१] अश्वीयम् अश्वसमूहरूपं बलम्।

तुरङ्गमाधिरूढेनानुगम्यमानो वैशम्पायनेन राजलक्ष्मीनिवासयोग्यपुण्डरीकानुकारिणा, सकलराजन्यकुलकुमुदषण्डचन्द्रमण्डलेनेव तुरङ्गमसेनास्रवन्तीपुलिनायमानेन क्षीरोदफेनधवलितवासुकिफणामण्डलच्छविना, स्थूलमुक्ता(क)कलापजालकावृतेन, उपरि त्रिकृतकेसरिणमुद्वहता अतिमहता कार्त्तस्वरदण्डेन ध्रियमाणेनातपत्रेण निवारितातपः, उभयतः समुद्धूयमानचामरकलापपवननर्त्तितकर्णपल्लवः, पुरःप्रधावता तरुणवीरप्रायेणानेकसहस्रसंख्येन पदातिपरिजनेन "जय जीवेति," च मधुरवचसा मङ्गलप्रायमनवरतमुच्चैःपठता वन्दिजनेन स्तूयमानो नगराभिमुखः प्रतस्थे।

क्रमेण च तं समासादितविग्रहम् अनङ्गमिवावतीर्णं, नगरमार्गमनुप्राप्तमवलोक्य सर्वएव परित्यक्तसकलव्यापारो रजनिकरोदयपरिवृध्यमान(ख)कुमुदवनानुकारी जनः समजनि। "सत्यस्मिन् सम्प्रति मुखकुमुदकदम्बक(ग)विकृताकृतिः [१] कार्त्तिकेयो विड़म्बयति कुमारशब्दम्। अहो वयमति-

---

(क) अत्र तु फलक इत्यधिकः पाठो दृश्यते।

(ख) पुष्प्यत् इति च पाठः।

(ग) मुखकलापविडम्बनेति च पाठः।

[१] मुखानि कुमुदानीव तेषां कदम्बकेन षट्संख्यान्वितत्वेन विकृताकृतिः विकटाकारः विडम्बयति तिरस्करोति कुत्सितोमारो यस्मा-

पुण्यभाजः यदिमाममानुषीमस्याकृतिम् अन्तःसमारूढ़प्रीतिरसनिष्पन्दविस्तारितेन कुतूहलोत्तानितेन लोचनयुगलेनानिवारिताः पश्यामः सफला नोऽद्य जाता जन्मवत्ता, सर्वथा नमोऽस्मै रूपान्तरधारिणे भगवते चन्द्रापीड़च्छद्मने पुण्डरीकेक्षणायेति" वदन् आरचितप्रणामाञ्जलिः नगरलोकः प्रणनाम। सर्वतश्च समपावृतकपाटपुटप्रकटवातायनसहस्रतया चन्द्रापीड़दर्शनकुतूहलान्नगरमपि समुन्मीलितलोचननिवहमिवाभवत्। अनन्तरञ्च "समाप्तसकलविद्यो विद्यागृहान्निर्गतोऽयमागच्छति चन्द्रापीड़इति" समाकर्ण्य आलोकनकुतूहलिन्यः सर्वस्मिन्नेव नगरे ससम्भ्रमसमुत्सृष्टार्द्धपरिसमाप्तप्रसाधनव्यापाराः काश्चिद्वामकरतलगतदर्पणाः स्फुरितसकलरजनिकरमण्डलाइव पौर्णमासीरजन्यः, काश्चित् आर्द्रालक्तकरसपाटलितचरणपुटाः कमलपरिपीतबालातपाइव नलिन्यः, काश्चित् ससम्भ्रमगतिविगलितमेखलाकलापाकुलितचरणकिशलयाः, शृङ्खलासन्दानमन्दमन्दसञ्चारिण्य[१]इव करिण्यः, काश्चिज्जलधरसमयदिवसश्रियइवेन्द्रायुधरागरुचिराम्बर[२]धारिण्यः काश्चिदुल्लसितधव-

---

दिति व्युत्पत्त्या कुमारशब्दस्य सौन्दर्य्यवाचित्वेन विकटाकृतौ कार्त्ति-केये प्रवर्त्तमानः स्वयं तिरस्कृतो भवतीत्यर्थः।

[१] सन्दानं संयमनं बन्धनं तेन मन्दमन्दसंचारिण्यः।

[२] इन्द्रायुधस्येव इन्द्रायुधेन च रागः। अम्बरमाकाशः वस्त्रञ्च।

लनखमयूखपल्लवान् नूपुररवाक्कष्टगृहकलहंसकानिव चरणपुटा[१]नुद्वहन्त्यः, काश्चित् करतलस्थितस्थूलमुक्ताहारयष्टयो रतिमिव मदनविनाशशोकगृहीतस्फटिकाक्षवलयां विड़म्बयन्त्यः, काश्चित् पयोधरान्तरालगलितमुक्तालताः तनुविमलस्रोतोजलान्तरितचक्रवाकमिथुनाइव प्रदोषश्रियः, काश्चिन्नूपुरमणिसमुत्थितेन्द्रायुधतया परिचया(य्या)नुगतगृहमयूरिकाइव विराजयन्त्यः, काश्चिदङ्कुपीतोज्झितमणिचषकाः स्फुरितरागैर्मधुरसमिवाधरपल्लवैः क्षरन्त्यो हर्म्यतलानि ललनाः समारुरुहुः। अन्याश्च मरकतवातायनविवरविनिर्गतमुखमण्डला विकचकमलकोषपुटामम्बरतलसञ्चारिणीं कमलिनीमिव दर्शयन्त्यो ददृशुः।

उदपादि च सहसा सरभससञ्चलनजन्मा मधुरसाधारणास्फालितवीणारवकोलाहलो, रशनारवाहूतगृहसारसरसितसंभिन्नः, स्खलितचरणतलताड़ितमणिसोपानजातगम्भीरध्वनिप्रहृष्टानामवरोधशिखण्डिनां केकारवैरनुगम्यमानो, नवजलधररवभयचकितकलहंसकुलकोलाहलकोमलो, मकरध्वजविजयघोषणानुकारी, परस्परविघट्टनास्फालिततारहारमणीनां श्रोत्रहारी, हर्म्यकुक्षिषु प्रतिरवनिर्ह्रादी भूषणनिनादः।

मुहूर्त्तादिव युवतिजननिरन्तरतया नारीमयाइव प्रासादाः

---

[१] चरणाः पुटा जलद्रोण्य इव। तेन पुंस्त्वोपपत्तिः।

सालक्तकपदकमलविन्यासैः पल्लवमयमिव क्षितितलम्, अङ्गप्रभाप्रवाहेण लावण्यमयमिव नगरम्, आननमण्डलनिवहेन चन्द्रविम्बमयमिव गगनतलम्, आतपनिवारणायोत्तानितेन करतलजालकेन कमलवनमयमिव दिक्चक्रवालम्, आभरणांशुकलापेनेन्द्रायुधमयइवातपः, लोचनमयूखलेखासन्तानेन नीलोत्पलदलमयइव दिवसोबभूव। कौतुकप्रसारितनिश्चललोचनानाञ्च पश्यन्तीनां तासामादर्शमयानीव सलिलमयानीव स्फटिकमयानीव हृदयानि विवेश चन्द्रापीड़ाकृतिः।

आविर्भूतमदनरसानाञ्चान्योन्यतः सपरिहासाः [१] सनिर्भाः ससम्भ्रमाः सेर्ष्याः सोत्प्रासाः साभ्यसूयाः [२] सविलासाः समन्मथाः सस्पृहाश्च तत्क्षणमतिरमणीयाः प्रससुरालापाः। तथाहि "त्वरितगमने! मामपि प्रतिपालय" "दर्शनोन्मत्ते गृहाणोत्तरीयम्" "चपले! उल्लासय [३] अलकलतामाननावलम्बिनीम्" मूढ़े! चन्द्रलेखां [४] मुपाहर" "उपहारकुसुमस्खलितचरणा पतसि मदनान्धे!" "संयमय मूर्द्धजनिहतने! केशपाशम्" "उत्क्षिप चन्द्रापीड़दर्शनव्यसनिनि! काञ्चीदामकम्" "उत्सर्पय पापे! कपोलदोलायितं कर्णपल्लवम्" "अहृदये

[१] सपरिहासाः सकेलिकाः।

[२] परगुणासहिष्णुत्वमीर्ष्या परगुणेषु दोषारोपणमसूया।

[३] उल्लासय उत्तोलय स्वस्थाने स्थापय।

[४] चन्द्रलेखां नूपुरविशेषम्।

गृहाण निपतितं दन्तपत्रम्" [१] "यौवनोन्मत्ते! विलोकयसि जनेन स्थगय, पयोधरभारम्" [२] "अपगतलज्जे! शिथिलीभूतमाकलय दुकूलम्" "अलीकमुग्धे! द्रुततरमागम्यताम्" "कुतूहलिनि! देहि दर्शनान्तरम् [३] असन्तुष्टे! "कियदालोकयसे!" तरलहृदये! परिजनमपेक्षस्व" "पिशाचि (क)! गलितोत्तरीया विहस्यसे जनेन" "रागाहतनयने! पश्यसि न सखीजनम्" "अनेकभङ्गिविकारपूर्णे! दुःखकारणायासितहृदया जीवसि" "मिथ्याविनीते! किं? व्यपदेश [४] वीक्षितैर्विस्रब्धमालोकय" "यौवनशालिनि! किं? पीड़यसि पयोधरंभारेण" अतिकोपने! पुरतोभव" "मत्सरिणि! किम्? एकाकिनी रुणत्सि वातायनम्" "अनङ्गपरवशे! मदीयमुत्तरीयांशुकमुत्तरीयतां नयसि" "रागासवमत्ते, (ख) निवारयात्मानम्" "उज्झितधैर्य्ये! किं? धावसि गुरुजनसमक्षम्" "उल्लसत्स-

(क) पिशाचिके इति च पाठः।

(ख) रागमत्ते इति वा पाठः।

[१] दन्तपत्रम् गजदन्तनिर्मितं पत्राकारम् कर्णभूषणभेदम्।

[२] स्थगय आच्छादय।

[३] दर्शनान्तरं दृष्टियोग्यमवकाशम्।

[४] व्यपदेशः छलम् इतरदर्शनच्छलेन तस्यैव दर्शनं करोषि तत्कृतं व्याजेन, निर्व्यलीकं पश्य।

भावे [१] किम्? एवमाकुलीभवसि" "मुग्धे? निगूहस्व मदनज्वरजनितपुलकजालकम्" अश्लाघ्याचरणे(क)! किम्? एवमुत्ताम्यसि" "बहुविकारे! विविधाङ्ग(ख)वलनायासितमध्यभागा वृथा खिद्यसे" "शून्यहृदये! स्वभवनान्निर्गतमपि नात्मानमवगच्छसि" "कौतुकाविष्टे! विस्मृतासि निश्वसितुम्" "अन्तःसङ्कल्परचितसुरतसमागमसुखरसनिमीलितलोचने! समुन्मीलय लोचनयुगलमतिक्रामत्ययम्" "अनङ्गशरप्रहारमूर्च्छिते! रविकिरणनिवारणाय कुरु शिरस्युत्तरीयांशुकपल्लवम्" "अयि सतीव्रतग्रहगृहीते! द्रष्टव्यमपश्यन्ती वञ्चयसि लोचनयुगलम्" "अधन्ये! हतासि परपुरुषदर्शनपरीहारव्रतेन" "प्रसीदोत्तिष्ठ सखि! पश्य रतिविरहितं साक्षादिव भगवन्तमगृहीतमकरध्वजं मकरध्वजम्" "अयमस्य सितातपत्रान्तरेण अलिकुलनीले शिरसि तिमिरशङ्कानिपतितइव शशिकरकलापो मालतीकुसुमशेखरोऽभिलक्ष्यते, एतदस्य कर्णाभरणमरकतप्रभाश्यामायितमुपरचितविकचशिरीषकुसुमकर्णपूरमिव कपोलतलमाभाति, अयमस्य हारान्तर्निविष्टारुणमणिकिरणकलापच्छलेन हृदयं विविक्षुरभिनवयौवनरागइव वहिः परि-

(क) अंसावरणे इति वा पाठः।

(ख) पुस्तकान्तरे अत्र तु भङ्गेत्यधिकः पाठो दृश्यते।

[१] उल्लसत्स्वभावे! चलस्वभावे!

स्फुरति, एतदलक(क)चामरकलापान्तरेरितविरलवीचितम्, एतत् किमपि वैशम्पायनेन सह समामन्त्रयतो दशनमयूखलेखाधवलीकृतदिक्चक्रवालं हसितम्, एषोऽस्य शुकपक्षतिहरितरागेणोत्तरीयांशुकप्रान्तेन वलाहकस्तुरगखुरचलनजन्मानमालग्नमग्रकेशेषु रेणुमपहरति, अयमनेन लक्ष्मीकरकमलकोमलतलः समुत्क्षिप्य तिर्य्यक् तुरङ्गमस्कन्धे निक्षिप्तश्चरणपल्लवः, सलीलमयमनेन च ताम्बूलयाचनार्थमुत्तानितकरतलः कोमलदीर्घाङ्गुलिराताम्रपुष्कर [१] कोषशोभी गजेनेव शैवालकवललालसः (ख) प्रसारितः करः, धन्या सा या लक्ष्मीरिव निर्ज्जितकमलं करतलमस्य वसुन्धरासपत्नी ग्रहीष्यति, धन्याच देवी विलासवती सकलमहीमण्डलभार(ग)धारणक्षमः ककुभा दिग्गजइव गर्भेण यया च व्यूढः” (घ)

इत्येवंविधानि चान्यानि च वदन्तीनां तासाम् आपीयमानइव लोचनपुटैः, आहूयमानइव भूषणरवैः, अनुगम्यमानइव हृदयैः, निबध्यमानइवाभरणरत्नरश्मिरज्जुभिः, उपह्रियमाण

(क) एतदनेन इति च पाठः।

(ख) ग्रासवाञ्छया इति च पाठः।

(ग) पुस्तकान्तरे भारेति पाठो नास्ति।

(घ) दिग्गज इव कुकुभा गर्भेणायमूढ़ः इति च पाठः।

[१] पुष्करं करिहस्ताग्रं तत्कोषः पुटमिव पुष्करस्य पद्मस्य कोषइव च शोभी। करः हस्तः शुण्डा च।

इव नवयौवनवल्लिभिः, शिथिलभुजलताविगलितधवलवलयनिकरैः पदेपदे विवाहानल इव कुसुममिश्रैर्लाजाञ्जलिभिरवकीर्य्यमाणश्चन्द्रापीड़ो राजकुल [१] समीपमाससाद। क्रमेण च यामावस्थिताभिः [२] अनवरतकरटस्थलविगलितमदमसीपङ्करीभिः(क) अञ्जनगिरिमालामलिनाभिः कुञ्जरघटाभिरन्धकारितदिङ्मुखतया जलधरदिवसायमानम्, उद्दण्डधवलातपत्रसहस्रसङ्कटम्, अनेकद्वीपान्तरागतदूतशतसमाकुलं राजद्वारमासाद्य तुरङ्गमादवततार।

अवतीर्य्य च करतलेन करे वैशम्पायनमवलम्ब्य पुरःसविनयं प्रस्थितेन वलाहकेनोपदिश्यमानमार्गः त्रिभुवनमिव पुञ्जीभूतम्, आगृहीतकनकवेत्रलतैः सितवारवाण[३]धारिभिः सिताङ्गरागैः सितकुसुमशेखरैः सितोष्णीषैः सितवेषपरिग्रहतया श्वेतद्वीपसम्भवैरिव कृतयुगपुरुषैरिव महाप्रमाणैर्दिवानिशमालिखितैरिव उत्कीर्णैरिव तोरण [४] स्तम्भनिषण्णैर्द्वारपालैरनुज्झितद्वारदेशम्, अनेकसंयमनचन्द्रशालिकाविटङ्क[५] वेदिकासङ्कट-

(क) मसीपट्टधराभिः इति वा पाठः।

[१] "कुलं जनपदे गृहे सजातीयगणे गोत्रे" इत्युक्तेः राजगृहम्।

[२] यामे यामे प्रहरेप्रहरे पृथक्पृथक् अवस्थिताः। करटः गण्डः।

[३] वारवाणः वर्म।

[४] तोरणं वहिर्द्वारम्।

[५] संयमनं चतुःशालं गृहं चन्द्रशालिका प्रासादशिखरो

शिखरैरभ्रङ्कषैरुपहसितकैलासशैल(क)-शोभैरमलसुधावदातैः सप्रालेयशैलमिव महाप्रासादैः, अनेकवातायनविवरविनिर्गतयुवतिभूषणकिरणसहस्रतया कनकशृङ्खलाजालकेनेवोपरिवितानेन विराजमानम्, अन्तर्गतायुधनिवहाभिराशीविषकुलसङ्कुलाभिः पातालगुहाभिरिवातिगम्भीराभिरायुधशालाभिरुपेतम्, अबलाचरणालक्तकरसरक्तमणिशकलैः शिखरनिलीनशिखिकुलकृतकेकारवकलकलैः क्रीड़ापर्वतकैरुपशोभितम्, उज्ज्वलवर्णकम्बलावगुण्ठितकनकपर्य्याणाभिः [१] प्रलम्ब(ख)चामरकलापचुम्बितचलकर्णपल्लवाभिः कुलयुवतिभिरिवोपारूढ़शिक्षाविनयनिभृताभिर्यामक [२] करेणुकाभिरशून्यकक्षान्तरम्, [३] आलानस्तम्भनिषण्णेन च नवजलधर(ग)घोषगम्भीरमनुगत(घ)

(क) शैलेत्यत्र शिखरेति वा पाठः।

(ख) प्रचलेति वा पाठः।

(ग) पुस्तकान्तरे अत्र तु गर्ज्जितेत्यधिकः पाठो दृश्यते।

(घ) अतन्द्रिति च पाठः।

परिस्युगृहम् (चिलेर घर) विटङ्कः कपोतपालिका। वेदिका वितर्दिः।

[१] आलानस्तम्भोनिर्याणम्।

[२] यामे यामे पृथक् पृथक् बध्या करेणवः स्त्रीहस्तिन्यः यामककरेणवः।

[३] कक्षः प्रकोष्ठम्।

वीणावेणुस्वरम्यम् आस्फालितघर्घरिका[१]घर्घरम्, अनवरतमृदुमृदङ्गध्वनिम्, आमीलित(क)लोचनत्रिभागेण वामदशनकोटिनिषण्णहस्तेन निश्चलकर्णतालेनाकर्णयता सलीलमुभयपार्श्वावलम्बि(ख)वर्णकम्बलतया विन्ध्यगिरिणेवाविस्कृतधातु[२]विचिलितपक्षसम्पुटेनाधोरण[३]गीतानन्दकृतमन्द्रकण्ठगर्ज्जितेन मदजलशबलशङ्ख[४]शोभितश्रवणपुटेन रजनिकरबिम्बचुम्बितावर्त्तका(ग)[५]म्बुदविडम्बकेन कर्णान्तलम्बिना काञ्चनमयेन कृतकर्णपूरमिवाङ्कुशेन मुखमुद्वहता मदजलमलिनेन द्वितीयेनेव कर्णचामरेण कपोलतलदोलायमानेन मधुकरकुलेनालङ्क्रियमाणेन अत्युदग्रतया पूर्वकायस्य अतिवामनतया च जघनभागस्य पातालतलादिव

(क) अनवरतसङ्गीतमृदुमृदङ्गध्वनिमतिमनोहरं किञ्चिदामीलितेति च पाठः।

(ख) पार्श्वप्रलम्बितेति च पाठः।

(ग) चुम्बितावर्त्तकेति च पाठः।

[१] घर्घरिका क्षुद्रघण्टिका।

[२] धातवो गैरिकादयः स्वर्णादयश्च।

[३] आधोरणाः हस्तिपालः।

[४] "शङ्खो निधौ ललाटास्थ्नीति" विश्वः।

[५] आवर्त्तकश्चिक्रभेदः मेघाधिपभेदश्च।

उत्तिष्ठता निशासमयेनेव परिस्फुरत्सार्द्धचन्द्रनक्षत्र [१] मालेन शरदारम्भेणेव प्रकटितारुणचारुपुष्करेण (क)[२] वामनरूपेणेव कृतत्रिपदीविलासेन [३] स्फटिकगिरितटेनेव लग्नसिंहमुख [४] प्रतिमेन प्रसाधितेनेवालोल(ख)कर्णपल्लवा [५] हतमुखेन गन्धमादननाम्ना गन्धहस्तिना सनाथीकृतैकदेशम्, उज्ज्वलपट्टकम्बलपटप्रावारितपृष्ठैश्च रसितमधुरघण्टिकारवमुखरकण्ठैर्मञ्जिष्ठालोहितस्कन्धकेशरजालपल्लवैर्निहतवनगजरुधिरपाटलसटैरिव केशरिभिः पुरोनिहितयवस [६] राशिशिखरोपविष्टमन्दुरा [७] पालैरासन्नमङ्गलगीतध्वनिदत्तकर्णैरन्तःकपोलधृतमधुरसलवलुलित(ग)लाजकवलैर्भूपाल-वल्लभैर्मन्दुरागतैस्तुरङ्ग-

---

(क) प्रकटितरुचिरकोमलारुणपुष्करेण इति च पाठः।

(ख) प्रसाधितेनेव लोध्रेति वा पाठः।

(ग) विलुलितेति च पाठः।

[१] नक्षत्राणां माला, सप्तविंशमुक्ताग्रथिता हस्तिमाला च।

[२] पुष्करं पद्मं हस्तिमुखाग्रञ्च।

[३] त्रिपदी पादानां चरणानां त्रयं हस्तिपदबन्धनरज्जुविशेषश्च "त्रिपदीच्छेदिनामपीति" रघुः।

[४] सिंहमुखस्य प्रतिमा तद्रूपालङ्कारभेदश्च।

[५] कर्णः पल्लवइव कर्णाश्रितः पल्लवश्च।

[६] यवसं घासः।

[७] वाजिशाला तु मन्दुरा तत्पालाः।

मेरुद्भासितम्, अधिकरण [१] मण्डपगतैश्चार्य्यवेशैरत्युच्चवेत्रासनोपविष्टैर्धर्ममयैरिव धर्म्माधिकारिभिर्महापुरुषैरधिष्ठितम्, अधिगतसकलग्रामकर्वट[२]नगरनामभि(क)रेकभवनमिव जगदखिलमालोकयद्भिरालिखितसकलभुवनव्यापारतया धर्मराजनगरव्यतिकरमिव दर्शयद्भिरधिकरण(ख)लेखकैरालिख्यमानशासनसहस्रम्, अभ्यन्तरावस्थितनरपतिनिर्गमप्रतीक्षणपरेण च (ग) स्थानस्थानेषु (घ) बद्धमण्डलेन कनकमयार्द्धचन्द्रतारागणशतशबलैश्चर्मफलकैर्निशासमयमिव दर्शयता स्फुरितनिशितकरवालकरप्ररोहकरालितातपेन एकश्रवणपुटघटितधवलदन्तपत्त्रेण (ङ) उर्द्धबद्धमौलिकलापेन धवलचन्दनस्थासकखचितभुजोरुदण्डेन बद्धासिधेनुकेन अन्ध्रद्रविड़सिंहलप्रायेण सेवकजनेन आस्थानमण्डपगतेन च यथोचितासनोपविष्टेन प्रसारयता दुरोदर [३] क्रीड़ाम्, अभ्यस्यता-

---

(क) सकलनगरखेटखर्वटनामभिरिति वा पाठः।

(ख) अधिकारलेखकैरिति च पाठः।

(ग) च, इति पुस्तकान्तरे नास्ति।

(घ) स्थाने स्थाने इति च पाठः।

(ङ) श्रवणपुटघटितानेकदन्तपत्त्रेण इति वा पाठः।

[१] विचारविषयलेखनमण्डपोऽधिकरणमण्डपः।

[२] "कर्वटो द्विशतग्राममध्ये ग्रामो मनोरम"इत्युक्तः ग्रामश्रेष्ठः।

[३] "दुरोदरो द्यूतकारे, पणे द्यूते दुरोदर"मित्युक्तेः द्यूतम्।

ष्टापद [१] व्यापारम्, आस्फालयता परिवादिनीम्, आलिखता चित्रफलके भूमिपालप्रतिबिम्बम्, आबध्नता काव्यगोष्ठीम्, [२] आतन्वता परिहासकथां, विन्दता विन्दुमतीं, [३] चिन्तयता प्रहेलिकां, [४] भावयता नरपतिकृतकाव्यसुभाषितानि, पठता द्विपदीम्, [५] गृह्णता कविगुणान्, उत्किरता पत्त्रभङ्गान्, [६] आलपता वारविलासिनीजनम्, आकर्णयता वैतालिकगीतिम्; अनेकसहस्रसंख्येन धवलोष्णीषपटाश्लिष्टविकटकिरीटसङ्कटशिरसा, सनिर्झरशिखरालग्नबालातपमण्डलेनेव कुलपर्वतचक्रवालेन, मूर्द्धाभिषिक्तेन सामन्तलोकेनाधिष्ठितम्, आस्थानोत्थितभूमिपालसंवर्त्तितानाञ्च[७]

---

[१] "अष्टापदं सारिफल"मित्युक्तं सारिफलं द्यूतविशेषम्।

[२] गोष्ठीं संलापम् "गोष्ठी सभायां संलापे" इति विश्वः।

[३] शब्दालङ्कारभेदं विन्दता लभमानेन यथा "मानसं हरपादाब्जे भ्रमरं कुर्वतिद्रतम्। कान्ते स्वकं पुरःप्राप्ता वैवस्वतकरक्रिये"-त्यत्र मानं संहरेत्यत्रैकमात्रविन्दुदानेनार्थान्तरप्रतीतिः।

[४] प्रहेलिका (हेयालि) "यथा तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुरिति" जिज्ञासायाम् ईषदपूर्णजलकुम्भ इत्यत्रोत्तरम्।

[५] द्विपदीं गीतिविशेषम्।

[६] पत्त्राकारः भङ्गः तिलकभेदः।

[७] संवर्त्तितानां सङ्कोचितानाम्।

कुथानां [१] रत्नासनानाञ्च राशिभिरनेकवर्णैरिन्द्रायुधपुञ्जैरिव विराजितसभापर्य्यन्तम्, अमलमणिभूमिसंक्रान्तमुखनिवहप्रतिविम्बतया विकचकमलपुष्पप्रकरमिव सम्पादयता, गतिवशरणितनूपुरपरिहार्य्य [२] रशनास्वनमुखरेण, स्कन्धावसक्तकनकदण्डचामरेण, निर्गच्छता प्रविशता चानवरतं वारविलासिनीजनेनाकुलितम्, एकदेशनिषण्णचामीकरशृङ्खलासंयतश्वगणम्, (क) इतस्ततः प्रचलितपरिचिताभितकस्तूरिका- [३] कुरङ्गपरिमलवासितदिङ्मुखम्, अनेककुब्जकिरातवर्षवर [४] बधिरवामनमूकसङ्कुलम्, उपाहृतकिन्नरमिथुनम्, आनीतवनमानुषम्, आबद्धमेषकुक्कुटकुररकपिञ्जललावक- [५] वर्त्तिकायुद्धम्, उत्कूजितचकोरकादम्बहारीतकोकिलम्, लालप्यमानशुकसारिकम्, इभपतिमदपरिमलामर्षजृम्भितैश्च निष्कूजद्भिः शिखरिणां जीवितैरिव गिरिगुहानिवासिभिर्गृहीतैः पञ्जरकेशरिभिरुद्भास्यमानम्, उत्त्रास्यमानैः काञ्चनभवनप्रभाजनितदावानलशङ्कैर्लोलतारकैर्भ्रमद्भिर्भवनहरिणक-

---

(क) संयताश्वगणमिति च पाठः।

[१] आस्तरणविशेषः चित्रकम्बलं कुथम्।

[२] परिहार्य्यः अलङ्कारः।

[३] कस्तूरिकाकुरङ्गः मृगमदयोनिभूता मृगभेदः।

[४] वर्षवरः षण्डविशेषः (खोजा)।

[५] लावकः श्येनाकारः पक्षिभेदः। बुलबुल् इत्येके।

दम्बकैर्लोचनप्रभया धवलीकृतदिगन्तरम्, उद्दामकेकारवानुमीयमानमरकतकुट्टिमस्थितशिखण्डिमण्डलम्, अतिशिशिरचन्दनविटपिच्छायानिषण्णनिद्रायमाणगृहसारसम्, अन्तःपुरेण च बालिकाजनप्रस्तुतकन्दुकपञ्चालिका [१] क्रीड़ेन, अविरतसंवाह्यमानदोला (क)शिखरक्वणितघण्टाटङ्कारपूरिताशामुखेन, भुजगनिर्मोकशङ्कितमयूरह्रियमाणहारेण, सौधशिखरावतीर्णप्रचलितपारावतकुलतया, स्थलोत्पलिनीवनशोभितेनेवान्तःपुरिकाजनप्रस्तुतनरपतिचरितविड़म्बन [२] क्रीड़ेन, अश्वमन्दुरापरिभ्रष्टागतैरवलुप्तभवनदाड़िमीफलैराखण्डिताङ्गनरुहकारपल्लवैरभिभूतकुब्जवामनकिरातकरतलाच्छिन्नानि भूषणानि विकिरद्भिः कपिभिराकुलीकृतेन, शुकसारिकाप्रकाशितसुरतविश्रम्भालापलज्जितावरोधजनेन, प्रासादसोपानसमारोहणचलितैरबलानां चरणावसक्तैर्मणिमयैर्विभूषणैः पदेपदे रणद्भिस्तुलाकोटिवलयैर्द्विगुणीकृतकूजितरताभिर्भवनकलहंसमालाभिर्धवलिताङ्गणेन, (ख)धृतधौतधवलदुकूलोत्तरीयैः कलधौतदण्डावलम्बिभिः पलितपाकपाण्डुरमौलिभिराचारमयैरिव विनयमयैरिव मर्य्यादामयैरिव मङ्गलमयैरिव गम्भीरा-

---

(क) वाह्यमानतोलीति वा पाठः।

(ख) धवलीकृताजिरेण धौतधवलेति च पाठः।

[१] पञ्चालिका कृत्रिमपुत्तलिका।

[२] विड़म्बनमनुकरणं तदीयरूपधारणम्।

कृतिभिः स्वभावधीरैरुष्णीषिभिर्वयःपरिणामेऽपि जरत्(क) सिंहैरिवापरित्यक्तसत्वा[१]वष्टम्भैः कञ्चुकिभिरधिष्ठितेन, समुपेताभ्यन्तरम्; जलधरसनाथमिव कृष्णागुरुधूमपटलैः, सनीहारमिव यामकुञ्जरघटाकरशीकरैः, सनिशमिव, तमालवीथिकान्धकारैः, सबालातपमिवारक्ताशोकैः सतारागणमिव, मुक्ताकलापैः, सवर्षासमयमिव धारागृहैः, सतड़िल्लतमिव हेममयीभिर्मयूरयष्टिभिः, सगृहदैवतमिव शालभञ्जिकाभिः, शिवभवनमिव द्वारावस्थितदण्डपाणि[२]प्रतीहारगणम्, उत्कृष्टकविगद्यमिव विविधवर्ण-[३]-श्रेणीप्रतिपाद्यमानानेकाभिनवार्थसञ्चयम्, अप्सरोगणमिव प्रकटमनोरमारम्भं, [४] दिवसकरोदयमिवोल्लसत्पद्माकरकमलामोदम्, [५] उष्णकिरणमिव निज-

---

(क) जरज्जरदिति च पाठः।

[१] सत्वानां जन्तूनामवष्टम्भआस्कन्दनं सत्वञ्च ज्ञानादिसाधनगुणभेदस्यावलम्बनञ्च।

[२] दण्डः पाणौ यस्य तादृशः, दण्डपाणिनामकभैरवश्च प्रतीहारो द्वारपालः।

[३] विविधाक्षरपङ्क्तिद्योत्यमानबहुविधाभिधेयसमूहम्, विविधब्राह्मणादिवर्णैः श्रेणीभिः कारुशिल्पिभिश्च दीयमानोऽनेकद्रव्यसञ्चयो यत्र च।

[४] मनोरमा रम्भा च अप्सरोविशेषः, मनोहरआरम्भश्च।

[५] उल्लसन् पद्माकराणां तड़ागानां कमलामोदः पद्मसुगन्धो

लक्ष्मीकृतकमलोपकारं, [१] नाटकमिव प्रकटपताकाङ्कशोभितं [२] शोणितपुरमिव वाणयोग्यावासोपेतं [३] पुराणमिव यथाविभागावस्थापितसकलभुवनकोशं [४]सम्पूर्णचन्द्रोदयमिव मृदुकरसहस्रसंवर्द्धितरत्नालयं, [५] दिग्गजमिवाविच्छिन्नमहादानसन्तानं [६]ब्रह्माण्डमिव सकलजीवलोकव्यवहारकारणोत्पन्नहिरण्यगर्भम्, [७] ईशानबाहुवनमिव महाभोगिमण्डलसहस्रा-

---

यस्मादिति उल्लसन्त्या पद्मया लक्ष्म्या, करेण राजग्राह्येण च प्रजानां कमला सम्पत्तिः मोदो हर्षश्च यस्मादिति च।

[१] निजलक्ष्म्या शोभया कृतः कमलानामुपकारः प्रकाशनं येन, निजचिह्नीकृतः कमलया उपकारः प्रजानां येन च।

[२] पताका वैजयन्ती अङ्कश्चिह्नम्। पताका अङ्कश्च नाटकाङ्गविशेषश्च। तत्र पताका यथा "पताका नायकस्य स्यान्नस्वकीयफलान्तरम् गर्भे सन्धौ विमर्षे वा निर्वाहस्तस्य जायते" इत्युक्ता।

अङ्कस्तु। "प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः।
अङ्को नानाप्रकारार्थः संविधानरसाश्रय" इत्युक्तः॥

[३] शोणितपुरं वाणासुरराजधानी. वाणो नामासुरः शरश्च।

[४] भुवनानां कोशः धनसञ्चयः। भुवनरूपस्थानञ्च।

[५] मृदुना अतापकेन करेण किरणेन राजग्राह्यबलिना च। रत्नालयः समुद्रः रत्नानामाधारश्च।

[६] दानं मदजलं विप्रादिभ्यो वितरणञ्च।

[७] हिरण्यगर्भः ब्रह्मा, हिरण्यं स्वर्णं तच्च गर्भे अभ्यन्तरे यस्य।

घिष्ठितप्रकोष्ठम्,(क)[१]महाभारतमिवानन्तगीताकर्णनानन्दितनरम्, (२)यदुवंशमिव कुलक्रमागतशूरभीमपुरुषोत्तमबलपरिपालितं,[३]व्याकरणमिव प्रथममध्यमोत्तमपुरुषविभक्तिस्थितानेकादेशकारकाख्यातसम्प्रदानक्रियाव्ययप्रपञ्चसुस्थितम् [४]

(क) ऽध्यासितप्रकोष्ठमिति वा पाठः।

[१] भोगिनः सर्पाः वनितादिभोगवन्तश्च प्रकोष्ठं विस्तृतकरः कद्वदेशश्च।

[२] अनन्तेन नारायणेन गीताया उक्तायाः योगोपनिषदश्चाकर्णनानन्दितो नरो नरनाममुनेरंशोऽर्जुनो यत्र असंख्यकगीतश्रवणेन सन्तोषितः लोको यत्र च।

[३] शूरः वसुदेवः भीमनामा राजभेदः पुरुषोत्तमः वासुदेवः बलो बलभद्रः। शूराणां वीराणां भीमानां भयाकानां पुरुषोत्तमानां पुरुषश्रेष्ठानां बलं सामर्थ्यञ्च।

[४] प्रथमादिपुरुषाः तिङामादिमध्यान्त्यावयवाः, विभक्तिः सुप् तिङ् च, आदेशः एकवर्णादीनामपरवर्णादिभावः, कारकं कर्मादि, आख्यातं तिङन्तक्रियापदम्। सम्प्रदानं कारकभेदः, क्रिया साध्यरूपव्यापारः। तद्बोधकधातुर्लक्ष्यते। अव्ययं लिङ्गसंख्याविनिर्मुक्तः शब्दभेदः, तेषां प्रपञ्चेन सुस्थितम्, उत्तमादित्रिविधपुरुषेषु विभक्त्या विभागेन स्थिताः ये आदेशकारकाः निर्देशकर्त्तारस्तैराख्यातः कथितः सम्प्रदानक्रियायै वितरणार्थं यो व्ययप्रपञ्चस्तेन सुस्थितम्।

उदधिमिव भयान्तःप्रविष्ट(क) [१] सपक्षभूमिभृत्सहस्रसङ्कुलम् ऊषानिरुद्धसमागममिव [२] चित्रलेखादर्शितविचित्रसकलत्रिभुवनाकारम् [३] बलियज्ञमिव पुराणपुरुषवामनाधिष्ठिताभ्यन्तरम्, [४] शुक्लपक्षप्रदोषमिव विततशशिकिरणकलापधवलाम्बरवितानं [५] नरवाहनदत्त [६] चरितमिवान्तःसंवर्द्धितप्रियदर्शनराजदारिकागन्धर्व्वदत्तोत्कण्ठं, महातीर्थमिव

(क) भयात् प्रविष्टेति च पाठः।

[१] पक्षेण सहितः सपक्षः सहायश्च भूमिभृत् राजा पर्वतश्च।

[२] ऊषा बाणासुरकन्या अनिरुद्धः श्रीकृष्णपौत्रस्तत्समागमकथा च हरिवंशे १७७ अध्याये।

[३] चित्रलेखा अप्सरोभेदः चित्रस्य लेखा लेखनञ्च। भुवनस्याकारः भुवनस्थसुन्दरपुरुषमूर्त्तिश्च तत्कथापि हरिवंशे १७६ अध्याये।

[४] पुराणः प्राचीनः पुरुषः परमेश्वरावतारः वामनः काश्यपपुत्रः। पुराणः वृद्धः, वामनः खर्वश्च।

[५] कलापेन धवलम् कलापइव धवलञ्च अम्बरमाकाशो वस्त्रञ्च।

[६] नरवाहनदत्तो राजभेदः प्रियदर्शनाख्या सुदर्शना च राजदारिका राजकुमारिका तया गन्धर्वेभ्यो दत्ता सौन्दर्य्यातिशयात् उत्कण्ठा यत्र।

सद्योऽनेकपुरुषप्राप्ताभिषेक [१] फलम्, प्राग्वंशमिव [२] नानासवपात्रसङ्कुलं, निशासमयमिवानेकनक्षत्रमाला [३] लङ्कृतं प्रभातसमयमिव पूर्वदिग्भागरागानुमेयमित्रोदयं, [४] गान्धिक [५] भवनमिव स्नानधूपलेपनवर्णकोज्ज्वलं, ताम्बूलिकभवनमिव कृतलवलीलवङ्गैलाकक्कोलपत्रसञ्चयं, प्रथम(क) वेश्यासमागममिवाविदितहृदयाभिप्रायचेष्टाविकारं कामुकजनमिव बहुचाटुसंलापसुभाषितरसास्वाददत्ततालशब्दं, धूर्त्तमण्डलमिव [६] दीयमानमणिशतसहस्रालङ्करणकृतलेख्यपत्रसञ्चयं, धर्म्मारम्भमिवाशेषजनमनःप्रह्लादनं, महावनमिव विव-

---

(क) प्रधानेति च पाठः।

[१] अभिषेकः स्नानं राज्याभिषेकश्च, तारापीड़ाद्यैव इतरेषां राज्याभिषेकात्तस्य सर्वभौमता।

[२] प्राग्वंशः हविर्गृहात् पूर्वस्थगृहम्। सवाः प्रातर्मध्याह्नत्रयसमये कर्त्तव्यां यज्ञभेदाः आसवानि मद्यानि च।

[३] नक्षत्रमाला नक्षत्रसमूहः सप्तविंशमुक्ताग्रथिता माला च।

[४] पूर्वदिग्भागे पूर्वदिशि पूर्वावस्थायां च रागो रक्तता अनुरागश्च मित्रः सूर्य्यः मित्रं सुहृच्च उदयः उत्थानं वृद्धिश्च।

[५] गन्धः शिल्पमस्य ठञ्। गन्धद्रव्याजीवी। वर्णकं चन्दनम्।

[६] धूर्त्ताः द्यूतकारिणस्ते च द्यूते पराजितद्रव्यदानार्थं दातव्यतया ऋणशोधनानुगुणं लेख्यपत्रं कुर्वन्तीति प्रसिद्धम्।

श्वापदद्विजो [१] पघुष्टं, रामायणमिव कवि (पि) [२] कथा-समाकुलं, माद्रीकुलमिव नकुला [३] लङ्कृतं, सङ्गीतभवन-मिवानेकस्थानावस्थापितमृदङ्गं, रघुकुलमिव भरत [४] गुणा-नन्दितं, ज्योतिषमिव ग्रहमोक्षकलाभागनिपुणं, [५] नार-दीयमिव [६] आवर्ण्यमानराजधर्मं, यन्त्रमिव [७] विविध-शब्दरसलब्धास्वादं, मृदुकाव्यमिवानन्यचिन्तितस्वभावाभिप्रा-यावेदकं, [८] महानदीप्रवाहमिव सर्व्वदुरिततापहरं, [९]

---

[१] द्विजाः पक्षिणः ब्राह्मणादयश्च।

[२] कविः वाल्मीकिः काव्यकर्त्ता च कपिकथेति पाठे कपिः मन्दुरास्थः पलायमानः वानरः, हनूमदादिश्च।

[३] नकुलः जन्तुभेदः माद्रीपुत्रश्च।

[४] भरतः कैकयीपुत्रः रामभ्राता भरता नटाश्च।

[५] ग्रहो दुष्टानां निग्रहो बन्धनं वा, राहुणा सूर्य्यचन्द्रयो-रास्कन्दनञ्च। मोक्षः कारास्थानात् विमोचनं, ग्रासनिवृत्तिश्च कलाः चतुःषष्टिप्रकाराः राशेः १८० अष्टादशशतमितभागाः, दण्डा वा च। भागः दायादानामंशः, राशेः त्रिंशांशश्च।

[६] नारदेन प्रोक्तं मनूक्तराजधर्मसारभूतं द्वादशसहस्रमितम्।

[७] यन्त्रम् वीणादि।

[८] अनन्यचिन्तागोचरः स्वभावस्य योऽभिप्रायस्तस्यावेदकम्।

[९] दुरितं पापं तज्जन्यः तापः दुःखम्। दुरिता दुर्गता दरिद्रा-स्तेषां तापश्च।

धनमिव न कस्यचिन्न काङ्क्षणीयं (क) सन्ध्यासमयमिव दृश्यमानचन्द्रापीड़ोदयं [१] नारायणवक्षःस्थलमिव श्रीरत्नप्रभाभासितदिगन्तं, बलभद्रमिव कादम्बरी [२] रसविशेषवर्णनाकुलमतिं, ब्रह्माणमिव पद्मासनोपदेशदर्शितभूमण्डलं, [३] स्कन्दमिव शिखिक्रीड़ारम्भचञ्चलं, कुलाङ्गनाप्रचारमिव सर्वदोषजातशङ्कं, वेश्याजनमिव उपचार [४] चतुरं, दुर्जनमित्रापगतपरलोक [५] भयम्, अन्तरजनमिवागम्यविषयाभिलाषम्, [६] अगम्यविषयासक्तमपि प्रशंसनीयम्, अन्तकभट-

---

(क) काङ्क्षणीयफलमिति च पाठः।

[१] चन्द्रापीड़ोनामात्मरूपः राजकुमारः तस्य च तदानीं तत्र प्रवेक्ष्यमाणत्वेन तद्भूषणत्वम् चन्द्ररूपआपीड़ः शिरोभूषणञ्च।

[२] कादम्बरी मद्यभेदः उभयत्र समानम्। एतद् ग्रन्थरूपकादम्बरीपरत्वन्तु तदानीमसम्भवीत्यनुसन्धेयम्।

[३] पद्माया लक्ष्म्या आसनमाश्रयभूतस्तस्य नारायणस्योपदेशेन दर्शितं भूमण्डलं यस्मै, पद्माया राजलक्ष्म्याः आसनोपदेशः स्थितिहेतुभूतः नीत्युपदेशस्तेन दर्शितं भूमण्डलम् यत्र च।

[४] उपचारः कैतवम्। राजकुलस्यापि छलप्रधानत्वात्तथात्वम्।

[५] परलोकः मरणोत्तरगम्यलोकः शत्रुजनश्च।

[६] अगम्यो यो विषयो देशस्तदभिलष्यति यश्च। अगम्यो दुर्बोधो विषयाभिलाषो धनादितृष्णा यस्य।

गणमिव कृताकृतसुकृतविचारनिपुणं, [१] सुकृतमिवादिमध्यावसानकल्याणकरं, वासरारम्भमिव परिस्फुरत्पद्मरागारुणीक्रियमाणनिशान्तं, [२] दिव्यमुनिगणमिव कलापिसनाथश्वेतकेतु [३] शोभितं, भारतसमरमिव कृतवर्मशिलीमुखचक्रसम्भारभीषणं, [४] पातालमिव महाकञ्चुकि [५] सहस्राध्यासितं, वर्षपर्वत [६] समूहमिवान्तस्थितापरिमाणशृङ्गि-

---

[१] अकृतं दुष्कृतं पापं दुष्क्रिया च सुकृतं पुण्यं सुष्ठुकार्य्यञ्च तयोर्विचारे निपुणम्।

[२] पद्मरागो मणिभेदः कमलस्य रक्तता च निशान्तः शान्तिशेषः भवनञ्च।

[३] कलापी मयूरः वैशम्पायनशिष्यो मुनिभेदश्च। श्वेतकेतुः शुक्लध्वजः छान्दोग्यप्रसिद्धऋषिभेदश्च "तत्त्वमसि श्वेतकेतो„ इति छान्दोग्य श्रुतिः।

[४] कृतवर्मा यादवः क्षत्त्रियभेदः तस्य वाणादिसमूहेन, कवचवाणचक्रादिसमूहेन च भीषणम्।

[५] कञ्चुकिनः कञ्चुकयुक्ता अवरोधरक्षिपुरुषभेदाः सर्पाश्च।

[६] "हिमवान् हेमकूटश्च निषधो मेरुरेव च। चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्वताः" इत्युक्तपर्वतसमूहः भूमिवलयमध्ये नवसु वर्षेषु सीमाभूतः चिह्नयुतो वा पर्वतसंघः। अन्तस्थः सीमाद्वयान्तस्थितः अपरिमाणः अतिपरिमाणः शृङ्गी हेमकूटश्च यत्र,

हेमकूटं, महाद्वारमपि दुष्प्रवेशम्, अवन्तिविषयगतमपि मागध[१]जनाधिष्ठितम्, स्फीतमपि भ्रमन्नग्नलोकं [२] राजकुलं विवेश।

ससम्भ्रमोपगतैश्च कृतप्रणामैः प्रतीहारमण्डलैरुपदिश्यमानमार्गः, सर्वतः प्रचलितेन, च पूर्वकृतावस्थानेन, दूरपर्य्यस्तमौलिशिथिलितचूड़ामणिमरीचिचुम्बितवसुधातलेन, राजलोकेन प्रत्येकशः प्रतीहारनिवेद्यमानेन सादरं प्रणम्यमानः, पदे पदे चाभ्यन्तरविनिर्गताभिराचारकुशलाभिरन्तःपुरवृद्धाभिः क्रियमाणावतरणमङ्गलो, भुवनान्तराणीव विविधप्राणिसहस्रसङ्कुलानि सप्तकक्षान्तराण्यतिक्रम्य अभ्यन्तरावस्थितम्, अनवरतशस्त्रग्रहणश्यामिकाखीढ़करतलैः, करचरणलोचनवर्ज्जैर्मसितलोहजालकावृतशरीरैः, आलानस्तम्भैरिव गजमदपरिमललोभनिरन्तरनिलीनमधुकरपटलजटिलैः, कुलक्रमागतैरुदात्ता [३] न्वयैः, अनुरक्तैर्महाप्रमाणतयातिकर्कशतया च दा-

---

अन्तर्मध्यस्थितानामपरिमितानां शृङ्गिणां गवादीनां हेम्नाञ्च कूटं समूहो यत्र इति। अत्र च पक्षे खर्परे शरि वेति ८,३,२८, वा॰ विसर्गलोपः।

[१] मागधाः मगधदेशवासिनः वन्दिनश्च।

[२] "नग्नो वन्दिनि क्षपणे विवस्त्रे त्वभिधेयवदिति विश्वः नग्नः विवस्त्रः क्षपणसंन्यासी च।

[३] उदात्तान्वया महावंशजाताः।

नवैरिवातिशयाकारै, सम्भाव्यमानपराक्रमैः, सर्वतः शरीररक्षाधिकारनियुक्तैः पुरुषैः परिवृतम्, उभयतो वारविलासिनीभिश्चानवरतमुद्धूयमानधवलचामरम् अमलपुलिनतलशोभिनि सुरकुञ्जरमिव मन्दाकिनीवारिणि हंसधवलशयनतले निषण्णं पितरमपश्यत्।

"आलोकयेति,, च प्रतीहारवचनानन्तरम् अतिदूरावनतेन चलितचूड़ामणिना शिरसा कृतप्रणामम् "एह्येहीति, अभिदधानो, दूरादेव प्रसारितभुजयुगलः, शयनतलादीषदुच्छसितमूर्त्तिः, आनन्दजलापूर्य्यमाणलोचनः, समुद्गतपुलककण्टकतया सीव्यन्निवैकीकुर्वन्निव, तं पिता विनयावनतमालिलिङ्ग। आलिङ्गितोन्मुक्तश्च [१] पितुश्चरणपीठसमीपे पिण्डीकृतमुत्तरीयमात्मताम्बूलकरङ्कवाहिन्या सत्वरमासनीकृतम् "अपनयेति,, शनैर्वदन्नग्रचरणेन समुत्सार्य्य (क) क्षितितलएव निषसाद। अनन्तरनिहिते चास्यासने राज्ञा सुतनिर्विशेषमुपगूढ़ो वैशम्पायनो न्यषीदत्। मुहूर्त्तमिव विस्मृतचामरोत्क्षेपनिश्चलानां वारविलासिनीनां साभिलाषैरनिलचलितकुवलयदलदामदीर्घैराजिह्म (ख) तरलतरतारकैरवलुप्यमानइव दृष्टिपातैः, स्थित्वा "गच्छ वत्स पुत्र-

(क) पुस्तकान्तरे अत्र तु चन्द्रापीड़ः इत्यधिकः पाठो दृश्यते।

(ख) जिह्मितेति वा पाठः।

[१] पूर्वमालिङ्गितः पश्चादुन्मुक्तः।

वत्सलां मातरमभिवाद्य दर्शनलालसा यथाक्रमं सर्वा जननी: दर्शनेनानन्दयेति,, विसर्ज्जितः पित्रा, सविनयमुत्थाय निवारितपरिजनो वैशम्पायनद्वितीयोऽन्तःपुरप्रवेशयोग्येन राजपरिजनेनोपदिश्यमानवर्त्मा अन्तःपुरमाययौ ।

तत्र धवलकञ्चुकावच्छन्नशरीरैरनेकशतसंख्यैः श्रियमिव क्षीरोदजलकल्लोलैः समन्तात् परिवृतां, शुद्धान्तान्तर्वंशिकैः [१] अतिप्रशान्ताकाराभिश्च, कषायरक्ताम्बरधारिणीभिः, सन्ध्याभिरिव सकललोकवन्द्याभिः प्रलम्बश्रवणपाशाभिः विदितानेककथालापवृत्तान्ताभिः, भूतपूर्वाः कथाः कथयन्तीभिः, वाचयन्तीभिरितिहासपुस्तकानि, ददतीभिर्धर्मोपदेशान्, निवेदयन्तीभिः पुण्याः कथाः, जरत्प्रव्रजिताभिर्विनोद्यमानाम्, उपरचितस्त्रीवेशभारेण गृहीतविकटप्रसाधनेन वर्षवरजनेन संसेव्यमानाम्, अनवरतविधूयमानबालव्यजनकलापाम्, अङ्गनाजनेन च वसनाभरणकुसुमपटवासताम्बूलतालवृन्ताङ्गरागभृङ्गार[२]धारिणा मण्डलोपविष्टेनोपास्यमानां, पयोधरान्तरावलम्बितमुक्तागुणाम्, अचलद्वयमध्यप्रवृत्तगङ्गाप्रवाहामिव मेदिनीम्, आसन्नदर्पणपतितमुखप्रतिबिम्बाम्, अर्कबिम्बप्रविष्टशशिमण्डलामिव दिवं, (क) समुपसृत्य मातरं प्रणनाम ।

(क) दिवसश्रियमिति वा पाठः ।

[१] "अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः,, इत्यमरः ।

[२] "भृङ्गारः कनकालुकेत्यमरः स्वर्णभाजनपात्रभेदः । (झारी)

सा तु तं ससम्भ्रममुत्थाप्य सत्यप्याश्वासम्पादनदक्षे पार्श्वपरिवर्त्तिनि परिजने स्वयमेव कृतावतरणमङ्गला प्रस्नुतपयोधरक्षरत्पयोविन्दुच्छलेन द्रवीभूय स्नेहाकुलेन निर्गच्छतेव हृदयेन, अन्तः शुभशतानीवाभिध्यायन्ती मूर्द्धन्युपाघ्राय तं सुचिरमाश्लिष। अनन्तरञ्च तथैव कृतयथोचितसमुपचारमाश्लिष्टवैशम्पायना स्वयमुपविश्य विनयादवनितले समुपाविशन्तमाकृष्य बलात् अनिच्छन्तमपि चन्द्रापीड़मुत्सङ्गमारोपितवती। ससम्भ्रमपरिजनोपनीतायामासन्द्या[१]मुपविष्टे च वैशम्पायने चन्द्रापीड़ं पुनःपुनरालिङ्ग्य ललाटदेशे वक्षसि भुजशिखरयोश्च मुहुर्मुहुः करतलेन परामृशन्ती विलासवती तमवादीत्। "वत्स! कठिनहृदयस्ते पिता, येनेयमाकृतिरीदृशी त्रिभुवनलालनीया क्लेशमतिमहान्तमियन्तं कालं लम्भिता, कथमपि सोढ़वानतिदीर्घामिमां गुरुयन्त्रणाम्, अहो बालस्यापि सतः कठोरस्येव ते महद्धैर्य्यम्, अहो विगतशिशुजनक्रीड़ाकौतुकलाघवमर्भकस्यापि(क)ते हृदयम्, अहो गुरुजनस्योपरि भक्तिरसाधारणी, सर्वथा, यथा पितुः प्रसादात् समस्ताभिरुपेतो विद्याभिरालोकितोऽसि, एवमचिरेणैव कालेनानुरूपाभिर्वधूभिरुपेतमालोकयिष्यामीति,, एवमभिधाय लज्जा-

---

(क) अर्भकत्वेऽपि इति वा पाठः।

[१] आसन्दी यन्त्रघटितासनभेदः।

स्मितावनतम् आत्ममुखप्रतिविम्बगर्भे विकचकमलक्षतकर्णपल्लवावतंसइव कपोले पर्य्यचुम्बदेनम्। एवञ्च तत्रापि नातिचिरमेव स्थित्वा क्रमेण सर्वान्तःपुराणि दर्शनेन नन्दयामास। निर्गत्य च राजकुलद्वारावस्थितमिन्द्रियायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः शुकनासं द्रष्टुमयासीत्।

यामावस्थितविविधगन्धगजघटासङ्कटम्, अनेकतुरङ्गसहस्रसम्बाधम्, अपरिमितजनसमूहसम्मर्द्दसङ्कुलम्, एकदेशोपविष्टैः, सहस्रशो निबद्धचक्रवालैरनेककार्य्यागतैर्दर्शनोत्सुकैः समन्ततो विविधशास्त्राञ्जनोन्मीलितबुद्धिलोचनैश्चीवर [१] च्छद्मना विनयानुरागिभिः (क) धर्म्मपटै [२] रिवावगुण्ठितैः, शाक्यमुनिशासनपथधौरेयैः, रक्तपटैः (ख) पाशुपतैः [३] द्विजैश्च दिवानिशमासेव्यमानम्, अभ्यन्तरप्रविष्टानाञ्च सामन्तानां जघनोपविष्टपुरुषोत्सङ्गस्थितद्विगुणकुथाभिः (ग) अतिचिरावस्थाननिर्वेदप्रसुप्ताधोरणाभिः, अपर्य्याणाभिः सपर्य्याण-

---

(क) रक्ताम्बरच्छद्मना गुरुविनयानुरागिभिः इति च पाठः।

(ख) रक्तपादैरिति च पाठः स तु न समीचीनः।

(ग) स्थानोपविष्ट पुरुषावस्थितद्विगुणकुथाभिरिति वा पाठः।

[१] चीवरः सन्न्यासिधार्य्यः पटविशेषः।

[२] धर्मावेदकाः पटाः धर्मपटाः। यत्र पटे धर्मानालिख्य तद्दर्शनेनोपदिश्यते तादृशाः पटाः।

[३] पशुपतिना उपादिष्टमधीयते ये ते पाशुपताः शैवविशेषाः।

भिश्च [१] निश्चलावस्थानप्रचलायिताभिः [२] शतसहस्रशः-करिणीभिराकीर्णं, शुकनासगृहद्वारमासाद्य सत्वरप्रधावितैर्द्वारदेशावस्थितैः प्रतीहारपुरुषैरनिवार्य्यमाणोऽपि राजकुल इव राजपुत्रो बाह्याङ्गनएव तुरङ्गादवततार। द्वारदेशावस्थापिततुरङ्गस्य वैशम्पायनमवलम्ब्य पुरःप्रधावितैः समुत्सारितपरिजनैस्तत्प्रतीहारमण्डलैरुपदिश्यमानमार्गस्तथैव चलितमुकुटकोटिभिर्नरेन्द्रवृन्दैः सेवासमुपस्थितैरुत्थायोत्थाय प्रणम्यमानस्तथैव च प्रचण्डप्रतीहारहुङ्कारभयमूकीभवत्परिजनानि प्रचलितवेत्रलतात्रासनचकितसामन्तचक्रचरणशतचलितवसुन्धराणि कक्षान्तराणि निरीक्षमाणस्तथैव च नवनवसुधावदातप्रासादसहस्रनिरन्तरं द्वितीयमिव राजकुलं शुकनासभवनं विवेश। प्रविश्य चानेकनरेन्द्रसहस्रमध्योपविष्टमपरमिव पितरम् उपदर्शितविनयो दूरावनतेन मौलिना शुकनासं ववन्दे।

शुकनासस्तं ससम्भ्रममुत्थायानुपूर्व्वेणोत्थितराजलोकैः सादरमभिमुखदत्ताविरलपदः प्रहर्ष(क)विस्फारितलोचनागतानन्दजलकणः सह वैशम्पायनेन प्रेम्णा गाढमालिलिङ्ग। आलिङ्गितोन्मुक्तस्य सादरोपनीतमपहाय रत्नासनम् अवनावेव

(क) संहर्षेति च पाठः।

[१] पर्य्याणः पल्ययनम्। (पालान)

[२] प्रचलायिताः चपलाः।

राजपुत्रः समुपाविशत्, तदनु च वैशम्पायनः। समुपविष्टे च राजपुत्रे शुकनासवर्जमन्यदखिलमवनिपालचक्रमुज्झितनिजासनमवनितलमभजत। स्थित्वा च तूष्णीं क्षणमिव शुकनासः समुद्गतप्रीतिपुलकैरङ्गैरावेद्यमानहृदयहर्षप्रकर्षस्तमब्रवीत्।

"तात! चन्द्रापीड़! अद्य खलु देवस्य तारापीड़स्य समाप्तविद्यमुपारूढ़यौवनमालोक्य भवन्तं सुचिराङ्कुवनराज्यफलप्राप्तिरुपजाता, अद्य सम्वृद्धाः सर्वा गुरुजनाशिषः, अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म, अद्य प्रसन्नाः कुलदेवताः; न ह्यपुण्यभाजां भवादृशाः सकलत्रिभुवनविस्मयहेतवः पुत्रतां प्रतिपद्यन्ते, क्वेदं वयः? क्वेयममानुषी शक्तिः? क्व चेदमशेषविद्याग्रहणसामर्थ्यम्? अहो धन्याः प्रजाः यासां भरतभगीरथप्रतिमो भवानुत्पन्नः पालयिता, किम् खलु कृतमवदातं कर्म वसुन्धरया? ययासि भर्त्ता समासादितः, हरिवक्षःस्थलनिवासासद्ग्रहव्यसनिनी हता खलु लक्ष्मीः, या विग्रहवती भवन्तं नोपसर्पति, सर्वथा कल्पकोटीर्महावराह इव दष्ट्रायलयेन(क) वह बाहुना वसुन्धराभारं सहपित्रा।" इत्यभिधाय स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य विसर्ज्जयाञ्चकार। विसर्ज्जितश्चोत्थायान्तःपुरं प्रविश्य दृष्ट्वा वैशम्पायनमातरं मनोरमाभिधानां निर्गत्य समारुह्येन्द्रायुधं पित्रा पूर्वकल्पितं, प्रति-

(क) दंष्ट्राबलेनेति च पाठः।

च्छन्दकमिव [१] राजकुलस्य, द्वारावस्थितसितपूर्णकलसम्, आबद्धहरिचन्दनमालम्, उल्लसितसितपताकासहस्रम्, अभ्याहतमङ्गलतूर्य्यरवपरिपूरितदिगन्तरम्, उपरचितविकचकमलकुसुमप्रकरम् अचिरकृताग्निकार्य्यम्, [२] उज्ज्वलविविक्तपरिजनम्, उपपादिताशेषगृहप्रवेशमङ्गलं, कुमारो भवनं जगाम। गत्वा च श्रीमण्डपावस्थिते शयने मुहूर्त्तमुपविश्य सह तेन राजपुत्रलोकेन अभिषेकादि (क) मज्जनावसानमकरोद्दिवसविधिम्, अभ्यन्तरे च स्वशयनीयगृहएवेन्द्रायुधस्यावस्थानमकल्पयत्।

एवंप्रायेण चास्योदन्तेन [३] तदहःपरिणतिमुपययौ। गगनतलादवतरन्त्या दिवसश्रियः पद्मरागनूपुरमिव स्वप्रभापिहितरन्ध्रं रविमण्डलमुन्मुक्तपादं [४] पपात। सलिलप्रवाह इव रथचक्रमार्गानुसारेण [५] दिवसकरस्य वासरालोकः प्रतीचीं ककुभमगात् (ख)। अभिनवपल्लवलोहिततलेन

(क) अभिषेकादिकमिति वा पाठः।

(ख) ककुभमगमदिति वा पाठः।

[१] प्रतिच्छन्दकं विच्छन्दाकारकम् भवनविशेषः।

[२] अग्निकार्य्यम् गृहप्रवेशोदितहोमादि।

[३] उदन्तः वृत्तान्तः कथिततत्तद्व्यापारः।

[४] पादः किरणाः चरणाश्च।

[५] रथचक्रात्तुसीमामार्गः रथचक्रमार्गस्तेन निम्नता, जलप्रवाहस्य च निम्नगामित्वात्तथोत्प्रेक्षा।

करेणेव [१] (क) अधोमुखप्रसृतेन दिवसकरविम्बेन वासर कमलराग [२] मशेषं ममार्ज्ज। कमलिनीपरिमलपरिच-यागतालिमालाकुलितकण्ठं कालपाशैरिव चक्रवाकमिथुन माकृष्यमाणं विजघटे [३]। कर [४] पुटैर्दिवसान्तमापीत-मरविन्दमधुरसमिव रक्तातपच्छलेन गगनगमनखेदादिव दिवसकरविम्बं ववाम [५]।

क्रमेण च प्रतीचीकर्णपूररक्तोत्पले लोकान्तरमुपगते भगवति गभस्तिमालिनि, समुल्लसितायामम्बरतड़ागविकचकमलिन्यां-सन्ध्यायां, कृष्णागुरुपङ्कपत्रलताखिव तिमिरलेखासु स्फुरन्तीषु, दिशां मुखेषु अलिकुलेन मलिनेषु कुवलयवनेनेव रक्तकमलाकरे तिमिरनिकरेणोत्सार्य्यमाणे सन्ध्यारागे, कमलिनीनिपीतमातप-मुन्मूलयितुमन्धकारकरपल्लवेष्विव विशत्सु रक्तकमलोदराणि मधुकरकुलेषु, शनैःशनैश्च निशाविलासिनीमुखावतंसपल्लवे ग-लिते सन्ध्यारागे,दिक्षु विक्षिप्तेषु सन्ध्यादेवतार्च्चनबलिपिण्डेषु,

---

(क) अभिनवपल्लवदललोहितकरेणेति वा पाठः।

[१] करः किरणः हस्तश्च।

[२] रागोऽनुरागः रक्तता च।

[३] वियोजयामास।

[४] कराः किरणाः हस्ताश्च पुटाद्रोण्यइव तेन तैर्मधुरसपान-सम्भवः।

[५] उज्जगार।

शिखरदेशलग्नतिमिरासु अनारूढ़मयूरास्वपि मयूराधिष्ठितास्विव मयूरयष्टिषु, गवाक्षविवरनिलीनेषु प्रासादलक्ष्मीकर्णोत्पलेष्विव (क) पारावतेषु, विगतविलासिनीसंवाहननिश्चलकाञ्चनपीठासु मूकीभूतघण्टारवास्वन्तःपुरदोलासु, भवनसहकारशाखावलम्बितपञ्जरेषु विगतालापेषु शुकसारिकानिवहेषु, सङ्गीतकविरामविश्रान्तरवासूत्साय्यमाणासु वीणासु, युवतिनूपुरशब्दोपशमनिभृतेषु भवनकलहंसेषु, अपनीयमानकर्णशङ्खचामरनक्षत्रमालामण्डलेषु (ख) मधुकरकुलशून्यकपोलभित्तिषु मत्तवारणेषु, प्रदीप्यमानेषु राजवल्लभतुरङ्गमन्दुराप्रदीपेषु, प्रविशन्तीषु प्रथमयामकुञ्जरघटासु, कृतराजस्वस्त्ययनेषु निष्क्रमत्सु पुरोहितेषु, विसर्ज्जितराजलोकविरलपरिजनेषु, विस्तारितेष्विव राजकुलकक्षान्तरेषु, प्रज्वलितदीपिकासहस्रप्रतिबिम्बचुम्बितेषु कृतविकचचम्पकदलोपहारेष्विव मणिभूमिकुट्टिमेषु, निपतितदीपालोकासु रविविरहार्त्तनलिनीविनोदनागतबालातपास्विव भवनदीर्घिकासु, निद्रालसेषु, पञ्जरकेसरिषु, समारोपितकार्मुके गृहीतसायके यामिक [१] इवान्तःपुरप्रविष्टे मकरकेतौ, अवतंसपल्लवेष्विव सरागेषु कर्णे

(क) क्वचित् इवेति पाठो नास्ति।

(ख) मण्डनपिण्डेषु इति वा पाठः।

[१] यामिकः यामाधिकृतः प्रहरी।

क्रियमाणेषु सुरतदूतीवचनेषु, सूर्य्यकान्तमणिभ्यइव सङ्क्रान्तानलेषु ज्वलत्सु, मानिनीनां शोकविधुरेषु हृदयेषु, प्रवृत्ते प्रदोषसमये चन्द्रापीड़: प्रज्वलितदीपिकाचक्रवालपरिवारः चरणाभ्यामेव राजकुलं गत्वा पितुः समीपे मुहूर्त्तं स्थित्वा दृष्ट्वा च विलासवतीम् आगत्य स्वभवनमनेकरत्नप्रभाशवलमुरगराजफणामण्डलमिव हृषीकेशः शयनतलमधिशिश्ये।

प्रभातायाञ्च निशीथिन्यां समुत्थाय समभ्यनुज्ञातः पित्रा, अभिनवमृगयाकौतुकावकृष्यमाणहृदयो भगवत्यनुदितएव सहस्ररश्मावारुह्येन्द्रायुधम्, अश्वतीबालेय [१] प्रमाणानाकर्षद्भिस्चामीकरशृङ्खलाभिः कौलेयकान् [२] जरद्व्याघ्रचर्म्मशवलवसनकञ्चुकधारिभिरनेकवर्णपट्टचीरिकोद्बद्धमौलि (क)-भिरुपचितश्मश्रुगहनमुखैरेककर्णावसक्तहेमतालीपुटैः [३] आबद्धनिविड़कच्छैः [४] अनवरतश्रमोपचितोरुपिण्डकैः [५] कोदण्डपाणिभिः श्वपोषकैरनवरतकृतकोलाहलैः प्रधावद्भिः द्विगुणीक्रियाणगमनोत्साहो, बहुगजतुरगपदातिपरिवृतो वनं ययौ।

(क) चीरकावबद्धमौलिभिः, चीरकोर्द्धबद्धमौलिभिरिति वा।

[१] बालेया गर्दभाः "चक्रीवन्तस्तु बालेया इत्यमरः।

[२] कौलेयकः कुक्कुरः।

[३] हेमताली स्वर्णनिर्मितकर्णाभरणभेदः।

[४] कच्छः परिकरः।

[५] पिण्डः देहः।

तत्र च कर्णान्तावकृष्टमुक्तैर्विकचकुवलयपलाशकान्तिभिर्भल्लैः मदकलकलभकुम्भभित्तिभिदुरैश्च नाराचैः चापटङ्काररवभयचकितवनदेवताद्भीचवीचितो वनवराहान् केसरिणः शरभांश्चमराननेकविध (क) कुरङ्गकांश्च सहस्रशो जघान। अन्यांश्च जीवतएव महाप्राणतया स्फुरतोजग्राह।

समारूढे च मध्यमह्नः सवितरि, वनात् [१] स्नानोत्थितेनेव श्रमसलिलबिन्दुवर्षमनवरतमुज्झता मुहुर्मुहुर्दशनविघट्टनैः खण्डखण्डायितखरखलीनेन [२] (ख) श्रमशिथिलमुखगलितफेनिलरुधिरलवेन पर्य्याणपट्टकानुसारोत्थितफेनराजिना कर्णावतंसीकृतमुत्फुल्लकुसुमशवलमलिपटलझङ्काररवमुखरं वनगमनचिह्नं पल्लवस्तवकमुद्वहतेन्द्रायुधेनोह्यमानः, समुद्गतस्वेदतयान्तरार्द्रीकृतमण्डलेन मृगरुधिरलवशतशवलेन वारवाणेन [३] द्विगुणतरमुपजनितकान्तिः अनेकरूपा [४] नुसारसम्भ्रमपरिभ्रष्टच्छत्रधारतया छत्रीकृतेन वनपल्लवेण निवार्य्यमाणातपो विविधवनलताकुसुमरेणुधूषरो वसन्तइव विग्रह-

(क) विधेति पुस्तकान्तरे नास्ति।

(ख) खररवाभीतेन इति वा पाठः।

[१] वनं जलं काननञ्च।

[२] खलीनः कविका (कड़ियाल)

[३] वारवाणः कवचस् वर्म

[४] रूपाः मृगाः।

वान्, अश्वखुररजोमलिनललाटाभिव्यक्तावदातस्वेदलेखो दूर-विच्छिन्नेन पदातिजनेन शून्यीकृतपुरोभागः, प्रजवितुर-ङ्गमाधिरूढैरल्पावशिष्टैः सह राजपुत्रैः "एवं मृगपतिः, एवं वराहः, एवं वनमहिषः, एवं शरभः, एवं हरिण इति" तमेव मृगयावृत्तान्तमुच्चारयन् स्वभवनमाजगाम।

अवतीर्य्य च तुरङ्गमात् ससम्भ्रमप्रधावितपरिजनोपनीते समुपविश्यासने वारवाणमवतार्य्य अपनीय चाशेषं तुरङ्गाधि-रोहणोचितं वेशपरिग्रहम्, इतस्ततः प्रचलिततालवृन्तपवना-पनीयमानश्रमो मुहूर्त्तं विशश्राम। विश्रम्य च मणिरजत-कनककलशशतसनाथामन्तर्विन्यस्तकाञ्चनपीठां स्नानभूमिम-गात्। निर्वर्त्तिताभिषेकव्यापारस्य च विविक्तवसनपरिमृष्ट-वपुषः स्वच्छदुकूलपल्लवाकलितमौलेर्गृहीतवाससः कृतदेवता-र्चनस्याङ्गरागभूमौ समुपविष्टस्य राज्ञा विसर्ज्जिता महाप्रतीहा-राधिष्ठिता राजकुलपरिचारिकाः कुलवर्द्धनासनाथाश्च विला-सवतीदास्यः सर्व्वान्तःपुरप्रेषितास्चान्तःपुरपरिचारिकाः पट-लक [१] विनिहितानि विविधान्याभरणानि माल्यान्यङ्गरागान् (क) वासांसि चादाय पुरतस्तस्योपतस्थुः उपनिन्युश्च यथाक्र-मम्। आदाय च ताभ्यः प्रथमं स्वयमुपलिप्य वैशम्पायनम्, उप-

(क) माल्याङ्गरागानिति वा पाठः।

[१] पटलकमिवाच्छादनवत्त्वात् कन्। मञ्जूषाभेदः।

रचिताङ्गरागो (क) दत्त्वा च समीपवर्त्तिभ्यो यथार्हमाभरण-वसनाङ्गरागकुसुमानि विविधमणिभाजनसहस्रशारं शारदमम्ब-रतलमिव स्फुरिततारागणमाहारमण्डपमगच्छत्।

तत्र च द्विगुणीकृतकुथासनोपविष्टः समीपोपविष्टेन तद्गु-णोपवर्णनपरेण वैशम्पायनेन (ख) यथार्हभूमिभागोपवेशि-तेन राजपुत्रलोकेन "इदमस्मै दीयतामिति" प्रसादविशेषदर्शन-संवर्द्धितसेवारसेन च सहाहारविधिमकरोत्। उपस्पृश्य च गृहीतताम्बूलस्तस्मिन् मुहूर्तमिव स्थित्वा इन्द्रायुधसमीपमग-मत्। तत्र चानुपविष्टएव तद्गुणोपवर्णनप्रायालापाः कथाः कृत्वा सत्यप्याज्ञाप्रतीक्षणोन्मुखे पार्श्वपरिवर्तिनि परिजने तद्गुणापहृतहृदयः स्वयमेवेन्द्रायुधस्य पुरो यवसमाकीर्य्य निर्गत्य राजकुलमयासीत्। तेनैव च क्रमेणावलोक्य राजान-मागत्य निशामनैषीत्।

अपरेद्युश्च प्रभातसमयएव सर्व्वान्तःपुराधिकृतम् अवनिपतेः परमसम्मतम् अनुमार्गागतया [१] च प्रथमे वयसि वर्त्तमा-नया राजकुलसंवासप्रगल्भयाप्यनुज्झितविनयया किञ्चिदुपा-

---

(क) रचिताङ्गराग इति वा पाठः।

(ख) पुस्तकान्तरे अत्र तु सह इत्यधिकः पाठो दृश्यते।

[१] अनुमार्गागता पश्चाद्गामिनी।

रूढ़योवनया शक्रगोपका [१] लोहितरागेणांशुकेन रचितावगुण्ठनया सबालातपयेव पूर्व्वया ककुभा प्रत्यग्रदलितमनःशिलाचूर्णवर्णेनाङ्गलावण्यप्रभाप्रवाहेणामृतरसनदीपूरेणेव भवनमापूरयन्त्या ज्योत्स्नयेव राहुग्रासभयादपहाय रजनिकरमण्डलं गामवतीर्णया, (क)राजकुलगृहदेवतयेव मूर्त्तिमत्या, क्वणितमणिनूपुराकलितचरणयुगलया, कूजत्कलहंसाकुलितकमलयेव कमलिन्या, महार्हहेममेखलाकलापकलितजघनस्थलया, नातिनिर्भरोद्भिन्नपयोधरया, मन्दमन्दभुजलताविक्षेपप्रेङ्खितनखमयूखच्छलेन धाराभिरिव लावण्यरसमनवरतं क्षरन्त्या, दिक्षु विसर्पिणि हारलतानां रश्मिजाले निमग्नशरीरतया क्षीरसागरोन्मग्नवदनयेव लक्ष्म्या, बहलताम्बूलकृष्णिमान्धकारिताधरलेखया, समसुवृत्ततुङ्गनासिकया, विकसितपुण्डरीकधवललोचनया मणिकुण्डलमरकतमकरपत्रभङ्गकोटिकिरणातपाहतकपोलतया, सकर्णपल्लवमिव मुखमुद्वहन्त्या, पर्य्युषितधूसरचन्दनरसतिलकालङ्कृतललाटपट्टया, मुक्ताफलप्रायालङ्कारया राधेयराजलक्ष्म्येवोपपादिताङ्गरागया, [२] नववन-

---

(क) भूमण्डलमवतीर्णया इति वा पाठः।

[१] शक्रगोपः इन्द्रगोपः कीटभेदः।

[२] राधेयः दुर्य्योधनसुहृत् सूर्य्यजः कुन्तीपुत्रः कर्णः अङ्गो देशभेदः तस्मिन् रागोऽनुरागः अङ्गरागोऽङ्गलेपनञ्च।

लेखयेव कोमलतनुलतया, त्रय्येव सुप्रतिष्ठितचरणया, [१] मखशालयेव वेदिमध्यया, [२] मेरुवनलतयेव कनकपत्त्रा [३] लङ्कृतया, महानुभावाकारया, अनुगम्यमानं कन्यकया कैलास-नामानं कञ्चुकिनमायान्तमपश्यत्।

स कृतप्रणामः समुपसृत्य क्षितितलनिहितदक्षिणकरो वि-ज्ञापयामास। कुमार! "महादेवी विलासवती समाज्ञापयति 'इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्त्रलेखाभिधाना बालिका सती वन्दीजनेन सहानीयान्तःपुरपरिचारिकामध्यमुपनीता, सा मया विगत-नाथा राजदुहितेति च समुपजातस्नेहया दुहितृनिर्विशेषमि-यन्तं कालमुपलालिता संवर्द्धिता च, तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेषिता, नचास्या-मायुष्मता परिजनसामान्यदृष्टिना भवितव्यं, बालेव लालनीया स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया, शिष्येव द्रष्टव्या, सुहृदिव सर्व्वविश्रम्भेष्वभ्यन्तरीकरणीया दीर्घकालसंवर्द्धितस्नेह-तया स्वसुतायामिव हृदयमस्यामस्ति मे, बलवानस्यां पक्ष-

---

[१] त्रयी ऋग्यजुःसामलक्षणावेदत्रयी चरणः पादः शाखा च।

[२] वेदिर्मध्ये यस्याः वेद्या इव मध्यक्षममुभयतः स्थूलं मध्यं यस्या इति च।

[३] कनकमयं पत्त्रं कनकनिर्मितं पत्त्राकारभूषणञ्च।

पातः, महाभिजनराजवंशप्रसूता चार्हतीयमेवंविधानि कर्म्माणि नियतं स्वयमेवेयमभिविनीततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति, केवलमतिचिरकालोपचिता बलवती मे प्रेमप्रवृत्तिरस्याम्, "अविदितशीलश्चास्याः कुमार,, इति संदिश्यते, सर्व्वथा तथा कल्याणिना प्रयतितव्यं यथेयमतिचिरमुचिता परिचारिका ते भवतीति" इत्यभिधाय विरतवचसि कैलासे कृताभिजातप्रणामां पत्रलेखाम् अनिमिषलोचनं सुचिरमालोक्य चन्द्रापीड़ो "यथाज्ञापयत्यम्बे"त्येवमुक्त्वा कञ्चुकिनं प्रेषयामास।

पत्रलेखा तु ततःप्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य नोत्थितस्य न भ्रमतो न राजकुलगतस्य छायेव राजसूनोः पार्श्वं मुमोच। चन्द्रापीड़स्यापि तस्यां दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत्। अभ्यधिकञ्च प्रतिदिवसमस्याः प्रसादमकरोत् आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेष्वमन्यत। एवं समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीड़स्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारान् उपकरणसम्भारसङ्ग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकञ्च तं कदाचिद्दर्शनार्थमागतम् आरूढ़विनयमपि विनीततरमिच्छन् शुकनासः सविस्तरमुवाच।

"तात! चन्द्रापीड़! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य

ते नाल्पमप्युपदेष्टव्यमस्ति, केवलञ्च निसर्गतएव अभानुभेद्य-मरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं [१] तमो यौवनप्रभवम्, अपरिणामोपशमो दारुणो [२] लक्ष्मीमदः, कष्टमनञ्जनवर्त्ति [३] साध्यमपरमैश्वर्य्यतिमिरान्धत्वम्, अशिशिरोपचारहार्य्योऽतितीव्रो (क) दर्पदाहज्वरोष्मा, सततममूलमन्त्रशम्यो [४] विषमो विषयविषास्वादमोहः, नित्यमस्नानशौचवाध्यो (ख) बलवान् रागमलावलेपः, [५] अजस्रमक्षपावसानप्रबोधा [६] घोरा च राज्यसुखसन्निपातनिद्रा भवति,

---

(क) अत्यन्ततीव्र इति वा पाठः।

(ख) नित्यस्नानशौचाबाध्य इति वा पाठः।

[१] इतरान्धकारस्य सूर्य्यभेद्यत्वम्, मणिप्रभोच्छेद्यत्वम्, दीपनिवार्य्यत्वं चैतस्य ततो वैलक्षण्यमिति गहनत्वम्।

[२] अन्यमदस्य कालान्तरे उपशमो भवति गर्वरूपमदस्य नोपशम इति दारुणत्वम्।

[३] तिमिररोगेणान्धताया अञ्जनशलाकाविशेषेण निवृत्तिः नैतस्य तथेति कष्टत्वम्।

[४] मूलेन ओषधिमूलभेदेन गारुड़ादिमन्त्रेण च अन्यविषभोजनतापउपशम्यते नैतस्य तथेति विषमता।

[५] रागोऽनुरागः स मल इव तस्यावलेपः, तेन वावलेपः सम्बन्धः गर्वस्य अन्यस्य मलसम्बन्धस्य स्नानापनेयत्वेऽपि नैतस्य तथेति बलवत्त्वम्।

[६] अन्यस्याः निद्रायाः रात्र्यन्ते प्रबोधः नैतस्याः तथेति घोरत्वम्।

इत्यतो विस्तरेणाभिधीयसे। गर्भेश्वरत्वम् [१] अभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा, सर्व्वाविनयानामेकैकमप्येषामायतनं, किमुत ? समवायः, यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्ति[२]रदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी (क) च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्ग[३]प्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशाएव भवन्ति भाजनान्युपदेशानाम्, अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य, इतरस्य तु करिणइव शङ्खा[४]भरणम्

(क) इन्द्रिय हरिणां हरतीव इति वा पाठः।

[१] गर्भेश्वरत्वम् जन्मावध्यैश्वर्य्यम्।

[२] रजोगुणः धूलिश्च भ्रान्तिः भ्रमणम् अतस्मिन् तद्बुद्धिश्च।

[३] उन्मार्ग उद्गतो मार्गात् कुपथः, कुरीतिश्च।

[४] शङ्खः करिणां चिह्नभेदः।

आननशोभासमुदयमधिकतरमुपजनयति। अपहरति सकलमतिमलिनमपि अन्धकारमिव दोषजातं प्रदोषसमयनिशाकरइव गुरूपदेशः प्रशमहेतुः, परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति। अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य, कुसुमशरप्रहारजर्जरिते हृदये जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य, चन्दनप्रभवो न दहति किमनलः? किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति बड़वानलो वारिणा। गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अपनीतज्योतिरालोकः नोद्वेगकरः प्रजागरः, विशेषेण तु राज्ञाम्, विरला हि तेषामुपदेष्टारः, प्रतिशब्दकइव [१] राजवचनमनुगच्छति जनो भयात्, उद्दामदर्पश्वयथु [२] स्थगितश्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति, शृण्वन्तोपि च गजनिमीलितेना [३] वधीरयन्तः,

---

[१] प्रतिरूपः शब्दः। प्रतिशब्दः प्रतिध्वनिः।

[२] श्वयथुः शोथः।

[३] गजस्य निमीलितं सर्वदा निद्रावस्था तथा च गजस्य जागरणेऽपि यथा निमीलनमेवं तथा शृण्वतोऽपि तदादराभावात् अश्रुतत्वमिति भावः।

खेदयन्ति हितोपदेशदायिनो गुरून्। अहङ्कारदाहज्वरमूर्च्छान्धकारिताविह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारीणि धनानि, राज्यविषविकार(क)तन्द्रीप्रदा राजलक्ष्मीः।

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्, इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः, क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, [१] उच्चैःश्रवसश्चञ्चलतां, कालकूटान्मोहनशक्तिं, मदिराया मदं, कौस्तुभमणेरतिनैष्ठुर्य्यम्, [२] इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता, न ह्येवंविधमपरमपरिचितमिह जगति किञ्चिदस्ति, यथेयमनार्य्या लब्धापि खलु दुःखेन परिपाल्यते, दृढ़गुण [३] पाशसन्दाननिष्पन्दीकृतापि नश्यति, [४] उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृतापि अपक्रामति, मदजलदुर्द्दिनान्धकारगजघटितघनघटाटोप[५] (ख) परिपालितापि प्रपला-

(क) विकारेति पुस्तकान्तरे नास्ति।

(ख) पुस्तकान्तरे टोपेति नास्ति।

[१] वक्रता कौटिल्यम् असद्व्यवहारश्च।

[२] नैष्ठुर्य्यं काठिन्यं दयाशून्यत्वञ्च।

[३] गुणाः सन्धिविग्रहादयः रज्जवश्च। सन्दानं बन्धनम्।

[४] नश्यति लुप्यते अदर्शनं यातीत्यर्थः।

[५] आटोपः आरम्भः आड़म्बरो वा।

यते, न परिचयं रक्षति, नाभिजन [१] मीक्षते, न रूपमालोकयते, न कुलक्रममनुवर्त्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति, न धर्म्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमवबुध्यते, न लक्षणं प्रमाणीकरोति, गन्धर्वनगरलेखेव [२] पश्यतएव नश्यति, अद्याप्यारूढ़मन्दरपरिवर्त्तावर्त्तभ्रान्तिजनितसंस्कारेव परिभ्रमति, कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकक्षतेव (क) न क्वचिन्निर्भरमाबध्नाति पदम्, [३] अतिप्रयत्नविधृतापि परमेश्वर [४] गृहेषु विविधगन्धगजगण्डमधुपानमत्तेव परिस्खलति, पारुष्यमिवोपशिक्षितुमसिधारासु निवसति, विश्वरूपत्वमिव गृहीतुमाश्रिता नारायणमूर्त्तिम्, अप्रत्ययबहुला [५] च दिवसान्तकमलमिव समुप-

(क) कण्टकैर्य्येव वा पाठः।

[१] अभिजनं महावंशम् न ईक्षते पर्य्यालोचयति एवमन्यत्र।

[२] गन्धर्वनगरलेखा गगने हठात् जायमाना अनिष्टसूचकनिमित्तभेदः गन्धर्वनगरी आसुरिनाम्नी च तस्या रेखेव पश्यतएव पश्यन्तमनादृत्य नश्यति लुप्यते।

[३] पदं चरणं स्थानञ्च कण्टकविद्धत्वेन पादस्य सुस्थिरतयावस्थापनायोग्यत्वमुत्प्रेक्षितम्।

[४] परमेश्वरगृहेषु महाराजभवनेषु।

[५] अप्रत्ययबहुला अनाचारबहुला अनिश्चयबहुला वा अविश्वासबहुला च। "प्रत्ययः शपथे हेतौ ज्ञानविश्वासनिश्चये"ति विश्वः।

चितमूलदण्डकोषमण्डलमपि [१] मुञ्चति भूभुजं, लतेव विटपका [२] नध्यारोहति गङ्गेव वसुजनन्यपि [३] तरङ्ग-बुद्बुदचञ्चला, दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः, [४] पातालगुहेव तमोबहुला, [५] हिड़िम्बेव भीमसाहसैक-हार्य्यहृदया, [६] प्राविड़िव अचिरद्युतिकारिणी, [७] दुष्ट-पिशाचीव दर्शितानेकपुरुषोच्छ्राया, स्वल्पसत्वमुन्मत्तीकरोति, सरस्वतीपरिग्टहीतम् ईर्षयेव नालिङ्गति जनं, गुणवन्तमपवि-त्रमिव न स्पृशति, उदारसत्वममङ्गलमिव न बहु मन्यते, सुज-नमनिमित्तमिव [७] पश्यति, अभिजातमहिमिव [८] लङ्घ-

---

[१] मूलदण्डः परम्परागतसैन्यं कोषो धनसञ्चयः। मण्डलं समूहः राष्ट्रञ्च, मूलं शिफा दण्डः नालकाण्डः कोशमुकुलञ्च।

[२] विड़पः वृक्षः षिड़्गश्च।

[३] वसूनि धनानि अष्टौ वसवश्च तज्जननकथा चादिपर्वणि ९८ अध्याये। तरङ्गेण तरङ्ग इव च चञ्चला।

[४] संक्रान्तिः सञ्चारः एकराशिपरित्यागपूर्वकराश्यन्तरगमनञ्च।

[५] तमोऽन्धकारः अज्ञानहेतुभूतबुद्धिगुणभेदश्च।

[६] भीमः भयानकः भीमसेनश्च तत्कथा च भारतादिपर्वणि १५२ अध्याये।

[७] अचिरद्युतिः आशुनश्वरशोभा सौदामनी च।

[८] अनिमित्तं दुश्चिह्नम्।

[९] अभिजातं कुलीनम्।

यति, शूरं कण्टकमिव परिहरति, दातारं दुःखप्नमिव न स्मरति, विनीतं पातकिनमिव नोपसर्पति, मनस्विनमुन्मत्तमिव हसति, परस्परविरुद्धञ्च इन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथाहि सततमुष्माणमारोपयन्त्यपि जाड्य [१] मुपजनयति, उन्नतिमादधानापि नीचस्वभावतामाविष्करोति, तोयराशिसम्भवापि तृष्णां [२] संवर्द्धयति, ईश्वरतां [३] दधानाप्यशिवप्रकृतित्वमातनोति, बलोपचयमाहरन्त्यपि लघिमानमापादयति, अमृतसहोदरापि कटुविपाका, [४] विग्रहवत्यपि [५] अप्रत्यक्षदर्शना, पुरुषोत्तमरतापि [६] खलजनप्रिया, रेणुमयीव स्वच्छमपि कलुषीकरोति, यथा यथा चेयं चपला दीप्यते, तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म्म केवलमुद्वमति।

तथाहीयं संवर्द्धनवारिधारा, तृष्णाविषवल्लीनां, व्याध-

---

[१] जाड्यम् कृत्याकृत्यविवेचनशून्यत्वं शीतलत्वञ्च।

[२] तोयराशिः जलसंघातः समुद्रश्च तृष्णा पिपासाम् लालसाञ्च।

[३] ईश्वरतामैश्वर्य्यं महादेवत्वञ्च दधाना कुर्वती। अशिवप्रकृतित्वममङ्गलस्वभावत्वम् अमहादेवत्वञ्च।

[४] कटुरुग्रः विपाको रसो यस्याः अमृतसहोदरा अमृतसहजाः तत्तुल्या च।

[५] विग्रहो युद्धं देहश्च।

[६] पुरुषोत्तमः श्रेष्ठपुरुषः नारायणश्च।

गीति [१] रिन्द्रियमृगाणां, परामर्षधूमलेखा [२] सच्चरितचित्राणां, विभ्रमशय्या मोहदीर्घनिद्राणां, निवासजीर्णवलभी [३] धनमदपिशाचिकानां तिमिरोद्गतिः [४] शास्त्रदृष्टीनां, पुरःसरपताका सर्व्वाविनयानाम्, उत्पत्तिनिम्नगा क्रोधावेगग्राहाणाम्, आपानभूमिर्विषयमधूनां, सङ्गीतशाला भ्रूविकारनाट्यानाम्, आवासदरी दोषाशीविषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्, अकालप्रावृट् गुणकलहंसकानां, विसर्पण [५] भूमिर्लोकापवादविस्फोटानां, प्रस्तावना कपटनाटकस्य, कदलिका [६] कामकरिणः, बध्यशाला साधुभावस्य, राहुजिह्वा धर्म्मेन्दुमण्डलस्य।

नहि तं पश्यामि, यो ह्यपरिचितयानया न निर्भरमुपगूढ़ो, यो वा न विप्रलब्धः [७]। नियतमियमालेख्यगतापि चलति,

---

[१] व्याधाहि सुस्वरवंशीध्वनिना गानप्रियान् मृगान् निश्चलीकृत्य तान् घ्नन्तीति लोकप्रसिद्धम्।

[२] परामर्षः प्रोञ्छनं तदर्थं धूमलेखा धूमसन्ततिः।

[३] "गोपानसी तु वलभी छादने वक्रदारुणी" त्यमरः।

[४] तिमिरम् अन्धत्वहेतुनेत्ररोगभेदः अन्धकारश्च।

[५] विसर्पणम् समन्तात् विस्तारः।

[६] कदलिका वैजयन्ती गजोपरि ध्रियमाणा पताका।

[७] विप्रलब्धः प्रतारितः।

पुस्तमय्यपि [१] इन्द्रजालमाचरति, उत्कीर्णापि विप्रलभते, [२] श्रुताप्यभिसन्धत्ते, चिन्तितापि वञ्चयति। एवंविधयापि चानया दुराचारया कथमपि? दैववशेन परिगृहीता विक्लवीभवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथाहि अभिषेकसमय एव चैषां मङ्गलकलसजलैरिव प्रक्षाल्यते दाक्षिण्यम्, [३] अग्निकार्य्यधूमेनेव मलिनीभवति हृदयं, पुरोहितकुशाग्रसम्मार्जनीभिरिवापनीयते क्षान्तिः, उष्णीषपट्टबन्धेनेवावच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापवार्य्यते परलोकदर्शनं, चामरपवनैरिवापह्रियते सत्यवादिता, वेत्रदण्डैरिव उत्सार्य्यन्ते गुणाः, जयशब्दकलकलैरिव तिरस्क्रियन्ते साधुवादाः, ध्वजपटपल्लवैरिव परामृष्यते यशः। तथाहि केचित् श्रमवशशिथिलशकुनिगलपुटचपलाभिः खद्योतोन्मेषमुहूर्त्तमनोहराभिर्मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमानाः, धनलवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन [४] दुष्टासृजेव रागावेशेन बाध्यमाना विविधविषयरस [५] ग्रासलालसैः

[१] "पुस्तं च पुस्तके लेख्यकर्मविज्ञानयोरपीति" विश्वः।

[२] उत्कीर्णा लिखितापि विप्रलभते विसंवदति तत्र स्थिताया अपि अचिरावस्थायित्वात् विसंवादः।

[३] दाक्षिण्यम् आनुकूलं दयालुतामित्यर्थः।

[४] दोषः वातपित्तश्लेष्मविकाररूपधातुवैषम्यम् अविनयादिश्च।

[५] रसः आस्वादः पारदश्च।

पञ्चभिरप्यनेकसहस्रसंख्यैरिवेन्द्रियैरायस्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि शतसहस्रतामिवोपगतेन मनसाकुलीक्रियमाणाः विक्लवतामुपयान्ति। ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते, मदनशरैर्मर्म्माभिहता इव मुखभङ्गसहस्राणि कुर्वते, घनोष्मणा पच्यमाना इव विचेष्टन्ते, गाढ़प्रहाराभिहता इवाङ्गानि न धारयन्ति, कुलीरा [१] इव तिर्य्यक् परिभ्रमन्ति, अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्य्यन्ते, मृषावादविषविपाकसंजातमुखरोगा इवातिकृच्छ्रेण जल्पन्ति, सप्तच्छदतरव इव कुसुमरजोविकारैरासन्नवर्त्तिनां शिरःशूलमुत्पादयन्ति, आसन्नमृत्यव इव पुरःस्थितं बन्धुजनमपि नाभिजानन्ति, उत्कुपितलोचना इव तेजस्विनो नेक्ष्यन्ते, कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषा इव सोष्माणं न सहन्ते, दुष्टवारणा इव महालानस्तम्भनिश्चलीकृता अपि न गृह्णन्त्युपदेशम्, अतितृष्णाविषवेगमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति, असयइव (क) पान [२] वर्द्धित-

---

(क) अभय इति वा पाठः।

[१] कुलीराः कर्कटाः तेषां तिर्य्यग्गतित्वं लोकप्रसिद्धम्।

[२] पानं मद्यादिपानं शस्त्रतैक्ष्ण्यापादकलौहकारव्यापारभेदश्च

तैक्ष्ण्याः(क)परप्रेरिता विनाशयन्ति, दूरस्थितान्यपि फलानीव दण्ड विक्षेपैर्महाकुलानि शातयन्ति, अकालकुसुमप्रसवा इव मनोहराकृतयोऽपि लोकविनाशहेतवः, श्मशानाग्नय इवातिरौद्र-भूतयः[१] तैमिरिका [२] इवादूरदर्शिनः, उपसृष्टा इव क्षुद्रा-[३] धिष्ठितभवनाः, श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति, चिन्त्यमाना अपि महापातकाध्यवसाया इव उपद्रवमुपनज-यन्ति, अनुदिवसमापूर्य्यमाणाः पापेनेवाध्मातमूर्त्तयो भवन्ति, तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थिताः (ख) जलविन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रैरास्थान-नलिनीधूर्त्तबकैः, द्यूतं विनोद इति, परदाराभिगमनं वैदग्ध्य-मिति, मृगया श्रम इति पानं विलास इति, प्रमत्तता शौर्य्य-मिति, स्वदारपरित्यागोऽव्यसनितेति, गुरुवचनावधीरणम-परप्रणेयत्व[४]मिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्य-गीतवाद्यवेश्याभिसक्तीरसिकतेति, महापराधानाकर्णनं महानु-

(क) पारुष्या इति वा पाठः।

(ख) वल्मीकतृणाग्रस्थिताः इति च पाठः।

[१] अतिक्रान्तपूर्वैश्वर्य्याः अत्यन्तभयालभस्मानश्च।

[२] तैमिरिका, तिमिर नेत्ररोगग्रस्ताः।

[३] उपसृष्टाः कामुकाः क्षुद्रा नीचाः वेश्याश्च।

[४] अपरप्रणेयत्वम् अनन्यविधेयत्वम्।

भावतेति, परिभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति, देवावमाननं महासत्वतेति, वन्दिजनख्यातिर्यश इति, तरलता उत्साह इति, अविशेषज्ञता अपक्षपातित्वमिति, दोषानपि गुणपक्षमध्यारोपयद्भिः, अन्तः स्वयमपि विहसद्भिः, प्रतारणकुशलैर्धूर्त्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्य्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया तथे(क)त्यात्मन्यारोपितालीकाभिमानाः, मर्त्यधर्म्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः, प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्योपहास्यतामुपयान्ति, आत्मविड़म्बनाञ्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति, मनसा देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहतास्चान्तःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति, त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते, दर्शनप्रदानमप्यनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये [१] कुर्व्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते स्पर्शमपि पावनमाकलयन्ति, मिथ्यामाहात्म्यगर्व्वनिर्भराश्च न प्रणमन्ति देवताभ्यो, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान् नार्च्चयन्त्यर्च्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्, अनर्थका-

---

(क) यथेति च पाठः।

[१] दीनानाथादिभ्यो देयधनविभागः।

यासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनं, जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम्, आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवादिने। सर्व्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्व्वन्ति, तं संवर्द्धयन्ति, तेन सह सुखमवतिष्ठन्ते तस्मै ददति, तम् मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्ततामापादयन्ति, योऽहर्निशमनवरतमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्त्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति "किम्? वा तेषां साम्प्रतं, येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं [१] प्रमाणम्, अभिचार [२] क्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धान [३] परा मन्त्रिणउपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेष्वभियोगः, [४] सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः, [५]।

---

[१] कौटिल्यः चाणक्यः उपहासपक्षे कुटिलप्राधान्यम्।

[२] अभिचारः वैरिनाशकक्कत्योत्पादकः श्येनयागादिः।

[३] अभिसन्धानम् चिन्तनम्।

[४] मारणात्मकेषु हिंसाप्रधानेषु अभियोगः अभिनिवेशः।

[५] भ्रातर उच्छेद्या इत्येवं प्रायाणि येषां कार्य्याणि तेषां किं वा साम्प्रतं किमपि उचितं न किमपीत्यर्थः एवंप्रकारेण नीतिवेदिनां माहात्म्यमुद्भवतीति पर्व्वणान्वयः।

तदेवम्प्रायातिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रे [१] अस्मिन् महामोहान्धकारिणि च यौवने कुमार ! तथा प्रयतेथाः, यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः, यथा च न प्रतार्य्यसे विटैः, न प्रहस्यसे कुशलैः (क) नास्वाद्यसे भुजङ्गैः, नावलुप्यसे सेवकवृकैः, न वञ्चसे धूर्त्तैः, न प्रलोभ्यसे, वनिताभिः (ख) न विड़म्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे रागैः, (ग) नापह्रियसे सुखेन। कामं भवान् प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः, तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्-गुणसन्तोषो मामेवं मुखरीकृतवान्, इदमेव च पुनः पुनर-भिधीयसे, विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजात-मपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खली-करोति [२] लक्ष्मीरिति, सर्वथा कल्याणैः पित्रा क्रियमाण-

---

(क) प्रहस्यसे विटैः प्रतार्य्यसे कुशलैरिति वा पाठः।

(ख) सर्ववनिताभिरिति वा पाठः।

(ग) न रज्यसे रागेणेति च पाठः।

[१] राज्यानुकूलशास्त्रे ।

[२] खलीकरोति खलस्वभावं करोति।

मनुभवतु भवान् नवयौवनराज्याभिषेकमङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषैरूढ़ां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय स्वबन्धुवर्गम्, अभिषेकानन्तरञ्च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपसमुद्रभूषणां पुनर्विजयस्व वसुन्धराम्, अयञ्च ते कालः प्रतापमारोपयितुम्, आरूढ़प्रतापो (क) राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति" इत्येतावदभिधायोपशशाम।

उपशान्तवचसि शुकनासे चन्द्रापीड़स्ताभिरमलाभिरुपदेशवाग्भिः प्रक्षालित इव उन्मीलित इव स्वच्छीकृत इव अभिषिक्त इव अभिलिप्त इव निर्मृष्ट इव अलङ्कृत इव पवित्रीकृत इव उद्भासित इव प्रीतहृदयो मुहूर्त्तं स्थित्वा स्वभवनमाजगाम।

ततः कतिपयदिवसापगमे च राजा स्वयमुत्क्षिप्तमङ्गलकलसः सह शुकनासेन पुण्येऽहनि पुरोधसा सम्पादिताशेषराज्याभिषेकमङ्गलम् अनेकनरपतिसहस्रपरिवृतः सर्वेभ्यस्तीर्थेभ्यः सर्वाभ्यो नदीभ्यः सर्वेभ्यश्च सागरेभ्यः समाहृतेन सर्वौषधिभिः [१] सर्वफलैः सर्वमृद्भिः [२] सर्वरत्नैश्च परिगृहीतेन

(क) अत्र तु पुस्तकान्तरे हि इत्यधिकः पाठो दृश्यते।

[१] सर्वौषधयः मुरामांसीप्रभृतयः प्रागुक्ताः।

[२] अश्वस्थानगजस्थानवल्मीकसङ्गमह्रदादिमृत्तिकाभिः।

आनन्दबाष्पजलमिश्रेण मन्त्रपूतेन वारिणा सुतमभिषिषेच। अभिषेकसलिलार्द्रदेहञ्च तं लतेव पादपान्तरं निजपादपममुञ्चन्त्यपि तारापीड़ं तत्क्षणमेव सञ्चक्राम राजलक्ष्मीः। अनन्तरमखिलान्तःपुरपरिवृतया च प्रेमार्द्रहृदयया विलासवत्या स्वयमापादतलादामोदिना चन्द्रातपधवलेन चन्दनेनानुलिप्तमूर्त्तिः, अभिनवविकसितसितकुसुमकृतशेखरः, गोरचनाच्छुरितदेहः, दूर्व्वाप्रबालरचितकर्णपूरो दीर्घदशमनुपहतमिन्दुधवलं दुकूलयुगलं वसानः, पुरोहितप्रतिबद्धप्रतिसर(१)प्रसाधितपाणिः, अभिनव-राजलक्ष्मीकमलिनीमृणालेनाभिषेकदर्शनार्थमागतेन सप्तर्षिमण्डलेनेव हारेणालिङ्गितवक्षःस्थलः, सितकुसुमग्रथिताभिराजानुलम्बिनीभिरिन्दुकरकलाप-कोमलाभिर्वैकक्ष(२)स्रग्भिर्निरन्तरनिचितशरीरतया धवलवेशपरिग्रहतया च नरसिंह इव विधृतकेसरनिकरः, (क) कैलास इव स्रवत्स्रोतस्विनीस्रोतोराशिः, ऐरावत इव मन्दाकिनीमृणालजालजटिलः, क्षीरोद इव स्फुरितफेनलताकुलः, तत्कालप्रतिपन्नवेत्रदण्डेन पित्रा स्वयं पुरःप्रारब्धसमुत्सारणः, सभा-

---

(क) मन्दाकिनीमृणालविधृतकेशर निकरः इति वा पाठः।

[१] "भवेत् प्रतिसरं हस्तसूत्रे मूल्ये च मण्डने" इति विश्वः।

[२] उरसि तिर्य्यक्क्षिप्तम् कुक्षिपर्य्यन्तव्यापकमाल्यभेदः।

मण्डपमुपगम्य काञ्चनमयं शशीव मेरुशृङ्गं चन्द्रापीड़ः सिंहासनमारुरोह।

आरूढ़स्य चास्य कृतयथोचितसकलराजलोकसम्मानस्य(क) मुहूर्त्तं स्थित्वा दिग्विजयप्रयाणशंसी, प्रलयघनघटाघोषघर्घरध्वनिः, उदधिरिव मन्दरघातैः(ख) वसुन्धरापीठमिव युगान्तनिर्घातैः, उत्पातजलधर इव तड़िद्दण्डपातैः, पातालकुक्षिरिव महावराहघोणाभिघातैः कनककोणै(१)रभिहन्यमानः प्रस्थानदुन्दुभिरामन्थरं दध्वान। येन ध्वनता समाध्मातानीव उन्मीलितानीव मुखरीकृतानीव पृथक्कृतानीव विस्तारितानीव गर्भीकृतानीव प्रदक्षिणीकृतानीव बधिरीकृतानीव रवेण भुवनान्तराणि, विश्लेषिता इव दिशामन्योन्यबन्धसन्धयः। यस्य च भयवशविषमचलितोत्तानफणासहस्रेण आलिङ्ग्यमान इव रसातले शेषेण, मुहुर्मुहुरभिमुखदत्तदन्तोर्द्धघातैराहूयमान इव दिक्षु दिक्कुञ्जरैः सन्त्रासरचितरेचितमण्डलैः, प्रदक्षिणीक्रियमाण इव नभसि दिवसकररथतुरगैः, अपूर्व्वशर्व्वाट्टहासशङ्काहर्षहुङ्कृतेनाश्रुतपूर्वं आभाष्यमाण इव कैलासशिखरिणि त्र्यम्बकवृषभेण कृतगम्भीरकण्ठगर्ज्जितेन, प्रत्युद्गम्यमान

(क) सन्धानस्येति च पाठः।

(ख) मन्दर परिवर्त्तिभिरिति च पाठः।

[१] "कोणो वीणादिवादनम्।

इव, मेरौ(क) ऐरावतेन अश्रुतपूर्व्वरव(ख)रोषावेशतिर्य्यगवनमितविषाणमण्डलेन प्रणम्यमान इव, विबुधसद्मनि (ग) कृतान्तमहिषेण, सन्त्रस्तलोकपालाकर्णितो बभ्राम त्रिभुवनमखिलं निनादः। ततो दुन्दुभिरवमाकर्ण्य जयजयेति च सर्व्वतः समुद्घुष्यमाणजयशब्दः सिंहासनात् सह द्विषतां श्रिया सञ्चचाल चन्द्रापीड़ः। समन्तात् ससम्भ्रमोत्थितैश्च परस्परसङ्घट्टविघटितहारसूत्रविगलितान् अनवरतमाशाविजयप्रस्थानमङ्गललाजानिव मुक्ताफलप्रकरान् क्षरद्भिः, पारिजात इव सितकुसुममुकुलपातिभिः कल्पपादपैः ऐरावत इव विमुक्तकरशीकरैराशागजैः गगनाभोग इव तारागणवर्षिभिर्दिगन्तरैः, जलदकाल इव स्थूलजललवासारस्यन्दिभिर्जलधरैः, अनुगम्यमानो नरपतिसहस्रैः आस्थानमण्डपान्निरगात्।

निर्गत्य च पूर्व्वारूढ़या पत्रलेखया समध्यासितान्तरासनामुपपादितप्रस्थानसमुचितमङ्गल्यालङ्कारां ससम्भ्रमाधोरणोपनीतां करेणुकामधिरुह्य अचलरेचकवक्रीकृतचोरोद्दावर्त्तपाण्डुरेण दशवदनबाहुदण्डावस्थितकैलास(१)कान्तिना मुक्ता-

(क) विबुधसद्मनि इति वा पाठः।

(ख) इव इति वा पाठः।

(ग) यमसद्मनि इति च पाठः।

[१] तत्कथा रामायणे उत्तरकाण्डे १६ अध्याये।

फलजालिना शतशलाकेन आतपत्रेण निवार्य्यमाणातपो निर्गन्तुमारेभे। निर्गच्छंश्च अभ्यन्तरावस्थितएव (क) प्राकारान्तरितदर्शनानां द्वारावस्थितानां प्रतिपालयतां राज्ञामुन्मयूखानां चूड़ामणीनाम् अलक्तकद्रवद्युतिमुषा बहलेनालोकबालातपेन राज्याभिषेकानन्तरप्रसृतेन स्वप्रतापवह्निनेवात्यर्थं पिञ्जरीक्रियमाणा दश दिशो यौवराज्याभिषेकजन्मना निजानुरागेणेव रज्यमानमवनितलमासन्नरिपुविनाशपिशुनेन दिग्दाहेनेव पाटलीक्रियमाणमम्बरतलम् अभिमुखागतभुवनतललक्ष्मीचरणालक्तकरसेनेव लोहितायमानातपं दिवसं ददर्श।

विनिर्गतश्च ससम्भ्रमप्रचलितगजघटासहस्रैः अन्योऽन्यसंघट्टजर्जरितातपत्रमण्डलैः आदरावनतमौलिशिथिल(ख)मणिमुकुटपङ्क्तिभिः आवर्जितरत्नकर्णपूरैः कपोलस्थलस्खलितरत्न(ग) कुण्डलैः आज्ञप्तसेनापतिनिर्द्दिश्यमाननामभिरवनिभुजां चक्रवालैः प्रणम्यमानः, बहलसिन्दूररेणुपाटलेन क्षितितलदोलायमानस्थूलमुक्ताकलापावचूलेन (१) सितकुसुममालाजालशवलशिरसा संलग्नसन्ध्यातपेन तिर्य्यगावर्ज्जितश्वेतगङ्गाप्रवाहेण

(क) पुस्तकान्तरे अत्र तु धवलेत्यधिकः पाठो दृश्यते।

(ख) आदरादनवरत प्रणामशिथिलितेति वा पाठः।

(ग) पुस्तकान्तरे रत्नेति नास्ति।

[१] ध्वजाधो बद्धवस्त्रमवचूलम्।

तारागणदन्तुरितशिखरशिलातलेन मेरुगिरिणेव गन्धमादनेनानुगम्यमानः, कनकालङ्कारप्रभा(क)प्रतानकल्माषितावयवेन (ख)चदत्तकुङ्कुमस्थासकेनेवाकृष्यमाणेनेन्द्रायुधेन सनाथीकृतपुरोभागः, शनैः शनैः (ग) प्रथममेव शातक्रतवीमाशामभिप्रतस्थे। अथ चलितगजघटाकम्पितधवलातपत्रवनम् अनेककल्लोलपरम्परापतितचन्द्रमण्डलप्रतिविम्बसहस्रं महाप्रलयजलधिजलमिव प्लावितमहीतलम् अङ्कुतोङ्कूतकलकलम् अखिलं सञ्चचाल बलम्।

उच्चलितस्य चास्य स्वभवनात् उपपादितप्रस्थानमङ्गलो दुकूलवासाः (घ) सितकुसुमाङ्गरागो महता बलसमूहेन नरेन्द्रवृन्दैश्चानुगम्यमानो धृतधवलातपत्रो द्वितीय इव युवराजः त्वरितपदसञ्चारिण्या करिण्या वैशम्पायनः समीपमाजगाम। आगत्य च रजनिकरइव रवेरासन्नवर्त्ती बभूव। अनन्तरमितश्चेतश्च "निर्गतो युवराज इति" समाकर्ण्य प्रधावतां बलानां भरेण चलितकुलशैल[१]क्षोभितजलधिजलतरङ्गगतेव तत्-

(क) घटेति वा पाठः।

(ख) पटार्द्धेनेति च पाठः।

(ग) पुस्तकान्तरे शनैःशनैरित्येतत् नास्ति।

(घ) धवलवासाः इति च पाठः।

[१] कुलपर्वताः "महेन्द्रोमलयः" इत्यादयः प्रागुक्ताः।

क्षणमाचकम्पे मेदिनी। सम्मुखागतैरन्यैश्चान्यैश्च प्रणमद्भि-र्भूमिपालैः अंशुलताजालजटिलचूलिकानां [१] मणिमुकुटा-नामालोकेनोन्मिषितबहुलरोचिषाञ्च पत्रभङ्गिनीनां केयूर-मण्डलीनां प्रभासन्तानेन क्वचिद्विकीर्य्यमाणचाष[२]पक्षक्षोदा इव क्वचिदुत्पतितशिखिकुलचलच्चन्द्रकशतशारा [३] इव क्वचिद-कालजलधरतड़ित्तरला इव क्वचित् सकल्पतरुपल्लवा इव क्वचित् शतयज्ञचापा इव क्वचित् सबालातपा इवाक्रियन्त दश दिशः। धवलान्यपि विविधमणिनिकरकल्माषैरुत्सर्पिभि-श्चूड़ामणिमरीचिभिर्मायूराणीवाराजन्त राज्ञामातपत्राणि।

क्षणेन च तुरगमयमिव महीतलं कुञ्जरमयमिव दिक्-चक्रवालम् आतपत्रमण्डलमयमिवान्तरिक्षं ध्वजवनमयमिवा-म्बरतलम् इभमदगन्धमय इव समीरणः भूपालमयीव प्रजा-सृष्टिः आभरणांशुमयीव दृष्टिः किरीटमयइवातपः चामर-मय इव दिवसः जयशब्दमयमिव त्रिभुवनमभवत्। सर्वतश्च कुलपर्वताकारैः प्रचलद्भिर्मत्तवारणैः, उत्पातचन्द्रमण्डलनिभैश्च प्रेङ्खद्भिरातपत्रैः, [४] संवर्त्तकाम्भोदगम्भीरभीमनादेन च ध्वनता

---

[१] चूलिका कर्णमूलस्यालङ्कारभेदः।

[२] चाषः नीलकण्ठनामकः पक्षी।

[३] शाराः कर्बूरवर्णयुक्ताः।

[४] संवर्त्तकः मेघाधिपभेदः।

दुन्दुभिना, तारकावर्षसदृशेन विसर्पता गजशीकरनिकरेण, धूमकेतु[१]धूसरै श्चोल्लसद्भिरवनिरजोदण्डकैः, निर्घातपातपरुष-गम्भीरघोषैश्च करिकण्ठगर्ज्जितैः, क्षतज[२] कणवर्षबभ्रुणा च भ्रमता मतङ्गजकुम्भसिन्दूररेणुना, संक्षुभितजलधिजलक-ल्लोलचञ्चलाभिश्च विसर्पन्तीभिस्तुरङ्गमालाभिः, अन्धकारित-दिगन्तरेणचानवरतक्षरता गजमदजलधारादुर्द्दिनेन, कलक-लेन च भुवनान्तरव्यापिना, महाप्रलयकालइव सञ्जज्ञे।

बहलबलकोलाहलभीता इव धवलध्वजनिवहनिरन्तरावृता ययुः क्वापि दश दिशः। मलिनावनि(क)रजः[३]संस्पर्शशङ्कित-मिव समदगजघटावचूल[४]सहस्रसंरुद्धमतिदूरमम्बरमपससार। प्रचलितवेत्रलतासमुत्सार्य्यमाणा इव तुरगखुररजोधूसर(ख) मर्ककिरणा मुमुचुः पुरोभागम्। इभकरशीकरनिर्वापणत्रस्त इव आतपत्रसंच्छादिताततपो दिवसो ननाश। बहलबलभर जर्जरीकृता मदकलकरिचरणशतताड़िता द्वितीयेव प्रयाणभेरी-

(क) मलिनीकृतमिवेति च पाठः।

(ख) धूसरताभीता इति च पाठः।

[१] धूमकेतुः दैवारिष्टसूचकः तारापुञ्जविशेषः।

[२] क्षतजं रुधिरम्।

[३] रजः धूलिः, स्त्रीणां पुष्पञ्च तस्यास्पृश्यत्वात् शङ्का।

[४] अवचूलः वस्त्रम् मूलवस्त्रं वा।

भैरवं भूमीरराम। गुल्फदयसे [१] च तुरङ्गमुखविनिःसृत-सितफेनपल्लविते मदपयसि मदस्रुतां करिणां प्रचस्खलुः पदे-पदे पदातयः। हरितालपरिमलनिभेन चातिपटुना गज-मदामोदेनानुलिप्तस्य सामजस्ये[२ वोपययौ (क) लिखिलान्य-गन्धग्रहणसामर्थ्यं घ्राणेन्द्रियस्य।

क्रमेण च प्रसर्पतो बलस्य पुरः प्रधावतां जनकदम्बकानां कोलाहलेन, तारतरदीर्घेण च काहलानां निनादेन, खुररव-विमिश्रेण च वाजिनां हेषारवेण, अनवरतकर्णतालस्वन(ख) सम्पृक्तेन च दन्तिनामाडम्बररवेण, ग्रैवेयक[३]किङ्किणीक्वणिता-नुसृतेन (ग) च गतिवशाद्विषमविराविणीनां घण्टानां टङ्कतेन, मङ्गलशङ्खशब्दसंवर्द्धितध्वनीनां च प्रयाणपटहानां निनादेन, मुहुर्मुहुरितस्ततस्ताड्यमानानाञ्च डिण्डिमानां निःस्वनेन जर्जरीकृतश्रवणपुटस्य मूर्च्छेवाभवत् जनस्य।

(क) समुपययौ इति वा पाठः।

(ख) स्वेति च पाठः।

(ग) क्वणितानुगृहीतेनेति वा पाठः।

[१] गुल्फदयसं गुल्फाग्रावधिप्रमाणम् प्रमाणे दयसच्प्रत्ययः।

[२] सामजः गजः।

[३] ग्रीवाया अलङ्कारः ग्रैवेयकः ग्रीवाया भूषार्थे ढकञ्।

शनैःशनैश्च बलसंक्षोभजन्मा चितेरनेकवर्णतया क्वचिज्जीर्णशफरक्रोड़धूम्रः, (क) क्वचित् क्रमेलकसटा(ख)सन्निभः, क्वचित् परिणतरल्लकरोमपल्लवमलिनः, क्वचित् पचोर्णतन्तुपाण्डरः, क्वचिज्जरठमृणालदण्डधवलः, क्वचिज्जरत्कपिकेशरकपिलः, क्वचिद्धुरवृषभरोमन्थफेन पिण्ड(ग)पाण्डुरः, त्रिपथगाप्रवाहइव हरिचरणप्रभवः, कुपित इव मुञ्चन् खमात्, आरब्धपरिहास इव रुन्धन्नयनानि, तृषित इव पिवन् करिकरशीकरजलानि, पक्षवानिवोत्पतन् गगनतलम्, अलिनिवह इव चुम्बन्नद्दलेखां, मृगपतिरिव रचयन् करिकुम्भस्थलीषु पदम्, उपात्तविजय इव गृह्णन् पताकाः, जरागम इव पाण्डरीकुर्वन् शिरांसि, मुद्रयन्निव पक्ष्माग्रसंस्थितो दृष्टिम्, आजिघ्रन्निव मकरन्दमधुविन्दु (घ) लग्नः कर्णोत्पलानि, मदकलकरिकर्णतालताड़नचकितइवाविशन् कर्ण (ङ) शङ्खोदरविवराणि, पीयमान इव उन्मुखीभिरवनिपतिमुकुटमणिभङ्गमकरिकाभिः, अभ्यर्च्यमान इव तुरगमुखविक्षेपविभ्रुतैः

(क) सदृशः इति वा पाठः।

(ख) घटेति वा पाठः।

(ग) वृषाभरणांशुकेन इति पाठः।

(घ) पङ्क्तेति पाठः।

(ङ) पुस्तकान्तरे करिकर्णेति पाठः।

फेनपल्लवकुसुमस्तवकैः, अनुगम्यमान इव मत्तगजघटाकुम्भभित्तिसम्भवेन धातुधूलिवलयेन, आलिङ्ग्यमान इव चलचामरकलापविधुतेन पटवास[१]पांशुना, प्रोत्साह्यमान इव नरपतिशिखरसहस्रपरिच्युतैः कुसुमकेशररजोभिः, उत्पातराहुरिव दिवसकरमण्डलमकाण्डएव पिबन्, नृपप्रस्थानमङ्गलप्रतिसर[२]वलयमालिकासु गोरोचनाचूर्णायमानः क्रकच[३]क्षतचन्दनक्षोदधूसरो रेणुरुत्पपात। अपरिमाणबलसङ्घट्टसमुपचीयमानश्च शनैः शनैः संहरन्निव विश्वमशेषम्, अकालकाल[४]मेघपटलमेदुरो विस्तारमुपगन्तुमारेभे।

तेन च क्रमेणोपचीयमानबहलमूर्त्तिना, दिग्विजयमङ्गलध्वजेन, रिपुकुलकमलप्रलयनीहारेण, राजलक्ष्मीविलासपटवासचूर्णेन, अहितातपत्रपुण्डरीकषण्ड[५]तुषारेण, सेनाभरपीड़ितमहीतलमूर्च्छान्धकारेण, चलद्बहलबलजलदकालकदम्बकुसुमोद्गमेन, दिवसकरकिरणकमलवनोद्दलनद्विपयूथेन, गगनमहीतलप्लावनप्रलयपयोधिपूरेण, त्रिभुवनलक्ष्मीशिरोवगुण्ठनपटेन, महावराहकेशरनिकरकर्बुरेण, प्रलयानलधूमराजिमांस-

---

[१] पटवासः गन्धद्रव्यचूर्णभेदः।

[२] मङ्गलार्थः प्रतिसरः हस्तसूत्रभेदः।

[३] क्रकचः करपत्रनामकः अस्त्रभेदः (करात)।

[४] अकालः अप्रशस्तकालः प्रलयकाल इति यावत्।

[५] पुण्डरीकषण्डम् समूहार्थे षण्डच्प्रत्ययः।

लेन, पातालतलादिवोत्तिष्ठता, चरणेभ्य इव निर्गच्छता, लोचनेभ्य इव निष्पतता, दिग्भ्य इवागच्छता, नभस्तलादिव पतता, पवनादिवोल्लसता, रविकिरणेभ्य इव सम्भवता अनपहृतचेतनेन, निद्रागमेन, अनवगणितसूर्य्येणान्धकारेण, अघर्मकालोपस्थितेन भूमि[१]गृहेण, अनुदिततारागणनिवहेन बहुलनिशादोषेण, अपतितसलिलेन जलधरसमयेन, अभ्रान्तभुजङ्गेन रसातलेन, हरि[२]चरणेनेव संवर्द्धमानेन त्रिभुवनमलङ्घ्यत रजसा।

विकचकुवलयवनमिव नवोदकेन, गगनतलमवष्टभ्यमानमलक्ष्यत क्षणात् क्षीरोदफेनपाण्डुना क्षितिक्षोदेन। बकुलरजोधूसरितमशिशिरकिरणबिम्बमवचूल[३]चामरमिव निष्प्रभमभवत्। दुकूलपट्टधवला कदलिकेव[४] कलुषतामाजगाम गगनापगा। नरपालबलभरमतिगुरुमसहमाना पुनरिव भारावतारणार्थममरलोकमारुरोह रजोनिभेन [५]मही। निःशेषनिपीतातपमन्तर्दह्यमानमिव जलधिजलेषु धूसरितरविरथध्वज-

---

[१] अघर्मकालः शीतकालः तस्मिन् हि आवृतकपाटत्वेनान्धकारातिशयात् भूमिरिव गृहम्।

[२] हरिर्वामनः।

[३] अवचूलं ध्वजाग्राधोबद्धवस्त्रं तत्सन्निहितचामरम्।

[४] कदलिका पताका।

[५] रजोनिभेन रजश्छलेन।

पटमपतदवनिरजः। मुहूर्त्तेन च गर्भवासमिव, संहारसागरजलमिव, कृतान्तजठरमिव महाकालमुखमिव, नारायणोदरमिव, ब्रह्माण्डमिव विवेश पृथिवी। मृण्मयइव बभूव दिवसः, प्रस्थमय्य इव चकाशिरे ककुभः, रेणुरूपेणेव परिणतमम्बरतलम्, एकमहाभूतमयमिव त्रैलोक्यमासीत्।

अथ निजमदोष्म-सन्तप्तानां दिशि दिशि करविवरविनिःसृतैः क्षरद्भिः क्षीरोदक्षोदधवलैः शीकरासारैः कर्णपल्लवप्रहतिविप्लुतेन च विसर्पता दानजलविन्दुदुर्द्दिनेन हेषारवविप्रकीर्णैश्च वाजिनां लालाजललवजालकैरुपशमिते रजसि पुनरुपजातालोकासु दिक्षु सागरसलिलादिवोन्मग्नमालोक्य तदपरिमाणं बलमुपजातविस्मयः सर्वतो दत्तदृष्टिर्वैशम्पायनश्चन्द्रापीड़मावभाषे।

युवराज! किं [न जितं] (क) देवेन महाराजाधिराजेन तारापीड़ेन? यज्जेष्यसि; का दिशो न वशीकृताः? या वशीकरिष्यसि; कानि दुर्गाणि न प्रसाधितानि? यानि प्रसाधयिष्यसि; कानि द्वीपान्तराणि नात्मीकृतानि? यान्यात्मीकरिष्यसि; कानि रत्नानि नोपार्ज्जितानि? यान्युपार्जयिष्यसि; के वा न प्रणता राजानः? कैर्न विरचितः शिरसि बालकमलकुड्मलकोमलः सेवाञ्जलिः? कैर्न मसृणीकृताः

(क) किं किमजितमिति पाठः।

प्रतिबद्धहेमपट्टैर्ललाटैः सभाभुवः? कैर्न घृष्टाः पादपीठे चूड़ामणयः? कैर्न प्रतिपन्ना वेत्रयष्टयः? कैर्नोद्धूतानि चामराणि? कैर्नोच्चारिता जयशब्दाः? केषां न पीताः किरीटपत्रमकरैः सलिलधारा इव निर्मलास्त्वच्चरणनखमयूखराजयः? एते हि ते चतुरुदधिजलावगाहदुर्ललितबलमदावलिप्ता दशरथभगीरथभरतदिलीपालर्कमान्धातृप्रतिमाः कुलाभिमानशालिनः सोमपायिनो मूर्द्धाभिषिक्ताः पृथिव्यां सर्वपार्थिवाः, रक्षाभूतिमिवाभिषेकपयःपातपूतैश्चूड़ामणिपल्लवैरुद्वहन्ति माङ्गल्यां भवच्चरणरजःसंहतिम्; एभिरियमादिपर्वतैरिवापरैर्धृता धरित्री; एतानि चाप्यमीषामाज्ञावितदशदिगन्तरालानि सैन्यानि भवन्तमुपासते। तथाहि पश्य, यस्यां यस्यां दिशि विक्षिप्यते चक्षुः, तस्यां तस्यां रसातलमिवोद्गिरति, वसुधेव सूते, ककुभ इव वमन्ति, गगनतलमिव वर्षति, दिवस इव सृजति बलानि। अपरिमितबलभराक्रान्तामन्ये स्मरति महाभारत (क) समरसंक्षोभस्याद्य क्षितिः। एष शिखरदेशेषु परिस्खलितमण्डलो ध्वजान् गणयन्निव कुतूहलाद् भ्रमति कदलिकावनान्तरेषु मयूखमाली। सर्वतश्च मदजलमुचां करिणामेलापरिमलसुरभिणि वेणिका[१]वाहिनि मद-

---

(क) पुस्तकान्तरे तु बलेत्यधिकः पाठो दृश्यते।

[१] वेणिकया अतिवेगप्रवाहेण वाहिनि गामिनि।

वारिणि निरन्तरमग्ना निपतितमधुकरकुलकलकलकलिता कालिन्दीजलकल्लोलकलिलेव भाति भूतधात्री। सैन्यभर (क) संक्षोभभयात् सरित इव गगनतलमुत्पतिताः (ख) संच्छादयन्त्येता दिक्चक्रवालमिन्दुधवला ध्वजपङ्क्तयः। सर्वथा चित्रं यन्नाद्य विघटितसकलकुलशैलसन्धिबन्धा सहस्रशः शकलीभवति बलभरेण धरित्री, यद्वा बलभरपीड़ितवसुधाधारणविधुरा न दलन्ति फणिनां पत्युः फणाभित्तय इति (ग)।

(घ)एवं वदत[१] एव तस्य युवराजः समुच्छ्रितानेकतोरणां, तृणमयप्राकारमन्दिरसहस्रसम्बाधाम्, उल्लासितधवलपटमण्डपशतशोभिनीमावासभूमिमवाप। तस्याञ्चावतीर्य्य राजवत् सर्वाः क्रियाश्चकार। सर्वैश्च तैः समेत्य नरपतिभिरमात्यैश्च विविधाभिः कथाभिर्विनोद्यमानस्तं दिवसमशेषमभिनवपितृवियोगजन्मना शोकावेगेनायास्यमानहृदयो दुःखेनात्यवाहयत्। अतिवाहितदिवसस्य यामिनीमपि स्वशयनीयस्य नातिदूरे

(क) पुस्तकान्तरे भरेति नास्ति।

(ख) धरणिमपहाय गगनतलमुत्पतिताः इति पाठः।

(ग) पुस्तकान्तरे इतीति नास्ति।

(घ) इत्येवं वदत इत्येव क्वचित् पाठः।

[१] वदत इत्यनादरे षष्ठी वदन्तमनादृत्येत्यर्थः।

निहितशयननिषस्रेन (क) वैशम्पायनेन अन्यतश्च समीपे (ख) क्षितितलविन्यस्तकुथ[१]प्रसुप्तया पत्रलेखया सह अन्तरा पितृसक्तम् अन्तरा मातृसम्बद्धम् अन्तरा शुकनासमयं कुर्वन्नालापं नात्युपजातनिद्रः प्रायेण जाग्रदेव निन्ये। प्रत्युषसि चोत्थाय तेनैव क्रमेणानवरतप्रयाणकैः प्रतिप्रयाणक[२]मुपचीयमानेन सेनासमुदायेन जर्जरयन् वसुन्धराम्, आकम्पयन् गिरीन्, उत्सिञ्चन् सरितः, रिक्तीकुर्वन् सरांसि, चूर्णयन् काननानि, समीकुर्वन् विषमाणि, दलयन् दुर्गाणि, पूरयन्निम्नानि निम्नयन् स्थलानि, प्रातिष्ठत्। शनैः शनैश्च स्वेच्छया परिभ्रमन्नुन्नतान् नमयन्, आश्वासयन् भीतान्, रक्षन् शरणागतान्, उन्मूलयन् विटपकान्, उत्सादयन् कण्टकान्, अभिषिञ्चन् स्थानस्थानेषु राजपुत्रान्, समर्जयन् रत्नानि, प्रतीच्छ[३]न्नुपायनानि, गृह्णन् करान्, आदिशन् देशव्यवस्थाः, स्थापयन् स्वचि-

---

(क) नातिदूरनिषस्रेनेति क्वचित् पाठः।

(ख) शयनीयसमीपे इति क्वचित् पाठः।

[१] कुथः चित्रकम्बलम्।

[२] प्रतिप्रयाणकं प्रतिदिवसीयप्रयाणसमयम् उत्तरोत्तराधिकसेनागमनेन उपचीयमानत्वम्।

[३] प्रतीच्छन् प्रतिगृह्णन् उपायनानि उपढौकनद्रव्याणि।

ङ्गानि, कुर्वन् कीर्त्तनानि, लेखयन् (क) शासनानि, पूजयन्नग्रजन्मनः,प्रणमन्, (ख) मुनीन्, पालयन्नाश्रमान्, जनयन् जनानुरागं, प्रकाशयन् विक्रमम्, आरोपयन् प्रतापम्, उपचिन्वन् यशः, विस्तारयन् गुणान्, प्रख्यापयन् सच्चरितम्, उद्घातयन् पौरुषम्, आम्रद्नन् वेलावनानि, बलरेणुभिराधूसरीकृतसकलसागरसलिलः पृथिवीं विचचार। प्रथमं प्राचीं ततस्त्रिशङ्कुतिलकां, [१] ततो वरुणलाञ्छनाम्, अनन्तरञ्च सप्तर्षितारागबलां [२] दिशं विजिग्ये। वर्षत्रयेण चात्मीकृताशेषद्वीपान्तरं सकलमेव चतुरम्भोधिखातवलयपरिखाप्रमाणं वभ्राम महीमण्डलम्। ततः क्रमेण निर्जितसकलभुवनतलः प्रदक्षिणीकृत्य वसुधां परिभ्रमन् कदाचित् कैलाससमीपचारिणां हेमजटनाम्नां किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृतं [३] पूर्वजलनिधेर्जित्वा जग्राह। तत्र च

(क) पूर्वाः प्रशस्तीरिति च पाठः।

(ख) प्रीणयन् इति च पाठः।

[१] त्रिशङ्कुस्तिलक इव यस्याम् दक्षिणां दिशमित्यर्थः। आकाशे त्रिशङ्कोर्दक्षिणदिक्स्थितिकथा च रा०बा०का०अ०६० अनुसन्धेया।

[२] सप्तर्षयः मरीच्यत्रिपुलस्त्यपुलहक्रतुदक्षवशिष्ठास्तदाकारास्ताराः ताभिः शवलां मिश्रितामुत्तरां दिशमित्यर्थः। उत्तरस्थमेरोरुपरिस्थत्वात्तासामुत्तरदिक्स्थत्वम्।

[३] नातिविप्रकृतं नातिविप्रकृष्टं किञ्चित् सन्निकृष्टमित्यर्थः।

निखिलधरणितलपर्य्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान् दिवसानतिष्ठत्।

एकदा तु तत्रस्थएवेन्द्रायुधमारुह्य मृगयानिर्गतो विचरन् काननं (क) शैलशिखरादवतीर्णं यदृच्छया किन्नरमिथुनमद्राक्षीत्। अपूर्वदर्शनतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषस्तत्समीपमादरादुपसर्पिततुरगः समुपससर्प। अदृष्टपूर्वपुरुषदर्शनत्रासप्रधावितञ्च तत् पलायमानम् अनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेन्द्रायुधेन एकाकी निर्गत्य निजबलसमूहात् सुदूरमनुससार। अत्र गृह्यते, इदं गृहीतमिदं गृहीतमित्यतिरभसा[१]कृष्टचेता महाजवतया तुरङ्गमस्य मुहूर्त्तमात्रेणैकपदमिवासहायस्तस्मात् प्रदेशात् पञ्चदशयोजनमात्रमध्वानं जगाम। तच्चानुबध्यमानं किन्नरमिथुनमालोकयतएवास्य सम्मुखापतितमचलतुङ्गशिखरमारुरोह।

आरूढ़े च तस्मिन् शनैः शनैस्तदनुसारिणीं निवर्त्त्य दृष्टिम् अचलशिखरप्रस्तरशकलप्रतिहतगतिप्रसरो विधूततुरङ्गस्कन्धापीड़स्तस्मिन् काले समुपारूढ़श्रमस्वेदार्द्रशरीर(ख)मिन्द्रायुधमात्मानञ्चावलोक्य चणमिव विचार्य्य स्वयमेव विहस्याचिन्तयत्,

---

(क) कानने इति च पाठः।

(ख) स्वेदार्द्रमित्येव क्वचित् पाठः।

[१] अतिरभसेन अत्यौत्सुक्येनाकृष्टहृदयः

"किमिति निरर्थकमयमात्मा मया शिशुनेवायासितः? किमनेन गृहीतेनागृहीतेन वा किन्नरयुगलेन प्रयोजनं? गृहीतमिदं ततः किम्? अथ न गृहीतं ततोऽपि किम्? अहो मे मूर्खतायाः प्रकारः अहो यत्किञ्चनकारितायामादरः अहो निरर्थकव्यापारेष्वभिनिवेशः अहो बालिशचरितेष्वासक्तिः साधुफलं कर्म क्रियमाणं वृथाजातम्, अवश्यकर्त्तव्या [१] क्रिया प्रस्तुता विफलीभूता, सुहृत्कार्य्यमुपपाद्यमानं नोपपन्नं, राजधर्मः प्रवर्त्तितो न निष्पन्नः, गुर्व्वर्थः, प्रारब्धो न परिसमाप्तः, विजिगिषुव्यापारप्रयत्नो न सिद्धः कस्मादहमाविष्ट इवोत्सृष्ट(क)निजपरिवार एतावतीं भूमिमायातः? कस्माच्च मया निष्प्रयोजनमिदमनुसृतमश्वमुखद्वय?मिति, विचार्य्यमाणे यत् सत्यमात्मैव मे पर इव हासमुपजनयति न जाने कियताध्वना विच्छिन्नमितोबलमनुयायि मे, महाजवो हीन्द्रायुधो, निमिषमात्रेणातिदूरमतिक्रामति, नचागच्छता मया तुरगवेगवशात् किन्नरमिथुने बद्धदृष्टिना अस्मिन्नविरलतरुशतशाखागुल्मलतासन्तानगहने निरन्तरनिपतितशुष्कपर्णावकीर्णतले महावने पन्था निरूपितः, येन प्रतिनिवृत्य यास्यामि। नचास्मिन् प्रदेशे प्रयत्नेनापि परिभ्रमता मर्त्यधर्म्मा कश्चि-

---

(क) उत्सृज्य निजपरिवारमिति च पाठः।

[१] अवश्यकर्त्तव्या दिग्विजयलक्षणा क्रिया व्यापारः।

दासाद्यते, यः सुवर्णपुरगामिनं पन्थानमुपदेच्यति। श्रुतं हि मया बहुशः कथ्यमानम् उत्तरेण सुवर्णपुरं सीमान्तलेखा पृथिव्याः सर्व्वजनपदानाम्, ततः परतो निर्म्मानुषमरण्यं, तच्चातिक्रम्य कैलासगिरिरिति। अयञ्च कैलासः तदिदानीं प्रतिनिवृत्यैकाकिना स्वयमुत्प्रेच्योत्प्रेच्य दक्षिणामाशां केवलमङ्गीकृत्य गन्तव्यम्। आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैवेति" अवधार्य्य वामकरतलवलितरश्मिपाशस्तुरङ्गमं व्यावर्त्तयामास।

व्यावर्त्तितुरङ्गश्च पुनश्चिन्तितवान्, अयमुद्भासितप्रभाभास्वरो भगवान् भानुरधुना दिवसश्रियो रशनामणिरिव मध्यमलङ्करोति, परिश्रान्तश्चायमिन्द्रायुधः, तदेनं तावदाग्टहीतकतिपयदूर्वाप्रबालकवलं कस्मिंश्चित् सरसि शिलाप्रस्रवणे वा सरिदम्भसि वा स्नातपीतोदकमपनीतश्रमं कृत्वा स्वयञ्च सलिलं पीत्वा कस्यचित्तरोरधश्छायायां मुहूर्त्तमात्रं विश्रम्य ततोगमिष्यामीति चिन्तयित्वा सलिलमन्विष्यन् (क)मुहुर्मुहुरितस्ततो दत्तदृष्टिः पर्य्यटन् नलिनीजलावगाहोत्थितस्याचिरापक्रान्तस्य च महतो गिरिचरस्य चरणोत्तारितैः पङ्कपटलैराद्रींकृतं, करावकृष्टैश्च समृणालमूलनालैः कमलकलापैः कल्माषितम्, आर्द्रार्द्रैश्च शैवलप्रवालैः श्यामलितोद्देशम् उद्दलितैश्च

(क) अन्वेषयन् इति च पाठः।

कमल(क)कुमुदकुवलयकह्लारकुड्मलैरन्तरान्तरा विच्छुरितम्, उत्खातैश्च सकर्द्दमैः शालूककन्दैराकीर्णं, खण्डितैश्च कुसुमस्तवकशारै[१]र्वनपल्लवैराच्छादितम्, आलूनाभिश्च कुसुमोपविष्टनिष्पिष्टोच्छ्वसत्षट्पदाभिर्वनलताभिराकुलितम्, अभिनवबकुलकुसुमपरिमलवाहिना च तमालपल्लवरसश्यामेन मदजलेन सर्व्वतः सिक्तं मार्गमद्राक्षीत्।

उपजातजलाशयशङ्कश्च (ख) तं प्रतीपमनुसरन् उद्ग्रीवदृश्यैरुपरि कृतमण्डलाकारैः सरलसालसल्लकीप्रायैरविरलैरपि निःशाखतया विरलैरिवोपलक्ष्यमाणैः पादपैरुपेतेन, स्थूलकपिलवालुकेन शिलातलबहुलतया विरलतृणोलपेन, वनद्विपदशनदलितमनःशिलाधूलिकपिलेन, आभङ्गिनीभिरुल्की[ा]भिरिव पत्रभङ्गकुटिलाभिः पाषाणभेदक(ङ्ग)(२)मञ्जरीभिर्जटिलीकृतशिलान्तरालेन, अनवरतगलद्गुग्गुलुद्रुमद्रवार्द्रीकृतदृषदा शिखरस्रुतशिलाजतुरसपिच्छलोपलेन, टङ्कन[३]खरखुरखण्डितहरितालक्षोदपांशुलेन, आखुनखरोत्खातविलविप्रकीर्णकाञ्चनचूर्णेन

(क) पुस्तकान्तरे कमलेति नास्ति।

(ख) ज्ञातजलाशस्चेति पाठः।

[१] शारैः कर्वुरवर्णैः।

[२] पाषाणभेदकः (हाड़जोड़ा) वृक्षभेदः।

[३] टङ्कनः अश्वभेदः (टाङ्गन)।

सिकतानिमग्नचमरकस्तूरिकामृगखुरपङ्क्तिना संशीर्ण-(क) जीर्णरङ्कु(ख)रल्लक[१]रोमप्रकरनिचितेन विषमशिलाच्छेदोपविष्टजीवञ्जीवकयुगलेन वनमानुषमिथुनाध्यासिततटगुहामुखेन, गन्धपाषाण[२]परिमलामोदिना वेत्रलताप्रतानवता प्ररूढ़वेणुना कैलासतलेन कञ्चिदध्वानं गत्वा तस्यैव कैलासशिखरिणः पूर्वोत्तरे दिग्भागे जलभारालसजलधरव्यूहमिव बहुलपक्षक्षपान्धकारमिव पुञ्जीकृतमत्यायतं (ग) तरुषण्डं ददर्श। तत्र सम्मुखादागतेन कुसुम(घ)रजःकषाया[३]मोदिना जलसंसर्गशिशिरेण शीकरिणा चन्दनरसस्पर्शेनालिङ्गमान इव जलतरङ्गमारुतेन कमलमधुपानमत्तानाञ्च श्रोत्रहारिभिः कलहंसानां कोलाहलैराहूयमान इव प्रविवेश।

प्रविश्य च तस्य तरुषण्डस्य मध्यभागे मणिदर्पणमिव

(क) संकीर्णेति च पाठः।

(ख) पुस्तकान्तरे रङ्क्विति नास्ति।

(ग) विविधतरुषण्डमिति च पाठः।

(घ) कुसुमेत्यत्र कुमुदेति च पाठः।

[१] रङ्कुर्मृगभेदः यल्लोमभिः राङ्कवं वस्त्रं रल्लकोऽपि मृगभेदः।

[२] गन्धयुक्ताः पाषाणाः गन्धपाषाणाः।

[३] कषायः (कषा) रसभेदवान् तथाभूतोऽपि आमोदी अतिदूरगामिगन्धयुक्तः।

त्रैलोक्यलक्ष्म्याः, स्फटिकभूमिगृहमिव वसुन्धरादेव्या, निर्गमनमार्गमिव सागराणां, निष्यन्दमिव दिशाम्, अवतारमिव जलाकारं गगनतलस्य, कैलासमिव द्रवतामापन्नं, तुषारगिरिमिव विलीनं, चन्द्रातपमिव [१]रसतामुपेतं, हराट्टहासमिव जलीभूतं, त्रिभुवनपुण्यराशिमिव सरोरूपेणावस्थितं, वैदूर्य्यगिरिजालमिव सलिलाकारेण परिणतं, शरदभ्रवृन्दमिव द्रवीभूयैकत्र निःष्यन्दितम्, आदर्शभवनमिव प्रचेतसः, स्वच्छतया मुनिमनोभिरिव सज्जनगुणैरिव हरिणलोचनप्रभाभिरिव मुक्ताफलांशुभिरिव निर्मितम्, आपूर्णपर्य्यन्तमपि अन्तःस्पष्टदृष्टसकलवृत्तान्ततया रिक्त[२]मिवोपलक्ष्यमाणम्, अनिलोद्धूतजलतरङ्गशीकरधूलिजन्मभिः सर्वतः समुत्थितैः संरक्ष्यमाणमिवेन्द्रचापसहस्रैः, प्रतिमानिभेनान्तःप्रविष्टसकलकाननशैलनक्षत्रग्रहचक्रवालं त्रिभुवनमुद्भिन्नपङ्कजेनोदरेण नारायणमिव बिभ्राणम्, आसन्नकैलासावतीर्णस्य च शतशो भगवतः खण्डपरशोर्मज्जनोन्मज्जनक्षोभचलितचूडामणिचन्द्रखण्डच्युतेनामृतरसेन जलक्षालितवामार्द्धकपोलगलितलावण्यप्रवाहानुकारिणा सम्मिश्रितजलम्, उप-

---

[१] चन्द्रातपः चन्द्रस्य किरणः।

[२] वृत्तान्तः वस्तु। रिक्तम् शून्यम् आवरणशून्यमिति यावत् अन्तःस्थस्पष्टदृष्टसकलवस्तुतया तथात्वेन उपलक्ष्यमाणत्वम्॥

कूलतमालवनप्रतिविम्बान्धकारिताभ्यन्तरैर्दृश्यमानरसातलद्वारैरिव सलिलप्रदेशैर्गम्भीरतरं, दिवाप्युपजातनिशाशङ्कैश्चक्रवाकमिथुनैः परिह्रियमाणनीलोत्पलवनगहनम्, असकृत्पितामहपरिपूरितकमण्डलुपरिपूतजलम्, अनेकशोबालखिल्य[१]कदम्बकृतसन्ध्योपासनं, बहुशः सलिलावतीर्णसावित्रीभग्नदेवतार्च्चनकमलं, सहस्रशः सप्तर्षिमण्डलस्नानपवित्रीकृतं, सर्व्वदा सिद्धवधूधौतकल्पलतावल्कलपुण्यीकृतोदकम्, उदकक्रीड़ादोहदा[२]गतानाञ्च यक्षकेश्वरान्तःपुरकामिनीनां मकरकेतुचापचक्राकृतिभिरतिविकटैरावर्त्तिभिर्नाभिमण्डलैरापीतसलिलं, क्वचिदरुणहंसाक्रान्तविकचकमलवनषण्डम्, क्वचिद्दिग्गजमज्जनजर्ज्जरितजरणमृणालजालदण्डं, (क) क्वचित् त्र्यम्बकवृषभविषाणकोटिखण्डिततटशिलाखण्डं, (ख) क्वचिद्यममहिषशृङ्गशिखरविच्छिन्नफेनपिण्डं, क्वचिदैरावतदशनमुषलखण्डितकुमुदषण्डं, यौवनमिवोत्कलिकाबहुलम्, उत्कण्ठितमिव मृणालवलया-

---

(क) मृणालदण्डमिति च पाठः।

(ख) त्र्यम्बकधवलवृषभविषाणकोदण्डखण्डिततटशिलाखण्डमिति च पाठः।

[१] वालखिल्याः क्षुद्रप्रमाणतपस्विभेदाः।

[२] दोहृदमभिलाषः।

लङ्कृतं, [१] महापुरुषमिव (क) मीनमकरकूर्मचक्रप्रकटलक्षणं, [२] षण्मुखचरितमिव श्रूयमाणक्रौञ्चवनिताप्रलापं, [३] भारतमिव पाण्डुधार्त्तराष्ट्रकुलपक्षकृतक्षोभम्, [४] अमृतमथनसमयमिव तीरावस्थितशितिकण्ठपीयमानविषं, [५] कृष्णबालचरितमिव (ख) तटकदम्बशाखाधिरूढ़हरि (ग) कृतजलप्रपातक्रीड़ं, [६] मदनध्वजमिव मकराधिष्ठितं, [७]

(क) प्रकटमीनमकरकूर्मचक्रलक्षणमिति च पाठः।

(ख) बालकृष्णचरितमिवेति च पाठः।

(ग) तटकदम्बशाखारूढ़हरीति च पाठः।

[१] उत्कलिका उत्कण्ठाविशेषः उद्गतकोरकश्च तदलङ्कृतम्।

[२] मत्स्यमकरकूर्मचक्राकाररेखारूपाणि प्रकटानि लक्षणानि, पक्षे मीनादयः स्पष्टलक्षणानि वा यस्य। चक्रवाकः पक्षिभेदः।

[३] क्रौञ्चः वकपक्षी क्रौञ्चनामकः हिमवत्पुत्रः पर्वतश्च तत्कथा च महाभारते वनपर्वणि २२४ अध्याये।

[४] पाण्डवः श्वेता धार्त्तराष्ट्रा हंसविशेषास्तेषां कुलस्य पक्षेण गरुता कृतं क्षोभश्चाञ्चल्यं यत्र, पाण्डुनृपवंशस्य धृतराष्ट्रनृपवंशस्य च पक्षेण सहायेन कृतः क्षोभो यत्रेति च।

[५] शितिकण्ठः शिवः मयूरश्च विषं गरलं जलञ्च। शिवस्य विषपानकथा च भारते आदिपर्वणि १८ अध्याये।

[६] हरिः कृष्णः वानरश्च।

[७] मकरः जलजन्तुभेदः तदाकारचिह्नञ्च।

दिव्यमिवानिमिषलोचनरमणीयम्, [१] अरण्यमिव विजृम्भमाणपुण्डरीकम्, [२] उरगकुलमिवानन्तशतपत्रपद्मोद्भासितं, [३] कंसबलमिव मधुकरकुलोपनीयमानकुवलयापीड़ं, [४] कद्रुस्तनयुगलमिव नागसहस्रपीतपयोगण्डूषं, [५] मलयमिव चन्दनशिशिरवनम्, [६] असत्साधनमिवादृष्टान्तम्, [७] अतिमनोहरमाह्लादनं दृष्टेः, अच्छोदं नाम सरो दृष्टवान्।

आलोकमात्रेणैवापगतश्रमो दृष्ट्वा मनस्यकरोत, "अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणम्" एतदालोकयतः सरः सफलतामुपगतम्। अद्य परिसमाप्तमीक्षणयुगलस्य

---

[१] अनिमिषः देवः मत्स्यश्च।

[२] पुण्डरीकः दमनकवृक्षः पुण्डरीकं श्वेतपद्मञ्च।

[३] अनन्तानि, बहूनि शतपत्राणि शतदलानि यानि पद्मानि कमलानि अनन्तशतपत्रपद्मनामकाः ये नागाश्च तैरुद्भासितम्।

[४] मधुवने करो बलिर्येषां मधुकराः कंसादयः, मधुकरा भ्रमराश्च तत्कुलेन उपनीयमानः उपहृियमाणः क्रियमाणश्च कुवलयापीड़नामा हस्तिविशेषो यत्र कुवलस्य आपीड़ः शिरोभूषणं यत्र च।

[५] नागाः हस्तिनः सर्पाश्च पयो जलं स्तन्यदुग्धञ्च।

[६] चन्दनतरुणा चन्दनखण्डमिव च शिशिरं शीतलम्।

[७] असतः हेत्वाभासादिदुष्टस्य साधनमनुमानमिव अदृष्टान्तम् न्यायावयवोदाहरणरहितं, न दृष्टोऽन्त इयत्ता यस्य तच्चादृष्टान्तम्।

द्रष्टव्यदर्शनफलम्, आलोकितः खलु रमणीयानामन्तः, दृष्ट आह्लादनीयानामवधिः, वीक्षिता मनोहराणां सीमान्तलेखा, प्रत्यक्षीकृता प्रीतिजननानां परिसमाप्तिः, विलोकिता दर्शनीयानामवसानभूमिः ; इदमुत्पाद्य सरःसलिलं अमृतरसमुत्पादयता वेधसा पुनरुक्ततामिव नीता स्वसृष्टिः। इदमपि खल्वमृतमिव सर्वेन्द्रियाह्लादनसमर्थम् अतिविमलतया चक्षुषः प्रीतिमुपजनयति, शिशिरतया स्पर्शसुखमुपाहरति, कमलसुगन्धितया घ्राणमाप्याययति, हंससुखरतया श्रुतिमानन्दयति, स्वादुतया रसनामाह्लादयति। नियतं चास्यैव दर्शनतृष्णया न परित्यजति भगवान् कैलासनिवासव्यसनमुमापतिः। न खलु साम्प्रतमाचरति जलशयनदोहदं [१] देवो (क) रथाङ्गपाणिः, यदिदममृतरससुरभिसलिलमपहाय लवणरसपरुषपयसमुदन्वति स्वपिति। नूनं चेदं न प्रथममासीत् सरः, येन प्रलयवराहघोणाभिघातभीता (ख) भूतधात्री कलसयोनिपान [२] परिकलितसकलसलिलं सागरमवतीर्णा, अन्यथा यदि

(क) दोहदं देव इत्यत्र दोहदमित इति च पाठः।

(ख) घोणाभिघाताभिभूता इति च पाठः।

[१] दोहदमभिलाषम्।

[२] कलसयोनिरगस्त्यः तेन सागरस्य पानकथा च महाभारते वनपर्वणि १०४ अध्याये।

अत्रागाधा(क)पातालगम्भीराम्भसि निमग्ना भवेन्महासरसि, किमेकेन? महावराहसहस्रैरपि नासादिता भवेत्। नूनञ्चास्मादेव सलिललेशमादायादाय महाप्रलयेषु प्रलयपयोदाः प्रलयदुर्दिनान्धकारितदिशः प्लावयन्ति भुवनान्तराणि। मन्ये च यत्तत् सलिलमयं [१] ब्रह्माण्डरूपमादौ भुवनमभूत्, तदिदं पिण्डीभूतं (ख) सरोव्यपदेशेनावस्थितम्"।

इति विचारयन्नेव तस्य शिलासकलकर्कशवालुकाप्रायं, विद्याधरोद्धृतसनालकुमुदकलापार्च्चितम्, अनेकचारुसैकतलिङ्गम्, अरुन्धतीदत्तदिनकरार्घ्यपयःपर्य्यस्तरक्त (ग) कमलशोभितम् उपकूलशिलातलोपविष्टजलमानुष[२]निषेव्यमाणातपम्, अभ्यर्णतया च कैलासस्य स्नानागतमातृमण्डलपदपङ्क्तिमुद्राङ्कितम्,

---

(क) अनेकपातालेति च पाठः।

(ख) पिण्डीभूयेति च पाठः।

(ग) पर्य्यस्तारक्त इति च पाठः।

[१] अप एव ससर्जादौ तासु वीजमवासृजत्।

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिन् जज्ञे स्वयं ब्रह्मा॥

इत्यादिना मनुना जलवीजसंयोगादेव ब्रह्माण्डोत्पत्तिरुक्ता।

[२] जलमानुषः मानुषाकारः जलजन्तुभेदः।

अवकीर्णभस्मसूचितमग्नोत्थितगणवृन्दोद्धूलनम्, अवगाहावतीर्णगणपतिगण्डस्थलगलितमदप्रस्रवणसिक्तम्, अतिप्रमाणपादानुमीयमानहृषितकात्यायनीसिंहावतारमार्गं, दक्षिणं तीरमासाद्य तुरगादवततार। अवतीर्य्य च व्यपनीतपर्य्याण[१]मिन्द्रायुधमकरोत्। क्षितितललुठितोत्थितञ्च गृहीतकतिपययवसग्रासं सरोवतार्य्य पीतसलिलमिच्छया स्नातं चोत्थाप्य अन्यतमस्य समीपवर्त्तिनस्तरोर्मूलशाखायामपगतखलीनं (क) [२]हस्तपाशशृङ्खलया कनकमय्या चरणे बद्धा कृपाणिकावलनान् क्षिप्त्वा चाग्रतः कतिचित् सरस्तीरप्ररूढ़दूर्व्वाप्रबालकवलान् स्वयमपि सलिलमवततार। ततश्च प्रक्षालितकरचरणयुगलस्चातकद्व कृत्वा जलमयमाहारं, चक्राह्वय इवास्वाद्य मृणालशकलानि, शिशिरांशुरिव कराग्रैः [३] स्पृष्ट्वा कुमुदानि, फणीवाभिनन्द्य जलतरङ्गवातान्, अनङ्गशरप्रहारातुरइवोरसि निधाय नलिनीदलोत्तरीयम्, अरण्यगज इव शीकरार्द्रपुष्करोपशोभितकरः सरःसलिलादुदगात्। प्रत्य-

(क) अखलीनमिति च पाठः।

[१] पर्य्याणं पल्ययनम् (पालान)।

[२] खलीनं वल्गा (कड़ियाल)।

[३] करः किरणः हस्तश्च।

ग्रभग्नशिशिरैश्च सम्टणालकैर्जलकणिकाचितैः कमलिनीपलाशै-र्लतामण्डपपरिच्छिन्ने शिलातले संस्तरमास्तीर्य्य निधाय शिरसि पिण्डीकृतमुत्तरीयं निषसाद। मुहूर्त्तं विश्रान्तस्य तस्य सरस उत्तरे तीरप्रदेशे समुच्चरन्तम् उन्मुक्तकवलेन निश्चल-श्रवणपुटेन तन्मुखीभूतेनोद्रीवेणेन्द्रायुधेन प्रथमसमाकर्णितं श्रुतिसुभगं वीणातन्त्रीझङ्कारमिश्रममानुषं गीतशब्दमशृ-णोत्। कुतोऽत्र विगतमर्त्त्यसम्पाते प्रदेशे गीतध्वनेः सम्भूतिः? इति समुपजातकौतुकः कमलिनीपत्रस्रस्तरादुत्थाय तामेव गीतसम्पातसूचितां दिशं चक्षुः प्राहिणोत्। अतिदवीय-स्तया [१] तु तस्य प्रदेशस्य प्रयत्नव्यापृतलोचनोऽपि विलो-कयन् न किञ्चिद्ददर्श, तमेव केवलमनवरतं गीतशब्दं शुश्राव। कुतूहलवशाच्च (क) गीतध्वनितप्रभवजिज्ञासया कृतगमन-बुद्धिर्दत्तपर्य्याणमिन्द्रायुधमारुह्य प्रियगीतैः प्रथमप्रस्थितैर-प्रार्थितैरपि वनहरिणैरुपदिश्यमानवर्त्मा, सप्तच्छदबकुलैला-लवङ्गलवलीलतालोलकुसुम(ख)सुरभिपरिमलया अलिकुलवि-रुतिमुखरितया तमालनीलया दिङ्नागमदवीथ्येव पश्चिमया सरस्तीरवनलेखया निमित्तीकृत्य तं गीतध्वनिमभिप्रतस्थे।

(क) कुतूहलप्रभावाच्चेति च पाठः।

(ख) लवङ्गलवलीति च पाठः।

[१] अतिदवीयस्तया अत्यन्तदूरतया।

क्रमेण च सम्मुखागतैः, अच्छनिर्झरजलकणजालजनितजड़िमभिः, जर्जरितभूर्जवल्कलैः, धूर्जटिवृषभरोमन्थफेनविन्दुवाहिभिः, षण्मुखशिखण्डिशिखाचुम्बिभिः, अम्बिकाकर्णपूरपल्लवोल्लासनदुर्ललितैः, उत्तरकुरुकामिनीकर्णोत्पलप्रेङ्खोलनदोहदिभिः, आकम्पितकक्कोलैः, [१] नमेरु [२] कुसुमपांशुपातिभिः, (क) पशुपतिजटाबन्धार्त्तवासुकि (ख) परिपीतशीकराह्लादिभिः, पुण्यैः, कैलासमारुतैरभिनन्द्यमानो गत्वा च तं प्रदेशं सर्वतो मरकतहरितैः हारिहारीत [३] रुतिरमणीयैः, भ्रमद्भृङ्गराजनखरजर्ज्जरितजरठकुड्मलैः, उन्मदकोकिलकुलकवलीकृतसहकारकोमलाग्रपल्लवैः, (ग) उन्मदषट्चरणचक्रवालवाचालितविकचचूतकलिकैः, अचकितचकोरचञ्चुचुम्बितमरिचाङ्कुरैः, चम्पकपरागपुञ्जपिञ्जरकपिञ्जल [४] जग्धपिप्प-

---

(क) आकम्पितकमलैर्नवकुसुममालापांशुवाहिभिरिति च पाठः।

(ख) पशुपतिजटाबन्धनवासुकीति च पाठः।

(ग) सहकारकोरकैरिति च पाठः।

[१] कक्कोलः स्वनामप्रसिद्धः गन्धद्रव्यविशेषः।

[२] नमेरुः सुरपुन्नागः रुद्राक्षो वा।

[३] हारिण्यः मनोहारिण्यः हारीतानां (हरित्) तन्नामपक्षिणां रुतयः।

[४] कपिञ्जलः श्वेततित्तिरिः चातको वा।

लोफलैः, फलभरनिकरनिपीड़ितनिविड़दाड़िमीनीडप्रसूतकलविङ्कैः, प्रक्रीड़ितचपलकपिलकपिकुलकरतलताड़नतरलिततताड़ीपुटैः, [१] अन्योन्यकलहकुपितकपोतपोतसंहतलोलपक्ष (क) पालीपातितकुसुमैः, कुसुमरजोराशिशार [२] सारिकाश्रितशिखरैः, शुकशतमुखनखशिखरशकलितफलस्फीतैः, जलधरजललुब्ध (ख) विप्रलब्धमुग्धचातकध्वानमुखरिततमालषण्डैः, इभकलभकोन्मूलनपल्लवेल्लितलवलीवलयैः, आलीयमान (ग) नवयौवनमदमत्तपारावतपक्षक्षेपपर्य्यस्तकुसुमस्तवकैः, तनुपवनकम्पितकोमलकदलीदलवीजितैः, अविरलफलनिकरावनतनालिकेरवनैः, अकठोरपत्रपुटपूतविटपिपरिवृतैः, अनिवारितविहङ्गतुण्डखण्डितपिण्डखर्जूरजालकैः, मदमुखरमयूरीमधुररवविराविताम्बरैः, (घ) अकलितकलिकाकलापदन्तुरैः, अन्तरान्तरा कैलासतरङ्गिणीतरङ्गितसिक-

(क) कुपितकपोतपक्षेति च पाठः। पाली कोटिः।

(ख) जललवलुब्धेति च पाठः।

(ग) कृतालीकमानेति च पाठः।

(घ) रवरचितान्तरैरिति च पाठः।

[१] ताड़ी तालाकारपत्रयुक्तः (ताड़ियात्) वृक्षभेदः।

[२] शारः कर्वुरः।

तिल [१] तलभूमिभागैः, वनदेवताकरतलनिवहनिभम् अलक्तकजललवसिक्तमिव, किशलयनिकरमतिसुकुमारमुद्वहद्भिः, ग्रन्थिपर्णक [२] ग्रासससमुदितचमरीकुलनिषेवितमूलैः, कर्पूरागुरुप्रायैः, इन्द्रायुधैरिव घनावस्थानैः, [३] कुमुदैरिवादत्तदिनकरकरप्रवेशशिशिराभ्यन्तरैः, [४] दाशरथिबलैरिवाञ्जननीलनलपरिगतप्रान्तैः, [५] प्रासादैरिव सपारावतैः, भवनतापसैरिव सन्निहितवेत्रासनैः, [६] रुद्रैरिव नागलताबद्धपरिकरैः, [७] उदधिकूलपुलिनैरिव निरन्तरोद्भिन्नप्रवाल [८] लताङ्कुरजालकैः, अभिषेकसलिलैरिव सर्व्वौषधि-

---

[१] सिकतिलं वालुकायुक्तम्।

[२] ग्रन्थिपर्णकः चोरनामगन्धद्रव्यम्।

[३] घनं निविड़म् अवस्थानं घना मेघा एवावस्थानञ्च।

[४] न दत्तः दिनकरकरस्य प्रवेशः वृक्षैर्निविड़च्छायत्वात् सङ्कुचितत्वाच्च स्वस्मिन् समावेशो यत्र अतएव शिशिरं शीतलम्।

[५] आञ्जनः अञ्जनाभवः हनूमान् नीलनलौ तन्नामकौ वानरौ च। अञ्जनमिव नीला हरिद्वर्णाः नलास्तृणभेदाश्च।

[६] वेत्रनिर्म्मितमासनं वेत्रः वृक्षभेदः (वेत) असनः पीतशालः (पेयासाल) वृक्षश्च।

[७] नागः सर्पः लतेव दीर्घत्वात् नागलता ताम्बूली च।

[८] प्रवालो विद्रुमः। प्रवालं नवपल्लवश्च।

कुसुमफलकिशलयसनाथैः, [१] आलेख्यगृहैरिव बहुवर्ण-चित्रपत्रशकुनिशतशोभितैः, [२] कुरुभिरिव भारद्वाजोप-सेवितैः, [३] महासमरमुखैरिव पुन्नागसमाकृष्टशिलीमुखैः, [४] महाकारिभिरिव प्रलम्बबालपल्लवस्पृष्टभूतलैः, [५] अप्रमत्तपा-र्थिवैरिव पर्य्यन्तावस्थितबहुगुल्मकैः, [६] दंशितैरिव भ्रमर-सम्पातकवचावृतकायैः, [७] प्रयाणाभिमुखैरिव वानरकरा-ङ्गुलिस्पृष्टगुञ्जैः, [८] अवनिपालशयनैरिव सिंहपादाङ्कित-तलैः, [९] आरब्धपञ्चतपःक्रियैरिवोच्छिखशिखिमण्डलपरि-

---

[१] सर्वा ओषधयः फलपाकान्ता लताभेदाः। कुष्ठमांसी हरिद्राभिर्वचाशैलेयचन्दनैः। मुस्ताचन्दनकर्पूरैर्मुरा सर्वौषधिः स्मृतेत्युक्तः द्रव्यगणश्च।

[२] चित्रपत्रः विचित्रपक्षः शकुनिः, शकुन्याकारः चित्रभेदश्च।

[३] भारद्वाजः द्रोणाचार्य्यः व्याघ्राटः पक्षिभेदश्च।

[४] पुन्नागः पुरुषहस्ती नागकेशरश्च शिलीमुखः भ्रमरः वाणश्च।

[१] बालपल्लवं नवपल्लवं शुण्डाकृष्टनूतनपल्लवश्च।

[५] गुल्मः स्कन्धरहितलताप्रतानः सीमादिरक्षकः सेनागणश्च।

[६] भ्रमरसम्पाताः सम्पतद्भ्रमरा एव कवचानि, ते कवचा-नीव च तैरावृतकायैः आवृतावयवैश्च।

[७] प्रयाणाभिमुखा अपि अङ्गुल्या गुञ्जां स्पृशन्तीति यात्राशास्त्रम्।

[८] सिंहानां पादेन सिंहाकारपादपीठेन च अङ्किततलैः।

वृतैः, [१] दीक्षितैरिव कृतकृष्णसारविषाणकण्डूयनैः, [२]जरद्गृहमुनिभिरिव (क) जटालबालकमण्डलधरैः, [३] इन्द्रजालिकैरिव दृष्टिहारिभिः [४] पादपैः परिवृतं चन्द्रप्रभनाम्नः तस्य सरसः पश्चिमे तीरे कैलासपादस्य ज्योत्स्नावदातया प्रभया धवलयतस्तं प्रदेशं तलभागसन्निविष्टं भगवतः शूलपाणेः शून्यं सिद्धायतनमपश्यत्।

तच्च पवनोद्धूतैरितस्ततः समापतद्भिः केतकीगर्भधूलिभि-

(क) दीर्घजटेति वा पाठः।

[१] उच्छिखः उत्तोलितचूड़ः उद्गतज्वालश्च शिखी मयूरो वह्निश्च।

[२] कृतं कृष्णसारैः विषाणेन कण्डूयनं येषु, कृतं कृष्णसार मृगस्य विषाणेन कण्डूयनं यैरिति च। कृष्णविषाणया कण्डूयते इति श्रुतौ हि अध्वरदीक्षितस्य कृष्णसारशृङ्गेण कण्डूयनं विहितम्।

[३] जरन्तो वृद्धा ये गृहमुनयः सदारा वानप्रस्थास्तैरिव जटायाः वृक्षमूले स्थितं यत् आलवालकमण्डलं तद्धरैः। जटालाः जटायुक्ता ये बालकास्तेषां मण्डलधरैश्च। पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वेति अनिवृत्तरजस्कस्त्रीकस्य पत्न्या सहैव वनगमनविधानात् तेषां तत्र बालकसम्भवः।

[४] दृष्टिर्दर्शनं लोचनव्यापारः लोचनञ्च तद्धारिभिः स्वसंयुक्तपदार्थस्य यथारूपदर्शनाभावात्, सौन्दर्यातिशयेन इतरदृश्ये दृष्टिनिवारकत्वाच्च तथात्वम्।

धवलीक्रियमाणकायः, पशुपतिदर्शनहेतोर्बलादिव प्रतिपाद्यमानो भस्मव्रतम्, आयतनप्रवेशपुण्यैरिव परिगृह्यमाणः, प्रविश्याद्राक्षीत् [१] चतुस्तम्भस्फटिकमण्डपिकातलप्रतिष्ठितम् अचिरोद्धृतैरार्द्रार्द्रशिखरगलज्जलबिन्दुभिः, ऊर्द्धविपाटितचन्द्रबिम्बदलैरिव, निजाट्टहासावयवैरिव शेषफणाशकलैरिव पाञ्चजन्यसहोदरैरिव क्षीरोदहृदयाकारैरुपपादितमौक्तिकमुकुटविभ्रमैः, शुचिभिर्मन्दाकिनीपुण्डरीकैः कृतार्च्चनम् अमलमुक्ताशिलाघटितलिङ्गम् अशेषत्रिभुवनवन्दितचरणं चराचरगुरुं चतुर्मुखं [२] भगवन्तं त्र्यम्बकम्।

तस्य च दक्षिणां मूर्त्तिमाश्रित्याभिमुखमासीनाम् [३] उपरचितब्रह्मासनाम् [४] अतिविस्तारिणा सर्व्वदिङ्मुखप्लावकेन प्रलयपरिप्लुतक्षीरपयोधिपयःपूरपाण्डरेण अतिदीर्घकालसञ्चितेन तपोराशिनेव सर्व्वतो विसर्पता पादपान्तरैः त्रिस्रोतोजलनिभेन पिण्डीभूय वहतेव देहप्रभावि-

---

[१] तत्र आयतनं प्रविश्य त्र्यम्बकमद्राक्षीदित्यन्वयः।

[२] पञ्चमुखस्यापि तत्र चतुर्मुखत्वेन स्थापनात् चतुर्मुखत्वम्।

[३] दक्षिणां तदुपसेवनानुकूलां मूर्त्तिं देहमाश्रित्यावलम्ब्य तस्याभिमुखमासीनाम्।

[४] उपरचितब्रह्मासनाम् स्तवादिपाठार्थं कृतासनविशेषाम् कन्यकां ददर्शेत्यन्वयः।

तानेन सगिरिकाननं चन्द्रमयमिव तं प्रदेशं कुर्वतीम्, अन्यथैव धवलयन्तीं कैलासगिरिम्, अन्तर्दृष्टैरपि लोचनपथप्रविष्टेव श्वेतिमानमिव मनो नयन्तीम्, [१] अतिधवलप्रभापरिगतदेहतया स्फटिकगृहगतामिव, दुग्धसलिलमग्नामिव, विमलचीनांशुकान्तरितामिव आदर्शतलसङ्क्रान्तामिव शरदभ्रपटलतिरस्कृतामिव परिस्फुटविभाव्यमानावयवां, पञ्चमहाभूतमयमपहाय द्रव्यात्मकमङ्गलनिष्पादनोपकरणकलापं धवलगुणेनैव केवलेनोत्पादितां, दक्षाध्वरक्रियामिवोद्धत[२]गणकचग्रहभयोपसेवितत्र्यम्बकां, निरन्तरभस्मोल्लुण्ठनसिताङ्गीं, रतिमिव मदनदेहनिमित्तं हरप्रसादनार्थमागृहीतहराराधनां, क्षीरोदधिदेवतामिव सहवासपरिचितहरचन्द्रलेखोत्कण्ठाकृष्टाम् [३] इन्दुमूर्त्तिमिव स्वर्भानुभयकृतत्रिनयनशरणगमनाम्, ऐरावतदेहच्छविमिव गजाजिनावगुण्ठनोत्कण्ठितशि-

---

[१] द्रष्टुः मनोऽपि अन्तर्लोचनपथप्रविष्टेव श्वेतिमानं श्वेतत्वं नयन्तीं प्रापयन्तीं श्वेतसम्बन्धाभावेऽन्तःस्थितमनसः श्वैत्यासम्भवात् तत्पथेन प्रवेश उत्प्रेक्षितः।

[२] उद्धता ये गणाः प्रमथास्तैः यः कचग्रहः केशाकर्षणं तद्भयेनेवेति हेतूत्प्रेक्षा गम्या।

[३] हरस्य शिरःस्था चन्द्रलेखा तस्यामुत्कण्ठा दर्शनोत्सुक्यं तेनाकृष्टेवेत्युत्प्रेक्षा।

तिकण्ठचिन्तितोपनतां [१] पशुपतिदक्षिणमुखहासच्छविमिव निर्गत्य कृतावस्थानां, शरीरिणीमिव रुद्रोद्धूलनविभूति[२] माविर्भूतां, ज्योत्स्नामिव हरकण्ठान्धकारविघट्टनोद्यमप्राप्तां, गौरीतपःसिद्धिमिव कृतदेहपरिग्रहां, कार्त्तिकेयकौमारव्रतक्रियामिव मूर्त्तिमतीं, गिरिशवृषभदेहद्युतिमिव पृथगवस्थिताम्, आयतनतरुकुसुमसमृद्धिमिव शङ्कराभ्यर्चनाय स्वयमुद्यतां, पितामहतपःसिद्धिमिव महीतलमवतीर्णाम्, आदियुगप्रजापतिकीर्त्तिमिव सप्तलोकभ्रमणखेदविश्रान्तां, त्रयीमिव कलियुगध्वस्तधर्मशोकगृहीतवनवासाम्, आगामिकृतयुगवीजकलामिव प्रमदारूपेणावस्थितां, देहवतीमिव मुनिजनध्यानसम्पदम्, अमरगजवीथिमिवाभ्रगङ्गाभ्यागमवेगपतितां, कैलासश्रियमिव दशमुखोन्मूलनक्षोभनिपतितां, श्वेतद्वीपलक्ष्मीमिवान्यद्वीपान्तरावलोकनकुतूहलागतां, काशकुसुमविकाशकान्तिमिव शरत्समयमुदीक्षमाणां, शेषशरीरच्छायामिव रसातलमपहाय निर्गतां, मुषलायुधदेहप्रभामिव मधुमदविघूर्णनायासविगलितां, शुक्लपक्षपरम्परामिव पुञ्जीकृतां, सर्वहंसैरिव धवलतया कृतसंविभागां, धर्महृदयादिव निर्गतां,

---

[१] गजाजिनस्य अवगुण्ठनं परिधानं तत्र उत्कण्ठितेन शितिकण्ठेन चिन्तितोपनतां चिन्तामात्रेणोपस्थिताम्।

[२] रुद्रस्य उद्धूलनं धूलिसाधनं या विभूतिर्भस्मसम्पत्तिः

शङ्खादिवोत्कीर्णां, मुक्ताफलादिवाकृष्टां, मृणालैरिव विरचितावयवां, दन्तदलैरिव घटिताम्, इन्दुकरकूर्च्चैः। कैरिव[१]प्रक्षालितां, वर्णसुधा[२]च्छटाभिरिव च्छुरितां, अमृतफेनपिण्डैरिव पाण्डुरीकृतां, पारदरसधाराभिरिव धौतां, रजतद्रवेणेव निर्घृष्टां, चन्द्रमण्डलादिवोत्कीर्णां, कुटजकुन्दसिन्धुवारकुसुमच्छविभिरिवोल्लासिताम्, इयत्ताभिव धवलिम्नः, स्कन्धावलम्बिनीभिः उदयतटगतार्कविम्बादुद्धृत्य बालरश्मिप्रभाभिरिव निर्म्मिताभिः उन्मिषत्तडित्तन्तुतरलतेजस्ताम्राभिः अचिरस्नानावस्थितविरलवारिकणतया प्रणामलग्नपशुपतिचरणभस्मचूर्णाभिरिव जटाभिरुद्भासितशिरोभागां, जटापाशग्रथितमुत्तमाङ्गेन मणिमयं नामाङ्कमीश्वरचरणद्वयमुद्वहन्तीं, रविरथतुरगखुरमुखच्छलनच्छन्नचोदविशदेन भस्मनालङ्कृतललाटपट्टिकां, शिखरशिलाश्लिष्टशशाङ्ककलामिव शैलराजमेखलाम्, अतुलभक्तिप्रसाधितया लक्ष्मीकृतलिङ्गया द्वितीययेव पुण्डरीकमालया दृष्ट्या सम्भावयन्तीं, भूतनाथम्, अनवरतगीतपरि(क)स्फुरिताधरपुटवशादतिशुचिभिः, शुद्धहृदयमयूखै-

---

(क) परीति पुस्तकान्तरे नास्ति।

[१] कूर्च्चकैः तूलिकाभिः कुँचीति प्रसिद्धैः।

[२] वर्णसुधा वर्णनार्थं सुधालेपनद्रव्यम् (कलि)।

रिव, गीतगुणैरिव, स्वरैरिव, स्तुतिवर्णैरिव, मूर्त्तिमद्भिर्मुखा-न्निष्पतद्भिर्दशनांशुभिः, पुनरिव स्नपयन्तीं गौरीपतिम्, अति-विमलैश्च वेदार्थैरिव साक्षात् पितामहमुखादाकृष्टैः गाय-त्रीवर्णैरिव ग्रन्थनामु(क)पगतैः, नारायणनाभिपुण्डरीकवीजैरि-वोद्धृतैः, सप्तर्षिभिरिव करतलस्पर्श(ख)पूतमात्मानमिच्छद्भि-स्तारकारूपेणागतैः, आमलकीफलस्थूलैर्मुक्ताफलैरुपरचितेना-क्षवलयेनाधिष्ठितकण्ठभागां, परिवेशपरिगतचन्द्रमण्डलामिव पौर्णमासीम्, अधोमुखहरशिरःकपालमण्डलाकारेण मोक्षपुर-द्वार(ग)कलसकान्तिना स्तनयुगलेन एकहंसमिथुनसनाथामिव श्वेतगङ्गां, गौरीसिंहसटामयेनेव चामररुचिराकृतिना (घ) स्तन-युगलमध्यनिबद्धग्रन्थिना कल्पतरुलतावल्कलेन कृतोत्तरीयकृ-त्याम्, अयुग्मलोचनसकाशात् प्रसादलब्धेन चूड़ामणिचन्द्रमयू-खजालेनेव मण्डलीकृतेन ब्रह्मसूत्रेण पवित्रतरीकृतकायाम्, आ-प्रपदीनेन [१] च स्वभावसितेनापि ब्रह्मासनबन्धोत्तानचरणतल-प्रभापरिष्वङ्गाल्लोहितायमानेन दुकूलपटेन प्रावृतनितम्बां सो-,

---

(क) ग्रथिततामिति वा पाठः।

(ख) करस्पर्शेति वा पाठः।

(ग) मोक्षद्वारेति वा पाठः।

(घ) चामरचीराकृतिनेति वा पाठः।

[१] आप्रदीनेन पदतलपर्य्यन्तव्यापकेन।

वनेनापि स्वकालोपसर्पिणा (क) निर्विकारविनीतेन शिष्येणेवोपास्यमानां, लावण्येनापि कृतपुण्येनेव स्वच्छात्मना परिगृहीतां, रूपेणापि रुचिरलोचनेन [१] विगतचापलेनायतनमृगेणेव निषेविताम्, उत्सङ्गगताञ्च स्वसुतामिव सूक्ष्मशङ्खखण्डिकाङ्गुलीयकपूरिताङ्गुलिना त्रिपुण्ड्रकावशेषभस्मपाण्डरेण प्रकोष्ठबद्धशङ्खखण्डकेन नखमयूखदन्तुरतया गृहीतदन्तकोणेनेव [२] दन्तमयीं, दक्षिणकरेण वीणामास्फालयन्तीं, प्रत्यक्षामिव गन्धर्वविद्यां, मणिमण्डपिकास्तम्भलग्नाभिरात्मानुरूपाभिः सहचरीभिरिव सवीणाभिर्विलासवतीभिः प्रतिमाभिरुपेतां, स्नपनार्द्रलिङ्गसंक्रान्तप्रतिविम्बतयातिप्रबलभक्त्याराधितस्य हृदयमिव प्रविष्टां हरस्य, हारलेखयेव प्राप्तकण्ठयोगया, ग्रहपङ्क्त्येव ध्रुव[३]प्रतिबद्धया, क्रुद्धयेव रक्तमुखवर्णया, [४] मत्तयेव

(क) यौवनेनादिष्टेनोपसर्पिणेति वा पाठः।

[१] रुचिरे लोचने यत्र यस्य वा रूपमृगयोर्विशेषणम्।

[२] कोणो वीणावादनसाधनं धनुराकारं वस्तुभेदः दन्तमयः कोणः गृहीतो येन करेण।

[३] ध्रुवः नक्षत्रभेदस्तमवलम्ब्य सर्वग्रहकक्षास्थितिर्ज्योतिषे उक्ता। ध्रुवं गीतिभेदञ्च (ध्रुया)

[४] रक्तः माधवादिरागयुक्तः मुखवर्णः मुखोच्चारिताक्षरं यस्याः रक्तः शोणः मुखस्य वर्णो रूपं यस्या इति च।

घूर्णितमन्दतारया, [१] उन्मत्तयेवानेककृततालया, [२] मीमांसयेवानेकभावना[३]नुविद्धया गीत्या देवं विरूपाक्षमुपवीणयन्तीम्, [४] अतिमधुरगीताकृष्टैर्ध्यानमिवाभ्यस्यद्भिर्निश्चलकर्णपुटैर्मृगवराहवानरवारणशरभसिंहप्रभृतिभिर्वनचरैराबद्धमण्डलैराकर्ण्यमानगीतानुविद्धविपञ्चीघोषाम्, अमरापगामिव नभसोऽवतीर्णां, दीक्षितवाचमिवाप्राकृतां, [५] त्रिपुरारिशरशलाकामिव तेजोमयीं, पीतामृतामिव विगततृष्णाम्, ईशानशिरःशशिकलामिवानुपजातरागाम्, [६] अमथितोदधिजलसम्पदमिवान्तःप्रसन्नाम्, असमस्तपदवृत्तिमिवाद्वन्द्वां, [७]

---

[१] मन्दा तारा अक्षिपुत्तलिका। मन्दो मृदुः तार उच्चः स्वरभेदश्च।

[२] तालः तलसंयोगः गीतौ कालक्रिया च।

[३] भावना भावयितुर्व्यापारः सा च शाब्दी आर्थी चेत्यनेकविधा। भावना चिन्तनञ्च।

[४] उपवीणयन्तीं वीणया उपस्तुवतीम्।

[५] अप्राकृतां संस्कृतां नापभाषितवै इत्यादिश्रुतौ दीक्षितस्यापभ्रंशकथननिषेधात्। अमानुषीं दिव्यामिति च।

[६] रागोऽनुरागः लौहित्यञ्च।

[७] असमस्तानां पदानां वृत्तिं स्थितिमिव अद्वन्द्वामेकाकिनीं शीतोष्णादिद्वन्द्वरहिताञ्च।

बौद्धबुद्धिमिव निरालम्बनां, [१] वैदेहीमिव प्राप्तज्योतिःप्रवेशां, [२] द्यूतकलाकुशलामिव वशीकृताक्षहृदयां, [३] मही मिव जल भृतदेहां, हिमसमयदिवसमुखलक्ष्मीमिव परिपीतभास्करातपाम्, आर्य्यामिव समुपात्तयतिगणोचितमात्राम्, [४] आलिखितामिवाचलावस्थानाम्, [५] अंशुमयीमिव तनुच्छायानुलिप्तभूतलां, निर्ममां, निरहङ्कारां, निर्मत्सराममानुषाकृतिं, दिव्यत्वादपरिज्ञायमानवयःप्रमाणामष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श।

---

[१] निरालम्बनां निर्विषयाम्। तेषां मते हि सहोपलम्भनियमादभेदो नीलतद्धियोरित्युक्तेः विज्ञानातिरिक्तविषयो नास्ति। शब्दादिविषयेषु अनासक्तचित्ताञ्च।

[२] प्राप्तः ज्योतिषि परीक्षार्थं वह्नौ परब्रह्मणि च प्रवेशो यया।

[३] वशीकृतानि अक्षाणि इन्द्रियाणि हृदयञ्च यया वशीकृतमक्षहृदयं पाशकविद्यारहस्यञ्च यया।

[४] आर्य्याम् मात्रावृत्तभेदम्। यतिः जिह्वेष्टविश्रामस्थानं गणाः, "ज्ञेयाः सर्वादिमध्यान्तगुरवोऽत्र चतुष्कलाः गणाश्चतुर्लघूपेता इत्याद्युक्ताः,, सर्वगुर्वादयः पञ्च। यतीनां जितेन्द्रियाणां गणेन उचिता तुल्या मात्रा अल्पपरिच्छेदो यस्याः।

[५] अचलं स्थिरमवस्थानं यस्याः अचले पर्वते अवस्थानं यस्याः इति च।

ततोऽवतीर्य्य तरुशाखायां बद्ध्वा तुरगम्, उपसृत्य भगवते भक्त्या (क) प्रणम्य त्रिलोचनाय, तामेव दिव्ययोषितमनिमिषपक्ष्मणा निश्चलनिबद्धलक्ष्येण चक्षुषा पुनर्निरूपयामास। उदपादि चास्य तस्या रूपसम्पदा कान्त्या प्रशान्त्या चाविर्भूतविस्मयस्य मनसि, "अहो जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तान्तराणि,,। तथाहि, मया मृगयायां यदृच्छया निरर्थकमनुबध्नता तुरगमुखमिथुनम्, अयमतिमनोहरो मानवानामगम्यो दिव्यजनसञ्चरणोचितः प्रदेशो वीक्षितः क्षितेः। अत्र च सलिलमन्वेषमाणेन हृदयहारि सिद्धजनोपस्पृष्टजलं सरो दृष्टम्। तत्तीरलेखाविश्रान्तेन चामानुषं गीतमाकर्णितम्; तच्चानुसरता मानुषदुर्लभदर्शना दिव्यकन्येयमालोकिता। न हि मे संशीति [१] रस्या दिव्यतां प्रति, आकृतिरेवानुमापयत्यमानुषतां; कुतश्च मर्त्त्यलोके सम्भूतिरेवंविधानां गन्धर्वध्वनिविशेषाणां? तद्यदि मे सहसा दर्शनपथान्नापयाति, नारोहति वा कैलासशिखरं, नोत्पतति वा गगनतलं, ततः "का त्वं? किमभिधाना? वा! किमर्थं? वा प्रथमे वयसि प्रतिपन्ना व्रतम्? इति सर्वमेवैतदेनामुपसृत्य पृच्छामि, अतिमहानयमवकाश आश्चर्य्याणाम्"। इत्यव-

---

(क) महाभक्त्येति पाठान्तरम्।

[१] संशीतिः संशयः।

धार्य्य तस्यामेव स्फटिकमण्डपिकायामन्यतमं स्तम्भमाश्रित्य समुपविष्टो गीतसमाप्त्यवसरं प्रतीक्षमाणस्तस्थौ।

अथ गीतावसाने मूकीभूतवीणा प्रशान्तमधुकरमधुररुतेव कुमुदिनी सा कन्यका समुत्थाय प्रदक्षिणीकृत्य कृतहर-प्रणामा परिवृत्य स्वभावधवलया तपःप्रभावप्रगल्भया दृष्ट्या समाश्वासयन्तीव, पुण्यैरिव स्पृशन्ती, तीर्थजलैरिव प्रक्षालयन्ती, तपोभिरिव पावयन्ती, शुद्धिमिव कुर्वाणा, वरदानमिवोप-पादयन्ती, पवित्रतामिव नयन्ती, चन्द्रापीड़माबभाषे। "स्वाग-तमतिथये, कथमिमां भूमिमनुप्राप्तो महाभागः? तदुत्तिष्ठानु-गम्यतामनु (क) भूयतामतिथिसत्कार इति"। एवमुक्तस्तु तया सम्भाषण (ख) मात्रेणैवानुगृहीतमात्मानं मन्यमानः उत्थाय(ग) भक्त्या कृतप्रणामो, "भगवति! यथाज्ञापयसीत्य" भिधाय दर्शितविनयः शिष्यइव तां व्रजन्तीमनुवव्राज।

व्रजंश्च समर्थयामास, "हन्त! तावन्नेयं मां दृष्ट्वा तिरोभूता, कृतं हि मे कुतूहलेन प्रश्नाशया हृदि पदं, यथा चेयमस्या-स्तपस्विजनदुर्लभदिव्यरूपाया अपि दाक्षिण्यातिशया प्रति-पत्ति[१]रभिजाता विभाव्यते, तथा सम्भावयामि, नियतमिय-

(क) उत्तिष्ठ आगम्यतामिति वा पाठः।

(ख) सम्भाषितेति वा पाठः।

(ग) समुत्थायेति वा पाठः।

[१] प्रतिपत्तिः आतिथ्यकरणाय निश्चयपूर्वकप्रवृत्तिभेदः।

मात्मोदन्त(क)मभ्यर्थ्यमाना मया कथयिष्यतीति, एवञ्च कृतमतिः पदशतमात्रमिव गत्वा, निरन्तरैर्दिवापि रजनीसमयमिव दर्शयद्भिस्तमालतरुभिरन्धकारितपुरोभागाम्, उत्फुल्लकुसुमेषु लतानिकुञ्जेषु कूजतां मन्दं मन्दं मदमत्तमधुलिहां विरुतिभिर्मुखरीकृतपर्य्यन्ताम्, अतिदूरपातिनीनाञ्च धवलशिलातलप्रतिघातोत्पतनफेनिलानामपां प्रस्रवणैरुत्कोटिग्रावविटङ्क[१] विपाट्यमानैरुच्चरद्ध्वनिभिरवशीर्य्यमाणतुषारशिशिरसीकरासारैराबध्यमाननीहारां, हिमहारहरहासधवलैरोभयतः चरद्भिर्निर्झरैर्द्वारा (ख) वलम्बितचारुचलच्चामरकलापामिवोपलक्ष्यमाणाम्, अन्तःस्थापितमणिकमण्डलुमण्डलाम्, एकान्तावलम्बितयोगपट्टिकां, विशाखिका[२]शिखरनिबद्धनारिकेलीफलवल्कलमयधौतोपानद्युगोपेताम्, अवशीर्णाङ्गभस्मधूसरवल्कलशयनीयसनाथैकदेशाम्, इन्दुमण्डलेनेव टङ्कोत्कीर्णेन शङ्खमयेन भिक्षाकपालेनाधिष्ठितां, सन्निहितभस्मालाबुकां गुहामद्राक्षीत्। तस्याञ्च द्वारि शिलातले समुपविष्टो वल्कल-

(क) अखिलमात्मोदन्तमिति वा पाठः।

(ख) धारेति वा पाठः।

[१] ग्रावा विटङ्कः गृहदारुभेद इव तेन पाट्यमानैर्जर्जरीक्रियमाणैः।

[२] विशाखिका श्रिक्याकारवस्तुभेदः (शिका)

शयनशिरोभागविन्यस्तवीणां, ततः पर्णपुटेन निर्झरादागृहीतमर्घ्यसलिलमादाय तां कन्यकां समुपस्थिताम् "अलमलमतियन्त्रणया, कृतमतिप्रसादेन, भगवति! प्रसीद, विमुच्यतामय मत्यादरः, त्वदीयमालोकनमपि (क) सर्वपापप्रशमनमघमर्षणमिव [१] पवित्रीकरणायालम् आस्यताम्" इत्यब्रवीत्। अनुरुध्य (ख) मानश्च तया तां सर्वामतिथिसपर्य्यामतिदूरावनतेन शिरसा सप्रश्रयं [२] प्रतिजग्राह।

कृतातिथ्यया च तया द्वितीयशिलातलोपविष्टया क्षणमिव तूष्णीं स्थित्वा क्रमेण परिपृष्टो दिग्विजयादारभ्य किन्नरमिथुनानुसरणप्रसङ्गेनागमनमात्मनः सर्वमाचचक्षे। विदितसकलवृत्तान्ता चोत्थाय सा कन्यका भिक्षाकपालमादाय तेषामायतनतरूणां तलेषु विचचार। अचिरेण च तस्याः स्वयंपतितैः फलैरपूर्य्यत भिक्षाभाजनम्। आगत्य च तेषां फलानामुपयोगाय [३] नियुक्तवती चन्द्रापीड़म्। आसीच्च तस्य चेतसि, "नास्ति खल्वसाध्यं नाम तपसां, किमतः परमाश्चर्य्यं? यदत्र

(क) अत्र खलु इत्यधिकः पाठः।

(ख) अनुबन्ध्य इति वा पाठः।

[१] अघमर्षणम् आपोहिष्ठा इत्यादि वैदिकमन्त्रसमूहः।

[२] सप्रश्रयं सप्रणयम्।

[३] उपयोगाय भोजनाय।

व्यपगतचेतना(क)अपि सचेतना इवास्यै भगवत्यै समतिसृजन्तः फलान्यात्मानुग्रहमुपपादयन्ति वनस्पतयः। चित्रमिदमालोकितमस्माभिरदृष्टपूर्वमित्यधिकतरोपजातविस्मयश्चोत्थाय तमेव प्रदेशमिन्द्रायुधमानीय व्यपनीतपर्य्याणं नातिदूरे संयम्य निर्झरजलनिर्वर्त्तितस्नानविधिस्तान्यमृतरसस्वादून्युपयुज्य फलानि पीत्वा च तुषारशिशिरं प्रस्रवणजलमुपस्पृश्य चैकान्ते तावदवतस्थे, यावत्तयापि कन्यया कृतो जलफलमूलमयेष्वाहारेषु प्रणयः।

इति परिसमापिताहारां, निर्वर्त्तितसन्ध्योचिताचारां, शिलातले विस्रब्धमुपविष्टां निभृतमुपसृत्य नातिदूरे समुपदिश्य मुहूर्त्तमिव स्थित्वा चन्द्रापीड़ः सविनयमवादीत्। भगवति! त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति। जनयति हि प्रभुप्रसादलवोऽपि प्रागल्भ्यमधीरप्रकृतेः। स्वल्पाप्येकदेशावस्थानकालकला परिचयमुत्पादयति। अणुरप्युपचारपरिग्रहः प्रणयमारोपयति। तद् यदि नातिखेदकरमिव, ततः कथनेनात्मानमनुग्राह्य-(ख) मिच्छामि। अति महत् खलु भवद्दर्शनात् प्रभृति मे कौतुक-

(क) यत्र विगतचेतना इति वा पाठः।

(ख) अनुग्रह्यमाणमिति वा पाठः।

मस्मिन् विषये, कतरन्मरुतामृषीणां गन्धर्वाणां गुह्यकाना-
मप्सरसां वा कुलमनुगृहीतं भगवत्या जन्मना किमर्थं वास्मिन् कुसुमसुकुमारे नवे वयसि व्रतग्रहणं क्वेदं वयः? क्वेदं तपः? क्वेयमाकृतिः? क्वचायं लावण्यातिशयः? क्वेयमिन्द्रियाणामुपशान्तिः? तदद्भुतमिव मे प्रतिभाति, किंनिमित्तं? वा अनेकसिद्धसाध्यसम्बाधानि सुरलोकसुभगान्य(क)पहाय दिव्याश्रमपदानि एकाकिनी वनमिदममानुषमधिवससि? कश्चायं प्रकारो? यत्तैरेव पञ्चभिर्महाभूतै(ख)रारब्धमीदृशीं धवलतां धत्ते शरीरं? नेदमस्माभिरन्यत्र दृष्टश्रुतपूर्वं वा। अपनयतु नः कौतुकमावेदयतु भवती सर्वमिदमित्येवमभिहिता सा किमप्यन्तर्ध्यायन्ती तूष्णीं मुहूर्त्तमिव स्थित्वा निश्वस्य स्थूलस्थूलैरन्तर्गतां हृदयशुद्धिमिवादाय निर्गच्छद्भिः, इन्द्रियप्रसादमिव वर्षद्भिः, तपोरसनिस्यन्दमिव स्रवद्भिः लोचनविषयं धवलिमानमिव द्रवीकृत्य पातयद्भिः, अच्छाच्छैरमलकपोलस्खलस्खलितैः, अवशीर्णहारमुक्तमुक्ताफलतरलपातैः, अनुबद्धविन्दुभिः, वल्कलावृतकुचशिखरजर्जरितशीकरैरश्रुभिरामीलितलोचना निःशब्दं रोदितुमारेभे।

ताञ्च प्ररुदितां दृष्ट्वा चन्द्रापीड़स्तत्क्षणमचिन्तयत्।

(क) सुलभानि इति वा पाठः।

(ख) कस्यायं प्रजापतेः प्रकारो? यत्तैरेव महाभूतैः पञ्चभिरिति वा पाठः।

अहो! दुर्निवारता व्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां [१]कुर्वन्ति, सर्वथा न कञ्चन स्पृशन्ति शरीरधर्माणमुपतापाः। बलवती हि द्वन्द्वानां [२] प्रवृत्तिः। इदमपरमधिकतरमुपजनितमतिमहन्मनसि मे कौतुकमस्या वाष्पसलिलपातेन। न ह्यल्पीयसा शोककारणेन चेतीक्रियन्ते, [३] एवंविधा मूर्त्तयः नहि क्षुद्रनिर्घात[४]पाताभिहता चलति वसुधा। इति संवर्द्धितकुतूहलस्य शोकस्मरणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादञ्जलिना मुखप्रक्षालनोदकमुपनिन्ये। सा तु तदनुरोधादविच्छिन्नवाष्पजलधारासन्तानापि किञ्चित् कषायितोदरे प्रक्षाल्य लोचने वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णञ्च निश्वस्य शनैः प्रत्यवादीत्। राजपुत्र! "किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन? तथापि यदि महत् कुतूहलं, तत् कथयामि-श्रूयताम्।

---

[१] आत्मीयां स्ववशीभूताम् कुर्वन्तीत्यत्र व्यसनोपनिपाता इति शेषः।

[२] द्वन्द्वानां सुखदुःखादीनाम्।

[३] चेत्तीक्रियन्ते विषयीक्रियन्ते।

[४] निर्घातः भूमौ आकाशादकस्मात् पवनपातेनाभिघातः।

एतत् प्रायेण कल्याणाभिनिवेशिनः [१] श्रुतिविषयमापतितमेव, यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्तीति। तासां चतुर्दश कुलानि एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम्, अन्यद्वेदेभ्यः सम्भूतम्, अन्यदग्नेरुद्भूतम्, अन्यत् पवनात् प्रसूतम्, अन्यदमृतान्मथ्यमानादुत्थितम्, अन्यज्जलाज्जातम्, अन्यदर्ककिरणेभ्यो निर्गतम्, अन्यत् सोमरश्मिभ्यो निष्पतितम्, अन्यद्भूमेरुद्भूतम्, अन्यत् सौदामनीभ्यः प्रवृत्तम्, अन्यन्मृत्युना निर्मितम्, अपरं मकरकेतुना समुत्पादितम्, अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां सुतानां मध्ये द्वे सुते मुनिररिष्टा च बभूवतुः, ताभ्यां गन्धर्वैः सह कुलद्वयं जातं, एवमेतान्येकत्र चतुर्दश कुलानि। गन्धर्वाणां तु दक्षात्मजाद्वितयसम्भवं तदेव कुलद्वयं जातम्, तत्र मुनेस्तनयश्चित्रसेनादीनां पञ्चदशानां भ्रातृणामधिको गुणैः षोड़शश्चित्ररथो नाम समुत्पन्नः। स किल सकलत्रिभुवनप्रख्यातपराक्रमो भगवता समस्तसुरमौलिमालालालितचरणनखिनेनाखण्डलेन (क) सुहृच्छब्देनोपबृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यमसिलतामरीचिनिचयमेचकितेन बाहुना समुपार्ज्जितं शैशव एवासवान्। इतश्च नातिदूरे तस्मादस्माद्भारतवर्षादुत्तरेणानन्तरे किम्पुरुषनाम्नि वर्षे वर्ष-

---

(क) अरविन्दजेनेति वा पाठः।

[१] कल्याणाभिनिवेशिनः मङ्गलचेष्टस्य भवतः श्रुतिविषयं कर्णपथमेतं वक्ष्यमाणवृत्तं प्रायेणापतितमित्यन्वयः।

पर्वतो हेमकूटो नाम निवासः। तत्र च तद्भुजयुगलपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति। तेनैव चेदं चैत्ररथं नामातिमनोहरं काननं निर्म्मितम्, इदञ्चाच्छोदाभिधानमतिमहत् सरो निखानितम्, अयञ्च भवानीपतिरुपरचितो भगवान्। अरिष्टायास्तु [१] पुत्रस्तुम्बुरुप्रभृतीनां सोदर्य्याणां षणां ज्येष्ठो (क) हंसो नम जगद्विदितो गन्धर्वः। तस्मिन् द्वितीये (ख) गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान्। अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः। यत्तु तत् सोममयूखसम्भवमप्सरसां कुलं, तस्मात् किरणजालानुसारगलितेन सकलेनेव रजनिकरकलाकलापलावण्येन निर्म्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीपतिनाम्ना हिमकर(ग)किरणावदातवर्णा कन्यका प्रसूता। ताञ्च द्वितीयगन्धर्वकुलाधिपतिर्हंसो मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत्। सा तु भगवता मकरकेतनेनेव रतिः, शरत्समयेनेव कमलिनी, हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती निखिलान्तःपुरस्वामिनी च तस्याभवत्।

(क) श्रेष्ठ इति वा पाठः।

(ख) पुस्तकान्तरे द्वितीयेति नास्ति।

(ग) रजनीकर इति वा पाठः।

[१] अरिष्टाया दक्षासुताभेदस्य।

तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा (क) समुत्पन्ना। तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मम जन्माभिनन्दितवान्। अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान्। साहं पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं सञ्चरन्ती अविदितस्नेहशोकायासमनोहरं शैशवमतीतवती। क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव इव मदनेन नवयौवनेन पदम्।

अथ विजृम्भमाणनवनलिनवनेषु, अकठोरचूतकलिकाकलापकृतकामुकोत्कलिकेषु,[१]कोमलमलयमारुतावतारतरङ्गितानङ्गध्वजांशुकेषु, मदकलितकामिनीगण्डूषसीधुसेकपुलकितवकुलेषु, मधुकरकुलकलङ्ककालीकृतकालेयक[२]कुसुम(ख)कुड्मलेषु, अशोकतरुताड़नारणितरमणीयमणिनूपुरझङ्कारसहस्रमुखरेषु,

---

(क) विगतलक्षणा विगतश्रद्धा केवलमनेकदुःखसहस्रभाजनमेकैव इति वा पाठः॥

(ख) पुस्तकान्तरे कुसुमेति नास्ति।

[१] उत्कलिका उत्कण्ठा।

[२] भ्रमरकुलं कलङ्क इव कृष्णत्वात् तेन कालीकृतं कृष्णाधिक्यं नीतं कालेयकं जायकपुष्पभेदः।

विकसमुकुलपरिमलपुञ्जितालिजालमञ्जुसिञ्जितसुभगसहकारेषु, अविरलकुसुमधूलिबालुकापुलिनधवलितधरातलेषु, (क) मधुमदविड़म्बितमधुकरीकदम्बकसंवाह्यमानलतादोलेषु, उत्फुल्लपल्लवलवली(ख)लीयमानमत्तकोकिलोल्लासितमधुसीकरोद्गमदुर्द्दिनेषु, प्रोषितजनजायाजीवोपहारहृष्टमन्मथेषु, मन्मथास्फालितचापरवभयस्फुटितपथिकहृदयरुधिरार्द्रमार्गेषु, किंशुकसमाकीर्णेषु, अविरतपतत्कुसुमशरपतत्त्रिपतत्त्रत्कारबधिरीकृत(ग)दिङ्मुखेषु, दिवापि प्रवृत्तान्तर्मदनरागान्धाभिसारिकासार्थसङ्कुलेषु, उद्वेलरतिरससागरपूरप्लावितेषु, सकलजीवलोकहृदयानन्दकेषु मधुमासदिवसेषु [१] एकदाहमम्बया सह मधुमासविस्तारितशोभं प्रोत्फुल्लनवनलिनकुमुदकुवलयकह्लारमिदमच्छोदं सरः स्नातुमभ्यागमम्। अत्र च स्नानार्थमागतया भगवत्या पार्वत्या तटशिलातलेषु विलिखितानि सभृङ्गरीटीनि पांशुनिमग्नकृशपदमण्डलानुमितमुनिजनप्रणामप्रदक्षिणानि त्र्यम्बकप्रतिबिम्बकानि वन्दमाना, भ्रमर(घ)भरभुग्नग-

(क) अत्र तु असकृदित्यधिकः पाठः।

(ख) वल्लीति वा पाठः।

(ग) पतत्त्रिपक्षबधिरीकृत इति वा पाठः।

(घ) पतत्त्रमय इति वा पाठः।

[१] मधुमासदिवसेषु वसन्तदिनेषु अच्छोदसरः स्नातुमभ्यागममित्यन्वयः॥

र्भकेशरजर्जरकुसुमोपहाररम्यो(क)ऽयं लतामण्डपः परभृतनख-कोटिपाटितकुड्मलनाल (ख) विवरविगलितमधुनिकर(ग)धारः, सुपुष्पितोऽयं सहकारतरुः, उन्मदमयूर (घ) कलकलभीत-भुजङ्गमुक्ततलाशिशिरेयं चन्दनवनवीथिका, विकचकुसुम-पुञ्जपातस्थगितवनदेवताप्रेङ्खोलनशोभनेयं लतादोला, बहल-कुसुमरजःपटलमग्नकलहंसपदलेखमतिरमणीयमिदं तीरत-रुतलम् इति स्निग्धमनोहरतरोद्देशदर्शनलोभाच्चिप्तहृदया सह सखीजनेन व्यचरम्।

अथैकस्मिंश्च प्रदेशे झटिति वनानिलेनोपनीतं निर्भर-विकसितेऽपि कानने अभिभूतान्यकुसुमपरिमलं विसर्पन्तम्, अतिसुरभितया अनुलिम्पन्तमिव पूरयन्तमिव तर्पयन्तमिव घ्राणेन्द्रियम्, अहमहमिकया मधुकरकुलैरनुबध्यमानम्, अना-घ्रातपूर्वममानुषलोकोचितं कुसुमगन्धमभ्यजिघ्रम्। कुतोऽय-मित्युपारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुम-गन्धेन मधुकरीवाकृष्यमाणा कौतुकतरलाभ्यधिकतरोपजात-नूपुरमणिझङ्काराकृष्टसरःकलहंसानि कतिचित् पदानि गत्वा

(क) शाखान्तर नर्त्तक जर्ज्जर कुसुमोपहार इति वा पाठः।

(ख) नाल इत्यधिकः पाठः।

(ग) निकर इत्यधिकः पाठः।

(घ) अत्र तु पुस्तकान्तरे सकल इत्यधिकः पाठो दृश्यते।

हरनयनहुताशनेन्धनीकृतमदनशोकविधुरं वसन्तमिव[१]तपस्यन्तम्, अखिलमण्डल[२]प्राप्त्यर्थमीशानशिरःशशाङ्कमिव धृतव्रतम्, अयुग्मलोचनं वशीकर्तुकामं काममिव सनियमम्, अतितेजस्वितया प्रचलतड़िल्लतापञ्जरमध्यगतमिव (क) ग्रीष्मदिवसं दिवसकरमण्डलोदरप्रविष्टमिव ज्वलनं (ख) ज्वालाकलापमध्यस्थितमिव विभाव्यमानम्, उन्मिषन्त्या बहुलबहुलया दीपकालोकपिङ्गलया देहप्रभया कपिलीकृतकाननं, कनकमयमिव तं प्रदेशं, कुर्वाणम्, रोचनारसलुलितप्रतिसर[३]समानसुकुमारपिङ्गल (ग) जटं पुण्यपताकायमानया सरस्वतीसमागमोत्कण्ठाकृतचन्दनलेखयेव भस्मललाटिकया बालपुलिनलेखयेव गङ्गाप्रवाहमुद्भासमानम्, अनेकशापभ्रूकुटिभवनतोरणेन भ्रूलताद्वयेन विराजितम्, अत्यायततया लोचनमयीं मालामिव ग्रथितामुद्वहन्तम्, सर्वहरिणैरिव

(क) प्रचलित तड़िल्लतापञ्जर गतमिव इति वा पाठः।

(ख) ज्वलदनल इति वा पाठः।

(ग) पुस्तकान्तरे पिङ्गल इत्येवन्नास्ति।

[१] हरलोचनदहनेन इन्धनीकृतस्य भस्मीकृतस्य मदनस्य शोकेन विधुरं कातरमतएव तपस्यन्तं तपश्चरन्तं वसन्तमिव।

[२] अखिलमण्डलस्य संपूर्णमण्डलस्य प्राप्त्यर्थं तत्रत्यचन्द्रस्य एकनामात्मतत्त्वेन संपूर्णता प्राप्याप्ता भवतीति बोध्यम्।

[३] प्रतिसरः विवाहादौ मङ्गलार्थं बध्यमानहस्तसूत्रम्।

दत्तलोचनशोभासंविभागम्, आयतोत्तुङ्गघ्राणवंशम्, अप्राप्तहृदयप्रवेशेन नवयौवनरागेणेव सर्वात्मना पाटलीकृताधररुचकम्,[१] अनुद्भिन्नश्मश्रुराजित्वादनास्वादितमधुकरावलीवलयपरिक्षेपविलासमिव बालकमलमाननं दधानम्, अनङ्गकार्मुकगुणेनेव कुण्डलीकृतेन तपस्तडागकमलिनीमृणालेनेव यज्ञोपवीतेनालङ्कृतम्, एकेन सनालबकुलफलाकारं कमण्डलुम्, अपरेण मकरकेतुविनाशशोकरुदिताया रतेरिव वाष्पजलविन्दुभिरारचितां स्फाटिकगुलिकाक्षमालिकां, करेण कलयन्तम्, अनेकविद्यापगासङ्गमावर्तनिभया नाभिमुद्रयोपशोभमानम्, अन्तर्ज्ञाननिराकृतस्य मोहान्धकारस्यापयानपदवीमिवाञ्जनरजोलेखाश्यामलां रोमराजिमुदरेण तनीयसा तनीयसीं बिभ्राणम्, आत्मतेजसा विजित्य सवितारमागृहीतेन परिवेशमण्डलेनेव मौञ्जमेखलागुणेन परिक्षिप्तजघनभागम् अभ्रगङ्गास्रोतोजलप्रक्षालितेन जरच्चकोरलोचनपुटपाटलकान्तिना मन्दारवल्कलेनोपपादिताम्बरप्रयोजनम्, अलङ्कारमिव ब्रह्मचर्य्यस्य, यौवनमिव(क)धर्मस्य, विलासमिव सरस्वत्याः स्वयम्बरपतिमिव सर्वविद्यानां, सङ्केतस्थानमिव सर्वश्रुतीनां, निदाघकालमिव साषाढं,[२] हिमसमयकाननमिव स्फुटितप्रि-

(क) आपनमिव इति वा पाठः।

[१] रुचकं भूषणम्।

[२] आषाढ़ेन पालाशदण्डेन आषाढ़मासेन च सहितम्।

यङ्गुमञ्जरीगौरं, [१]मधुमासमिव कुसुमधवलतिलकभूतिभूषितमुखम्, आत्मानुरूपेण सवयसा अपरेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतम्, अतिमनोहरं, स्नानार्थमागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां, वसन्तदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियः, मलयमारुतागमनार्थलाजाञ्जलिमिव मधुमासस्य, यौवनलीलामिव कुसुमलक्ष्म्याः, सुरतपरिश्रमस्वेदजलकणजालकावलीमिव रतेः, ध्वजचिह्नचामरपिच्छिकामिव मनोभवगजस्य, मधुकरकामुकाभिसारिकां, कृत्तिकातारास्तवकानुकारिणीम्, अमृतबिन्दुनिस्यन्दिनीमदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम्। (क) अस्याः परिभूतान्यकुसुमामोदो नन्वयं परिमल इति मनसा निश्चित्य, तं तपोधनयुवानमीक्षमाणाहमचिन्तयम्, "अहो! रूपातिशयनिष्पादनोपकरणकौशलस्याक्षीणता विधातुः, यत् त्रिभुवनाद्भुतरूपसम्भारं भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकरकेतुरुत्पादितः। मन्ये च सकलजगन्नयनानन्दकरं शशिबिम्बं विरचयता लक्ष्मीलीलाविलास(ख)भवनानि कमलानि सृजता प्रजापतिना प्रथममेतद्वाननाकारकरण-

(क) अत्र तु दृष्ट्वा च इत्यधिकः पाठः।

(ख) विलास इति वा पाठः।

[१] मञ्जरीव गौरं मञ्जर्या च गौरम्।

कौशलाभ्यास एव कृतः, अन्यथा किमिव हि सदृशवस्तुविरचनायाः कारणम् ? अलीकञ्चेदं, यथा किल सकलाः कलाः कलावतो बहुलपक्षे क्षीयमाणस्य सुषुम्णानाम्ना रश्मिना रविरापिबतीति, ताः खल्वस्य गभस्तयः समस्ता वपुरिदमाविशन्तीति, कुतोऽन्यथा रूपापहारिणि क्लेशबहुले तपसि वर्त्तमानस्येदं लावण्यमिति" विचिन्तयन्तीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती (क) नवयौवनसुलभः कुसुमायुधः कुसुमासवमद इव मधुकरीं परवशामकरोत्।

उच्छ्वसितैः सह विस्मृतनिमेषेण किञ्चिदामुकुलितपक्ष्मणा आजिह्मिततरलतरतारशारोदरेण[१]दक्षिणेन चक्षुषा सस्पृहमापिबन्तीव, किमपि याचमानेव, त्वदायत्तास्मीति वदन्तीव, अभिमुखं हृदयमर्पयन्तीव, सर्व्वात्मनानुप्रविशन्तीव, तन्मयतामिव गन्तुमीहमाना, मनोभवाभिभूतां त्रायस्वेति शरणमिवोपयान्ती, देहि मे हृदयेऽवकाशमित्यर्थितामिव दर्शयन्ती, "हाहा किमिदमसाम्प्रतमतिह्रेपणमकुलकुमारीजनोचितमिदं मया प्रस्तुतमिति" जानानाप्यप्रभवन्ती, करणानां, स्तम्भितेव लिखि-

---

(क) पक्षपातीव इति च पाठः।

[१] आजिह्मिता विकसिता अतएव तरलतरा अति[illegible]ला या तारा चक्षुःपुत्तलिका तया शारं श्वेत[illegible] रमभ्यन्तरं यस्य।

तेव, उत्कीर्णेव, संयतेव, मूर्च्छितेव, विष्टतेव, निष्पन्दसकला-वयवा, तत्कालाविर्भूतेनावष्टम्भेन [१] अकथितशिचितेन अना-ख्येयेन स्वसंवेद्येन[२]केवलम्। न विभाव्यते किं ? तद्रूपसम्पदा किं मनसा ? किं मनसिजेन ? किमभिनवयौवनेन ? किमनु-रागेण ? वोपदिश्यमाना, किमन्येनैव वा ? केनापि प्रकारेण अहमपि न जानामि कथं कथमिति तमतिचिरं व्यलोकयम्।

उत्क्षिप्य नीयमानेव तत्समीपमिन्द्रियैः, पुरस्तादाकृष्यमा-णेव हृदयेन, पृष्ठतः प्रेर्य्यमाणेव पुष्पधन्वना, कथमपि मुक्तप्रय-त्नमात्मानमधारयम्। अनन्तरञ्च मे तन्मदनेना(क)वकाशमिव दातुमाहितसन्ताना निरीयुः श्वासमरुतः। साभिलाषं हृदय-माख्यातुकाममिव स्फुरितमुखमभूत् कुचयुगलम्। स्वेदसलि-ललवलेखाचालितेवागलल्लज्जा। मकरध्वजनिशितशरनिकर-पातचस्तेवाकम्पत गात्रयष्टिः। तद्रूपातिशयं द्रष्टुमिव कुतूह-लादालिङ्गनलालसेभ्योऽङ्गेभ्यो निरगाद्रोमाञ्चजालकम्। अ-शेषतः स्वेदाम्भसा धौतस्तरणयुगलादिव हृदयमविशद्रागः।

आसीच्च मम "मनसि शान्तात्मनि दूरीकृतसुरतव्यति-

(क) मे ह्यन्तर्म्मदनेन इति वा पाठः।

[१] अवष्टम्भेन निश्चेष्टताप्रयोजकेन सात्विकस्तम्भेन।

[२] केवलं स्वसंवेद्येन आत्ममात्रसाक्षिकेण अतएवानाख्येयेन वक्तुमशक्येन।

करेऽस्मिन् जने मां निक्षिपता किमिदमनार्य्येणासदृशमारब्धं मनसिजेन। एवञ्च नामातिमूढ़हृदयमङ्गनाजनस्य यदनुरागविषययोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसाञ्च? क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिष्पन्दितानि? नियतमयं मामेवं मकरलाञ्छनेन विडम्ब्यमानामुपहसति मनसा। चित्रञ्चेदं, यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्त्तुम्। अन्या अपि कन्यकास्त्रपामपहाय स्वयमुपयाताः पतीन्, अन्या अप्यनेन दुर्विनीतेन मन्मथेनोन्मत्ततां नीता नार्य्यः' न पुनरहमेका यथा, कथमनेन क्षणेनाकारमात्रालोकनाकुलीभूतम् एवमस्वतन्त्रतामुपेत्यन्तःकरणम्। काले हि गुणाश्च दुर्निवारतामारोपयन्ति मदनस्य। सर्वथा यावदेव सचेतनास्मि, यावदेव च न परिस्फुटमनेन विभाव्यते मे मदनदुश्चेष्टितलाघवमेतत्, तावदेवास्मात् प्रदेशादपसर्पणं श्रेयः। कदाचिदनभिमतस्मरविकारदर्शनकुपितोऽयं शापाभिज्ञां करोति माम्, अदूरकोपा हि मुनिजनप्रकृतिः" इत्यवधार्य्यापसर्पणाभिलाषिण्यहमभवम्। अशेषजनपूजनीया चेयं जातिरिति कृत्वा तद्वदनाकृष्टदृष्टिप्रसरम्, अचलितपक्ष्ममालम् अदृष्टभूतलम्, ईषदुल्लसितकर्णपल्लवोन्मुक्तकपोलमण्डलम्, आलोलालकलतालसत्कुसुमावतंसम् अंसदेशदोलायितमणिकुण्डलम्, अस्मै प्रणाममकरवम्।

अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया भगवतो

मनोभुवः, मदजननतया च मधुमासस्य, अतिरमणीयतया च तस्य प्रदेशस्य, अविनयबहुलतया चाभिनवयौवनस्य, चञ्चलप्रकृतितया चेन्द्रियाणां, दुर्निवारतया च विषयाभिलाषाणां, चपलतया च मनोवृत्तेः, तथा भवितव्यतया च तस्य तस्य वस्तुनः, किं बहुना मम भाग्यदौरात्म्यादस्य चेदृशस्य क्लेशस्य विहितत्वात्तमपि मद्विकारदर्शनापहृतधैर्य्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः। तदा तस्यापि अभिनवागतं मदनं प्रत्युद्गच्छन्निव रोमोद्गमः प्रादुरभवत्। मत्सकाशमभिप्रस्थितस्य मनसो मार्गमिवोपदिशद्भिः पुरः प्रवृत्तं श्वासैः। वेपथुगृहीता व्रतभङ्गभीतेवाकम्पत करतलगताक्षमाला। द्वितीयेव कर्णावसक्तकुसुममञ्जरी कपोलतलासङ्गिनी समदृश्यत स्वेदसलिलशीकरजालिका। मद्दर्शनप्रीतिविस्तारितस्य चोत्तानतारकस्य पुण्डरीकमयमिव तमुद्देशमुपदर्शयतो लोचनयुगलस्य विसर्पिभिरंशुसन्तानैर्यदृच्छयाच्छोदसलिलमपहाय विकचकुवलयवनैरिव गगनतलसमुत्पतितैररुध्यन्त दश दिशः। तया तु तस्यातिप्रकटया विकृत्या द्विगुणीकृतमदनावेशा तत्क्षणमश्मवर्णनयोग्यां [१] कामप्यवस्थामन्वभवम्। इदञ्च मनस्यकरवम्, "अनेकसुरतसमागमलास्यलीलोपदेशोपाध्यायो मकरकेतुरेव विलासानुपदिशति, अन्यथा विविधरसासङ्गललिते-

[१] अश्मवर्णनयोग्याम् अश्मनः प्रस्तरस्येव वर्णनयोग्यां निश्चेष्टताम्।

स्वोदृशेषु व्यतिकरेष्वप्रविष्टबुद्धेरस्य जनस्य कुत ? इवेयमनभ्यस्ताकृतीरतिरसनिष्यन्दमिव वर्षन्ती, चरन्ती अमृतमिव, मदमुकुलितेव, खेदालसेव, निद्राजड़ेव, आनन्दभरमन्थरतरलतरसञ्चारिणी, अनिभृतभ्रूलतालासिनी दृष्टिः। कुत ? इदमतिनैपुणं, यच्चक्षुषैवानक्षरमेवमन्तर्गतो हृदयाभिलाषः कथ्यते"।

प्राप्त(क)प्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्, "भगवन्! किमभिधानः, कस्य वायं तपोधनस्य युवा, किन्नाम्नस्य तरोरियमनेनावतंसीकृता कुसुममञ्जरी ? जनयति हि मे मनसि महत् कौतुकमस्याः समुत्सर्पन्नसाधारणसौरभोऽयमनाघ्रातपूर्वो गन्ध इति"। स तु मानीषद्विहस्याब्रवीत्, "बाले! किमनेन पृष्टेन प्रयोजनम्? अथ कौतुकमावेदयामि श्रूयताम्।

अस्ति खलु सकलत्रिभुवनप्रख्यातकीर्त्तिरत्युदारतपाः सुर(ख)सिद्धवृन्दवन्दित(ग)चरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम। तस्य भगवतः सुरासुर(घ)लोकसुन्दरीहृदयानन्दकरम् अशेषत्रिभुवनसुन्दरम् अतिशयितनलकूवरं

(क) लब्धप्रसरेति वा पाठः।

(ख) सुरासुरेति वा पाठः।

(ग) मौलिलालितेति वा पाठः।

(घ) सकलेत्यधिकः क्वचित् पाठः।

रूपमासीत्। स कदाचिद्देवतार्चनकमलान्युद्धर्त्तुम् ऐरावतमदजलविन्दुबद्धचन्द्रक[१]शतखचितजलां हरहसितस्रोतसं, (क) मन्दाकिनीमवततार। अवतरन्तञ्च तं तदा कमलवनेषु सततसन्निहिता विकचसहस्रपत्रपुण्डरीकोपविष्टा देवी (ख) लक्ष्मीर्ददर्श। तस्यास्तु तमवलोकयन्त्याः प्रेममन्दमुकुलितेनानन्दवाष्पभरतरङ्गतरलतारेण लोचनयुगलेन रूपमास्वादयन्त्या, जृम्भिकारम्भमन्थरमुखविन्यस्तहस्तपल्लवाया, मन्मथविकृतं मन आसीत्। आलोकनमात्रेण च समासादितसुरतसमागमसुखायास्तस्मिन्नेवासनीकृते पुण्डरीके कृतार्थता आसीत्। तस्माच्च कुमारः समुदपादि। ततस्तमुत्सङ्गेनादाय सा "भगवन्! गृहाण तवायमात्मज" इत्युक्त्वा तस्मै श्वेतकेतवे ददौ। असावपि बालजनोचिताः सर्वाः क्रियाः कृत्वा तस्य पुण्डरीकसम्भवतया तदेव पुण्डरीक इति नाम चक्रे। प्रतिपादितव्रतञ्च तमागृहीतसकलविद्याकलापमकार्षीत्। सोऽयम्।

इयञ्च सुरासुरैर्मथ्यमानात् क्षीरसागरादुद्गतः पारिजातनामा पादपः, तस्य मञ्जरी। यथा चैषा व्रतविरुद्धमस्य

(क) हरहसिततोयामितीति वा पाठः।

(ख) कमलवदनेति वा पाठः।

[१] चन्द्रकं जले घृतादिस्निग्धद्रव्यपातेन झटिति उन्मिषन् चन्द्राकारः पदार्थभेदः।

श्रवणसंसर्गमासादितवती, तदपि कथयामि। अद्य चतुर्द्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितुममरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्निर्गत्य च साक्षान्मधुमासलक्ष्मीदत्तललितहस्तावलम्बया बकुलमालिकामेखलया पारिजातकुसुमपल्लवग्रथिताभिराजानुलम्बिनीभिः कण्ठमालिकाभिर्निरन्तराच्छादितविग्रहया नवचूताङ्कुरकर्णपूरया पुष्पासवपानमत्तया नन्दनवनदेवतया पारिजातकुसुममञ्जरीमिमामादाय प्रणम्याभिहितः, "भगवन्! सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः सुसदृशोऽयमलङ्कारः प्रसादीक्रियतामियमवतंसविलासदुर्ल्ललिता समारोप्यतां श्रवणशिखरं, व्रजतु सफलतां जन्म पारिजातस्य" इत्येवमभिदधानाच्च अयमात्मरूप(क)स्तुतिवादत्रपावनमितविलोचनस्तामनादृत्यैव गन्तुं प्रवृत्तः। मया तु तामनुयान्तीमालोक्य, "को दोषः? सखे! क्रियतामस्याः प्रणयपरिग्रह" इत्यभिधाय बलादियमनिच्छतोऽप्यस्य कर्णपूरीकृता। तदेतत् कार्त्स्न्येन योऽयं, यस्य चायं, या चेयं, यथा चास्य श्रवणशिखरं समारूढ़ा तत्सर्वमावेदितम्"।

इत्युक्तवति तस्मिन् स तपोधनयुवा किञ्चिदुपदर्शितस्मितो माम(ख)वादीत्, अयि कुतूहलिनि! किमनेन प्रश्नायासेन?

(क) पुस्तकान्तरे रूपेति नास्ति।

(ख) पुस्तकान्तरे मामिति नास्ति।

यदि "रुचित(क)सुरभिपरिमला[१](ख)गृह्यतामियम्" इत्युक्त्वा समुपसृत्यात्मीयात् श्रवणादपनीय कलै[२]रलिकुलक्वणितैः प्रारब्धरतिसमागमप्रार्थनामिव मदीये श्रवणपुटे तामकरोत्। मम तु तत्करतलस्पर्शलोभेन तत्क्षणमपरमिव पारिजातकुसुमावतंसस्थाने हृदयमासीत्। स च मत्कपोलतलस्पर्शसुखेन तरलीकृताङ्गुलिजालकात् करतलादक्षमालां लज्जया सह गलितामपि नाज्ञासीत्। अथाहं तामसंप्राप्तामेव भूतलमक्षमालां गृहीत्वा सलीलं तद्भुजपाशसंदानित [२] कण्ठग्रहसुखमिवानुभवन्ती दर्शितापूर्व्वहारलतालीलां कण्ठाभरणतामनयम्।

इत्यम्भूते च व्यतिकरे छत्रग्राहिणी मामवोचत् "भर्तृदारिके! स्नाता देवी, प्रत्यासीदति गृहगमनकालः, तत्क्रियतां मज्जनविधिरिति।" अहन्तु तेन तस्या वचनेन नवग्रहा [३] करिणीव प्रथमाङ्कुशपातेन अनिच्छयापि कथं कथमपि समाकृष्यमाणा तन्मुखलावण्यामृतपङ्कमग्नामिव कपोलपुलककण्टकजालकल-

(क) पुस्तकान्तरे रुचितेति नास्ति।

(ख) अत्र तु तदत्यधिकः क्वचित् पाठो दृश्यते।

[१] रुचितसुरभिपरिमला अभिलषितसुगन्धा।

[२] कलैर्मधुराव्यक्तैः।

[२] सन्दानितस्य बद्धस्य कण्ठस्य ग्रहसुखमिव।

[३] नव अभिनवः ग्रहः ग्रहणं बन्धनं यस्याः।

शामिव, मदनशरशलाकाकीलितामिव, सौभाग्यगुणस्यूतामिव, अतिक्लच्छ्रेण दृष्टिमाकृष्य स्नातुमुदचलम्। उच्चलितायाञ्च मयि द्वितीयो मुनिदारकस्तथाविधन्तस्य धैर्य्यस्खलितमालोक्य किञ्चित्प्रकटितप्रणयकोप इवावादीत्।

"सखे! पुण्डरीक! नैतदनुरूपं भवतः, क्षुद्रजनक्षुण्ण एष मार्गः, धैर्य्यधनाहि साधवः, किम्? यः कश्चित् प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि, कुतस्तवापूर्वोऽयमद्येन्द्रियोपप्लवः? येनास्येवं कृतः, क्व ते तद्धैर्य्यम्? क्वासाविन्द्रियजयः? क्व तद्वशित्वम् चेतसः? क्व सा प्रशान्तिः? क्व तत् कुलक्रमागतं ब्रह्मचर्य्यम्? क्व सा सर्वविषयनिरुत्सुकता? क्व ते गुरूपदेशाः? क्व तानि श्रुतानि? क्व ता वैराग्यबुद्धयः? क्व तदुपभोगविद्वेषित्वम्? क्व सा सुखपराङ्मुखता? क्वासौ तपस्यभिनिवेशः? क्व सा संयमिता? क्व सा भोगानामुपर्य्यरुचिः? क्व तद्यौवनानुशासनम्? सर्वथा निष्फला प्रज्ञा, निर्गुणो धर्मशास्त्राभ्यासः, निरर्थकः संस्कारः, निरुपकारको गुरूपदेशविवेकः, निष्प्रयोजना प्रबुद्धता, निष्कारणं ज्ञानम्, यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषीक्रियन्ते, प्रमादैश्चाभिभूयन्ते। कथम्? करतलाद्गलितामपहृतामक्षमालामपि न लक्षयसि? अहो विगतचेतनत्वम्, अपहृता नामेयम् [१] इदमपि

---

[१] इयमक्षमाला अपहृता नाम अपहृतैव।

तावदपह्रियमाणमनया अनार्य्यया निवार्य्यतां हृदयमिति"।

एवमभिधीयमानस्य तेन किञ्चिदुपजातलज्ज इव प्रत्यवादीत्, "सखे! कपिञ्जल! किं मामन्यथा सम्भावयसि? "नाहमेवमस्याद्दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिम" मित्यभिधाय अलीककोपकान्तेन प्रयत्नविरचितभीषणभ्रुकुटिभूषणेन चुम्बनाभिलाषस्फुरिताधरेण मुखेन्दुना मामवदत्, "चपले! प्रदेशादस्मादिमामक्षमालामदत्त्वा पदात् पदमपि न गन्तव्यमिति"। तच्च श्रुत्वाहमात्मकण्ठादुन्मुच्य मकरध्वजलास्यारम्भलीलापुष्पाञ्जलिमेकावलीम् "भगवन् गृह्यतामक्षमालेति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारितपाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवातरम्। उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम्। गत्वा च प्रविश्य कन्यान्तःपुरं, ततः प्रभृति तद्विरहविधुरा किमागतास्मि? किं तत्रैव स्थितास्मि? किं परिवृतास्मि? किमेकाकिन्यस्मि? किं तूष्णीमस्मि? किं प्रस्तुतालापास्मि? किं जागर्मि,? किं सुप्तास्मि? किं रोदिमि? किं न रोदिमि? किं दुःखमिदम्? किं सुखमिदम्? किम् उत्कण्ठेयम्? किं व्याधिरयम्, किं व्यसनमिदम्? किम् उत्सवोऽयम्? किं दिवस एषः, किं निशेयम्? कानि रम्याणि? कान्यरम्याणि? इति सर्वं नावगच्छम्। अविज्ञातमदनवृत्तान्ता च क्व ग-

च्छामि? (क) किं शृणोमि? किं पश्यामि? किमालपामि? कस्य कथयामि? कोऽस्य प्रतीकार? इति सर्वञ्च नाज्ञासिषम्। केवलमारुह्य कुमारीपुरप्रासादं, विसर्ज्य च सखीजनं, द्वारि निवारिताशेषपरिजनप्रवेशा सर्वव्यापारानुत्सृज्य एकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी तामेव दिशं तद्सनाथतया, प्रसाधितामिव, कुसुमितामिव, महारत्ननिधानाधिष्ठितामिव, अमृतरससागरपूरप्लावितामिव, पूर्णचन्द्रोदयालङ्कृतामिव, दर्शनसुभगामीक्षमाणा, तस्माद्दिगन्तरादागच्छन्तमनिलमपि, वनकुसुमपरिमलमपि, शकुनिध्वनिमपि तद्वार्त्तां प्रष्टुमीहमाना, तद्वल्लभतया तपःपरिक्लेशायापि, स्पृहयन्ती, तत्प्रीत्येव गृहीतमौनव्रता, स्मरजनित पक्षपाता, च तत्परिग्रहान्मुनिवेशस्याग्राम्यताम्,[२]तदास्पदतया यौवनस्य चारुतां, तच्छ्रवणसम्पर्कात् पारिजातकुसुमस्य मनोहरतां, तन्निवासात् सुरलोकस्य रम्यतां, तद्रूपसम्पदा कुसुमायुधस्य दुर्जयतामध्यारोपयन्ती, [१] दूरस्थापि कमलिनीव सवितुः, सागरवेलेव चन्द्रमसः, मयूरीव जलधरस्य, तस्यैवाभिमुखी, तथैव तां तद्विरहातुरजीवितोद्गमरक्षावलीमिवाक्षा-

---

(क) क्वचित् किं करोमि इत्यधिकः पाठः।

[१] अग्राम्यताम् असौन्दर्य्यम्।

[२] अध्यारोपयन्ती विचारयन्ती।

वलीं [१] कण्ठेनोद्वहन्ती, तथैव च तया प्रस्तुततद्रहस्यालापयेव कर्णलग्नया पारिजातमञ्जर्य्या तथैव च तेन तत्करतलस्पर्श-सुखजन्मना कदम्बमुकुलकर्णपूरायमाणेन रोमाञ्चजालेन कण्टकितैककपोलफलका निष्पन्दम् (क) अतिष्ठम्।

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम ययैव सह गता स्नातुमासीत्। सा पश्चाच्चिरादिवागत्य तथावस्थितां शनैर्मामवादीत् "भर्तृदारिके! यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुरियमवतंसीकृता सुरतरुकुसुममञ्जरी स तस्माद्द्वितीयादात्मनो रक्षन् दर्शनम्, अतिनिभृतपदः कुसुमितलतासन्तानगहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्टतो भर्तृदारिकामुद्दिश्याप्राक्षीत् "बालिके! केयं कन्यका कस्य वापत्यं किमभिधाना क्व वा गच्छतीति"। मयोक्तम् "एषा खलु भगवतः श्वेतभानोरंशुभूतायामप्सरसि गौर्य्यां समुत्पन्ना देवस्य सकलगन्धर्व्वकुल मुकुटमणिशलाकाशिखरोल्लेखमसृणितचरणनखचक्रस्य पादपीठीकृतलक्ष्मीकरकमलस्य गन्धर्व्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं हेमकूटमचलवरमभिप्रस्थितेति" कथिते च मया किमपि चिन्तयन् मुहूर्त्तमिव तूष्णीं

(क) निष्कम्पमिति वा पाठः।

[१] अच्छावलीमच्छमालाम्।

स्थित्वा विगतनिमेषेण चक्षुषा चिरमभिवीक्षमाणो मां सानुनयमर्थितामिव दर्शयन् पुनराह "बालिके ! कल्याणिनी तवाविसंवादिन्यचपला बालभावेऽप्याकृतिरियं तत्करोषि मे वचनमेकमभ्यर्थ्यमानेति"। ततो मया सविनयमुपरचिताञ्जलिपुटया दर्शितादरमभिहितः "भगवन् कस्मात् एवमभिधत्से काहं, महात्मानः सकलत्रिभुवनपूजनीया(क)स्त्वादृशाः" पुण्यैर्विना निखिलकल्मषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयन्ति किं पुनराज्ञां ? तद्विस्रब्धमादिश्यतां कर्त्तव्यम्, अनुगृह्यतामयं जन इति"। एवमुक्तश्च मया सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्या मामभिनन्द्य निकटवर्त्तिनस्तमालपादपात् पल्लवमादाय निष्पीड्य तटशिलातले तेन गन्धगजमदसुरभिपरिमलेन रसेन उत्तरीयवल्कलैकदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्य इयं पत्रिका "त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकिन्यै देये"त्यभिधायार्पितवान् इत्युक्त्वा च सा ताम्बूलभाजनादाकृष्य तामदर्शयत्। अहन्तु तेन तत्सम्बन्धिनालापेन शब्दमयेनापि स्पर्शसुखमिवान्तर्जनयता, श्रोत्रविषयेणापि रोमोद्गमानुमितसर्व्वाङ्गानुप्रवेशिना, मदनावेशमन्त्रेणेवाविश्यमाना, तस्याः करतलादादाय वल्कलपट्टिकां तस्यामिमामभिलिखितामार्य्यामपश्यम्।

(क) सकलत्रिभुवनाभिपूजिता इति वा पाठः।

"दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे।
हंस इव दर्शिताशो मानसजन्मा [१] त्वया नीतः।"

अनया च मे दृष्टया दिङ्मोहभ्रान्त्येव प्रनष्टवर्त्मनो, बहुलनिशयेवान्धस्य, जिह्वोच्छित्त्येव मूकस्य, इन्द्रजालिकपिच्छिकयेवातत्त्वदर्शिनः, ज्वरप्रलापप्रवृत्त्येवासम्बद्धभाषिणः दुष्टनिद्रयेव विषविह्वलस्य, लोकायतिकविद्ययेवाधर्म्मरुचेः मदिरयेवोन्मत्तस्य, दुरावेशक्रिययेव पिशाचग्रहस्य, दोषविकारोपचयः सुतरामक्रियत, (क) स्मरानुरक्तस्य मे मनसः, येनाकुलीक्रियमाणा सरिदिव पूरेण विह्वलतामभ्यागमम्। ताञ्च द्वितीयदर्शनेन कृतमहापुण्यामिव, अनुभूतसुरलोकवासामिव, देवताधिष्ठितामिव, लब्धवरामिव, पीतामृतामिव, समासादितत्रैलोक्यराज्याभिषेकामिव, मन्यमाना सततसन्निहितामपि दुर्लभदर्शनामिव, अतिपरिचितामप्यपूर्वामिव, सादरमाभाषमाणा पार्श्वस्थामपि, सर्वलोकस्योपर्य्यवस्थितामिव; पश्यन्ती कपोलयोरलकलताभङ्गेषु [२] च सोपग्रहं स्पृशन्ती विपरीत-

---

(क) अजायत इति वा पाठः।

[१] विससितया मृणालशुभ्रया मुक्तालतया एकावल्या विप्रलोभ्यमानः प्रतार्य्यमाणः।

मानसं सरोविशेषः चित्तञ्च तज्जन्मा कामः, तत्र जातः हंसश्च।

[२] अलकलताभङ्गेषु अलकलताखण्डेषु कर्मणोऽधिकरणत्वविवक्षया सप्तमी सोपग्रहं सानुकूलं तां तरलिकां स्पृशन्ती

मित्र परिजनस्वामिसम्बन्धमुपदर्शयन्ती "तरलिके! कथय(क) कथं स त्वया (ख) दृष्टः, किं किमभिहितासि तेन कियन्तं कालमवस्थितासि तत्र कियदनुसरन्नस्मानसावागत इति" पुनः पुनः पर्य्यपृच्छम्। अनयैव च कथया तया सह तस्मिन्नेव प्रासादे तथैव प्रतिषिद्धाशेषपरिजनप्रवेशा दिवसमत्यवाहयम्।

अथ मदीयेनेव हृदयेन कृतरागसंविभागे, लोहितायति, गगनतलोपान्तावलम्बिनि, रविविम्बे, सरागदिवसकरदर्शनानुरक्तायां, कृतकमलशयनायामनङ्गातुरायामिव, पाण्डुतां व्रजन्त्यामातपलक्ष्म्यां, गैरिकगिरिसलिलप्रपातपाटलेषु कमलवनेभ्यः समुत्थाय वनगजयूथेष्विव पुञ्जीभवत्सु, भास्करकिरणेषु, गगनावतारविश्रामलालसानां रविरथवाजिनां हर्षहेषारवप्रतिशब्दकेन सह विशति मेरुगिरिगह्वरं, वासरे मुकुलितरक्तपङ्कजपुटप्रविष्टमधुकरावलीषु रविविरहमूर्च्छान्धकारितहृदयास्विव प्रारब्धनिमीलनासु पद्मिनीषु, ग्रासीकृतसामान्यमृणाललताविवरसंक्रामितानीव परस्परहृदयान्यादाय विघटमानेषु रथाङ्गनाम्नां युगलेषु, सा छत्रग्राहिणी समागत्याकथयत् "भर्तृदारिके! तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति कथयति चाक्षमालामुपयाचितुमागतोऽस्मीति।"

(क) कथय कथय इति वा पाठः।

(ख) त्वयाऽसाविति वा पाठः।

अहन्तु मुनिकुमारनामग्रहणादेव स्थानस्थितापि गतेव द्वारदेशं, समुपजाततदागमनाशङ्का समाहूयान्यतमं कञ्चुकिनं "गच्छ प्रवेश्यताम्" इत्यादिश्य प्राहिणवम्। अथ मुहूर्त्तादिव तं तस्य रूपस्येव यौवनं, यौवनस्येव मकरकेतनं, मकरकेतनस्येव वसन्तसमयं, वसन्तसमयस्येव दक्षिणानिल,मनुरूपं सखायमृषि-कुमारकं कपिञ्जलनामानं, जराधवलस्य कञ्चुकिनोऽनुमार्गेण चन्द्रातपस्येव बालातपमागच्छन्तमपश्यम्। अन्तिकमुपगतस्य चास्य पर्य्याकुलमिव, सविषादमिव, शून्यमिव, अर्थिनमिवा-न्तर्गताकूतमाकारमलक्षयम्। उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपाहरम्। उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावपमृज्य चोत्तरीयांशुकपल्लवेनाव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम्। अथ मुहूर्त्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां मत्समीपोपविष्टायां तरलिकाया-ञ्चक्षुरपातयत्। अहन्तु विदिताभिप्राया दृष्ट्वैव, "भगवन्नव्य-तिरिक्तेयमस्मच्छरीरात् अशङ्कितमभिधीयताम्" इत्यवोचम्।

एवमुक्तश्च मया कपिञ्जलः प्रत्यवादीत् "राजपुत्रि! किं ब्रवीमि(क)वागेव मे नाभिधेयविषयमवतरति त्रपया। क्व कन्द-मूलफलाशी शान्तो वनवासनिरतो मुनिजनः, क्व वायमशान्त-

---

(क) ब्रवीमीति वा पाठः।

जनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलास-सङ्कटो रागप्रायः प्रपञ्चः, सर्वमेवानुपपन्नमालोकय किमारब्धं देवेन। अयत्नेनैव खलूपहासास्पदतामोश्वरो नयति जनम्। न जाने किमिदं वल्कलानां सदृशम्? उताहो जटानां समुचिम्? किं तपसोऽनुरूपम्? आहोस्विद्धर्मकर्मोपदेशाङ्गमिदम्? अपूर्वेयं विड़म्बना केवलमवश्यकथनीयमिदम् अपरउपायो न दृश्यते, अन्या प्रतिक्रिया नोपलभ्यते, अन्यच्छरणं नालोक्यते, अन्या गतिर्नास्ति, अकथ्यमाने च महाननर्थोपनिपातोजायते प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति" कथयामि। "अस्ति भवत्याः समक्षमेव स मया तथानिष्ठुरमुपदर्शितकोपेनाभिहितस्तथाचाभिधाय परित्यज्य तं तस्मात् प्रदेशादुपजातमन्युरुत्सृष्टकुसुमावचयोऽन्यं प्रदेशमगमम्। अपयातायां भवत्यां मुहूर्त्तमिव स्थित्वा एकाकी किमयमिदानीमाचरतोति सञ्जातवितर्कः प्रति निवृत्त विटपान्तरितविग्रहस्तं प्रदेशं व्यलोकयम्। यावत्तत्र तं नाद्राक्षम् आसीच्च मे मनस्येवं, "किन्नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन् गतोभवेत्? गतायाञ्च तस्यां लब्धचेतनो लज्जया न शक्नोति मे दर्शनपथमुपगन्तुम्, आहोस्वित् कुपितः परित्यज्य मां गतः, ? उतान्वेषमाणो मामेव प्रदेशमन्यमितः समाश्रितः? स्यादिति" एवं विकल्पयन् कञ्चित्कालमतिष्ठम्। तेन तु जन्मतःप्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमानः

पुनरचिन्तयम् "स कदाचिद्धैर्य्यस्खलनविलक्षः [१] किञ्चिद-निष्टमपि समाचरेत् नहि किञ्चिन्न (क) क्रियते क्रिया तन्न युक्तमेनमेकाकिनं कर्त्तुम्" इत्यवधार्य्यान्वेष्टुमादरमकरवम्। अन्वेषमाणश्च यथा यथा नापश्यं तम्, तथा तथा सुहृत्-स्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानः तरुलता(ख)-गहनानि, चन्दनवीथिकाः, लता-मण्डपान्, (ग) सरःकूलानि (घ) च वीक्षमाणो निपुणमितस्ततोदत्तदृष्टिः सुचिरं व्यचरम्।

अथैकस्मिन् सरःसमीपवर्त्तिनि निरन्तरतया कुसुम-मय इव, मधुकरमय इव परभृतमय इव, मयूरमय इवा-तिमनोहरे वसन्तजन्मभूमीभूते लतागहने, कृतावस्था-नम्, उत्सृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तम्भितमिवोपरतमिव, प्रसुप्तमिव, योगसमाधिस्थमिव, निश्चलमपि, स्वधर्म्माच्चलितम् [२] एकाकिनमपि मन्मथा-

(क) किञ्चित् यन्नेति पाठः।

(ख) अत्र तु वनेत्यधिकः पाठः।

(ग) मण्डपिकाः इति वा पाठः।

(घ) सरस्तीराणीति वा पाठः।

[१] विलक्षः लज्जायुक्तः।

[२] चलितम् भ्रष्टम्। चलनाचलनयोर्विरोधः तत्परिहारस्तु भ्रंशपरतया।

धिष्ठितम् [१] सानुरागमपि [२] पाण्डुतामावहन्तम्, शून्यान्तःकरणमपि [३] हृदयनिवासिदयितम्, तूष्णीकमपि [४] कथितमदनवेदनातिशयम्, शिलातलोपविष्टमपि मरणे व्यवस्थितम् [५] शापप्रदानभयादिवादत्तदर्शनेन कुसुमायुधेन सन्ताप्यमानम्, अतिनिष्पन्दतया हृदयनिवासिनीं प्रियां द्रष्टुमन्तःप्रविष्टैरिवासह्यसन्तापसन्त्रासप्रलीनैरिव मनःक्षोभप्रकुपितैरिव उन्मुच्य गतैरिन्द्रियैः शून्यीकृतशरीरं, निष्पन्दनिमीलितेनान्तर्ज्वलन्मदनदहनधूमाकुलिताभ्यन्तरेणेव पक्ष्मान्तरविवरवान्तानेकधारमनवरतमोचनयुगलेन वाष्पजलदुर्द्दिनमुत्सृजन्तम्, आलोहिनीमधरप्रभामनङ्गाग्नेः प्रदहता

---

[१] एकाकिनमसहायम्। मन्मथाधिष्ठितत्वेनासहायत्वविरोधः।

[२] रक्तवर्णस्य पाण्डुत्वे विरोधः, अनुरागवत्त्वात् तत्परिहारः।

[३] विषयशून्यान्तःकरणत्वेऽपि प्रियाक्रान्तमनस्त्वात् विरोधः। कान्तान्तरविषयशून्यत्वेन तत्परिहारः।

[४] तुष्णीकम् मौनावलम्बिनम् कथितेन भावविशेषेण सूचितमदनवेदनमित्यर्थस्तेन कथनाकथनयोर्विरोधे सूचनपरतया परिहारः।

[५] मरणे व्यवस्थितम् मरणे कृतनिश्चयम् उपविष्टस्य मरणासम्भवात् विरोधः अध्यवसायपरत्वेन तत्परिहारः।

हृदयम् ऊर्द्धसंसर्पिणीं शिखामिवादाय [१] निष्पतद्भिरुच्छ्वासैस्तरलीकृतासन्नलताकुसुमकेशरम्, वामकपोलशयनीकृतकरतलतया समुत्सर्पद्भिरमलैर्नखांशुभिर्विमलीकृतमच्छाच्छचन्दनरसरचितललाटिकमिव [२] ललाटमुद्वहन्तम् अचिरापनीतपारिजातकुसुममञ्जरीकर्णपूरतया अशेषपरिमलामोदलोभोपसर्पिणा कलविरुतच्छलेन मदनसम्मोहनमन्त्रमिव जपता मधुकरकुलेन सनीलोत्पलमिव सतमालपल्लवमिव श्रवणदेशं दधानम् उत्कण्ठाज्वररोमाञ्चव्याजेन प्रतिरोमकूपनिपतितानां मदनशराणां कुसुमशरकेशरशल्यशकलनिकरमिवाङ्गलग्नं बिभ्राणं, दक्षिणकरेण च स्फुरितकिरणनिकरां करतलस्पर्शसुखकण्टकितामिव मुक्तावलीमविनयपताकामुरसि धारयन्तं मदनवशीकरणचूर्णेनेव कुसुमरेणुना तरुभिराहन्यमानम्, आत्मरागमिव संक्रामयद्भिरासन्नैरनिलवलितैरशोकपल्लवैः स्पृश्यमानं, सुरताभिषेकसलिलैरिवाभिनवपुष्पस्तवकमधुशीकरैर्वनश्रियाभिषिच्यमानम्, अलिनिवहनिपीयमानपरिमलैरुपरि पतद्भिश्चम्पककुड्मलैस्तप्तशल्यकैरिव सधूमैः (क) कुसुमशरेण

(क) संतप्तशल्यशरैरिव सधूमैरिति वा पाठः।

[१] हृदयं प्रदहतः मदनाग्नेः ऊर्द्धसंसर्पिणीं शिखामिव आलोहिनीम् ईषद्रक्तां प्रभामादाय निष्पतद्भिः उद्गच्छद्भिः उच्छ्वासैरित्यन्वयः।

[२] ललाटिका ललाटभूषणविशेषः।

साद्यमानम् अतिबहलवनामोदमत्तमधुकरनिकरझङ्कारनिस्वनैर्हुङ्कारैरिव दक्षिणानिलेन निर्भर्त्स्यमानं, मदकलकोकिलकुलकोलाहलैर्वसन्तजयशब्दकलकलैरिव मधुमासेनाकुलीक्रियमाणं, प्रभातचन्द्रमिव पाण्डुतया परिगृहीतं, निदाघगङ्गाप्रवाहमिव कृशिमानमागतम्,(क)अन्तर्गतानलं चन्दनविटपमिव म्लायन्तम्, अन्यमिवादृष्टपूर्वमिवापरिचितमिव, जन्मान्तरमिवोपगतं, रूपान्तरेणेव परिणतम्, आविष्टमिव, [१] महाभूताधिष्ठितमिव, ग्रहगृहीतमिवोन्मत्तमिव, छलितमिवा-[२]न्धमिव, बधिरमिव, मूकमिव, विलासमयमिव, मदनमयमिव, परायत्तचित्तवृत्तिं परां कोटिमधिरूढं मन्मथावेशस्य, अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम्।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन हृदयेनाचिन्तयम् "एवंनामायमतिदुर्विषयवेगो मकरकेतुः येनानेन क्षणेनायमीदृशावस्थान्तरमप्रतीकारमुपनीतः कथमेवमेकपदेव्यर्थीभवेदेवंविधो ज्ञानराशिः? अहोवत महच्चित्रं तथा नामायमा शैशवाद्धीरप्रकृतिरस्खलित(ख)वृत्तिर्मम चान्येषाञ्च मुनिकुमारकाणां स्पृहणीयचरित

(क) आपगतमिति वा पाठः।

(ख) अत्र तु चित्तेत्यधिकः पाठः।

[१] परपुरुषदेहप्रवेशाभिज्ञडाकिन्यादिभिः प्रविष्टमिव।

[२] छलितं प्रतारितमन्यथाभूतस्यान्यरूपेण बोधितमित्यर्थः।

आसीत्, अद्य तु इतर इव [१] परिभूय ज्ञानम्, अविगणय्य तपःप्रभावम्, उन्मूल्य गाम्भीर्य्यं मन्मथेन जड़ीकृतः, सर्व्वथा दुर्लभं यौवनमस्खलितमिति[२]। उपसृत्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्य अंसदेशावसक्तपाणिस्तम(क)नुन्मीलितलोचनमेव "सखे! पुण्डरीक! कथय किमिदमित्यपृच्छम्। अथ सुचिरसम्मीलनाल्लग्नमिव कथमपि प्रयत्नेनानवरतरोदनवशादुपजातारुणभावमश्रुजलपूरप्लावितम् उत्कुपितमिव, सवेदनमिव स्वच्छांशुकान्तरितरक्तकमलवनच्छायं चक्षुरुन्मील्यमन्थरया(ख) दृष्ट्या सुचिरं विलोक्य माम् आयततरं निश्वस्य लज्जाविशीर्य्यमाणविरलाक्षरं "सखे! कपिञ्जल! विदितवृत्तान्तोऽपि किं? मां पृच्छसीति कृच्छ्रेण शनैरवदत्। अहन्तु तदाकर्ण्य तदवस्थयैवाप्रतीकारविकारोऽयं तथापि सुहृदा सुहृदसन्मार्गप्रवृत्तौ यावच्छक्तितः सर्व्वात्मना निवारणीय इति मनसावधार्य्याब्रुवम्।

(क) पाणितलमिति वा पाठः।

(ख) मन्थर मन्थरया इति वा पाठः।

[१] इतरः नीच इव।

[२] यौवनमस्खलितमिति सर्व्वदा दुर्लभमित्यन्वयः। प्राप्ते यौवनं दैवगत्यैव स्वायत्तं भवतीति भावः।

"सखे! पुण्डरीक! सुविदित(क)मेतन्मम केवलमिदमेव पृच्छामि यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टम्? उत धर्म्मशास्त्रपठितम्? उत धर्म्मार्जनोपायोऽयम्, उतापरस्तपसां प्रकारः? उत स्वर्गगमनमार्गोऽयम्? उत व्रतरहस्यमिदम्? उत मोक्षप्राप्तियुक्तिः? आहोस्विदन्यो नियमप्रकारः" कथमेतद्युक्तं भवतो, मनसापि चिन्तयितुं, किं पुनराख्यातुमीक्षितुं वा कथय किमप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मानं नावबुध्यसे मूढो हि मदनेनायास्यते। का वा सुखाशा? साधुजननिन्दितेष्वेवंविधेषु विषयेषु भवतः। स खलु धर्म्मबुद्ध्या [१] विषलतावनं सिञ्चति, कुवलयमालेति निस्त्रिंसलतामालिङ्गति, कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते, महारत्नमिति ज्वलन्तमङ्गारमभिस्पृशति, मृणालमिति दुष्टवारणदन्तमुषलमुन्मूलयति, मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः परिणतिविरसेषु सुखबुद्धिमारोपयति। अधिगतविषयतत्त्वोऽपि कस्मात् खद्योत इव ज्योतिर्निर्वीर्य्यमिदं ज्ञानमुद्वहसि? यतो न निवारयसि प्रबलरजःप्रसर-

---

(क) सत्यमेतदिति वा पाठः।

[१] यः परिणतिविरसेषु परिणामे असुखदायिषु विषयेषु सुखबुद्धिं सुखदायकताधियमारोपयति स खलु धर्मबुद्ध्या विषलतां सिञ्चति, कुवलयमालेति बुद्ध्या निस्त्रिंशलतामालिङ्गतीत्याद्यन्वयः।

कलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि न नियम यसि वा क्षुभितं मनः, कोऽयमनङ्गो नाम? धैर्य्यमवलम्ब्य निर्भर्त्स्यतामयं दुराचार इत्येवं,' वदत एव मे वचनमाक्षिप्य प्रतिपद्यान्तरालप्रवृत्तवास्पवेणिकं[१]प्रमृज्य चक्षुः करतलेन पाणौ मामवलम्ब्यावोचत्।

"सखे! किं बहुनोक्तेन सर्वथा सुस्थोऽसि आशीविषविषवेग-विषमाणामेतेषां कुसुमचापशायकानां पतितोऽसि न गोचरे सुखमुपदिश्यते परस्य। यस्य चेन्द्रियाणि सन्ति मनोवा, यः पश्यति वा शृणोति वा श्रुतमवधारयति वा योवा शुभ-मिदं न शुभमिदमिति विवेक्तुमलम् स खलूपदेशमर्हति, मम सर्वमेवेदमतिदूरापेतम्। अवष्टम्भो, [२]ज्ञानं, धैर्य्यं प्रतिसंख्या-न[३]मित्यस्तमितैषा कथा। कथमप्येवमेवायत्नविधृतास्तिष्ठ-न्त्यसवः, दूरातीतः खलूपदेशकालः, समतिक्रान्तोधैर्य्यावसरः, गता प्रतिसंख्यानवेला अतीतोज्ञानावष्टम्भसमयः केन [४]

---

[१] वाष्पवेणिका वाष्पप्रवाहः।

[२] "अवष्टम्भः सुवर्णेऽपि प्रारम्भस्तम्भयोरपीति" विश्वः। अवष्टम्भः प्रारम्भः।

[३] प्रतिसंख्यानं सांख्यादिप्रसिद्धज्ञानभेदः। इत्येषा कथा अ-स्तमितेत्यन्वयः।

[४] भवन्तं कपिञ्जलमपहाय विनेत्यर्थः अन्येन केनास्मिन् समये उपदेष्टव्यं न केनापीत्यर्थः।

वान्येनास्मिन् समये भवन्तमपहायोपदेष्टव्यम्? उन्मार्गप्रवृत्ति निवारणं वा करणीयं? कस्यान्यस्य वा वचसि मया स्थातव्यम्? को वापरस्त्वत्समो मे जगति बन्धुः? किं करोमि? यन्न शक्नोमि निवारयितुमात्मानम्, इयमनेनैव क्षणेन भवता दृष्टावस्था, तद्गत इदानीमुपदेशकालः, यावत् प्राणिमि तावदस्य कन्याक्तोदितद्वादशदिनकरकिरणातपतीव्रस्य मदनसन्तापस्य प्रतिक्रियां क्रियमाणमिच्छामि। पच्यन्त इव [१] मेऽङ्गानि उत्क्वथ्यत इव हृदयं, प्लुष्यत इव दृष्टिः, ज्वलतीव शरीरम्, अत्र यत् प्राप्तकालं तत् करोतु भवानित्य,भिधाय तूष्णीमभवत्।

एवमुक्तोऽप्यहमेनं प्रबोधयं पुनः पुनः। यदा शास्त्रोपदेशविशदैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं स्रोपग्रहञ्चाभिधीयमानोऽपि नाकरोत् कर्णे, तदाहमचिन्तयम्, "अतिभूमिमयं गतो, न शक्यते निवर्त्तयितुमिति इदानीं निरर्थकाः खलूपदेशाः, तत् प्राणपरिरक्षणेऽपि तावदस्य यत्नमाचरामीति" कृतमतिः उत्थाय गत्वा तस्मात् सरसः सरसा मृणालिकाः समुद्धृत्य कमलिनीपलाशानि जललवाङ्कितानि चादाय गर्भधूलिकषायपरिमलमनोहराणि च कुमुदकुवलयकमलानि गृहीत्वागत्य तस्मिन्नेव लतागृहशिलातले शयनमस्या-

---

[१] अग्निसम्पर्के हि पाकक्राथनदहनज्वलनानि सम्भवन्ति तानीह दर्शयति पच्यन्त इत्यादि। उत्क्वथ्यते उद्भास्यते। प्लुष्यते दह्यते।

कल्पयम्। तत्र च सुखनिषसस्य प्रत्यासन्नवर्त्तिनां चन्दनविटपिनां मृदूनि किसलयानि निष्पीड्य तेन स्वभावसुरभिणा तुषारशिशिरेण रसेन ललाटिकामकल्पयम्, आचरणतलादङ्गचर्चाञ्चारचयम्, अभ्यर्णपादपस्फुटितवल्कलविवरशीर्णेन च करसम्पुटचूर्णितेन कर्पूररेणुना स्वेदप्रतीकारमकरवम्, उरोनिहितचन्दनद्रवार्द्रवल्कलस्य स्वच्छसलिलशीकरस्राविणा कदलीदलेन व्यजनक्रियामन्वतिष्ठम्, एवञ्च मुहुर्मुहुरन्यदन्यन्नलिनीदलशयनमुपकल्पयतो, मुहुश्चन्दनचर्च्चामारचयतो, मुहुर्मुहुश्च स्वेदप्रतिक्रियां कुर्वतः, कदलीदलेन चानवरतं वीजयतः, समुदभून्मे मनसि चिन्ता "नास्ति, खल्वसाध्यं नाम भगवतो मनोभुवः, क्वायं हरिण इव वनवासनिरतः स्वभावमुग्धो जनः? क्व च विविधविलासरसराशिर्गन्धर्वराजपुत्री महाश्वेता? सर्वथा नहि किञ्चिदस्य दुर्घटं दुष्करमनायत्तमकर्त्तव्यं वा जगति दुरुपपादेष्वप्यर्थेष्वयमवज्ञया विचरति। नचायं केनापि(क)प्रतिकूलयितुं शक्यते? का वा गणना सचेतनेषु? अपगतचेतनान्यपि सङ्घट्टयितुमलं, यद्यस्मै रोचते, कुमुदिन्यपि दिनकरकरानुरागिणी भवति, कमलिन्यपि शशिकरद्वेषमुज्झति, निशापि वासरेण सह मिश्रतामेति, ज्योत्स्नाप्यन्धकारमनुवर्त्तते, छायापि प्रदीपाभिमुखमवतिष्ठते, तड़िदपि

(क) केनचिदिति वा पाठः।

जलदे स्थिरतां व्रजति, जरापि यौवनेन सञ्चारिणी भवति। किं वा तस्य दुःसाध्यमपरम्, एवंविधो येनायमगाधगाम्भीर्य्यसागरस्तृणलवलघुतामुपनीतः। क्व तत्तपः? क्वेयमवस्था? सर्वथा निष्प्रतीकारेयमापदुपस्थिता, किमिदानीं कर्त्तव्यम्? किमाचेष्टितव्यम्? कां दिशं गन्तव्यम्[१]? किं शरणम्? कस्य उपायः? कः सहायः? कः प्रकार? (क) का युक्तिः? कः समाश्रयः? येनास्यासवः संधार्य्यन्ते, केन वा कौशलेन? कतमया वा युक्त्या? कतरेण प्रकारेण? केन वावष्टम्भेन[२]कया? प्रज्ञया कतमेन वा समाश्वासनेनायं जीवेत्?" इत्येते चान्ये च मे विषसहृदयस्य सङ्कल्पाः प्रादुरासन्। पुनश्चाचिन्तयम् "किमनयात्यन्तायतया निष्प्रयोजनया चिन्तया? प्राणास्तावदस्य येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः, तेषाञ्च तत्समागममेकमपहाय नास्त्यपरः संरक्षणोपायः; बालभावादप्रगल्भतया च तपोविरुद्धमनुचितमुपनतमुपहासमिवात्मनो मदनव्यतिकरं मन्यमानो नियतमेकोच्छ्वासावशेषजीवितोऽपि नायं तस्याः स्वयमभिगमनेन पूरयति मनोरथम्, अकालान्तरक्षमश्चायमस्य मदनविकारः, सततमतिगर्हिते-

(क) प्रतिकार इति वा पाठः।

[१] गन्तव्यमिति भावे तव्य तद्योगे कर्मणि न षष्ठी।

[२] अवष्टम्भेन आरम्भेण।

नात्मत्येनापि परिरक्षणीयान् मन्यन्ते सुहृदसून्, साधवः। तदतिक्लेशमकर्त्तव्यमप्येतदस्माकमवश्यकर्त्तव्यतामापतितम्, किञ्चान्यत् क्रियते, वा कान्या गतिः? सर्वथा, प्रयामि तस्याः सकाशमावेदयामि एतामवस्थामिति" चिन्तयित्वा च कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय सञ्जातलज्जो निवारयेदित्यनिवेद्यैव तस्मै तस्मदेशात् सव्याजमुत्थायागतोऽहम्। तदेवमवस्थिते यदत्रावसरप्राप्तम् ईदृशस्य चानुरागस्य सदृशम्, अस्मदागमनस्य चानुरूपम्, आत्मनो वा समुचितम्, तत्र प्रभवति भवतीत्यभिधाय किमियं वक्ष्यतीति मन्मुखासक्तदृष्टिस्तूष्णीमासीत्।

अहन्तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना, रतिरसमयमुदधिमिवावतीर्णा, सर्वानन्दानामुपरि वर्त्तमाना, सर्वमनोरथानामग्रमिवाधिरूढ़ा, सर्वोत्सवानामतिभूमिमिवाधिशयाना, तत्कालोपजातया लज्जया किञ्चिदवनम्यमानवदनत्वादस्पृष्टकपोलोदरैः ग्रथितैरिवोपर्य्युपरिपतनानुबन्धदर्शितमालाक्रमैः अप्राप्तपक्ष्मसंश्लेषतयोपजातप्रथिमभरैरमलैरानन्दवाष्पजलविन्दुभिः स्रवद्भि(क)रावेद्यमानप्रहर्षप्रसरा,(ख) तत्क्षण-

(क) प्रवहद्भिरिति वा पाठः।

(ख) प्रसङ्गा इति वा पाठः।

[१] निवारयेदात्मानमकार्य्यात् पुण्डरीक इति शेषः।

मचिन्तयम्, "दिष्ट्या तावदयमनङ्गो मामिव तमप्यनुबध्नाति, यत्सत्यमनेन मे सन्तापयतापि कियताप्यंशेन दर्शितानुकूलता, यदि च सत्यमेव तस्येदृशी दशा, ततः किमिव ? नोपकृतमनेन, किं वा नोपपादितम् ? को वानेनापरः समानो बन्धुः ? कथं वा ? कपिञ्जलस्य स्वप्नेऽपि वितथा भारती प्रशान्ताकृतेरस्माद्वदनान्निष्क्रामति"(क)। इत्थंभूते किं मयापि प्रतिपत्तव्यम् ? तस्य वा पुरः किमभिधातव्यमित्येवं विचारयन्त्या एव प्रविश्य ससम्भ्रमा प्रतीहारी ममाकथयत्, "भर्तृदारिके ! त्वमसुस्थशरीरेति परिजनादुपलभ्य महादेवी प्राप्तेति।" तच्च श्रुत्वा कपिञ्जलो महाजनसंमर्दभीरुः सत्वरमुत्थाय "राजपुत्रि ! महानयमुपस्थितः कालातिपातः" भगवांश्च भुवनत्रयचूडामणिरस्तमुपगच्छति दिवसकरः, तद्गच्छामि सर्वथाभिमतसुहृत्प्राणरक्षादक्षिणार्थमयमुपरचितोऽञ्जलिः एष मे परमो विभव" इत्यभिधाय प्रतिवचनकालमप्रतीक्ष्यैव पुरोयायिना अम्बायाः प्रविशता कनकवेत्रलताकरेण प्रतीहारीजनेन कञ्चुकिलोकेन गृहीतताम्बूलकुसुमपटवासाङ्गरागेण चामरव्यग्रपाणिना कुब्जकिरातबधिरवामनवर्वरविकलमूकानुगतेन परिपालनेन सर्वतः संरुद्धे द्वारदेशे कथमप्यवाप्तनिर्गमः प्रययौ। अम्बा तु मत्समीपमागत्य सुचिरं स्थित्वा स्वभवनमयासीत्। तया तु

(क) निष्पतेदिति वा पाठः।

तत्रागत्य किं कृतं? किमभिहितं? किमाचेष्टित? मिति शून्यहृदया सर्वं नालक्षयम्।

गतायाञ्च तस्याम् अस्तमुपगते भगवति हारीतहरितवाजिनि[१]सरोजिनीजीवितेश्वरे चक्रवाकसुहृदि सवितरि, लोहितायमाने पश्चिमाशामुखे, हरितायमानेषु कमलवनेषु, नीलायमाने पूर्वदिग्भागे, पातालपङ्ककलुषेण महाप्रलयजलधिपयःपूरेणेव तिमिरेणावष्टभ्यमाने[२]जीवलोके, किंकर्त्तव्यतामूढ़ा तामेव तरलिकामपृच्छम्, "अयि तरलिके! न(क) कथं पश्यसि, दृढ़माकुलं मे हृदयम्, अप्रतिपत्तिविक्लवानि[३]चेन्द्रियाणि, न स्वयमण्वपि कर्त्तव्यमलमस्मि ज्ञातुम्, उपदिशतु मे भवती यदत्र साम्प्रतम्, अयमेवं त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः, यदि तावदितरकन्यकेव विहाय लज्जाम् उत्सृज्य धैर्य्यम् उन्मुच्य विनयम्, अचिन्तयित्वा जनापवादम्, अतिक्रम्य सदाचारम्, उल्लङ्घ्य शीलम्, अवगणय्य कुलम्, अङ्गीकृत्यायशः, रागान्धवृत्तिरननुज्ञाता पित्रा, अननुमोदिता मात्रा, स्वयमुपगम्य ग्राहयामि पाणिम्, एवं गुरुजनातिक्रमादधर्म्मो महान्।

(क) किमत्र साधु इत्यधिकः पाठः।

[१] हारीतः पक्षिभेदः स इव हरिता वाजिनोऽश्वा यस्य।

[२] अवष्टभ्यमाने व्याप्यमाने इत्यर्थः।

[३] अप्रतिपत्तिः कर्त्तव्यतानिश्चयाभावः।

अथ धर्म्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्गीकरोम्येवमपि प्रथमं तावत् स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिञ्जलस्य प्रणयप्रसरभङ्गः। पुनरपरं यदि कदाचित्तस्य जनस्य मत्कृताशाभङ्गात् प्राणविपत्तिरुपजायते, तदपि मुनिजनवधजनितं महदेनो भवेत्,, इत्येवमुच्चारयन्त्यामेव मयि आसन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन वसन्तवनराजिरिव कुसुमरजसा धूसरतां वासवी दिगयासीत्।

ततः शशिकेशरिकरनखरविदार्य्यमाणतमःकरिकुम्भसम्भवेन मुक्ताफलक्षोदेनेव धवलतामुपनीयमानम्, उदयगिरिसिद्धसुन्दरीकुचच्युतेन चन्दनचूर्णराशिनेव पाण्डुरीक्रियमाणं, चलितजलधिजलकल्लोलानिलोल्लासितेन वेलापुलिनसिकतोल्लसेनेव पाण्डुतामापाद्यमानम्, पश्चिमेतरत् इन्दुधाम्ना दिगन्तरमदृश्यत। शनैःशनैश्चन्द्रदर्शनान्मन्दमन्दस्मिताया दशनप्रभेव ज्योत्स्ना निष्पतन्ती निशाया मुखशोभामकरोत्। तदनु रसातलादवनीमवदार्य्योद्गच्छता शेषफणमण्डलेनेव रजनिकरविम्बेनाराजत रजनी। क्रमेण च सकलजीवलोकानन्दकेन कामिनीजनवल्लभेन किञ्चिदुन्मुक्तबालभावेन मकरध्वजबन्धुभूतेन उपारूढ़रागेण सुरतोत्सवोपभोगैकयोग्येन अमृतमयेन यौवनेनेवारोहिता शशिना रमणीयतामनीयत यामिनी।

अथ तं प्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिव, उदयगिरि-

सिंहकरतलाहतनिजहरिण[१]शोणितशोणीकृतमिव, रतिकलहकुपितरोहिणीचरणालक्तकरसलाञ्छितमिव अभिनवोदयलोहितं, रजनिकरमुदितं विलोक्य अन्तर्ज्वलितमदनानलान्धकारितहृदया, तरलिकोत्सङ्गविधृतशरीरापि मन्मथहस्तवर्त्तिनी चन्द्रगतनयनापि मृत्युमालोकयन्ती [२] तत्क्षणमचिन्तयम्।"एकत्र खलु मदनमधुमासमलयमारुतप्रभृतयः समस्ताः, एकत्र चायं पापकारी चन्द्रहतको, न शक्यते सोढुम्, इदमतिदुर्विषहमदनवेदनातुरञ्च मे हृदयम्, अस्य चोद्गमनमिदं सदाहज्वरस्याङ्गारवर्षः, शीतार्त्तस्य तुषारपातः, विषस्फोटमूर्च्छितस्य कृष्णसर्पदंश" इत्येवं विचिन्तयन्तीमेव चन्द्रोदयापनीता कमलवनम्लानिनिद्रेव मूर्च्छा मां निमीलितलोचनामकार्षीत्। अचिरेण च सम्भ्रान्ततरलिकोपनीताभिस्पन्दनचर्चाभिस्तालवृन्तानिलैश्चोपलब्धसंज्ञा तामेवाकुलाकुलां, मूर्त्तेनेवाधिष्ठितां, विषादेन मल्ललाटविधृतस्रवच्चन्द्रकान्तमणिशलाकामविच्छिन्नबाष्पजलधारान्धकारितमुखीं, रुदन्तीं तरलिकामपश्यम्। उन्मीलितलोचनाञ्च मां सा कृतपादप्रणामा चन्दनपङ्कार्द्रेण करयुगलेन बद्धाञ्जलिरवादीत्।

---

[१] निजहरिणः चन्द्रसंवन्धिहरिणः तस्य मृगाङ्कतया तथासम्भवः।

[२] मृत्युमात्मनो मरणम् आलोकयन्ती उत्प्रेक्षमाणा सम्भावयन्तीत्यर्थः।

"भर्तृदारिके! किं लज्जया? गुरुजनापेक्षया वा? प्रसीद प्रेषय माम्, आनयामि ते हृदयदयितं जनम्, उत्तिष्ठ स्वयं वा तत्र गम्यताम्, अतःपरम् असमर्थास्मि सोढुमिमं प्रबलचन्द्रोदयविजृम्भमाणोत्कलिकाशत[१]मुदधिमिव मकरचिह्न"मित्येवं वादिनीं तामहमवोचम्। "उन्मत्ते! किं मन्मथेन? नन्वयं सर्व्वविकल्पानपहरन्, सर्व्वोपायदर्शनान्युत्सारयन्, सर्व्वानन्तरायानन्तरयन्, सर्वसन्देहानपनयन् सर्वशङ्कास्तिरस्कुर्वन्, लज्जामुन्मूलयन्, स्वयमभिगमनलाघवदोषमाह्वयन्, कालातिपातं परिहरन् आगत एव मृत्योस्तस्यैव वा सकाशं नेता, कुमुदबान्धवः। तदुत्तिष्ठ यथा कथञ्चिदनुगत(क)जीविता सम्भावयामि हृदयदयितमायासकारिणं जन"मित्यभिदधाना मदनमूर्च्छाखेदविक्लवै(ख)रङ्गैः कथञ्चिदवलम्ब्य तामेवोदतिष्ठम्।

उच्चलितायाश्च मे दुर्निमित्तनिवेदकमस्पन्दत दक्षिणं लोचनम् [२]उपजातशङ्का चाचिन्तयम्, "इदमपरं किमप्युपक्षिप्तं दैवेनेति।" अथ नातिदूरोद्गतेन, त्रिभुवनप्रासादमहाप्रणाला-

---

(क) अनुगमनेन जीवितेति वा पाठः।

(ख) सन्तापपरिक्षामैः इति वा पाठः।

[१] उत्कलिकाः उत्कण्ठाः तरङ्गाश्च। मकरः जलजन्तुः स चिह्नं ध्वजो यस्य तं कामम्। उदधेस्तु मकरालयत्वात्तथात्वम्।

[२] स्त्रीणां हि दक्षिणाङ्गस्पन्दनेऽशुभमिति शकुनशास्त्रप्रसिद्धम्।

नुकारिणा, सुधासलिलपूरानिव वहता, चन्दनरसनिर्झर-निकरानिव क्षरता, श्वेतगङ्गाप्रवाहसहस्राणीव वमता, अमृतसागरपूरानिवोद्गिरता, चन्द्रमण्डलेनाप्लाव्यमाने, ज्योत्स्नया भुवनान्तराले श्वेतद्वीपनिवासमिव, सोमलोकदर्शनसुखमिवानुभवति जने, महावराहदंष्ट्रामण्डलनिभेन शशिना क्षीरसागरोदरादिवोद्ध्रियमाणे महीमण्डले प्रतिभवनमङ्गनाजनेन विकचकुसुदगन्धैश्चन्दनोदकैरुपक्रियमाणेषु चन्द्रोदयार्घेषु कामिनीप्रहितसुरतदूतीसहस्रसङ्कुलेषु राजमार्गेषु नीलांशुकरचितावगुण्ठनासु चन्द्रालोकभयचकितासु कमलवनलक्ष्मीष्विव नीलोत्पलप्रभापिहितासु इतस्ततः पलायमानास्वभिसारिकासु प्रतिकुसुदमाबद्धमधुकरमण्डलासु प्रबुध्यमानासु भवनदीर्घिकाकुमुदिनीषु स्फुटितकुसुदवनबहलधूलिधवलितोदरे निशानदीपुलिनायमानेऽन्तरीक्षे चन्द्रोदयानन्दनिर्भरे महोदधाविव रतिरसमय इव, उत्सवमय इव, विलासमय इव; प्रीतिमय इव जीवलोके शशिमणिप्रणालनिर्झरे प्रमोदमुखरमयूररवरम्ये, प्रदोषसमये गृहीतविविधकुसुमताम्बूलाङ्गरागपटवासचूर्णया तरलिकयानुगम्यमाना तेनैव मूर्च्छानिहितेन किञ्चिदाश्यानचन्दनललाटिकालग्नधूसराकुलालकेन चन्दनरसचर्चाङ्गरागवेशेनार्द्रार्द्रेण, तथैव च तया कण्ठस्थितयाक्षमालया श्रवणशिखरचुम्बिन्या च पारिजातमञ्जर्य्या पद्मरागरत्नरश्मिनिर्म्मितेनेव

रक्तांशुकेन कृतशिरोवगुण्ठना केनचिदात्मीयेनापि परिजनेनानुपलक्ष्यमाणा तस्मात् प्रासादशिखरादवातरम्।

अवतीर्य्य च पारिजातकुसुममञ्जरीपरिमलाकृष्टेन, रिक्तीकृतोपवनेन, कुमुदवनान्यपहाय धावता, मधुकरजालेन नीलपटावगुण्ठनविभ्रमानिव सम्पादयतानुबध्यमाना, प्रमदवनपक्षद्वारेण निर्गत्य तत्समीपमुदचलम्। प्रयान्ती च तरलिकाद्वितीयमपरिजनमात्मानमालोक्याचिन्तयम् "प्रियतमा(क)भिसरणप्रवृत्तस्य जनस्य किमिव ? कृत्यं बाह्येन परिजनेन, नन्वेत एव [१]परिजनलीलामुपदर्शयन्ति, तथाहि समारोपितशरासनासक्तशायकोऽनुसरति कुसुमायुधः, दूरप्रसारितकरः करमिव कर्षति शशी प्रस्खलनभयात्, पदेपदेऽवलम्बते रागः, लज्जां पृष्ठतः कृत्वा पुरः सहेन्द्रियैर्धावति हृदयम्, निश्चयमारोप्य नयत्युत्कण्ठेति।" प्रकाशञ्चावदम्, "अयि तरलिके! अपि नाम मामिवार्य्यमिन्दुहतकस्तमपि करेण कचग्रहाकृष्टमभिमुखमानयेदित्येवं" वादिनीञ्च मामसौ विहस्याब्रवीत्, "भर्तृदारिके! मुग्धासि किमस्य तेन जनेन ? [२] अयमात्मनैव

(क) प्रियतमाभिसरणेति वा पाठः।

[१] एते कामादयः अग्रे वक्ष्यमाणाः।

[२] अस्य चन्द्रस्य तेन पुण्डरीकमुनिकुमारेण पीडितेन किम् ? स्वयमेव पीडित इत्याह अयमात्मनैवेति। अयं चन्द्रः मदनातुर इव

तावन्मदनातुर इव भर्तृदारिकायास्तास्ताश्चेष्टाः करोति। तथाहि प्रतिबिम्बच्छलेन स्वेदसलिलकणिकाचितं चुम्बति कपोलयुगलम्, लावण्यवति पयोधरभारे निपतति प्रस्फुरितकरः, स्पृशति रसनावलिमणीन्, निर्म्मलनखलग्नमूर्त्तिः पादयोः पतति, किञ्चास्य मदनातुरस्येव वपुस्तापात् शुष्कचन्दनानुलेपपाण्डुतामुद्वहति, मृणालवलयधवलान् करान् धत्ते, प्रतिमाव्याजेन स्फटिकमणिकुट्टिमेषु निपतति, केतकीगर्भकेसरधूलिधूसरपादः कुमुदसरांस्यवगाहते, सलिलशीकरार्द्रान् शशिमणीन् करैराम्डशति, द्वेष्टि विघटितचक्रवाकमिथुनानि कमलवनानि।,, एतैश्चान्यैश्च तत्कालोचितैरालापैस्तया सह तमुद्देशमभ्युपागच्छम्। तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं कैलासतटास्यन्दोदयसुतचन्द्रकान्तमणिप्रस्रवणे प्रक्षालयन्ती यस्मिन् प्रदेशे स आस्ते तस्मिन्नेव चास्य सरसः पश्चिमे तटे पुरुषस्येव रुदितध्वनिं विप्रकर्षाज्जातिव्यक्तमुपालक्षयम्। दक्षिणेक्षणस्फुरणेन च प्रथममेव मनसाहितशङ्का तेन सुतरामवदीर्णहृदयेव किमप्यनिष्टमन्तःकथयतेव विषण्णेनान्तरात्मना "तरलिके! किमिदमिति?,, सभयमभिदधाना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छम्।

भर्तृदारिकायां त्वयि तास्ताः कामिजनचेष्टाः आत्मनैव स्वयमेव करोति किं पुनस्तस्य मुनिकुमारस्य कुर्य्यात् स्वस्यैव त्वयि साभिलाषत्वादिति भावः।

अतिनिशीथप्रभावात् दूरादेव विभाव्यमानस्वरमुन्मुक्तार्त्तनादम् "हा हतोऽस्मि, हा दग्धोऽस्मि, हा वञ्चितोऽस्मि, हा किमिदमापतितं? किं वृत्तम्? उत्सन्नोऽस्मि, दुरात्मन्! मदनपिशाच! पाप! निर्घृण! किमिदमकृत्यमनुष्ठितम्? आः पापे दुष्कृतकारिणि! महाश्वेते! दुर्विनीते! किमनेन तेऽपकृतम्? आः पाप! दुश्चरित! चन्द्र चण्डाल! कृतार्थोऽसि? इदानीमपगतदाक्षिण्य! दक्षिणानिलहतक! पूर्णास्ते मनोरथाः, कृतं कर्त्तव्यं, वहेदानीं यथेष्टम्, हा भगवन्! श्वेतकेतो! पुत्रवत्सल! न वेत्सि मुषितमात्मानम्, हा धर्म! निष्परिग्रहोऽसि, हा तपः! निराश्रयमसि, हा सरस्वति! विधवासि, हा सत्य! अनाथमसि, हा सुरलोक! शून्योऽसि। सखे! प्रतिपालय माम्, अहमपि भवन्तमनुयास्यामि, न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी, कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपदे उत्सृज्य प्रयासि?, कुतस्तवेयमतिनिष्ठुरता? कथय त्वदृते क्व गच्छामि? कं याचे? कं शरणमुपैमि? अन्धोऽस्मि संवृत्तः, शून्या मे दिशो जाताः, निरर्थकं जीवितम्, अप्रयोजनं तपः, निःसुखाश्च लोकाः केन सह परिभ्रमामि? कमालपामि? उत्तिष्ठ देहि मे विलपतः प्रतिवचनम्, क्व तन्ममोपरि सुहृत्प्रेम? क्व सा स्मितपूर्व्वाभिभाषिता च" इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम्।

तच्च श्रुत्वा पतितैरिव प्राणैर्दूरादेव मुक्तैकतारा[१]क्रन्दा, सरस्तीरलतासक्तिक्षुद्यमानां(क)शुकोत्तरीया, यथाशक्ति त्वरितैरज्ञातसमविषमभूमिभागविन्यस्तैः पादप्रक्षेपैः प्रस्खलन्ती, पदेपदे केनाप्युत्क्षिप्य नीयमानेव ? तं प्रदेशं गत्वा सरस्तीरसमीपवर्त्तिनि शिशिरशीकरासारस्राविणि शशिमणिशिलातले विरचितं कुमुदकुवलयकमलविविधवनकुसुमसुकुमारं मृणालमयं कुसुमशरसायकमयमिव शयनमधिशयानम्, अतिनिष्पन्दतया मत्पदशब्दमिवाकर्णयन्तम्, अन्तःकोप(ख)शमितमदनसन्तापतया तत्क्षणलब्धसुखप्रसुप्तमिव, मनःक्षोभप्रारब्धनिश्चलप्राणायामावस्थितमिव, अतिस्फुरितप्रभेण "लक्ष्यते ममेयमवस्थेति" कथयन्तमिवाधरेण, इन्दुद्वेषपरिवर्त्तितदेहतया पृष्ठभागनिपतितैर्मदनदहनविक्लवहृदयन्यस्तहस्तनखमयूखच्छलेन छिद्रितमिव, शशिकिरणैःउच्छुष्कपाण्डुरतया स्वदेहविनाशोत्पन्नया मदनचन्द्रकलयेव चन्दनलेखिकया रचितललाटिकम्, "मत्तः प्रियतरस्तवापरो जनो जात" इति कुपितेनेव जीवितेन परित्यक्तं, मन्मथव्यथया सहैता-

---

(क) लतानुषज्यमानेति वा पाठः।

(ख) क्षोभेति वा पाठः।

[१] दूरादेव पतितैः गतैरिव प्राणैः मुक्तैकताराक्रन्दा उन्मुक्तदीर्घोच्चक्रन्दनशब्दा।

नसून् स्वयमिवोत्सृज्य निश्चेतनतासुखमनुभवन्तम्, अनङ्गयोगविद्यामिव ध्यायन्तम्, अपूर्वप्राणायाममिवाभ्यस्यन्तम्, उपपादितास्मदागमनेन प्रणयादिवापहृतप्राणपूर्णपात्रम्, अनङ्गेन रचितचन्दनललाटिकात्रिपुण्ड्रकं, धृतसरसविसस्त्रयज्ञोपवीतम्, अंसावसक्तकदलीगर्भपत्रचारुचीरम्, एकावलीविशालाक्षमालम्, अविरलामलकर्पूरक्षोदभस्मधवलम्, आबद्धमृणालवलयरक्षाप्रतिसर-मनोभवव्रतवेशमास्थाय मन्मथमागममन्त्रमिव साधयन्तम्, अविरतरोदनाताम्रेण(क)अश्रुक्षयादागतरुधिरेणेव मदनशरशल्यवेदनाकूणित[१]त्रिभागेण (ख) "कठिनहृदये ! दर्शनमात्रकेणापि न पुनरनुगृहीतोऽयमनुगतोजन" इति सप्रणयं मामुपलभमानमिव चक्षुषा, किञ्चिद्विवृताधरतया जीवितमपहर्त्तुमन्तःप्रविष्टैरिवेन्दु किरणैर्निर्गच्छद्भिर्दशनांशुभिर्धवलितपुरोभागं, मन्मथव्यथया विघटमानहृदयनिहितेन वामेन पाणिना "प्रसीद प्राणैः समं प्राणसमे ! न गन्तव्यमिति" हृदयस्थितां मामिव धारयन्तम्, इतरेण च नखमयूखदन्तुरतया चन्दनमिव स्रवता उत्तानीकृतेन

(क) अनवरतरोदनेति वा पाठः ईषदालक्ष्यमाणपरिवृत्ततारेण इत्यधिकः क्वचित् पाठः।

(ख) अत्र तु अर्द्धनिमीलितेनेति अधिकः क्वचित् पाठः।

[१] आकूणितः ईषत्संकुचितः त्रिभागस्तृतीयो भागो यस्य तादृशेन चक्षुषा।

चन्द्रातपमिव निवारयन्तम्, अन्तिकस्थितेन च अचिरोद्गत-जीवित(क)मार्गमिवोद्ग्रीवेण विलोकयता तपःसुहृदा कमण्डलुना समुपेतं, कण्ठाभरणीकृतेन च मृणालवलयेन रजनिकरकिरणपाशेनेव संयम्य लोकान्तरमुपनीयमानं, कपिञ्जलेन मद्दर्शनादब्रह्मण्य[१]मित्यूर्द्धहस्तेन द्विगुणीभूतवाष्पोद्गमेनाक्रोशता कण्ठे परिष्वक्तं, तत्क्षणविगतजीवितं, तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम्।

उद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा क्वाहमगमं? किमकरवं? किं व्यलपमिति? सर्वमेव नाज्ञासिषम् असवश्च मे तस्मिन् क्षणे किमतिकठिनतयास्य मूढहृदयस्य? किमनेकदुःखसहस्रसहिष्णुतया हतशरीरस्य? किं विहिततया दीर्घशोकस्य? किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य? किं दुःखदाननिपुणतया दग्धदैवस्य? किमेकान्तवामतया दुरात्मनो मन्मथहतकस्य? केन? हेतुना नोद्गच्छन्ति स्म तदपि न ज्ञातवती। केवलमतिचिराल्लब्धचेतना दुःखभागिनी वह्नाविव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमपश्यम् अश्रद्दधाना

(क) गमनेत्यधिकः पाठः।

[१] मद्दर्शनात् मम महाश्वेताया दर्शनं प्राप्य अब्राह्मण्यमनुचितबधः प्राप्त इत्युक्त्वा ऊर्द्धहस्तेन उत्तोलितबाहुना।

सासम्भावनीयं तत्तस्य मरण,मात्मनश्च जीवितम्, उत्थाय हाहा किमिदमुपनतमिति ? मुक्तार्त्तनादा हा अम्ब ! हा तात ! हा सख्य ! इति व्याहरन्ती हा नाथ ! जीवितनिबन्धन आचक्ष्व क्व (क)मामेकाकिनीमशरणामकरुणं विमुच्य यासि ? (ख) पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था (ग) युगसहस्रायमाणः कृच्छ्रेण नीतो दिवसः, प्रसीद, सकृदप्यालप, दर्शय भक्त(घ)वत्सलताम् ईषदपि विलोकय, पूरय मे मनोरथम्, आर्त्तास्मि, भक्तास्मि, अनुरक्तास्मि, अनाथास्मि, बालास्मि, (ङ) अगतिकास्मि, दुःखितास्मि, अनन्यशरणास्मि, मदनपरिभूतास्मि, किमिति न करोषि दयां, कथय किमपराद्धं ? किं वा नानुष्ठितं ? मया, कस्यां वा नाज्ञायामादृतम् ? कस्मिन् वा त्वदनुकूले नाभिरतम् ? येन कुपितोऽसि दासीजनमकारणात् परित्यज्य

(क) किमिति वा पाठः।

(ख) गच्छसीति वा पाठः।

(ग) व्यथेति वा पाठः।

(घ) कृतज्ञजनवत्सलतामिति वा पाठः। अत्र तु प्रकटय परमां कृपालुतामित्यधिकः क्वचित् पाठः।

(ङ) अबलास्मीति वा पाठः।

व्रजन्न बिभेषि कौलीनात् [१] अलीकानुरागप्रतारणकुशलया किं वा मया वामया पापया? आः अहमद्यापि (क) प्राणिमि हा हतास्मि मन्दभागिनी, कथं मे न त्वम्? न तातो? न विनयो? न बन्धुवर्गो? न परलोकः? धिङ्मां दुष्कृतकारिणीं यस्याः कृते तवेयमीदृशी दशा वर्त्तते। नास्ति मत्सदृशी नृशंसहृदया याहमेवंविधं भवन्तमुत्सृज्य गृहं गतवती किं मे गृहेण? किमम्बया? किं वा तातेन? किं बन्धुभिः? किं परिजनेन?। हा कमुपयामि शरणम्? अयि दैव! निर्घृण! दर्शय दयां विज्ञापयामि त्वां देहि दयितदक्षिणाम् [२] भगवति! भवितव्यते! कुरु कृपां पाहि वनितामनाथाम्, भगवत्यो! वनदेवताः! प्रसीदत प्रयच्छतास्य प्राणान्! अम्ब! वसुन्धरे! सकललोकानुग्रहजननि! (ख) किमर्थं नानुकम्पसे? तात! कैलासेश! शरणं गतास्मि ते दर्शय दयालुताम्" इत्येतानि चान्यानि च व्याक्रोशन्ती कियद्वा

(क) येत्यधिकः क्वचित् पाठः।

(ख) जननिरतासीति वा पाठः।

[१] कौलिनात् शरणागतपरित्यागपूर्वकासहायगमनरूपात् दुष्टचेष्टितात्।

[२] दयितदक्षिणाम् दयितस्य दानरूपां दक्षिणां प्रार्थनानुरूपं दानमित्यर्थः।

स्मरामि ग्रहगृहीतेव, आविष्टेवोन्मत्तेव, भूतोपहृतेव, व्यलपम्। उपर्य्युपरि पतितनयनजलधारानिकरच्छलेन विलीयमानेव, द्रवतामिव नीयमाना, जलाकारेणेवात्मीक्रियमाणा, प्रलापाक्षरैरपि दशनमयूखशिखानुगततया साश्रुधारैरिव निष्पतद्भिः शिरोरुहैरप्यविरलविगलितकुसुमतया मुक्तवाष्पजलविन्दुभिरिव, आभरणैरपि प्रसृतविमलमणिकिरणाश्रुतया प्ररुदितैरिवोपेता, तज्जीवितायैवात्ममरणाय स्पृहयन्ती, मृतस्यापि सर्व्वात्मना हृदयं प्रवेष्टुमिवेच्छन्ती, करतलेन कपोलयोराश्यानचन्दनश्वेतजटामूले च ललाटे निहितसरसविसयोश्चांसयोः मलयजरसलवलुलितकमलिनीपलाशावगुण्ठिते च हृदये परामृशन्ती, "पुण्डरीक! निष्ठुरोऽसि एवमप्यार्त्तां न गणयसि माम्" इत्युपालभमाना, मुहुर्मुहुरेनमन्वनयम्, मुहुः पर्य्यचुम्बम्, मुहुः कण्ठे गृहीत्वा व्याक्रोशम्, "आः पापे! त्वयापि मत्प्रत्यागमनकालं यावदस्यासवो न रक्षिता" इति तामेकावलीमगर्हयम्, "अयि भगवन्! प्रसीद प्रत्युज्जीवयैनमिति" मुहुर्मुहुः कपिञ्जलस्य पादयोरपतम्, मुहुश्च तरलिकां कण्ठे गृहीत्वा प्रारुदम्। अद्यापि चिन्तयन्ती न जानामि तस्मिन् काले कुतस्तान्यचिन्तितान्यशिक्षितान्यनुपदिष्टान्यदृष्टपूर्व्वाणि मे हतपुण्यायाः कृपणानि चाटुसहस्राणि प्रादुरभवन्, कुतस्ते संलापाः कुतस्तान्यतिकरुणानि वैक्लव्यरुदितानि, अन्य एव प्रकारः।

प्रलयोर्म्मय इवोदतिष्ठन् अन्तर्वास्पवेगानाम्, जलयन्त्वाणी-वामुच्यन्त अश्रुप्रवाहाणाम्, प्ररोहा इव निरगच्छन् प्रला-पानाम्, शिखरशतानीवावर्द्धन्त दुःखानाम्, प्रसूतय इवो-दपाद्यन्त मूर्च्छानाम्।

इत्येवमात्मवृत्तान्तमावेदयन्त्या एव च तस्याः समति-क्रान्तं कथमप्यतिकष्टमवस्थान्तरमनुभवन्त्या इव चेतनां जहार मूर्च्छा, वेगान्निष्पतन्तीञ्च शिलातले तां ससम्भ्रम-प्रसारितकरः परिजन इव जातपीड़श्चन्द्रापीड़ो विधृतवान्। अश्रुजलार्द्रेण च तदीयेनैवोत्तरीयवल्कलप्रान्तेन शनैःशनैर्वी-जयन् संज्ञां ग्राहितवान्। उपजातकारुण्यश्च वास्पसलिलो-त्पीड़ेन प्रक्षाल्यमानकपोलयुगलां लब्धचेतनामवादीत्, "भग-वति! मया पापेन तवायं(क)पुनरभिनवतामुपनीतः शोकः, येनेदृशीं दशामुपनीतासि तदलमनया कथया संह्रियता-मियम्, अहमप्यसमर्थः श्रोतुम् अतिक्रान्तान्यपि हि स-ङ्कीर्त्त्यमानानि अनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दुःखानि, तन्नार्हसि कथंकथमपि विधृतानिमानसुलभा-नसून् पुनःपुनः स्मरणशोकानलेन्धनतामुपनेतुमिति"।

एवमुक्त्वा दीर्घमुष्णञ्च निश्वस्य वास्पायमानलोचना स-निर्वेदमवादीत् "राजपुत्र! या तस्यामतिदारुणायां हत-

---

(क) तव चायमिति वा पाठः।

निशायामेभिरतिनृशंसैरसुभिर्न परित्यक्ता (क) सेदानीं परित्यज्यत इति दूरापेतमेतत्। नूनमपुण्योपहतायाः पापाया मम भगवानन्तकोऽपि परिहरति दर्शनम्, कुतश्च मे कठिनहृदयायाः शोकः? सर्वमिदमलीकमस्य दुरात्मनः शठहृदयस्य सर्वथाहमनेन (ख) त्यक्तरूपेण निरपत्रपाणामग्रेसरीकृता, यया चाधिगतमदनवेदनया वज्रमय्येवेदमनुभूतम्, तस्याः का गणना कथनं प्रति। किं वापरमतः कष्टतरमाख्येयमन्यद्भविष्यति यन्न शक्यते श्रोतुमाख्यातुं वा। केवलमस्य वज्रपातस्यानन्तरमाश्चर्यं यदभूत्तदावेदयामि आत्मनश्च प्राणधारणकारणलव (ग) इवाव्यक्तो यः समुत्पन्नः तच्च कथयामि यथा दुराशामृगतृष्णिकया गृहीताहमिदमुपरतकल्पं परकीयमिव भारभूतमप्रयोजनमकृतज्ञञ्च हतशरीरं वहामि तदलं श्रूयताम्।

ततश्च तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया तत्तद्बहु विलप्य तरलिकामब्रुवम् "अयि उत्तिष्ठ निष्ठुरहृदये! कियद्रोदिषि (घ) काष्ठान्याहृत्य विरचय चिताम्,

(क) ते मामिदानीं परित्यजन्तीति वा पाठः।

(ख) अत्र तु चरितेनेत्यधिकः पाठः।

(ग) कारणभूत इति वा पाठः।

(घ) रोदिषीति वा पाठः।

अनुसरामि जीवितेश्वरम्” इत्यत्रान्तरे झटिति चन्द्रमण्डलविनिर्गतो गगनादवतीर्य्य केयूरकोटिलग्नममृतफेनपिण्डपाण्डरं पवनतरलमंशुकोत्तरीयमाकर्षन्, उभयकर्णान्दोलितकुण्डलमणिप्रभारक्तगण्डस्थलः, स्थूलमुक्ताफलतया तारागणमिव ग्रथितमतितार(क)हारमुरसा दधानः धवलदुकूलपल्लवकम्पितोष्णीषग्रन्थिः, अलिकुलनीलकुटिलकुन्तलनिकरविकटमौलिः, उत्फुल्लकुमुदकर्णपूरः, कामिनीकुचकुङ्कुमपत्रलतालाञ्छितांसदेशः, कुमुदधवलदेहो महाप्रमाणः, पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः स्वच्छवारिधवलेन देहप्रभावितानेन क्षालयन्निव, दिगन्तराणि, आमोदिना च शरीरतः क्षरता शिशिरेण शीतज्वरमिव जनयता, अमृतशीकरनिकरवर्षेण तुषारपटलेनेवानुलिम्पन्, गोशीर्षचन्दनरसच्छटाभिरिवासिञ्चन्, ऐरावतकरपीवराभ्यां बाहुभ्यां मृणालधवलाङ्गुलिभ्यामतिशीतलस्पर्शाभ्यां, तमुपरतमुत्क्षिप्य दुन्दुभिनादगम्भीरेण स्वरेण “वत्से! महाश्वेते! न परित्याज्यास्त्वया प्राणाः, पुनरपि तवानेन सह भविष्यति समागमः” इत्येवमाहतः पितेवाभिधाय सहैवानेन गगनतलमुदपतत्। अहन्तु तेन व्यतिकरेण सभया सविस्मया सकौतुका चोन्मुखी किमिदमिति कपिञ्जलमपृच्छम्। असौ तु सस-

---

(क) मनोहरमिति वा पाठः।

भ्रममदृत्त्वैवोत्तरमुदतिष्ठत् "दुरात्मन्! अन्तक! (क) क्व मे वयस्यमपहृत्य? गच्छसीति" अभिधायोन्मुखः सञ्जातकोपो बध्नन् सावेगमुत्तरीयवल्कलेन परिकरम् उत्पतन्तं तमेवानुसरन्, अन्तरिक्षमुदगात्। पश्यन्त्या एव च मे सर्व एव ते तारागण (ख) मध्यमविशन्।

मम तु तेन द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमनेन द्विगुणीकृतशोकायाः सुतरामदीर्य्यत हृदयम्। किंकर्त्तव्यतामूढा च तरलिकामब्रुवम्, "अयि जानासि कथय किमेतदिति।" सा तु तदवलोक्य स्त्रीस्वभावकातरतया तस्मिन् क्षणे शोकाभिभाविना भयेनाभिभूता वेपमानाङ्गयष्टिर्मम मरणशङ्कया च वराकी विषण्णहृदया सकरुणमवादीत् "भर्त्तृदारिके! न जानामि पापकारिणी, किन्तु महदिदमाश्चर्य्यम् अमानुषाकृतिरेष पुरुषः समाश्वासिता चानेन गच्छता सानुकम्पं पित्रेव भर्त्तृदारिका, प्रायेण चैवंविधा दिव्याः स्वप्नेष्वविसंवादिन्यो भवन्त्याकृतयः, किमुत साक्षात्। न चाल्पमपि विचारयन्ती कारणमस्य मिथ्याभिधाने पश्यामि। अतो युक्तं विचार्य्यात्मानमस्मात् प्राणपरित्यागव्यवसायान्निवर्त्तयितुम् अतिमहत् खल्विदमाश्वास-

---

(क) अन्तक इति पुस्तकान्तरे नास्ति

(ख) तारागणाधिपमध्यमिति वा पाठः।

स्थानमस्यामवस्थायाम्। अपि च तमनुसरन् गत एव कपिञ्जलस्तस्माच्च "कुतोऽयं? को वायं? किमर्थञ्चानेनायमपगतासुरुत्क्षिप्य नीतः? क्व वा नीतः? कस्माच्चासम्भावनीयेनामुना पुनः समागमाशाप्रदानेन भर्तृदारिका समाश्वासिते?ति" सर्वमिदमुपलभ्य [१] जीवितं वा मरणं वा समाचरिष्यसि। अदुर्लभं हि मरणमध्यवसितं पश्चादप्येतद्भविष्यति। नच जीवन् कपिञ्जलो भर्तृदारिकामदृष्ट्वा स्थास्यति तेन तत्प्रत्यागमनकालावधयोऽपि तावत् ध्रियन्ताममी प्राणा" इत्यभिदधाना पादयोर्मे न्यपतत्। अहन्तु सकललोकदुर्लङ्घतया जीविततृष्णायाः, क्षुद्रतया च स्त्रीस्वभावस्य, तया च तद्वचनोपनीतया दुराशामृगतृष्णिकया, कपिञ्जलप्रत्यागमनकाङ्क्षया च तस्मिन् काले तदेव युक्तं मन्यमाना नोत्सृष्टवती जीवितम्, आशया हि किमिव न क्रियते? ताञ्च पापकारिणीं कालरात्रिप्रतिमां वर्षसहस्रायमाणां यातनामयीमिव दुःखमयीमिव नरकमयीमिव अग्निमयीमिव उत्सन्ननिद्रा तथैव क्षितितले विचेष्टमाना रेणुकणधूसरैरस्रुजलार्द्रकपोलसन्दानितैर्विमुक्तव्याकुलैः शिरोरुहैरुपरुद्धमुखी निर्दयाक्रन्दजर्ज्जरस्वरक्षय(क)क्षामेण कण्ठेन, तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षपितवती।

(क) क्षामक्षामेणेति वा पाठः। अत्यन्तक्षीणेनेत्यर्थः।

[१] तस्मात् कपिञ्जलात् इत्यादि वाक्यनिर्द्दिष्टं सर्वमुपलभ्येत्यन्वयः।

प्रत्यूषसि उत्थाय तस्मिन्नेव सरसि स्नात्वा कृतनिश्चया तत्प्रीत्या तमेव कमण्डलुमादाय तान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा, बुद्ध्वा निःसारतां संसारस्य, ज्ञात्वा च मन्दपुण्यतामात्मनः, (क) निरूप्य चाप्रतीकारदारुणतां व्यसनोपनिपातानाम्, आकलय्य दुर्निवारतां शोकस्य, दृष्ट्वा च निष्ठुरतां दैवस्य, चिन्तयित्वा चातिबहुलदुःखतां स्नेहस्य, भावयित्वा चानित्यतां सर्वभावानाम्, अवधार्य्य चाकाण्ड-भङ्गुरतां सर्वसुखानाम्, अविगणय्य तातमम्बाञ्च, परित्यज्य सह परिजनेन मनसा सकलबन्धुवर्गम्, निवर्त्त्य विषयसुखेभ्यो मनः, संयम्येन्द्रियाणि, गृहीतब्रह्मचर्य्या देवं त्रैलोक्यनाथं शरणमिमं शरणार्थिनी स्थाणुमाश्रितवत्यस्मि। अपरेद्युश्च कुतोऽपि समुपलब्धवृत्तान्तस्तातः सहाम्बया सह बन्धुवर्गे-णागत्य सुचिरं कृताक्रन्दस्तैस्तैरुपायैरभ्यर्थनाभिश्च बहुभि-रुपदेशैश्चानेकप्रकारैः परिसान्त्वनैश्च नानाविधैर्गृहगमनाय मे महान्तं यत्नमकरोत्। यदा च नेयमस्माद्व्यवसायात् कथञ्चिदपि शक्यते व्यावर्त्तयितुमिति निश्चयमधिगतवान् तदा निराशोऽपि दुस्त्यजतया दुहितृस्नेहस्य, पुनःपुनर्मया विसृज्यमानोऽपि बहून् दिवसान् स्थित्वा सशोक एवान्त-र्दह्यमानहृदयो गृहानयासीत्। गते च ताते ततःप्रभृति

(क) मनस इत्यधिकः पाठः।

देवस्य कृते अश्रुमोचनमात्रकेण कृतज्ञतां दर्शयन्ती, तदनुरागकृशमिदमपुण्यबहुलमस्तमितलज्जममङ्गलभूतमनेकक्लेशायाससहस्रनिवासं दग्धशरीरकं बहुविधैर्नियमशतैः शोषयन्ती,(क)वन्यैश्च फलमूलवारिभिर्वर्त्तमाना जपव्याजेन तद्गुणगणानिव गणयन्ती, त्रिसन्ध्यमत्र सरसि स्नानमुपस्पृशन्ती[१] प्रतिदिनमर्च्चयन्ती देवं त्र्यम्बकम् अस्यामेव गुहायां(ख) तरलिकया सह दीर्घं शोक(ग)मनुभवन्ती सुचिरं न्यवसम्। साहमेवंविधा पापकारिणी निर्लक्षणा निर्लज्जा क्रूरा च नृशंसा च गर्हणीया निष्प्रयोजनोत्पन्ना (घ)निष्फलजीविता निर्नाथा निरवलम्बना निःसुखा च किं मया दृष्टया पृष्टया वामया कृतब्राह्मणवधमहापातकया, करोति महाभागः" [२]इत्युक्त्वा पाण्डुना वल्कलोपान्तेन शशिनमिव शरन्मेघशकलेनाच्छाद्य

(क) जपयन्तीति वा पाठः।

(ख) तयेत्यधिकः पाठः।

(ग) शोकमिममिति वा पाठः।

(घ) निःस्नेहा च अकृतज्ञता च इत्यधिकः पाठः।

[१] उपस्पृशः स्नानार्थत्वेऽपि स्नानस्य स्वशब्देनोपात्तत्वात् प्रकृते कार्यत्वेन उपस्पृशन्ती कुर्वतीत्यर्थः।

[२] वामया प्रतिकूलभाग्यया कृतमहापातकया मया दृष्टया पृष्टया वा महाभागः किं करोति नैव मद्दर्शनपृच्छयोः प्रयोजनमित्यर्थः।

वदनं दुर्निवारवाष्पवेगमपारयन्ती निवारयितुमुन्मुक्तकण्ठमतिचिरमुच्चैः साऽरोदीत्।

चन्द्रापीड़स्तु प्रथममेव तस्यारूपेण विनयेन दाक्षिण्येन मधुरालापतया निःसङ्गतया चातितपस्वितया च प्रशान्तत्वेन च निरभिमानतया च महानुभावत्वेन च शुचितया च उपारूढ़गौरवोऽभूत् तदानीन्तु तेनापरेण दर्शितसद्भावेन स्ववृत्तान्तकथनेन तया च कृतज्ञतया हृतहृदयः सुतरामारोपितप्रीतिरभवत्। आर्द्रीकृतहृदयश्च शनैःशनैरेनामभाषत "भगवति! क्लेशभीरुरकृतज्ञः सुखासङ्गलुब्धो लोकः स्नेहसदृशं कर्मानुष्ठातुमशक्तो निष्फलेनाश्रुपातमात्रेण स्नेहमुपदर्शयन् रोदिति त्वया तु कर्मणैव सर्वमाचरन्त्या किमिव न प्रेमोचितमाचेष्टितं? येन रोदिषि तदर्थमा जन्मनः प्रभृति समुपचितपरिचयः प्रेयानप्यसंस्तुत[१]इव परित्यक्तो बान्धवजनः, सन्निहिता अपि तृणावज्ञयावधीरिता विषयाः, विमुक्तान्यतिशयितसुनासीर[२]समृद्धीन्यैश्वर्य्यसुखानि, मृणालिनीवातीतनीयस्यपि नितरां तनिमानमनुचितैः संक्लेशैरुपनीता तनुः, गृहीतं ब्रह्मचर्य्यम्, आयोजितस्तपसि महत्यात्मा, वनिताजनदुष्करमतिकष्टमङ्गीकृतमरण्यावस्थानम्।

---

[१] असंस्तुतः अपरिचित इव।

[२] सुनासीरः इन्द्रः।

अपि च अनायासेनैवात्मा दुःखाभिहतैः परित्यज्यते, महीयसा तु यत्नेन गरीयसि क्लेशे निक्षिप्यते केवलम्। यदेतदनुमरणं नाम तदतिनिष्फलम्, अविद्वज्जनाचरित एष मार्गो, मोहविलसितमेतत्, अज्ञानपद्धतिरियम्, रभसाचरितमिदम्, क्षुद्रदृष्टिरेषा, अतिप्रमादोऽयम्, मौर्ख्यस्खलितमिदम् यदुपरते पितरि भ्रातरि सुहृदि भर्त्तरि वा प्राणाः परित्यज्यन्ते, स्वयञ्चेन्न जहति न परित्याज्याः। अत्र हि विचार्य्यमाणे स्वार्थ एव प्राणपरित्यागोऽयम् असह्यशोकवेदनाप्रतीकारत्वादात्मनः, उपरतस्य तु न कमपि गुणमावहति, न तावत्तस्यायं प्रत्युज्जीवनोपायः, न धर्मोपचयकारणम् न शुभलोकोपार्जनहेतुः, न निरयपातप्रतीकारः, न दर्शनोपायः न परस्परसमागमनिमित्तम्, अन्यामेव स्वकर्मफलपरिपाकोपचिता[१]मसाववशो नीयते भूमिम्, असावप्यात्मघातिनः केवलमेनसा संयुज्यते। जीवंस्तु जलाञ्जलिदानादिना बहूपकरोत्युपरतस्यात्मनश्च, मृतस्तु नोभयस्यापि। स्मर तावत् प्रियामेकपत्नीं रतिं भगवति भर्त्तरि मकरकेतौ सकलाबलाजनहृदयहारिणि हरनयन(क)हुतभुजा दग्धेऽप्यविरहितामसुभिः। पृथाञ्च वा-

---

(क) हुङ्कारेति वा पाठः।

[१] स्वस्य कर्मणः परिपाकस्तेन, परिपच्यमानस्वकर्मणेत्यर्थः उपचितामपपादितां भूमिमसौ अनुमृतः अवशो अनायत्तः जनः नीयते नतु तेन प्रकृतमृतजनस्य कश्चिदुपकार इति भावः।

र्णायी शूरसेनसुताम् अभिरूपे सावज्ञविजितसकलराजकमौ-लिकुसुमवासितपादपीठे पत्यावखिलभुवनवलि[१]भागभुजि पाण्डौ किन्दममुनिशापानलेन्धनतामुपगते[२]ऽप्यपरित्यक्त-जीविताम्। उत्तराञ्च विराटदुहितरं बालां बालशशिनीव नयना(क)नन्दहेतौ विनयवति विक्रान्ते च पञ्चत्वमभिमन्या-वुपगतेऽपि धृतदेहाम्। दुःशलाञ्च धृतराष्ट्रदुहितरं भ्रातृ-शतोत्सङ्गलालिताम् अतिमनोहरे हरवरदानवर्द्धितमहि-म्नि सिन्धुराजे जयद्रथेऽर्जुनेन [३] (ख) लोकान्तरमुपनीतेऽ-प्यकृतप्राणपरित्यागाम्। अन्याश्च रक्षःसुरासुरमुनिमनुज सिद्धगन्धर्वकन्यका भर्तृरहिताः श्रूयन्ते सहस्रशो विधृत-जीविताः।

प्रोन्मुच्येतापि जीवितं, सन्दिग्धोऽप्यस्य [४] समागमो

(क) जननयनानन्देति वा पाठः।

(ख) जयद्रथे इति पाठः क्वचिन्नास्ति।

[१] वलिः राजग्राह्यस्तस्य भागभुजि तदुपभोगिनि।

[२] पाण्डोः शापकथा च महाभारते आदिपर्वणि ११८अध्याये। तन्मरणकथा तु तत्रैव १२६ अध्याये।

[३] सिन्धुराजबधकथा महाभारते द्रोणपर्वणि १४६ अध्याये।

[४] अस्य मृतस्य सन्दिग्धः समागमः यदि स्यादिति सम्भावनयापि जीवितम् उन्मुच्येत नतु तत्सम्भावनमस्ति अतोनुमरणं न कार्य्य-मिति भावः।

यदि स्यात्, भगवत्या तु ततः पुनः स्वयमेव समागमसरस्वती समाकर्णिता, अनुभवे च को विकल्पः कथञ्च तादृशानामप्राकृताकृतीनां महात्मनामवितथगिरां गरीयसापि कारणेन गिरि वैतथ्यमास्पदं कुर्य्यात्, उपरतेन च सह जीवन्त्याः कीदृशी समागतिः। अतो निःसंशयम् असावुपजातकारुण्यो महात्मा पुनः प्रत्युज्जीवनार्थमेवैनमुत्क्षिप्य सुरलोकं नीतवान्। अचिन्त्यो हि महात्मनां प्रभावः, बहुप्रकाराश्च संसारप्रवृत्तयः चित्रञ्च दैवम्, आश्चर्य्यातिशययुक्ताश्च तपःसिद्धयः, अनेकविधाश्च कर्मणां शक्तयः। अपि च सुनिपुणमपि विमृशद्भिः किमिवान्यत्तदपहरणे कारणमाशङ्क्येत जीवितप्रदानादृते, न चासम्भाव्यमिदमवगन्तव्यं भगवत्या(क) चिरप्रवृत्त एष पन्थाः। तथा हि विश्वावसुना गन्धर्वराजेन मेनकायामुत्पन्नां प्रमद्वरां नाम कन्यामाशीविषविलुप्तजीवितां स्थूलकेशाश्रमे भार्गवस्य नप्ता प्रमतितनयो मुनिकुमारको रुरुर्नाम स्वायुषोऽर्द्धेन योजितवान् [१]। अर्जुनञ्चाश्वमेधतुरगानुसारिणम् आत्मजेन बभ्रुवाहननाम्ना समरशिरसि शरापहृत(ख)प्राणम् उलूपी नाम नागकन्यका

(क) सर्वथेत्यधिकः पाठः।

(ख) शरेण हतप्राणमिति वा पाठः।

[१] रुरुचरितं महाभारते आदिपर्वणि ९ अध्याये।

सोच्छ्वासमकरोत् [१]। अभिमन्युतनयञ्च परिक्षितमश्वत्थामास्त्रपावकपरिप्लुष्टमुदरादुपरतमेव निर्गतम् उत्तराप्रलापोपजनितकृपो भगवान् वासुदेवो दुर्लभानसून् प्रापितवान् [२]। उज्जयिन्याञ्च सान्दीपनिद्विजतनयमन्तकपुरादपहृत्य त्रिभुवनवन्दितचरणः स एवानीतवान् [३]। अत्रापि (क)कथञ्चिद्देवमेव भविष्यति। तथापि किं क्रियते क उपालभ्यते, प्रभवति हि भगवान् विधिः, बलवती च नियतिः, आत्मेच्छया न शक्यमुच्छ्वसितुमपि, अतिपिशुनानि चास्यैकान्तनिष्ठुरस्य दैवहतकस्य विलसितानि, न क्षमन्ते दीर्घकालमव्याजरमणीयं प्रेम। प्रायेण च निसर्गत एव अनायतस्वभावभङ्गुराणि (ख) सुखानि, आयत(ग)स्वभावानि च दुःखानि। तथा हि कथमप्येकस्मिन् जन्मनि समागमः (घ) जन्मान्तरसहस्राणि च विरहः प्राणिनाम्, अतो नार्हस्यनिन्द्य-

---

(क) तत्रापि कदाचित्यधिकः क्वचित् पाठः।

(ख) अनामुक्तस्वभावेति वा पाठः।

(ग) अनामुक्तेति वा पाठः।

(घ) अत्र तु वह्नीति अधिकः पाठः।

[१] तत्कथा च महाभारते आश्वमेधिके पर्वणि ८० अध्याये।

[२] परिक्षित्प्रत्युज्जीवनकथा भारते आश्वमेधिके पर्वणि ६६ अध्याये।

[३] सान्दीपनिपुत्रप्रत्युज्जीवनकथा हरिवंशे ९० अध्याये।

मात्मानं निन्दितुम्, आपतन्ति हि संसारपथमतिगहनमवतीर्णमेते वृत्तान्ताः, धीरा हि तरन्त्यापदम्" इत्येवंविधैरन्यैश्च मृदुभिरुपसान्त्वनैः संस्थाप्य [१] तां पुनरपि निर्झरजलेनाञ्जलिपुटोपनीतेनानिच्छन्तीमपि बलात् प्रक्षालितमुखीमकारयत्।

अत्रान्तरे च श्रुतमहाश्वेतावृत्तान्तोपजातशोक इव समुत्सृष्टदिवसव्यापारो रविरपि भगवानधोमुखतामयासीत्। अथ क्षीणे दिवसे परिणतप्रियङ्गुमञ्जरीरजोनिभेन पिञ्जरिम्णा रज्यमाने विलम्बिनि ब्रध्नमण्डले अविरलकुसुम्भकुसुमरसरक्तदुकूलकोमलेन चास्ता(क)तपेन मुच्यमानेषु दिङ्मुखेषु चकोरनयनतारका(ख)कान्तिना च पिङ्गलिम्ना विलिप्यमाने तिरोहितनीलिम्नि व्योम्नि, कोकिलविलोचनच्छविबभ्रुणि चारुणायति सान्ध्ये भुवनमर्चिषि [२] यथाप्रधानमुन्मिषत्सु ग्रहग्रामेषु वनमलीमसवपुषि [३] लोचनमुषि मुषित-

(क) रक्तास्तातपेनेति वा पाठः।

(ख) तारकाकारेति वा पाठः।

[१] संस्थाप्य प्रकृतिं प्रापय्य।

[२] सान्ध्ये सन्ध्याभवेऽर्चिषि ज्योतिषि भुवनं जलं लोकं वा अरुणयति अरुणवर्णं कुर्वति सतीत्यर्थः।

[३] मलीमसश्चौरः मलिनं वा वनमिव मलीमसं मलिनं, वनचौरस्येव वा वपुर्यस्य।

तारकापथप्रथिम्नि कालिमानमातन्वति शार्वरे तमसि अतनुतिमिरतिरोहित(क) हरिततासु गहनतां यान्तीषु तरुराजिषु रजनिजलविन्दुजालजनितजड़िम्नि बहलवनकुसुमपरिमलानुमितगमने च चलितलताविटपगहने, प्रवृत्ते च पवने, निद्रानिभृतपतत्रिणि त्रियामामुखे, महाश्वेता मन्दं मन्दमुत्थाय भगवतीमुपास्य पश्चिमां सन्ध्यां कमण्डलुजलेन प्रक्षालितचरणा वल्कलशयनीये सखेदमुष्णं निःश्वस्य निषसाद। चन्द्रापीड़ोऽप्युत्थाय सकुसुमं प्रस्रवणजलाञ्जलिमवकीर्य्य कृतसन्ध्याप्रणामः तस्मिन् द्वितीये शिलातले मृदुभिर्लतापल्लवैः शय्यामकल्पयत्। उपविष्टश्च तस्यां पुनःपुनरुक्तमेव मनसा महाश्वेतावृत्तान्तमन्वभावयत्। आसीच्चास्य मनसि "एवं नामायमप्रतीकारदारुणो दुर्विषहवेगः कष्टः कुसुमायुधः यदनेनाभिभूता, महान्तोऽप्येवमनपेक्षितकालक्रमाः समुत्सारित(ख)धैर्य्याः सद्यो जीवितं जहति (ग) सर्वथा नमो भगवते त्रिभुवनाभ्यर्चितशासनाय मकरकेतनायेति।" पुनः पप्रच्छ चैनाम् "भगवति! सा तव परिचारिका वनवासव्यसनमित्रं दुःखसब्रह्मचारिणी तरलिका क्व, गतेति?"

(क) रत्नाकारहृतहरिततासु इति वा पाठः।

(ख) समवधारितेति वा पाठः।

(ग) जना इत्यधिकः पाठः।

अथ साकथयत् महाभाग! यत्त्वया कथितम्, अमृतसम्भवमप्सरसां कुलं तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्यकाभूत्। तस्याश्चासौ सकलगन्धर्वकुलमुकुटकुड्मलपीठप्रतिष्ठितचरणो देवश्चित्ररथः पाणिमग्रहीत् अपरिमितगुणगणाकृष्टहृदयश्चान्यवनितादुर्लभेनाधःकृताशेषान्तःपुरेण हेमपट्टलाञ्छनेन कृतवेत्रचामरचिह्नेन महादेवीशब्देन परं प्रीतः प्रसादमकरोत्। अन्योऽन्यप्रेमसंवर्द्धनपरयोश्च तयोर्यौवनसुखानि सेवमानयोः (क) कालेनाश्चर्य्यभूतमेकजीवितमिव पित्रोः, अथवा सर्वस्यैव गन्धर्वकुलस्य वा जीवलोकस्य दुहितृरत्नमुदपादि कादम्बरीति नाम्ना। सा च मे जन्मतः प्रभृत्येकासनशयनपानाशना परं प्रेमस्थानमखिलविश्रम्भधाम द्वितीयमिव हृदयं बालमित्रम् एकत्र तया मया च नृत्यगीतादिकलासु कृताः परिचयाः शिशुजनोचिताभिश्च क्रीड़ाभिरनियन्त्रणनिर्भरमपनीतो बालभावः। सा चामुनैव मदीयेन हतवृत्तान्तेन समुपजातशोका निश्चयमकार्षीत् “नाहं कथञ्चिदपि सशोकायां महाश्वेतायाम् आत्मनः पाणिं ग्राहयिष्यामीति” सखीजनस्य पुरतः सशपथमभिहितवती, “यदि कथमपि मामनिच्छन्तीमपि बलात्तातः कदाचित् क-

---

(क) यौवनसुखान्यनुभवमानयोरिति वा पाठः वाच्कील्ये स्थानच।

स्मै चिद्दातुमिच्छति तदाहमनशनेन वा हुताशनेन वा रज्ज्वा वा विषेण वा नियतमात्मानमुत्स्रक्ष्यामीति।" सर्वञ्च तदात्मदुहितुः कृतनिश्चयं निश्चलभाषितं कर्णपरम्परया परिजनसकाशाद्गन्धर्वराजश्चित्ररथः स्वयमशृणोत्। गच्छति काले समुपारूढनिर्भरयौवनामालोक्य सुतां बलवदुपतापपरवशः (क) क्षणमपि न धृतिमलभत। एकापत्यतया चातिप्रियतया स न शक्तः किञ्चिदपि तामभिधातुमिति। अपश्यंश्चान्यदुपायान्तरम् इदमत्र प्राप्तकालमिति मत्वा तया महादेव्या मदिरया सहावधार्य्य क्षीरोदनामानं कञ्चुकिनं (ख) "वत्से! महाश्वेते! त्वद्व्यतिरेकेणैव दग्धहृदयानामिदमपरमस्माकमुपस्थितम् इदानीन्तु कादम्बरीमनुनेतुं (ग) त्वं शरणमिति, सन्दिश्य(घ)मत्समीपमद्यैव प्रत्यूषसि प्रेषितवान्। ततो मया गुरुवचनगौरवेण सखीप्रेम्णा च क्षीरोदेन सार्द्धं सा तरलिका "सखि कादम्बरि! किं दुःखितमपि जनमतितरां दुःखयसि जीवन्तीमिच्छसि चेन्मां तत् कुरु गुरुवचनमवितथमिति" सन्दिश्य विसर्ज्जिता। नातिचिरं गतायाञ्च

(क) बलवद्दूयमान इति वा पाठः।

(ख) ब्रूहि गत्वेत्यधिकः पाठः।

(ग) कादम्बरीव्यतिकरे इति वा पाठः।

(घ) तदनुनयार्थमित्यधिकः पाठः।

तस्यामनन्तरमेवेमां भूमिमनुप्राप्तो महाभाग इत्यभिधाय तूष्णीमभवत्।

अत्रान्तरे लाञ्छनच्छलेन विडम्बयन्निव शोकानलदग्धमध्यं महाश्वेताहृदयम्, उद्वहन्निव मुनिकुमारवधमहापातकं, दर्शयन्निव चिरकाललग्नं दक्षशापानलदाहचिह्नम्, [१] अविरलभस्माङ्गरागधवलः कृष्णमृगाजिनप्रावृताङ्गो वामस्तन इवाम्बिकायाः धूर्जटिजटामण्डलचूड़ामणिर्भगवानुदगात्तारकाराजः। क्रमेण चोन्नते गगनमहापयोधिपुलिने समस्तलोकनिद्रामङ्गलकलसे कुमुदबान्धवे विघटितकुमुदवने धवलितदशदिशि शङ्खश्वेते श्वेतातपत्रायमाणे(क)मानिनीमानमन्त्री शुचिशोचिषि शशाङ्कमण्डले शशिकरकलितासु अजस्रोषु कणिमानमोड़वीषु[२] प्रभासु, प्रस्रवत्सु च कैलासशशिमणिशिलानां सर्वतः स्रोतःस्राविषु प्रस्रवणेषु, मृणालकन्दलिनि [३] चावस्कन्दपतितचन्द्रकर इव विलुप्तकमलवनशोभे भात्यच्छोदसरःपयसि समुपोढ़मोहनिद्रे च द्राघीयोवीचिविचलितवपुषि, विरुवति विरहिणि चक्रवाकचक्रवाले, निर्वृत्ते च चन्द्रोदये, विद्रुते हर्षनयनजलकणनोहारिणि

(क) श्वेतिमानमातन्वतीति वा पाठः।

[१] इन्दोः दक्षशापकथा च महाभारते शल्यपर्वणि ३६ अध्याये

[२] उड़ुसम्बन्धिनीषु।

[३] कन्दलमङ्कुरः तद्वति।

वियद्विहारिणि मनोहारिणि विद्याधराभिसारिकाजने चन्द्रापीड़ः सुप्तामालोक्य महाश्वेतां पल्लवशयने शनैः समुपाविशत्। "अस्यां वेलायां किं नु खलु मामन्तरेण चिन्तयति वैशम्पायनः? किं वा वराकी पत्रलेखा? किं वा राजपुत्रलोक? इति" चिन्तयन्नेव निद्रां ययौ।

अथ क्षीणायां क्षपायामूषसि सन्ध्यामुपास्य शिलातलोपविष्टायां पवित्राण्यघमर्षणानि जपन्त्यां महाश्वेतायां निर्वर्त्तितप्राभातिकविधौ चन्द्रापीड़े तरलिका षोड़शवर्षवयसा सावष्टम्भाकृतिना मन्दखेदालसगजराजगमनगुरूणि पदानि निक्षिपता पर्य्युषितचन्दनाङ्गरागधूसरोरुदण्डद्वयेन कुङ्कुमरागपिञ्जरारुणेन चामीकरशृङ्खलाकलापनिविड़नियमितं कक्षाबन्धातिरिक्तप्रेङ्खत्पल्लवम् अधरवास एव केवलं वसानेन निरुदरतया विभक्तमध्येन विपुलवक्षसा दीर्घानुवृत्तपीनबाहुना वामप्रकोष्ठदोलायमानमाणिक्यवलयेन कर्णाभरणमणेर्विप्रकीर्य्यमाणमधोमुखकिरणेन्द्रायुधजालं वर्णां[१]शुकोत्तरीयमिवैकस्कन्धक्षिप्तमुद्वहता चूतपल्लवकोमलमनवरतताम्बूलबद्धरागान्धकारमधरं दधता कर्णान्तायतस्य स्वभावधवलस्य धवलिम्ना लोचनयुगलस्य

[१] वर्ण्यन्ते रज्यते इति वर्णं रागवस्तुना रक्तं यदंशुकं तदेवोत्तरीयम्।

धवलयतेव दिगन्तराणि, कुमुदवनानीव वर्षता, पुण्डरीकमयमिव दिवसं कुर्वता, कनकपट्टपृथुललाटेन अलिकुलनीलसरलशिरसिजेन [१] अग्राम्याकृतिना राजकुलसम्पर्कचतुरेण गन्धर्वदारकेण केयूरकनाम्नानुगम्यमाना प्रत्यूषस्येव प्रादुरासीत् (क)। आगत्य च कोऽयमित्युपजातकुतूहला चन्द्रापीड़ं सुचिरमालोक्य महाश्वेतायाः समीपमुपसृत्य कृतप्रणामा सविनयमुपाविशत्। अनन्तरञ्च अतिदूरानतेनोत्तमाङ्गेन प्रणम्य केयूरकोऽपि महाश्वेतादृष्टिनिसृष्टं नातिसमीपवर्त्ति शिलातलं भेजे। समुपविष्टश्च तमदृष्टपूर्वमधःकृतकुसुमायुधमुपहसितसुरासुरगन्धर्वविद्याधररूपं रूपातिशयं चन्द्रापीड़स्य दृष्ट्वा विस्मयमापेदे।

परिसमाप्तजपा तु महाश्वेता पप्रच्छ तरलिकां, "किं त्वया दृष्टा प्रियसखी? कादम्बरी कुशलिनी करिष्यति वा तदस्मद्वचनम्? इति।" अथ सा तरलिका विनयावनतमौलिरीषदालम्बितकर्णपाशमतिमधुरतया गिरा व्यजिज्ञपत्, "भर्तृदारिके! दृष्टा खलु मया भर्तृदारिका कादम्बरी सर्वतः कुशलिनी, विज्ञापिता च निखिलं भर्तृदुःहितुः

(क) अयासीदिति वा पाठः।

[१] अलिकुलमिव नीलाः सरलाश्च शिरसिजाः केशा यत्र तादृशेन ललाटेन।

सन्देशम्, आकर्ण्य च यत्तया सन्ततमुक्तमुक्तास्थूलाश्रुविन्दुवर्षं रुदित्वा प्रतिसंदिष्टं तदेष तथैव विसर्ज्जितः तस्या एव वीणावाहकः केयूरकः कथयिष्यती"त्युक्त्वा विरराम। विरतवचसि तस्यां केयूरकोऽब्रवीत् "भर्तृदारिके! महाश्वेते! देवी कादम्बरी दृढ़दत्तकण्ठग्रहा त्वां विज्ञापयति, "यदियमागत्य मामवदत् तरलिका, तत् कथय किमयं गुरुजनवचनानुरोधः? किमिदं मच्चित्तपरीक्षणं? किं गृहनिवासापराधनिपुणोपालम्भः? किं प्रेमविच्छेदाभिलापः किं भक्तजनपरित्यागोपायः? किं वा प्रकोपः? जानास्येव मे सहजप्रेमनिष्यन्दनिर्भरं हृदयम्, एवमतिनिष्ठुरं सन्दिशन्ती कथमसि न लज्जिता? तथा मधुरभाषिणी केनासि शिक्षिता वक्तुमप्रियं? परुषमभिधातुं वा? स्वस्थोऽपि तावत् क इव सहृदयः कनीयस्यवसानविरसे कर्मणीदृशे मतिमुपसर्पयेत्? किमुतातिदुःखाभिहतहृदयोऽस्मद्विधो जनः? सुहृद्दुःखखेदिते हि मनसि कैव सुखाशा? कैव निर्वृतिः? कीदृशाः सम्भोगाः? कानि वा हसितानि? येनेदृशीं दशामुपनीता प्रियसखी कथमतिदारुणं तमहं विषमिवाप्रियकारिणं कामं सकामं कुर्य्याम्? दिवसकरास्तमनविधुरासु नलिनीषु सहवासपरिचयाच्चक्रवाकयुवतिरपि समागमसुखानि परित्यजति, किमुत नार्य्यः? अपिच यत्र भर्तृविरहविधुरा अपहृतपरपुरुषदर्शना दिवानिशं निवसति प्रियसखी, कथमिव तन्मम हृदयमपरः प्रविशे-

ज्जनः ? यत्र च भर्तृविरहविधुरा तीव्रव्रतकर्षिताङ्गी प्रियसखी महत् कृच्छ्रमनुभवति, तत्राहमवगण्यैतत् कथमात्मसुखार्थिनी पाणिं ग्राहयिष्यामि ? कथं वा मम सुखं भविष्यति ? त्वत्प्रेम्णा चास्मिन् वस्तुनि कुमारिकाजनविरुद्धं स्वातन्त्र्यमालम्ब्याङ्गीकृतमयशः, समवधीरितो विनयः, गुरुवचनमतिक्रान्तम् न गणितो लोकापवादः, वनिताजनस्य सहजमाभरणमुत्सृष्टा लज्जा ? सा कथय, कथमिव पुनरत्र प्रवर्त्तते ? तदयमञ्जलिरुपरचितः प्रणामोऽयम्, इदञ्च पादग्रहणम् अनुगृहाण मां वनमितो गतासि" मे जीवितेन सहेति मा कृथाः स्वप्नेऽपि पुनरिममर्थं मनसि" इत्यभिधाय तूष्णीमभूत्।

महाश्वेता तु तत् श्रुत्वा सुचिरं विचार्य्य "गच्छ, स्वयमेवाहमागत्य यथार्हमाचरिष्यामीति" उक्त्वा केयूरकं प्राहिणोत्, गते च केयूरके चन्द्रापीड़मुवाच "राजपुत्र ! रमणीयो हेमकूटः, चित्रा च चित्ररथराजधानी, बहुकुतूहलः किंपुरुषविषयः पेशलो गन्धर्वलोकः, सरलहृदया महानुभावा च कादम्बरी, यदि नातिखेदकरमिव गमनं कलयसि, नावसीदति वा गुरु प्रयोजनम्, अदृष्टचरविषयकुतूहलि वा चेतः, मद्वचनमनुरुध्यते वा भवन्मतिः, सुखदायि वा अस्मच्चिरदर्शनम्, अर्हसि वा प्रणयमिमम्, अप्रत्याख्यानयोग्यं वा जनं मन्यसे, समारूढ़ो वा परिचयलेशोऽनुग्राह्यो वायं जनः, ततो

नार्हसि निष्फलां कर्तुमभ्यर्थनामिमाम्, मयैव सह गत्वा हेमकूटमतिरमणीयतानिधानं तत्र दृष्ट्वा च मन्निर्विशेषां कादम्बरीम् अपनीय तस्याः कुमतिमनोमोहविलसितम्, एकमहो विश्रम्य श्वोभूते प्रत्यागमिष्यसि मम हि निष्कारण-बान्धवं भवन्तमालोक्यैव दुःखान्धकारभाराक्रान्तेन महतः कालादुच्छ्वसितमिव चेतसा श्रावयित्वा स्ववृत्तान्तमिमं सह्यतामिव गतः शोकः। दुःखितमपि जनं रमयन्ति सज्जनसमागमाः, परसुखोपपादनपराधीनश्च भवादृशां गुणोदय" इत्युक्तवतीञ्चैनां चन्द्रापीड़ोऽब्रवीत्। "भगवति! दर्शनात् प्रभृति परवानयं जनः, कर्त्तव्येषु यथेष्टमशङ्कि-तया नियुज्यता"मित्यभिधाय तया सहैवोदचलत्।

क्रमेण च गत्वा हेमकूटमासाद्य गन्धर्वराजकुलं सम-तीत्य काञ्चनतोरणानि सप्तकक्षान्तराणि कन्यान्तःपुरद्वार-मवाप। महाश्वेतादर्शनप्रधावितेन दूरादेव कृतप्रणामेन कनकवेत्रलताहस्तेन प्रतीहारजनेनोपदिश्यमानमार्गः प्र-विश्य असंख्येयनारीशतसहस्रसम्बाधं, स्त्रीमयमपरमिव जीव-लोकम्, इयत्तां ग्रहीतुमेकत्र त्रैलोक्यस्त्रैणमिव [१] संहृतम्, अपुरुषमिव सर्गान्तरम्, अङ्गनाद्वीपमिवापूर्वमुत्पन्नं, पञ्चम-मिव नारीयुगावतारम्, अपरमिव पुरुषद्वेषिप्रजापति-

[१] स्त्रीणां समूहः स्त्रैणम्।

निर्माणम्, अनेककल्पकल्पनार्थं[१]मुत्पाद्य स्थापितमिवाङ्गनाकोषम्, अतिविस्तारिणा युवतिजनलावण्यप्रभापूरेण प्लावितदिगन्तरेण सिञ्चतेवामृतरसविसरेण [२]दिवसम्, आर्द्रीकुर्वतेव भुवनान्तरालं, बहलप्रभावर्षिणा मरकतमणिमयेन भूषणेनेव सर्वतः परिगततया तेजोमयमिव, चन्द्रमण्डलसहस्रैरिव निर्मितसंस्थानं, ज्योत्स्नयेव घटितसन्निवेशम्, आभरणप्रभाभिरिव निष्पादितदिगन्तरं, विभ्रमैरिव कृतसर्वोपकरणं, यौवनविलासैरिवोत्पादितावयवं, रतिविलसितैरिव विरचितसञ्चयं, मन्मथचरितैरिव कल्पितावकाशम्, अनुरागेणेवानुलिप्तसकलजनप्रदेशं, शृङ्गारमयमिव, सौन्दर्य्यमयमिव, सुरताधिदैवतमयमिव, कुसुमशरमयमिव, कुतूहलमयमिव, आश्चर्य्यमयमिव, सौकुमार्य्यमयमिव, प्रेममयमिव, कुमारः कुमारीपुराभ्यन्तरं ददर्श।

अतिबहलतया च तस्य कन्यकाजनस्य समन्तादाननद्युतिभिरिन्दुबिम्बवृष्टिमिव पतन्तीम्, अपाङ्गविक्षेपैस्खलितकुवलयवनमयीमिव क्रियमाणामवनीम्, अनिभृतभ्रूलता-

---

[१] अनेकेषु कल्पेषु प्रलयेषु कल्पनार्थं रचनार्थम् उत्पाद्य स्थापितं बीजरूपतया एकत्र सञ्चित्य रक्षितम् अङ्गनानां कोषं रक्षास्थानम्।

[२] अमृतरसस्य विसरेण विस्तारेण निष्यन्देनेत्यर्थः।

विभ्रमैः कामकार्मुकविलासशतानीव प्रचलितानि, शिर-सिजकलापान्धकारैर्बहुलपक्षप्रदोषसार्थानिव सम्बध्नतः, स्मितप्रभाभिरुत्फुल्लकुसुमधवलानिव वसन्तदिवसान् सञ्चरतः, श्वसितानिलपरिमलैर्मलयमारुतानिव परिभ्रमतः, कपोलमण्डलालोकैर्माणिक्यदर्पणसहस्राणीव स्फुरितानि करतलरागेण रक्तकमलवनवर्षिणमिव जीवलोकं, कररुहांकरणस्फुरणेन कुसुमायुधशरसहस्रैरिव संछादितदिगन्तराणि, आभरणकिरणेन्द्रायुधजालकैरुड्डीयमानानीव भवनमयूरवृन्दानि, यौवनविकारैरुत्पाद्यमानानीव मन्मथसहस्राणि अद्राक्षीत्। उचितव्यापारव्यपदेशेन कुमारिकाणां सखीहस्तावलम्बेषु पाणिग्रहणानि, वेणुवाद्येषु चुम्बनव्यतिकरान्, वीणासु कररुहव्यापारान्, कन्दुकक्रीडासु करतलप्रहारान्, भवनलतासेककलसकण्ठेषु भुजलतापरिष्वङ्गान्, लीलादोलासु नितम्बस्तनप्रेङ्खितानि ताम्बूलवीटिकावखण्डनेषु दशनोपचारान्, वकुलविटपेषु मधुगण्डूषप्रचारान्, अशोकतरुताडनेषु चरणाभिघातान्, उपहारकुसुमस्खलनेषु शीत्कारान्, अतिरिक्तं सुरतमिवाभ्यस्यन्तीनामपश्यत्।

यस्य च कन्यकाजनस्य कपोलतलालोक एव मुखप्रक्षालनं, लोचनान्येव कर्णोत्पलानि, हसितच्छवय एव अङ्गरागाः, निःश्वासा एवाधिवासगन्धप्रयुक्तयः, अधरद्युतिरेव कुङ्कुमानुलेपनम्, आलापा एव तन्त्रीनिनादाः, भुजलता

एव चम्पकमालाः, करतलान्येव लीलाकमलानि, स्तना एव दर्पणाः, निजदेहप्रभैवांशुकावगण्ठनं, जघनस्थलान्येव विलासमणिशिलातलानि, कोमलाङ्गुलिराग एव चरणालक्तकरसः, नखमणिमरीचय एव कुट्टिमोपहारकुसुमप्रकराः। यत्र चालक्तकरसोऽपि चरणातिभारः, वकुलमालिकामेखलाकलनमपि गमनविघ्नकरम्, अनङ्गरागगौरवमप्यधिकश्वासनिमित्तम्, अंशुकभारोऽपि ग्लानिकारणं, मङ्गलप्रतिसरवलयविधृतिरपि करतलविधुतिहेतुः, अवतंसकुसुमधारणमपि श्रमः, कर्णपूरकमलमधुकरपक्षपवनोऽपि आयासकरः, तथा च यत्र सखीदर्शनेष्वकृतहस्तावलम्बनमुत्थानमतिसाहसम्, प्रसाधनेषु हारभारसहिष्णुतास्तनकार्कश्यप्रभावः, कुसुमावचयेषु द्वितीयकुसुमग्रहणमप्ययुवतिजनोचितम्। कन्यकाविज्ञानेषु माल्यग्रथनमसुकुमारजनव्यापारः। देवताप्रणामेषु मध्यभागभङ्गो नातिविस्मयकारः।

तस्य चैवंविधस्य किञ्चिदभ्यन्तरमतिक्रम्य इतस्ततश्च परिभ्रमतः कादम्बरीप्रत्यासन्नस्य परिजनस्य शुश्राव तांस्तानतिमनोहरानालापान्, तथाहि। "लवलिके! कल्पय केतकीधूलिभिर्लवलीलतालवालमण्डलानि।" "सागरिके! गन्धोदककनकदीर्घिकासु विकिर रत्नबालुकाम्।" "मृणालिके! कृत्रिमकमलिनीषु कुङ्कुमरेणुमुष्टिभिस्कुरय चक्रवाकमिथुनानि।" "मकरिके! कर्पूरपल्लवरसेनाधिवासय

गन्धपात्राणि।" "रजनिके! भवनदीर्घिकातमालवीथिकान्धकारेषु निधेहि मणिप्रदीपान्।" "कुमुदिके! स्थगय शकुनिकुलरक्षणाय [१] मुक्ताजालैर्दाड़िमीफलानि।" "निपुणिके! लेखय मणिशालभञ्जिकास्तनेषु [२] कुङ्कुमरसपत्रभङ्गान्।" "उत्पलिके! परामृष कनक(क)सम्मार्ज्जनीभिः कदलीगृहमरकतवेदिकाः।" "केसरिके! सिञ्च मदिरारसेन वकुलकुसुममालागृहाणि।" "मालतिके! पाटलय सिन्दूररेणुना कामदेवगृहदन्तवलभिकाम्।" "नलिनिके! पायय कमलमधुरसं भवनकलहंसान्।" "कदलिके! नय धारागृहं गृहमयूरान्।" "कमलिनिके! प्रयच्छ चक्रवाकशावकेभ्यो मृणालक्षीर[३]रसम्।" "चूतलतिके!" "देहि पञ्जरपुंस्कोकिलेभ्यश्चूतकलिकाङ्कुराहारम्।" "पल्लविके! भोजय मरिचाग्रपल्लवदलानि भवनहारीतान्।" "लवङ्गिके! विक्षिप चकोरपञ्जरेषु पिप्पलीतण्डुलशकलानि।" "मधुकरिके! विरचय कुसुमाभरणकानि।" "मयूरिके! सङ्गीतशालायां

(क) कमलेति वा पाठः।

[१] शकुनिकुलात् रक्षणाय दाड़िमीवीजानामिति शेषः।

[२] मणिमयभित्तौ शालभञ्जिकाना चित्रपुत्तलिकानां स्तनेषु स्तनस्थानेषु।

[३] मृणालस्य क्षीरं निर्य्यासस्तद्रूपो रसः।

विसर्ज्जय किन्नरमिथुनानि।" "कन्दलिके!" "समारोहय क्रीड़ापर्वतशिखरं जीवञ्जीवमिथुनानि।" "हरिणिके! देहि पञ्जरशुकसारिकोपदेशमिति।"

एतान्यन्यानि च परिहासजल्पितान्यश्रौषीत्। तथाहि, "चामरिके! मिथ्यामुग्धतां प्रकटयन्ती कमभिसन्धातुमिच्छसि।" "अयि यौवनविलासैरुन्मत्तीकृते! विज्ञातासि, या त्वं स्तनकलसभारावनम्यमानमूर्त्तिर्मणिस्तम्भमयूरानवलम्बसे।" "परिहासकाङ्क्षिणि! रत्नभित्तिपतितमात्मप्रतिबिम्बमालपसि।" "पवनहृतोत्तरीयांशुके! हारप्रभामायासितकरतला सङ्कलयसि मणिकुट्टिमेषु।" "उपहारकमलस्खलनभीते! निजमुखप्रतिबिम्बकानि परिहरसि, जालवातायनपतितपद्मरागालोकं प्रति बालातपशङ्कया करतलमातपत्रीकरोषि।" "खेदग्रस्तहस्तगलितचामरे! नखमणिमयूखकलापमाधुनोषि, इत्येतान्यन्यानि च शृण्वन्नेव कादम्बरीभवनसमीपमाययौ।

पुलिनायमानमुपवनलतागलितकुसुमरेणुपटलैः, दुर्द्दिनायमानमनिभृतपरभृतनखक्षताङ्कसहकारफलरसवर्षैः, नीहारायमाणमनिलविप्रकीर्णवकुलसेकसीधुधाराधूलिभिः, काञ्चनद्वीपायमानं चम्पकोपहारैः, नीलाशोकवनायमानं कुसुमप्रकरपतितमधुकरवृन्दान्धकारैः, तथाच सञ्चरतः स्त्रीजनस्य रागसागरायमाणं चरणालक्तकरसविसरैः, अमृतोत्पत्तिदि-

वसायमानमङ्गरागामोदैः, चन्द्रलोकायमानं दन्तपत्रप्रभामण्डलैः प्रियङ्गुवनायमानं रोचनातिलकभक्तिभिः नीलायमानं कृष्णागुरुपत्रभङ्गैः, लोहितायमानं कर्णपूराशोकपल्लवैः, धवलायमानं चन्दनरसविलेपनैः, हरितायमानं शिरीषकुसुमाभरणैः, अथ सेवार्थमागतेनोभयत ऊर्द्ध्वस्थितेन स्त्रीजनेन प्राकारेणेव लावण्यमयेन कृतदीर्घरथ्यामुखाकारं मार्गमद्राक्षीत्। तेन चान्तर्निपतितमाभरणकिरणालोकं संपिण्डितं नदीवेणिकाजलप्रवाहमिव वहन्तमपश्यत्। तन्मध्ये च प्रतिस्रोत इव गत्वा प्रतीहारीमण्डलाधिष्टितपुरोभागं श्रीमण्डपं ददर्श।

तत्र च मध्यभागे पर्य्यन्तरचितमण्डलोपविष्टेन चानेकसहस्रसंख्येन परिस्फुरदाभरणसमूहेन कल्पलतानिवहेनेव कन्यकाजनेन परिवृतां, नीलांशुकप्रच्छदपटप्रावृतस्य महतः पर्य्यङ्कस्यापाश्रये[१]धवलोपधानन्यस्तद्विगुणभुजलतावष्टम्भेनावस्थितां, महावराहदंष्ट्रावलम्बिनीमिव महीं, विस्तारिणि देहप्रभाजालजले भुजनताविक्षेपपरिश्रमैः प्रतरन्तीभिरिव चामरग्राहिणीभिरुपवीज्यमानां, निपतितप्रतिबिम्बतया अधस्तान्मणिकुट्टिमेषु, नागैरिवापह्रियमाणाम्, उपान्ते च रत्नभित्तिषु दिक्पालैरिव पृथक् पृथक् नीय-

---

[१] अपाश्रये मध्ये।

मानाम्, उपरि मणिमण्डपेष्वमरैरिवोत्क्षिप्यमाणां, हृदयमिव प्रवेशितां महामणिस्तम्भैः, आपीतामिव भवनदर्पणैः, अधोमुखेन श्रीमण्डपमध्योत्कीर्णेन विद्याधरलोकेन गगनतलमिवारोप्यमाणां, चित्रकर्म्मच्छलेनावलोकनकुतूहलसंपुञ्जितेन त्रिभुवनेनेव परिवृतां, भूषणरवप्रवृत्तशिखिशतचित्रचन्द्रकेण भवनेनापि कौतुकोत्पादितलोचनसहस्रेणेव दृश्यमानाम्, आत्मपरिजनेनापि दर्शनलोभादुपार्ज्जितदिव्यचक्षुषेवानिमिषनयनेन निर्वर्ण्यमानां, लक्षणैरपि रागाविष्टैरिवाधिष्ठितसर्व्वाङ्गीम्, अकृतपुण्यमिव मुञ्चन्तीं बालभावम्, अदत्तामपि मन्मथावेशपरवशेनेव गृह्यमाणां यौवनेन, अविचलितचरणरागदीधितिभिरिव निर्गताभिः, अलक्तसरसपाटलितलावण्यजलवेणिकाभिरिव गलिताभिः, निवसितरक्तांशुकदशाभिरिवावलम्बिताभिः पादाभरणरत्नांशुकलेखासन्देहदायिनीभिः अतिकोमलतया नखविवरेण वमन्तीभिरिव रुधिरधारावर्षम् अङ्गुलिभिरुपेताभ्यां चित्रितलतारागणमिव नखमणिमण्डलमुद्वहद्भ्यां विद्रुमरसनदीमिव चरणाभ्यां प्रवर्त्तयन्तीं, नूपुरमणिकिरणचक्रवालेन गुरुनितम्बभरखिन्नोरुयुगलसहायतामिव कर्त्तुमुद्गच्छता स्पृश्यमानजघनभागां प्रजापतिकरदृढ़निपीड़ितमध्यभागगलितजघनशिलातलप्रतिघातान्नावण्यजलस्रोत इव द्विधागतमूरुद्वयं दधानां, सर्वतः प्रसारितदीर्घमयूखमण्डलेन

ईर्षया परपुरुषदर्शनमिव निरुन्धता, कुतूहलेन विस्तारमिव तन्वता, स्पर्शसुखेन रोमाञ्चमिव मुञ्चता काञ्चीदाम्ना नितम्बबिम्बस्य विरचितपरिवेषां, निपतितसकललोकहृदयभरेणेवातिगुरुनितम्बाम्, उन्नतकुचान्तरितमुखदर्शनदुःखेनेव [१] क्षीयमाणमध्यभागां, प्रजापतेः स्पृशतः सौकुमार्य्यादङ्गुलिमुद्रामिव निमग्नां नाभिस्थलीमावर्त्तिनी[२]मुद्वहन्तीं, त्रिभुवनविजयप्रशस्तिवर्णावलीमिव लिखितां मन्मथेन रोमराजिमञ्जरीं बिभ्राणाम्, अन्तःप्रविष्टकर्णपल्लवप्रतिबिम्बेन [३] भरखिद्यमानहृदयकरतलप्रेर्य्यमाणेनेव निष्पतता मकरकेतुपादपीठेन स्तनभरेण भूषिताम्, अधोमुखकर्णाभरणमयूखाभ्यामिव प्रसृताभ्याममललावण्यजलमृणालकाण्डाभ्यां

---

[१] उन्नताभ्यामुच्चाभ्यां कुचाभ्यामन्तरितं खोन्नत्या प्रतिरुद्धं यत् मुखदर्शनं तज्जातेन दुःखेन कुचोन्नत्या दृष्टिप्रतिरोधात् मुखदर्शनाभावदुःखेनेव मध्यस्य क्षीयमाणत्वमित्यर्थः।

[२] आवर्त्तिनीम् आवर्त्तः स्वतो जलभ्रमणं सइवावर्त्तस्तद्वतीम्।

[३] अन्तःप्रविष्टं स्वच्छत्वात् हृदयमध्यगतं यत् कर्णपल्लवस्य प्रतिबिम्बं तेन। तथा च हृदयागतकर्णपल्लवप्रतिबिम्बस्य कामपादपीठत्वेनोत्प्रेक्षा। अतएव भरेण पादपीठभरेण खिद्यमानं यत् हृदयं तेन कर्त्रा करतलेन करणेन प्रेर्य्यमाणेन अतएव निष्पतता निर्गच्छता।

बाहुभ्यां नखकिरणविसरवर्षिणा च माणिक्यवलयगौरवश्रमवशात् स्वेदजलधाराजालकमिव मुञ्चता करयुगलेन समुल्लासितां, स्तनभारावनम्यमानमाननमिवोन्नमयता हारेण ऊर्द्धैः करैर्गृहीतचिबुकदेशाम्, अभिनवयौवनपवनक्षोभितस्य रागसागरस्य तरङ्गाभ्यामिवोद्गताभ्यां विद्रुमलतालोहिताभ्यामधराभ्यां--रत्नावदातस्वच्छकान्तिना च मदिरारसपूर्णमाणिक्यशुक्तिसम्पुटच्छविना कपोलयुगलेन रतिपरिवादिनीरत्नकोण[१]चारुणा नासावंशेन च विराजमानां, गतिप्रसरनिरोधिश्रवणकोपादिव [२] किञ्चिदारक्तापाङ्गेन निजमुखलक्ष्मीनिवासदुग्धोदधिना लोचनयुगलेन लोचनमयमिव जीवलोकं कर्तुमुद्यताम्, उन्मदनवयौवनकुञ्जरमदराजिभ्यां भ्रूलताभ्यां, मनःशिलापङ्कलिखितेन च रागाविष्टेन मन्मथहृदयेनेव वदनलग्नेन तिलकबिन्दुना विद्यो-

---

[१] परिवादिनी वीणा रत्नमयः कोणः वीणावादनं धनुराकृतिपदार्थभेदस्तेन चारुणा। नासा वंशेन नासा वंश इव तेन नासारन्ध्रेण च। "वंशो रेणौ कुले वर्गे पृष्ठस्यावयवास्थनि। नासाविवरदेशेऽपि वाद्यभाण्डान्तरेऽपि चेति" विश्वः।

[२] गतिप्रसरस्य गतिसञ्चारस्य निरोधिनः प्रतिबन्धकस्य श्रवणस्य कोपात् गतिसञ्चारप्रतिरोधजनितात् कर्णोपरि कोपादित्यर्थः। तेन श्रवणायतदीर्घत्वं लोचनस्य व्यज्यते।

तितललाटपट्टाम्, उत्कृष्टहेमताली[१]पत्राभरणमयमामुक्त-कर्णोत्पलच्युतमधुधारासन्देहकारिणं कर्णपार्श्वे दोलायमान-पद्मरकतमाणिक्यकुण्डलं दधतीं, पाटलीकृतललाटेन सी-मन्तचुम्बिनश्चूड़ामणेः स्फुरतांशुजालेन मदिरारसेनेव प्र-क्षाल्यमानदीर्घकेशकलापां, देहार्द्धप्रविष्टहरगर्वितगौरीविजि-गीषयेव च सर्वाङ्गानुप्रविष्टमन्मथदर्शितसौभाग्यविशेषाम्, उ-रःसमारोपितैकलक्ष्मीमुदितनारायणावलेप[२]हरणाय प्रति-विम्बकैर्निजरूपतो लक्ष्मीशतानीव सृजन्तीम्, उत्तमाङ्गनिहि-तैकचन्द्रविस्मितहराभिमाननाशाय विलासस्मितैश्चन्द्रसहस्रा-णीव दिक्षु क्षिपन्तीं, निर्दयदग्धैकमन्मथप्रमथनाथरोषेणेव प्रतिहृदयं मन्मथायुतान्युत्पादयन्तीं, रजनीजागरखिन्नस्य परिचितचक्रवाकमिथुनस्य स्वप्तुं [३] क्रीड़ानदिकासु कमल-धूलिबालुकाभिर्बालपुलिनानि कारयन्तीं, परिजननूपुररव-प्रस्थितं वल्लभञ्च हंसमिथुनं मृणालनिगड़केन "बद्धानयेति" हंसपालीमादिशन्तीम्, आभरणमरकतमयूखान् लिहते च

[१] ताली (ताड़ियात) तस्याः पत्त्रमिव इवार्थे कन् तदा-काराभरणविशेषः।

[२] अवलेपो गर्वः।

[३] मिथुनस्येति कर्त्तुः सम्बन्धविवक्षया षष्ठी नतु कृद्योगे स्वप्तुमिति तुमुन्योगे तन्निषेधात् स्वप्नायेत्यर्थः।

भवनहरिणशावकाय सखीश्रवणादपनीय यवाङ्कुरप्रसरं प्रयच्छन्तीम्, आत्मसंवर्द्धितलताप्रथमकुसुमनिर्गमनिवेदनागतामुद्यानपालीमशेषाभरणदानेन सम्मानयन्तीम्, उपनीतविविधवनकुसुमफलपूर्णपत्रपुटामविज्ञायमानालापतया हास[१]हेतुं पुनःपुनः क्रीड़ापर्वतकपालशवरीमालापयन्तीं, करतलविनिहतैर्मुहुर्मुहुरुत्पतद्भिश्च मुखपरिमलान्धैर्नीलकन्दुकैरिव मधुकरैः क्रीड़न्तीं, पञ्जरहारीतकरुतश्रवणकृतदुष्टस्मितां चामरग्राहिणीं विहस्य लीलाकमलेन शिरसि विघट्टयन्तीं, मुक्ताफलखचितचन्द्रलेखिकाप्रतिमस्वेदजलविन्दुजालचितनखपदाभिप्रायेण[२] ताम्बूलकरङ्कवाहिनीं पयोधरे पटवासमुष्टिना ताड़यन्तीं, रत्नकुण्डलप्रतिविम्बसान्द्रदत्तनवनखपदमण्डलाशङ्कया चामरग्राहिणीं विहस्य कपोले प्रसादव्याजदत्तेनात्मकर्णपूरपल्लवेनाच्छादयन्तीं, पृथिवीमिव समुत्सारितमहाकुलभूभृद्वरव्यतिकरशेषभोगेषु [३] विषण्णां, मधुमासलक्ष्मी

[१] अविज्ञायमानः अर्थविशेषे सङ्केतहीनतया न ज्ञायमानः आलापो यस्याः तस्या भावः अतएव हासहेतुमस्फुटार्थकत्वेन हासहेतुत्वात् तत्कथनस्य।

[२] विन्दुजालेन चितः जनितो यो नखपदस्य नखाङ्कस्य अभिप्रायः संशयः तेन।

[३] महाकुलभूभृतः महान्तः कुलपर्वताः मन्दरादयः महावंशा राजानश्च, शेषभोगेषु अनन्तफणासु अवशिष्टसुखेषु च।

मिव षट्पदपटलापक्रियमाणकुसुमरजोधूसरपादपरागां, [१] शरदमिवोत्पादितमानसजन्मपक्षिरवापनीतनीलकण्ठ-मदां, [२] गौरीमिव श्वेतांशुकरचितोत्तमाङ्गाभरणाम्, [३] उदधिवेलावनलेखामिव मधुकरकुलनीलतमालकानना-म्, [४] इन्दुमूर्तिमिवोद्दाममन्मथविलासगृहीतगुरुकलत्रां [५] वनराजिमिव पाण्डुश्यामलवलीलतालङ्कृतमध्यां, [६]

---

[१] पादपानां रागः पादयोः परागश्च।

[२] उत्पादितेन मानसजन्मपक्षिणां हंसानां रवेणापनीतोऽधरी-कृतः नीलकण्ठानां मदो रवमधुरता मदो यत्र उत्पादितः स्वकान्ति-दर्शनेन पुनरुज्जीवितो यो मानसजन्मा मनोजः कामस्तस्य पक्षिणः शरास्तेषां रवेणापनीतो नीलकण्ठस्य रुद्रस्य मदोऽहङ्कारो यया च।

[३] श्वेतांशोश्चन्द्रस्य करैः किरणैः चितं व्याप्तम् उत्तमाङ्गं मस्तकमेवाभरणं यस्य। श्वेतांशुकेन श्वेतवस्त्रेण रचितमुत्तमाङ्गा-भरणं मस्तकभूषणं यस्याः।

[४] मधुकरकुलमिव नीलं तमालकाननं तमालवनं यत्र मधु-करकुलमिव नीलतमा अतिनीला अलका यत्र तादृशमाननं यस्या इति च।

[५] उद्दाममन्मथविलासेन उत्कटकामविलासेन गृहीतमपहृतम् आक्रान्तञ्च गुरुकलत्रं वृहस्पतिभार्य्या गुरुनितम्बं च यस्याः चन्द्रेण गुरुभार्य्याहरणकथा च महाभारते शान्तिपर्वणि २ अध्याये।

[६] पाण्डुश्यामा या लवलीलता तयालङ्कृतमध्यप्रदेशाम् स्वतः

दिनमुखलक्ष्मीमिव भास्वन्मुक्तांशुभिन्नपद्मरागप्रसाधनाम् [१] आकाशकमलिनीमिव स्वच्छाम्बरदृश्यमानमृणालकोमलोरुमूलां, [२] मयूरावलीमिव नितम्बचुम्बिशिखण्डभारविस्फुरच्चन्द्रकान्तां, [३] कल्पतरुलतामिव कामफलप्रदां [४]; शयनसमीपे सम्मुखोपविष्टं "कोऽसौ? कस्य वाऽपत्यं? किमभिधानो वा? कीदृशं तस्य रूपं? कियद्वा वयः? किमभिधत्ते? भवता किमभिहितं? कियच्चिरं दृष्टस्त्वया?

पाण्डुः श्यामला कृष्णा या लवली लतेव त्रिवलीलता तयालङ्कृतं च मध्यं यस्या इति च।

[१] भास्वता सूर्य्येण मुक्तैः अंशुभिर्भिन्नानां पद्मानां रागः रक्तता प्रसाधनं भूषणं यस्याः। भास्वद्भिः दीप्तिमद्भिः मुक्तांशुभिः मुक्ताफलकिरणैर्भिन्नाः मिश्रिताः पद्मरागाः मणिभेदाः प्रसाधनं यस्या इति च।

[२] स्वच्छाम्बरे निर्मलाकाशे दृश्यमानं मृणालकोमलं मृणालश्वेतम् उरुमूलम् उडुमूलं मूलनक्षत्रं यस्या डलयोरेकत्वेन रलयोश्च एकत्वात् उरुशब्दस्य उडुपरत्वम्, स्वच्छेन निर्मलेन अम्बरेण वस्त्रेण दृश्यमानं मृणालकोमलम् ऊरुमूलं यस्या इति च।

[३] नितम्बः पर्य्यतस्थानभेदः श्रोणिदेशश्च। शिखण्डः वर्हः केशकलापश्च "चन्द्रकान्तः मेचकान्तः समौ चन्द्रकमेचकावित्यमरः।" नितम्बचुम्बितकेशकलापां स्फुरच्चन्द्रवत्कान्तां तद्वन्मनोहरामित्यर्थः।

[४] कामो मदनविकारः अभिलष्यमाणपदार्थश्च।

कथञ्चास्य महाश्वेतया सह परिचय उपजातः? किमर्थमत्रागमिष्यतीति” मुहुर्मुहुश्चन्द्रापीड़सम्बद्धमेवालापं तद्रूपवर्णनामुखरं केयूरकं पृच्छन्तीं कादम्बरीं ददर्श।

तस्य तु कादम्बरीवदनचन्द्रलेखालक्ष्मीकस्य सागरस्येवामृतमुल्ललास हृदयम्, आसीच्चास्य मनसि “शेषेन्द्रियाण्यपि मे वेधसा किमिति लोचनमयान्येव न कृतानि, किं वानेन कृतमवदातं कर्म्म चक्षुषा, यदनिवारितमेनां पश्यति, अहो चित्रमेतदुत्पादितं वेधसा सर्वरमणीयानामेकं धाम, कुत एते रूपातिशयपरमाणवः समासादिताः? तन्नूनमेनामुत्पादयतो विधेः करतलपरामर्शक्लेशेन ये विगलिता लोचनयुगलादश्रुजलबिन्दवस्तेभ्य एतानि जगति कुमुदकमलकुवलयसौगन्धिकवनान्युत्पन्नानीति” एवं चिन्तयत एवास्य तस्या नयनयुगले निपपात चक्षुः, तदा तस्या अपि नूनमयं स केयूरकेणावेदित इति चिन्तयन्त्या रूपातिशयविलोकनविस्मयस्मेरं निश्चलनिबद्धलक्ष्य[१]श्चक्षुस्तस्मिन् सुचिरं पपात। लोचनप्रभाधवलितस्तु कादम्बरीदर्शनविक्लवो बल इव तत्क्षणमराजत चन्द्रापीड़ः। दृष्ट्वा च तं प्रथमं रोमोद्गमः, ततो भूषणरवः, तदनु कादम्बरी समुत्तस्थौ। अथ तस्याः कुसुमायुध एव स्वेदमजनयत् सम्भ्रमाभ्युत्थान-

[१] निश्चलमतएव निबद्धलक्ष्यं कृतजन्माने लक्ष्यमित्यर्थः।

श्मोव्यपदेशोऽभवत् ऊरुकम्प एव च गतिं ररोध। नूपुररवाकृष्टहंसमण्डलमयशो लेभे। निश्वासप्रवृद्धिरेवांशुकं चलं चकार चामरानिलो निमित्ततां ययौ। अन्तःप्रविष्टचन्द्रापीड़स्पर्शलोभेनेव निपपात हृदये हस्तपल्लवः, स एव स्तनावरणव्याजो बभूव। आनन्द एवाश्रुजलमपातयत् चलितकर्णावतंसकुसुमरजोव्यपदेशतामयासीत्। लज्जैव वक्तुं न ददौ मुखकमलपरिमलागतालिवृन्दं द्वारपालतामगात्। मदनशरप्रथमप्रहारवेदनेव शीत्कारमकरोत् कुसुमप्रकरकेतकीकण्टकक्षतिः साधारणतामवाप। वेपथुरेव करतलमकम्पयत् निवेदनोद्यतप्रतीहारीनिवारणं कपटमभूत्। तदा च कादम्बरीं विशती मन्मथस्यापि मन्मथ इवाभूत् द्वितीयः तया सह यो विवेश चन्द्रापीड़हृदयम्। तथाहि असावपि तस्याः रत्नाभरणद्युतिमपि तिरोधान[१]मसंस्त हृदयप्रवेशमपि परिग्रहमगणयत् भूषणरवमपि सम्भाषणममन्यत सर्वेन्द्रियाहरणमपि प्रसादमचिन्तयत् देहप्रभासम्पर्कमपि सुरतसमागमसुखमकल्पयत्।

कादम्बरी तु कृच्छ्रादिव दत्तकतिपयपदा महाश्वेतां स्नेहनिर्भरं चिरदर्शनजातोत्कण्ठा सोत्कण्ठं कण्ठे जग्राह।

---

[१] द्युतेः प्रकाशरूपत्वेऽपि विषयान्तरेषु इन्द्रियाच्छादकत्वेन तिरोधानरूपत्वमनुचितमिति विरोधः।

महाश्वेतापि दृढ़तरदत्तकण्ठग्रहा तामवादीत्, "सखि! कादम्बरि! भारते वर्षे राजा अनेकवरतुरगखुरमुखोल्लेखदत्तचतुःसमुद्रमुद्रो रचितप्रजापीड़स्तारापीड़ो नाम तस्यायं निजभुजशिलास्तम्भविश्रान्तविश्वम्भरापीड़श्चन्द्रापीड़ो नाम सूनुर्दिग्विजयप्रसङ्गेनागतोभूमिमिमाम्। एष च दर्शनात्प्रभृति प्रकृत्या मे निष्कारणबन्धुतां गतः परित्यक्तसकलसङ्ग निष्ठुरामपि मे सविशेषस्वभावसरलैर्गुणैराकृष्य चित्तवृत्तिं वर्त्तते। दुर्लभो हि दाक्षिण्यपरवशो निर्निमित्तमित्रसक्तविमहृदयो विदग्धजनः। यतो दृष्ट्वैवेममहमिव त्वमपि निर्म्माणकौशलं प्रजापतेः, निःसपत्नताञ्च रूपस्य, स्थानाभिनिवेशित्वञ्च लक्ष्म्याः, सह्रदंतासुखञ्च पृथिव्याः, सुरलोकातिरिक्तताञ्च मर्त्यलोकस्य, सफलताञ्च मानुषीलोचनानाम्, एकस्थानसमागमञ्च सर्वकलानाम्, ऐश्वर्य्यञ्च सौभाग्यस्य अग्राम्यताञ्च मनुष्याणां, ज्ञास्यसीति, बलादानीतोऽयम् कथिता चास्य मया बहुप्रकारं प्रियसखी। "तदपूर्वदर्शनोयमिति,, विमुच्य लज्जाम्, "अनुपजातपरिचय,, इत्युत्सृज्य अविश्रम्भताम्, "अविज्ञातशील,, इत्यपहाय शङ्कां, यथा मयि तथात्रापि वर्त्तितव्यम् एष ते मित्रञ्च बान्धवश्च परिजनश्च" इत्यावेदिते तया चन्द्रापीड़ः प्रणाममकरोत्। कृतप्रणामञ्च तं तदा कादम्बर्य्यास्तिर्य्यग्विलोकयन्त्याः सस्नेहमतिदीर्घलोचनायाः अपाङ्गभागं गच्छतस्तारतारकस्य लोचनस्य अ-

मसलिललवविसर इवानन्दवास्पजलविन्दुनिकरो निपपात। त्वरितमभिप्रस्थितस्य हृदयस्य (क) धूलिरिव सुधाधवला स्मितज्योत्स्ना विससार। "सम्मान्यतामयं हृदयरुचिरो जनः प्रतिप्रणामेनेति" शिरो वक्तुमिवैका भ्रूलता समुन्ननाम। अङ्गुलिविवरविनिःसृतमरकताङ्गुलीयकमयूखलेखाविभ्रमगृहीतताम्बूलवीटिक इव करो जृम्भारम्भमन्थरं मुखमुत्ससर्प। स्रवत्स्वेदजलधौतलावण्यनिर्मलेषु चास्याः संक्रान्तप्रतिविम्बतया सञ्चरन्मूर्त्तिर्मकरकेतुरिवावयवेष्वदृश्यत चन्द्रापीड़ः। तथा हि शिञ्जन्मणिनूपुरपुटेन मणिभुवमालिखता अङ्गुष्ठेनाहूत इव चरणनखेषु निपपात। दर्शनातिरभसप्रधावितेन गत्वा हृदयेनानीत इव स्तनाभ्यन्तरे समदृश्यत। विकचकुवलयदामदीर्घया च दृष्ट्या निपीत इव कपोलतले समलक्ष्यत। सर्वासामेव च तदा तासां कन्यकानां तिर्य्यक्पश्यन्तीनां तं कुतूहलादपाङ्गचुम्बिन्यो निर्गन्तुकामा इव कर्णपूरमधुकरैः समं बभ्रमुस्तरलास्तारकाः।

कादम्बरी तु सविभ्रमकृतप्रणामा (ख) महाश्वेतया सह पर्य्यङ्के निषसाद। सम्भ्रमपरिजनोपनीतायाञ्च शयनशिरोभागनिवेशितायां धवलांशुकप्रच्छदपटायां (ग) हेमपादाङ्कितायां

(क) मनस इति वा पाठः।

(ख) प्रतिप्रणामा इति वा पाठः।

(ग) विविधरत्नप्रभाभाषितायामिति वा पाठः।

पीठिकायां चन्द्रापीड़ः समुपाविशत्। महाश्वेतानुरोधेन च विदितकादम्बरीचित्ताभिप्रायाः संवृतमुखन्यस्तहस्तदत्त-शब्दनिवारणसंज्ञाः प्रतीहार्य्यो वेणुरवान् वीणाघोषान् गीतध्वनीन् मागधीजयशब्दांश्च सर्वतो निवारयाञ्चक्रुः। त्वरितपरिजनोपनीतेन च सलिलेन कादम्बरी स्वयमुत्थाय महाश्वेतायाश्चरणौ प्रक्षाल्योत्तरीयांशुकेनापमृज्य पुनः पर्य्यङ्कमारुरोह। चन्द्रापीड़स्यापि कादम्बर्य्याः सखी रूपानुरूपा जीवितनिर्व्विशेषा सर्वविस्रम्भभूमिर्मदलेखेति नाम्ना बलादनिच्छतोऽपि प्रक्षालितवती चरणौ। महाश्वेता तु कर्णाभरणप्रभावर्षिस्कन्धदेशे सप्रेम पाणिना स्पृशन्ती मधुकरभरपर्य्यस्तञ्च कर्णावतंसमुत्क्षिपन्ती चामरपवनविधुतिपर्य्यस्ताञ्चालकवल्लरीमनुष्वजमाना कादम्बरीमनामयं पप्रच्छ। सा तु सखीप्रेम्णा गृहनिवासेन कृतापराधेव अनामयेनैव लज्जमाना कृच्छ्रादिव कुशलमाचचक्षे। समुपजातशोकापि च तस्मिन् काले महाश्वेतामुखनिरीक्षणतत्परापि मुहुर्मुहुरपाङ्गविक्षेपप्रचलिततरलतरतारकशारोदरं चक्षुर्मण्डलितचापेन भगवता कुसुमधन्वना बलान्नीयमानं चन्द्रापीड़पीड़नायेव न शशाक निवारयितुम्। तेनैव क्षणेन तेना[१]सन्नसखीकपोलसंक्रान्तेन ईर्षां, रोमाञ्चभिद्यमानकुच-

[१] तेन चन्द्रापीड़ागतचक्षुषा लोचनस्य आसन्नसख्याः कपोलसंक्रान्तत्वेन विषयान्तरप्रवेशात् ईर्ष्या।

तटनश्यत्प्रतिविम्बेन [१] विरहव्यथां, स्वेदार्द्रवक्षःस्थलघटित-शालभञ्जिकाप्रतिमेन [२] सपत्नीरोषं, निमिषता, दौर्भाग्य-शोकम् [३] आनन्दजलतिरोहितेनाश्वतादुःखमभजत सा। मुहूर्त्तापगमे च ताम्बूलदानोद्यतां महाश्वेता तामभाषत "सखि! कादम्बरि! सर्वाभिरेवास्माभिरभिनवागतश्चन्द्रापीड़ आराधनीयस्तदस्मै तावद्दीयतां ताम्बूलम्" इत्युक्ता च किञ्चिद्विवर्त्तितानमितमुखी शनैरव्यक्तमिव "प्रियसखि! लज्जेऽहमनुपजातपरिचया प्रागल्भ्येनानेन, गृहाण त्वमेवास्मै प्रयच्छे" त्युवाच कादम्बरी ताम्, पुनःपुनरभिधीयमाना च तया कथमपि ग्राम्येव चिराद्दानाभिमुखं मनश्चक्रे महाश्वेतामुखादनाकृष्टदृष्टिरेव वेपमानाङ्गयष्टिरामुकुलितलोचना स्थूलस्थूलं निश्वसती निजशरप्रहारमूर्च्छिता मन्मथेन स्नपितेव स्वेदजलविसरैः स्वेदजलविसरनिमज्जनभयेन च हस्तावलम्ब-

---

[१] रोमाञ्चेन भिद्यमाने कुचतटे नश्यत् प्रतिविम्बं यस्य तेन चक्षुषा अतएव विरहसम्भवः।

[२] वक्षःस्थलेन घटितायाः शालभञ्जिकाया चित्रपुत्तलिकायाः प्रतिमा प्रतिच्छाया यत्र। शालभञ्जिकानां स्त्रीभावात् तासाञ्च तत्र संक्रमात् सपत्नीरोषसम्भवः वक्षःस्थलस्य प्रतिविम्बग्राहित्वसूचनाय स्वेदार्द्रेति विशेषणम्।

[३] निमिषता निमीलनं कुर्वताऽपि चक्षुषा तेन दौर्भाग्यसम्भवः।

नमिव याचमाना साध्वसपरवशा पलामीति लपितुमिव कृतप्रयत्ना प्रसारयामास ताम्बूलगर्वं हस्तपल्लवम्।

चन्द्रापीड़स्तु जयकुञ्जरकुम्भस्थलास्फालनसंक्रान्तसिन्दूरमिव सभावपाटलं धनुर्गुणाकर्षणकृतकिणश्यामलं कचग्रहाकृष्टरुदितारिलक्ष्मीलोचनपरामर्शलग्नाञ्जनविन्दुमिव विसर्पन्नखकिरणतयातिरभसेन प्रधाविताभिरिव विवर्द्धिताभिरिव प्रहसिताभिरिवाङ्गुलीभिरुपेतं सर्वलोभात्तत्कालकृतसन्निवेशाः सरागाः पञ्चापीन्द्रियवृत्तीरिवाङ्गुलीरुद्वहन्तं प्रसारितवान् पाणिम्। तत्र च सा तत्कालसुलभविलासदर्शनकुतूहलिभिरिव कुतोऽप्यागत्य सर्वरसैरधिष्ठिता। तेनानिबद्धलक्ष्यतया शून्यप्रसारितेन चन्द्रापीड़हस्तान्वेषणायेव पुरःप्रवर्त्तितनखांशुनिवहेन वेपथुचलितवलयावलीवाचालेन सम्भाषणमिव कुर्वता हस्तेन स्वेदसलिलपातपूर्वकं "गृह्यतामयं मन्मथेन दत्तो दासजन" इत्यात्मानमिव प्रतिग्राहयन्ती "अद्यप्रभृति भवतो हस्ते वर्त्तत" इति जीवितमिव स्थापयन्ती ताम्बूलमदात् आकर्षन्ती च करकिसलयं भुजलतानुसारेण स्खलितमागतम् अनङ्गशरभिन्नमध्यं हृदयमिव पतितमपि रत्नवलयं नाज्ञासीत्। गृहीत्वा चापरं ताम्बूलं महाश्वेतायै प्रायच्छत्।

अथ सहसैव त्वरितगतिः त्रिवर्णरागमिन्द्रायुधमिव कुण्डलीकृतं कण्ठेन वहता विद्रुमाङ्कुरानुकारिचञ्चुपुटेन मर-

कलद्युतिपक्षतिना मन्थरगतेन शुकेनानुबध्यमाना कुमुदकेसरपिञ्जरतया चरणयुगलस्य चम्पककलिकाकारतया च मुखस्य, कुवलयदलनीलतया च पक्षद्युतीनां, कुसुममयीवागत्य सारिका सक्रोधमवादीत्। "भर्तृदारिके! कादम्बरि! कस्मान्न निवारयस्येनमलीकसुभगाभिमानिनमतिदुर्विनीतं मामनुबध्नन्तं विहङ्गापसदम्। यदि मामनेन परिभूयमानामुपेक्षसे ततोऽहं नियतमात्मानमुत्सृजामि सत्यं शपामि ते पादपङ्कजस्पर्शेने,,त्येवमभिहिता च तया कादम्बरी स्मितमकरोत्। अविदितवृत्तान्ता तु महाश्वेता "किमियं वदतीति,, मदलेखां पप्रच्छ। सा चाकथयत् "एषा भर्तृदुहितुः कादम्बर्याः कालिन्दीति नाम्ना सारिका एतस्य परिहासनाम्नः शुकस्य भर्तृदारिकयैव पाणिग्रहणपूर्वकं जायापदं ग्राहिता। अद्य चायमनया प्रत्युषसि कादम्बर्यास्ताम्बूलकरङ्कवाहिनीमिमां तमालिकामेकाकिनीं किमपि पाठयन् दृष्टो यतः, ततः प्रभृति संजातेर्ष्याकोपपराङ्मुखी नैनमुपसर्पति नालपति न स्पृशति न विलोकयति सर्वाभिरस्माभिः प्रसाद्यमानापि न प्रसीदति।" एतदाकर्ण्य स्फुटस्फुरितकपोलोदरचन्द्रापीडो मन्दं मन्दं विहस्याब्रवीत्। "अस्त्येषा कथा श्रूयत एवैतद्राजकुले कर्णपरम्परया परिजनोऽप्येवं मन्त्रयति एवं वहिरपि जनाः कथयन्ति एवं दिगन्तरेष्वयमालापो वर्त्तते एवमस्माभिरप्येतदाकर्णितमेव यथा

किल देव्याः कादम्बर्य्यास्ताम्बूलदायिनीं तमालिकां कामयमानः परिहासनामा शुको मदनपरवशो गतान्यपि दिनानि न वेत्तीति। तदयमास्तां तावद्वामाचारः परित्यक्तनिजकलत्रो निस्त्रपयानया सह देव्यास्तु कादम्बर्य्याः कथमेतद्युक्तं यन्न निवारयतीमाञ्चपलां दुष्टदासीम्, अथ वा देव्यापि कथितैव निःस्नेहता प्रथममेव वराकीमिमां कालिन्दीमीदृशाय दुर्विनीताय विहङ्गाय प्रयच्छन्त्या। किमिदानीमियं करोतु यदेतत् सापत्न्यकरणं नारीणां प्रधानं कोपकारणम्, प्रणयविरागहेतुः, परं परिभवस्थानम् इयमेव केवलमतिधीरा यदनयानेन दौर्भाग्यगरिम्णा जातवैराग्यया विषं वा नास्वादितमनलो वा नासादितोऽनशनं वा नाङ्गीकृतम्। नह्येवंविधमपरमस्ति योषितां लघिम्नः कारणम्, यदि चेयमीदृशेऽप्यपराधेऽनुनीयमानानेन प्रत्यासत्तिमेष्यति तदा धिगिमाम् अलमनया दूरतो वर्जनीयेयम् अभिभवनिरास्थां क एनां पुनरालापयिष्यति को वावलोकयिष्यति को वास्या नाम ग्रहीष्यतीत्ये,,वमभिहितवति तस्मिन् सर्वास्ताः सह कादम्बर्य्या क्रीड़ालापभाविता[१]जहसुरङ्गनाः। परिहासस्तु[२]तस्य न-

---

[१] क्रीड़ार्थमलापः नर्मभाषणम् भावितः चिन्तितः याभिः भू चिन्तायामिति चौरादिकस्य कर्मणि क्तः निष्ठान्तस्य परनिपातः।

[२] परिहासः तन्नामा शुकस्तु इति वक्ष्यमाणं जगादेत्यन्वयः।

मभाषितमाकर्ण्य जगाद "धूर्त्त राजपुत्र ! निपुणेयं न त्वयान्येन वा लीला प्रतारयितुं शक्यते एषापि बुध्यत एवैतावतीर्वक्रोक्तीः इयमपि जानात्येव परिहासजल्पितानि अस्या अपि राजकुलसम्पर्कचतुरा मतिः। विरम्यताम् अभूमिरेषा भुजङ्ग[१]भङ्गिभाषितानाम् इयमेव हि वेत्ति मञ्जुभाषिणी कालञ्च कारणञ्च प्रमाणञ्च विषयञ्च प्रस्तावञ्च कोपप्रसादयोरिति।

अत्रान्तरे चागत्य कञ्चुकी महाश्वेतामब्रवीत्, "आयुष्मति ! देवश्चित्ररथो देवी च मदिरा त्वां द्रष्टुमाह्वयत इति।" एवमभिहिता च गन्तुकामा "सखि ! चन्द्रापीड़ः क्वास्तामिति" कादम्बरीमपृच्छत्। असौ तु "न पर्य्याप्तमनेकस्त्रीहृदयसहस्रावस्थानेने"ति[२]मनसा विहस्य प्रकाशमवदत्, "सखि ! महाश्वेते ! किं त्वमेवमभिदधासि, दर्शनादारभ्य शरीरस्याप्ययमेव प्रभुः, किमुत भवनस्य विभवस्य परिजनस्य वा ? यत्रास्मै रोचते प्रियसखीहृदयाय वा ? तत्रायमास्तामिति।" तत् श्रुत्वा महाश्वेतावदत् "अत्रैव त्वत्प्रासादसमीपवर्त्तिनि

[१] भुजङ्गानां नागराणां भङ्ग्या चातुर्य्येण भाषितानाम्।

[२] अनेकस्त्रीहृदयसहस्ररूपं यदवस्थानयोग्यस्थानं तेनापि किं नास्य पर्य्याप्तं ? तथा च सर्वस्त्रीहृदयसहस्रमेवास्य स्थितियोग्यस्थानमस्याभिरूपत्वात्।

प्रमदवने क्रीड़ापर्वतकमणिवेश्मन्यास्ताम्” इत्यभिधाय गन्धर्वराजं द्रष्टुं ययौ। चन्द्रापीड़ोऽपि तथा सहैव निर्गत्य विनोदनार्थं वीणावादिनीभिश्च(क)वेणुवाद्यनिपुणाभिश्च गीतकलाकुशलाभिश्च कादम्बरीसमादिष्टप्रतिहारीप्रेषिताभिः कन्याभिरनुगम्यमानः पूर्वदृष्टेन केयूरकेणोपदिश्यमानमार्गः क्रीड़ापर्वतमणिमन्दिरमगात्। गते च तस्मिन् गन्धर्वराजपुत्री विसर्ज्य सकलं सखीजनं परिजन[illegible] परिमितपरिचारिकाभिरनुगम्यमाना प्रासादमारुरोह। तत्र च शयनीये निपत्य अदूरस्थिताभिर्विनयविधृताभिः परिचारिकाभिर्विनोद्यमाना कुतोऽपि प्रत्यागतचेतना चैकाकिनी तस्मिन् काले, “चपले! किमिदमारब्धमिति” निगृहीतेव लज्जया, “गन्धर्वराजपुत्रि? कथमेतद्युक्तम्” इत्युपालब्धेव विनयेन, “अयमसावव्युत्पन्नो बालभावः क्व गत” इत्युपहसितेव मुग्धतया, “स्वैरिणि! मा कुरु यथेष्टमेकाकिन्यविनय”मित्याज्ञप्तेव कुमारभावेन, “भीरु! नायं कुलकन्यकानां क्रम” इति विगर्हितेव महत्त्वेन, “दुर्विनीते! रक्षाऽविनय”मिति तर्ज्जितेवाचारेण, “मूढ़े! निगृहीता मदनेन लघुतां नीताऽसी”त्यनुशासितेवाभिजात्येन, “कुतस्तवेयं तरलता? इति

(क) दूरोदरक्रीड़ारागिणीभिश्च अष्टापदपरिचयचतुराभिश्च चित्रकर्मकृतश्रमाभिश्च इत्यधिकः पाठः।

धिक्कृतेव धैर्य्येण, "स्वच्छन्दचारिणि ! अप्रमाणीकृताहं त्वयेति" निन्दितेव कुलस्थित्या, अतिगुर्वीं लज्जामुवाह।

समचिन्तयच्चैवम्, "अगणितसर्वशङ्कया तरलहृदयतां दर्शयन्त्याद्य मया किं कृतमिदं मोहान्धया हताशया ?" तथाहि, अदृष्टपूर्वोऽयमिति साहसिकया मया न शङ्कितं "लघुहृदयां मां लोकः कलयिष्यतीति" निर्लज्जया नाकलितं "कास्य चित्तवृत्तिः ?" इति मूढया न परीक्षितं दर्शनानुकूलाहमस्य नेति वा तरलया न कृतो विचारक्रमः, प्रत्याख्यानवैलक्ष्यान्न भीतं, गुरुजनान्न त्रस्तं, लोकापवादान्नोद्विग्नम्। तथा च महाश्वेता दुःखितेति निर्दाक्षिण्यया नापेक्षितम्, आसन्नवर्त्तिसखीजनोऽप्युपलक्षयतीति मन्दया न लक्षितं, पार्श्वस्थितः परिजनः पश्यतीति नष्टचेतनया न दृष्टम्। स्थूलबुद्धयोऽपि तादृशीं विनयच्युतिं विभावयेयुः, किमुतानुभूतमदनवृत्तान्ता महाश्वेता ? सकलकलाकुशलाः सख्यो वा ?, राजकुलसञ्चारचतुरो वा नित्यमिङ्गितज्ञः परिजनः ? ईदृशेष्वतिनिपुणतरदृष्टयोऽन्तःपुरदास्यः ? सर्वथा हतास्मि मन्दपुण्या ! ! ! मरणं मेऽद्य श्रेयो, न लज्जाकरं जीवितम्। श्रुत्वेतं वृत्तान्तं किं वक्ष्यत्यम्बा, तातो वा, गन्धर्वलोको वा। किं करोमि ? कोऽत्र प्रतीकारः ? केनोपायेन स्खलितमिदं प्रच्छादयामि ? कस्य वा चापलमिदमेतेषां दुर्विनीतानामिन्द्रियाणां कथयामि ? क्व वानेन दग्धहृदयेन पञ्चबाणेन न खलु जा-

नामिं गृहीता गच्छामि। तथा महाश्वेताव्यतिकरेण प्रतिज्ञा कृता, तथा प्रियसखीनां पुरो मन्त्रितम्, तथा च केयूरकस्य हस्ते सन्दिष्टं, न खलु जानामि मन्दभागिनी शठविधिना वा उत्सन्नमन्मथेन वा पूर्वकृतापुण्यसञ्चयेन वा मृत्युहतकेन वा अन्येन वा केनाप्ययमानीतो मम विप्रलम्भकश्चन्द्रापीड़ः! कोऽपि वा न कदाचिद्दृष्टो, नानुभूतो, नच श्रुतो, न चिन्तितो, नोत्प्रेक्षितो मां विड़म्बयितुमुपनतः? यस्य दर्शनमात्रेणैव संयम्य दत्ते वेन्द्रियैः, शरपञ्जरे निक्षिप्य समर्पितेव मन्मथेन, दासीकृत्योपनीतेवानुरागेण, निर्य्यातितेव गृहीतमूल्येन, गुणगणेन, विक्रीतेव हृदयेन, उपकरणीभूतास्मि, न मे कार्य्यं तेन चपलेनेति" क्षणमिव सङ्कल्पमकरोत्। कृतसङ्कल्पा चान्तर्गतेन "मिथ्याविनीते! यदि मया न कृत्यम् एष गच्छामीति" हृदयोत्कम्पचलितेन परिहसितेव चन्द्रापीड़ेन तत्परित्यागसङ्कल्पसमकालप्रस्थितेन कण्ठलग्नेन पृष्टेव जीवितेन "अविशेषज्ञे! पुनरपि प्रक्षालितलोचनया दृश्यतामसौ जनः प्रत्याख्यानयोग्यो न वेति?" तत्कालागतेनाभिहितेव वाष्पेण, "अपनयामि ते सहासुभिर्धैर्य्यावलेपमिति" निर्भर्त्सितेव मनोभुवा, पुनरपि तथैव चन्द्रापीड़ाभिमुखहृदया बभूव। तदेवमस्तमितप्रतिसमाधानबला बलात् प्रेमावेशेनाक्षतन्त्रीकृता परवशेवोत्थाय जालवातायनेन तमेव क्रीड़ापर्वतमवलोकयन्त्यतिष्ठत्। तत्क्षणाच सा तम् आनन्दजलव्यवधानोद्विग्नेव

स्त्या ददर्श न चक्षुषा। अङ्गुलीगलितस्वेदपरामर्शभीतेव चिन्तया लिलेख न चित्रवर्त्तिकया। रोमाञ्चतिरोधानशङ्कितेव हृदयेनालिलिङ्ग न वक्षसा। तत्सङ्गमकालातिपातासहेव मनो गमागमाय नियुक्तवती न परिजनम्।

चन्द्रापीडोऽपि प्रविश्य स्वच्छन्दं कादम्बरीहृदयमिव द्वितीयं मणिगृहं शिलातलास्तीर्णायाम्, उभयत उपर्य्युपरि निवेशितबहूपधानायां कुथायां निपत्य केयूरकेणोत्सङ्गे गृहीतचरणयुगलः ताभिर्यथादिष्टेषु, भूमिभागेषूपविष्टाभिः (क) कन्यकाभिः परिवृतो दोलायमानेन चेतसा चिन्तां विवेश। "किं तावदस्या गन्धर्वराजदुहितुः कादम्बर्य्याः सहभुव एते विलासा एवंविधाः सकललोकहृदयहारिणः? आहोस्विदनाराधितप्रसन्नेन भगवता मकरकेतुना मयि नियुक्ताः? येन मां सास्रेण सरागेणाकूणितत्रिभागेण हृदयान्तःपतत्स्मरशरकुसुमरजोरूषितेनेव चक्षुषा तिर्य्यग्विलोकयति? मद्विलोकिता च धवलेन स्मितालोकेन दुकूलेनेव लज्जयात्मानमावृणोति? मल्लज्जाविवर्त्तमानवदना च प्रतिबिम्बप्रवेशलोभेनेव कपोलदर्पणमर्पयति, मदवकाशदायिनो हृदयस्य प्रथमाविन्यस्तलेखामिव कररुहेण शयनाङ्के लिखति? मत्ताम्बूलवीटिकोपनयनखेदविधुतेन

(क) परिहासचतुराभिरित्यधिकः पाठः।

रक्तोत्पलभ्रमसम्भ्रमद्भ्रमरवृन्देन करतलेन स्विन्नं मुखमिव गृहीततमालपल्लवेनेव वीजयति? पुनश्चाचिन्तयत्, "प्रायेण मानुष्यकसुलभा लघुता मिथ्यासङ्कल्पसहस्रैरेवमायास्य मां विप्रलभते, लुप्तविवेकोयौवनमदो मदनो वा, यतस्तिमिरोपहतेव यूनां दृष्टिरल्पमपि कलुषं महत् पश्यति, स्नेहलवोऽपि वारिणेव नवयौवनमदेन दूरं विस्तार्यते, स्वयमुत्पादितानेकचिन्ताशताकुला कविमतिरिव तरलता न किञ्चिन्नोत्प्रेक्षते? निपुणमन्मथगृहीता चित्रवर्त्तिकेव तरुणचित्तवृत्तिर्न किञ्चिन्नालिखति? सञ्जातरूपाभिमाना कुलटेवात्मसम्भावना न क्वचिन्नात्मानमर्पयति? स्वप्न इवाननुभूतमपि मनोरथो दर्शयति, इन्द्रजालपिच्छिकेवासम्भाव्यमपि प्रत्याशा पुरः स्थापयति।" भूयश्च चिन्तितवान्, "किमनेन वृथैव मनसा खेदितेन? यदि सत्यमेवेयं धवलेक्षणा मय्येवं जातवृत्ति(क)स्तदा न चिरात् स एवैनामप्रार्थितानुकूलो मन्मथः प्रकटीकरिष्यति, स एवास्य संशयस्य छेत्ता भविष्यति" इत्यवधार्य्योत्थायोपविश्य च ताभिः कन्यकाभिः सहाक्षैर्लयैश्च विपञ्चीवाद्यैश्च पाणविकैश्च स्वरसन्देहविवादैश्च सुभाषितगोष्ठीभिश्चान्यैश्च तैस्तैरालापैः सुकुमारैः कलाविलासैः

(क) चित्तवृत्तिरिति वा पाठः।

क्रीड़न्नासाञ्चक्रे। मुहूर्त्तञ्च स्थित्वा निर्गत्योपवनालोकनकुतूहलच्छिन्नचित्तः क्रीड़ापर्वतकशिखरमारुरोह।

कादम्बरी तु तातं दृष्ट्वा चिरयतीति महाश्वेतायाः किल वर्त्मावलोकयितुं विमुच्य तं गवाक्षम् अनङ्गच्छिन्नचित्ता सौधस्योपरितनं शिखरमारुरोह। तत्र च विरलपरिजना सकलशशिमण्डलपाण्डुरेणातपत्रेण हेमदण्डेन निवार्य्यमाणातपा चतुर्भिर्बालव्यजनैश्च फेनशुचिभिरुद्धूयमानैरुपवीज्यमाना शिरसि कुसुमगन्धलुब्धेन भ्रमता भ्रमरकुलेन दिवापि नीलावगुण्ठनेव चन्द्रापीड़ाभिसरणवेशाभ्यासमिव कुर्वती कैलासशिखर इव गौरी, मुहुश्चामरशिखां समासज्य, मुहुश्छत्रदण्डमवलम्ब्य मुहुस्तमालिकास्कन्धे करौ विन्यस्य मुहुर्मदलेखां सखीं परिष्वज्य मुहुः परिजनान्तरितसकलदेहा नेत्रविभागेण मुहुरावलितत्रिवलीवलया परिवृत्त्य मुहुः प्रतीहारीवेत्रलताशिखरे कपोलं निधाय मुहुर्निश्चलकरविधृतामधरपल्लवे वीटिकां विनिवेश्य मुहुरुद्धूर्णकर्णोत्पलप्रहारपलायमानपरिजनानुसरणदत्तकतिपयपदा विहस्य तं विलोकयन्ती तेन च विलोक्यमाना (क) महान्तमपि कालमतिक्रान्तं नाज्ञासीत्।

(क) स्वसौधोपरितलमध्यवर्त्तिन्यपि चन्द्रापीड़पार्श्ववर्त्तिनमिवात्मानं मन्यमाना इत्यधिकः पाठः।

आरुह्य च प्रतीहार्य्या निवेदितमहाश्वेताप्रत्यागमना तस्मा- दवततार। स्नानादिषु मन्दादरापि महाश्वेतानुरोधेन दिवसव्यापारमकरोत्। चन्द्रापीडोऽपि तस्मादवतीर्य्य प्रथम- विसर्जितेनैव कादम्बरीपरिजनेन निर्वर्त्तितस्नानविधिर्नि- रूपहतशिलातलार्च्चिताभिमतदैवतः क्रीड़ापर्वतकएव सर्व- माहारादिकमहःकर्म्म चक्रे।

क्रमेण च कृताहारः क्रीड़ापर्वतकप्राग्भागभाजि मनोहा- रिणि हारीतहरिते हरिणीरोमन्थफेनशीकरासारे सीरा(क) युधहलभयनिश्चलकालिन्दीजलत्विषि तरुणीचरणालक्तकर- सशोणशोचिषि कुसुमरजःसिकतिलतले (ख) लतामण्डपोप- गूढ़े शिखण्डिताण्डवसङ्गीतगृहे मरकतशिलातले समुप- विष्टो दृष्टवान् सहसैवातिबहलधाम्ना धवलेनालोकेन जले- नेव निर्वाप्यमानं दिवसं, मृणालधवलेनेव पीयमानमातपं, क्षीरोदेनेव स्राव्यमानां महीं, चन्दनरसवर्षेणेव सिच्यमानान् दिगन्तान् सुधयेव विलिप्यमानमम्बरतलम्। आसीच्चास्य मनसि "किमु खलु भगवानोषधिपतिरकाण्डएव शीतांशुरु- दितो भवेत् उत यन्त्रविक्षेपविशीर्य्यमाणपाण्डुरजलधारा- सहस्राणि धारागृहाणि मुक्तानि? आहोस्विदनिलविकीर्य्य-

---

(क) मुषलेति वा पाठः।

(ख) सिकतिले इति वा पाठः।

मालतीकरधवलितभुवनाम्बरसिन्धुर्धरातलमवतीर्णेति।" कुतूहलाच्चालोकानुसारप्रहितचक्षुरद्राक्षीत् [१] अनल्पकन्यकाकदम्बपरिवृतां, ध्रियमाणधवलातपत्रामुद्धूयमानचामरद्वयां, कादम्बरीप्रतीहार्या वामपाणिना वेत्रलतागर्भेणार्द्रवस्त्रशकलावच्छन्नमुखं चन्दनानुलेपनसनाथं नारिकेलसमुद्गक[२]मुद्वहन्त्या दक्षिणकरेण दत्तहस्तावलम्बां, केयूरकेण च निश्वासहार्ये निर्मोकप्रतिमे धौते कल्पलतादुकूले दधता, निवेद्यमानमार्गां, मालतीकुसुमदामाधिष्ठितकरतलया च तमालिकयानुगम्यमानामागच्छन्तीं मदलेखाम्, तस्याश्च समीपे तरलिकाम् तया च सितांशुकोपच्छदे पटलके [३] गृहीतं धवलताकारणमिव क्षीरोदस्य, सद्भवमिव चन्द्रमसः मृणालदण्डमिव नारायणाभिपुण्डरीकस्य मन्दरक्षोभविक्षिप्तमिवामृतफेनपिण्डनिकरं, वासुकिनिर्मोकमिव मन्थनश्रमोज्झितं, हासमिव श्रियः कुलगृहवियोगगलितं, मन्दरमथनविखण्डितामेधशशिकलाखण्डसञ्चयमिव संहृतं तारा-

---

[१] आगच्छन्तीं मदलेखां तस्याश्च समीपे तरलिकामद्राक्षीदित्यन्वयः।

[२] नारिकेलास्थिनिर्मितं समुद्गकं सम्पुटकम् पात्रभेदम् (कटोा)।

[३] पटलके पेटके। "पटलन्तु, छदिर्नेत्ररोगे स्यात् पेटकेऽपि च" इति। लोचनः।

गणमिव जलधिजलादुद्धृतं, दिग्गजकरशीकरासारपुञ्जीभूतं, नक्षत्रमाला[१]भरणमिव मदनद्विपस्य शरन्मेघशकलैरिव कल्पितं, कादम्बरीरूपवशीकृतमुनिजनहृदयैरिव निर्म्मितं, गुरुमिव सर्व्वरत्नानां, यशोराशिमिवैकत्र घटितं, प्रतिपक्षमिव चन्द्रमसः, जीवितमिव ज्योत्स्नायाः लक्ष्मीहृदयमिव नलिनीदलगलज्जलबिन्दुविलासतरलम् [२] उत्कण्ठितमिव मृणालवलयधवलकरं [३] शरच्छशिनमिव घनमुक्तांशुनिवहधवलितदिङ्मुखं [४] मन्दाकिनीप्रवाहमिव सुरयुवतिकुचपरिमलवाहिनं [५] प्रभावर्षिणमतितारं [६] हारम्। दृष्ट्वा चायमस्य चन्द्रापीड़ः 'चन्द्रातपद्युतिमुषो धवलिम्नः कारणमिति' मनसा निश्चित्य दूरादेव प्रत्युत्थानादिना समुपचितो-

[१] नक्षत्रमाला सप्तविंशतिमुक्तामयहारभेदहस्तिगण्डमाला-भेदश्च।

[२] जलबिन्दुविलासेन तरलम् चञ्चलं विलास इव तरलो हारमध्यगो मणिर्यत्र च।

[३] करो हस्तः किरणश्च।

[४] घनैर्मेघैः मुक्ता अंशुनिवहाः। घना निविड़ा मुक्तानामंशवश्च।

[५] परिमलः गन्धभेदः सम्यकसम्बन्धश्च।

[६] अतितारमतिशुद्धम्। "तारो मुक्तादिशुद्धौ स्यादिति" विश्वः।

पचारक्रमेण मदलेखामापतन्तीं प्रतिजग्राह। सा तु तस्मिन्नेव मरकतग्रावणि मुहूर्त्तमुपविश्य स्वयमुत्थाय तेन चन्दनाङ्गरागेणानुलिप्य ते च द्वे दुकूले परिधाप्य तैश्च मालतीकुसुमदामभिरारचितशेखरं कृत्वा तं हारमादाय चन्द्रापीड़मुवाच। "कुमार! तवेयमपहस्थिता(क)हङ्कारकान्ता [१] पेशलता प्रीतिपरवशं जनं कमिव? न कारयति। प्रश्रय एव ते ददात्यवकाशमेवंविधानाम् अनया चाकृत्या कस्यासि न जीवितस्वामी? अनेन चाकारणाविष्कृतवात्सल्येन चरितेन कस्य न बन्धुत्वमध्यारोपयसि? एषा च ते प्रकृतिमधुरा व्यवहृतिः कस्य न वयस्यतामुत्पादयति? कं वा न समावासयन्त्यमी [२] स्वभावसुकुमारवृत्तयो भवद्गुणाः?। त्वन्मूर्त्तिरेवात्रोपालम्भमर्हति, या प्रथमदर्शन एव विश्रम्भमुपजनयति, इतरथा हि त्वद्विधे सकलभुवनप्रथितमहिम्नि प्रयुज्यमानं सर्वमेवानुचितमिवाभाति। तथाहि, सम्भाषणमप्यधःकरणमिवापतति। आदरोऽपि प्रभुताभिमानमिवानुमापयति। स्तुतिरप्यात्मोत्सेकमिव सूचयति। उप-

---

(क) अपहसितेति वा पाठः।

[१] अपहस्तितः दूरीकृतः अहङ्कारो यया तथाभूता अतएव कान्ता।

[२] समावासयन्ति आनमयन्ति अनुकूलयन्तीत्यर्थः।

चारोऽपि चपलतामिव प्रकाशयति। प्रीतिरप्यनात्मज्ञता-मिव ज्ञापयति। विज्ञापनापि प्रागल्भ्यमिव जायते। सेवापि चापलमिव दृश्यते। दानमपि परिभव इव भवति। अपि च स्वयं गृहीतहृदयाय किं दीयते? जीवितेश्वराय (क) किं प्रतिपाद्यते प्रथमकृतागमनमहोपकारस्य?, का ते प्रत्युपक्रिया? दर्शनदत्तजीवितफलस्य, सफलमागमनं केन ते क्रियते? प्रणयिताज्ञानेन व्यपदेशेन दर्शयति कादम्बरी, न विभवम्, अप्रतिपाद्या हि परस्वता [१] सज्जन-विभवानाम्, आस्तां तावद्विभवः भवादृशस्य दास्यमप्यङ्गीकुर्व्वाणा नाकार्य्यकारिणीति नियुज्यते, दत्त्वात्मानमपि वञ्चिता न भवति, जीवितमप्यर्पयित्वा न पश्चात्तप्यते, प्रणयिजनप्रत्याख्यानपराङ्मुखी च दाक्षिण्यपरवती महत्ता सताम् (ख)। न च तादृशी भवति याचमानानां यादृशी ददतां लज्जा, यत् सत्यममुना व्यतिकरेण कृतापराधमिव त्वय्यात्मानमवगच्छति कादम्बरी। तदयममृतमथनसमुद्भूतानां सर्वरत्नानामेकः शेष इति शेषनामा हारोऽमुनैव हेतुना

(क) आयत्तजीवितार्थाय इति वा पाठः।

(ख) महतामिति वा पाठः।

[१] सज्जनविभवानां परस्वता पराायत्तताकरणप्रयत्नः अप्रति-पाद्या अनुत्पाद्या स्वयं सिद्धत्वादित्यर्थः।

बहुमतो भगवताम्भसाम्पत्या, गृहमुपगताय प्रचेतसे दत्तः, पाशभृतापि मन्धर्वराजाय, गन्धर्वराजेनापि कादम्बर्य्यै, तयापि त्वद्वपुरस्यानुरूपमाभरणस्येति विभावयन्त्या नभस्तलमेवोचितं सुधासूतेर्धाम न धरेत्यवधार्य्यानुप्रेषितः। यद्यपि निजगुणगणाभरणभूषिताङ्गयष्टयो भवादृशाः क्लेशहेतुमितरजनबहुमतमाभरणमङ्गेषु नारोपयन्ति, तथापि कादम्बरीप्रीतिरत्र कारणम्। किं न कृतमुरसि शिलाशकलं कौस्तुभाभिधानं लक्ष्म्याः सहजमिति बहुमानमाविष्कुर्वता भगवता शार्ङ्गपाणिना, न च नारायणोऽत्रभवन्तमतिरिच्यते, नापि कौस्तुभमणिरणुनापि गुणलवेन शेषमतिशेते, न चापि कादम्बरीमाकारानुकृतिकलयाप्यल्पीयस्या लक्ष्मीरनुगन्तुमलम् अतोऽर्हतीयमिमं बहुमानं त्वत्तः। न चाभूमिरेषा प्रीतिप्रसरस्य, नियतञ्च भवता भग्नप्रणया महाश्वेतामुपालम्भसहस्रैः खेदयित्वात्मानमुत्स्रक्ष्यति अतएव महाश्वेता तरलिकामपीमं हारमादाय त्वत्सकाशं प्रेषितवती। तथापि कुमारस्य सन्दिष्टमेव "न खलु महाभाग! मनसापि कार्य्यः कादम्बर्य्याः प्रथमप्रणयप्रसरभङ्ग इति" उक्ता च ताराचक्रमिव चामीकराचलस्य तटे तं तस्य वक्षःस्थले बबन्ध।

चन्द्रापीड़स्तु विस्मयमानः सबहुमानं प्रत्यवादीत्, "मदलेखे! किमुच्यसे निपुणासि जानासि ग्राहयितुम् उत्तरा-

वैकाशमपहरन्त्या कृतं वचसि कौशलम्! अयि मुग्धे! के वयमात्मनः? के वा वयं ग्रहणस्याग्रहणस्य वा, गता खल्वियमस्त कथा, सौजन्यशालिनीभिर्भवतीभिरुपकरणीकृतोऽयं जनो यथेष्टमिष्टेष्वनभीष्टेषु वा व्यापारेषु विनियुज्यताम्। अतिदक्षिणायाः खलु देव्याः कादम्बर्यां निर्दाक्षिण्यमपि गुणा न कञ्चिन्न दासीकुर्वन्तीति" उक्त्वा च कादम्बरीसम्बद्धाभिरेव कथाभिः सुचिरं स्थित्वा विसर्जयाम्बभूव मदलेखाम्। अनतिदूरं गतायां च तस्यां क्रीड़ापर्वतकगतम् उदयगिरिगतमिव चन्द्रमसं चन्दनदुकूलहारधवलं चन्द्रापीड़ं द्रष्टुम् उत्सारितवेत्रच्छत्रचामरचिह्ना निषिद्धाशेषपरिजनानुगमना तमालिकाद्वितीया चित्ररथसुता पुनरपि तदेव सौधशिखरमारुरोह। तत्रस्था च पुनस्तथैव विविधविलासतरङ्गितैर्विलोकितैर्जहारास्य मनः, तथा हि मुहुर्नितम्बविम्बन्यस्तवामहस्तपल्लवा अंसप्रावृतांशुकानुसारप्रसारितदक्षिणकरा निश्चलतारका लिखितेव मुहुर्जृम्भिकारम्भदत्तोत्तानकरतलतया तन्नोत्स्खलनभिया निरुद्धवदनेव मुहुरंशुकपल्लवताड़ितनिश्वासामोद-लुब्ध--मधुकर-मुखरतया (क)प्रस्तुताह्वानेव मुहुरनिलगलितांशुकसंवरणसम्भ्रमद्विगुणीकृतभुजयुगलप्रावृतपयोधरतया दत्तालिङ्गनसंज्ञेव मुहुः-

(क) परिमलाकृष्टमुखरमधुकरतयेति वा पाठः।

केशपाशाकृष्टकुसुमपूरिताञ्जलिसमाघ्राणलीलया कृतनमस्कारेव, मुहुरुभयतर्ज्जनीभ्रमितमुक्ताप्रलम्बतया निवेदितहृदयोत्कलिकोद्गमेव, [१] मुहुरुपहारकुसुमस्खलनविधुतकरतलतया कथितकुसुमायुधशरप्रहारवेदनेव, मुहुर्गलितरसनानिविड़(क)नियमितचरणतया संयम्यार्पितेव मन्मथेन, मुहुःस्खलितोरुविधृतशिथिलदुकूला, क्षितितलदोलायमानांशुकैकदेशाच्छादितकुचा, चकितपरिवर्त्तनत्रुट्यत्त्रिवलीलता, अंसस्रस्तचिकुरकलापसङ्कलनाकुलकरकमला, कटाक्षक्षेपधवलीकृतकर्णोत्पला विलक्ष्य [२] चास्मितसुधाधूलिधूसरितकपोलं साचीकृतवदनमनेकरसभङ्गिभङ्गुरं विलोकयन्ती तावदवतस्थे, यावदुपसंहृतालोको दिवसो बभूव।

अथ हृदयस्थितकमलिनीरागेणेव रज्यमाने राजीवजीवितेश्वरे सकललोकचक्रवालचक्रवर्त्तिनि (ख) भगवति पूष्णि क्रमेण च दिनपरिलम्बन[३]रोषरक्ताभिः कामिनी-

(क) निगड़ेति वा पाठः।

(ख) सकलचक्रवाकचक्रवालहृदयचक्रवर्त्तिनीति वा पाठः।

[१] प्रलम्बोः लम्बमानहारभेदः उत्कलिका उत्कण्ठा।

[२] विलक्ष्य लज्जां प्राप्य।

[३] दिनस्य परिलम्बेन परिणामेन यो रोषः कोपः स्वपत्नीकृतदोषस्मरणोद्दीपकत्वात् तस्य कोपहेतुत्वम् तेन रक्ताभिः रागयुक्तीकृताभिः।

दृष्टिभिरिव संक्रमितशोणिम्नि व्योम्नि, संहृतशोचिषि जाते जरठहारीतहरितहये हरितवाजिनि, रवि(क)विरहमीलितसरोजसंहतिषु हरितायमानेषु कमलवनेषु, श्वेतायमानेषु (ख) कुमुदषण्डेषु, लोहितायमानेषु दिङ्मुखेषु, (ग) नीलायमाने शर्वरीमुखे, शनैःशनैश्च पुनर्दिनश्रीसमागमाशाभिरिवानुरागिणीभिः सहैव दीधितिभिरदर्शनतामुपगते भगवति गभस्तिमालिनि, तत्कालविजृम्भितेन च कादम्बरीहृदयरागरससागरेणेवापूरिते सन्ध्यारागेण जीवलोके, कुसुमायुधानलदह्यमानचक्रवाकहृदयसहस्रधूम इव जनितमानिनीनयनासारवारिणि, विस्तीर्य्यमाणे तरुणतमालत्विषि तिमिरे, दिक्करिकराकीर्णशीकरासार इव श्वेतायमानतारागणे गगने, (घ) जातायां चादर्शनक्षमायां वेलायां, सौधशिखरादवततार कादम्बरी, क्रीड़ापर्वतकनितम्बाच्च चन्द्रापीड़ः। ततो नचिरादिव गृहीतपादः [१] प्रसाद्यमान इव कुमुदि-

---

(क) हरितवाजीति वा पाठः।

(ख) तत्कालनिनर्त्तिषोपात्तभुजसहस्रविस्तारितसर्वपुरस्कृतगजचर्मणेव इत्यधिकः पाठः।

(ग) निजसुहृदस्तमूर्त्तिसमालोकनाशया प्रहर्षसन्दर्शितस्मितेष्विवोन्मुखेषु धवलायमानेष्विति वा पाठः।

(घ) जाते इत्यधिकः पाठः।

[१] पादस्वरणः किरणश्च।

नीभिः, कलुषमुखीः कुपिता इव प्रसादयन्नाशाः, प्रबोधाशङ्कयेव परिहरन् सुप्ताः कमलिनीः, लाञ्छनच्छलेन निशामिव हृदयेन समुद्वहन्, रोहिणीचरणताड़नलग्नमलक्तकरसमिवोदयरागं दधानः, तिमिरनीलाम्बरां [१] दिवमभिसारिकामिवोपसर्पन्, अतिवल्लभतया विकिरन्निव सौभाग्यमुदगात् भगवानीक्षणोत्सवः सुधासूतिः। उच्छ्रिते (क) च कुसुमायुधाधिराज्यैकातपत्रे कुमुदिनीबधूवरे विभावरीविलासदन्तपत्रे श्वेतभानौ, धवलितदिशि दन्तिदन्तादिवोत्कीर्णे भुवने, चन्द्रापीड़श्चन्द्रातपनिरन्तरतयैव कुमुदमय्या इव गृहकुमुदिन्याः कल्लोलधौतसुधाधवलसोपाने, तनुतरङ्गतालवृन्तवातवाहिनि, सुप्तहंसमिथुने, विरहवाचाल(ख)चक्रवाकयुगले तीरे कुमुददलावलीभिः पर्य्यन्तलिखितदन्तपत्रलतमवदातसिन्धुवारदामोपहारं हरिचन्दनरसैः प्रक्षालितं कादम्बरीपरिजनोपदिष्टं मुक्ताशिलापट्टं चन्द्रशीतलमधिशिश्ये। तत्रस्थस्य चास्यागत्याकथयत् केयूरकः, "देवी कादम्बरी देवं द्रष्टुमागतेति"।

(क) उदिते इति वा पाठः।

(ख) वाचालितेति वा पाठः।

[१] तिमिरेण तमसा नीलं कृष्णमम्बरं नभो यत्र तिमिरमिव नीलमम्बरं वस्त्रं यस्याश्च।

अथ चन्द्रापीड़: ससम्भ्रममुत्थायागच्छन्तीम्, अल्प-सखीजनपरिवृताम्, अपनीताशेषराजचिह्नाम्, इतराभि-वैकावलीमात्राभरणाम्, अच्छाच्छेन चन्दनरसेन धवली-कृततनुलताम्, एककर्णावसक्तदन्तपत्राम्, इन्दुकलाकलि-काकोमलं कर्णपूरीकृतं कुमुददलं दधानां, ज्योत्स्नाशुचिनी कल्पद्रुमदुकूले बिभ्रतीं, तत्कालरमणीयेन वेशेन साक्षादिव चन्द्रोदयदेवतां, मदलेखया दत्तहस्तावलम्बां, कादम्बरी-मपश्यत्। आगत्य च सा प्रीतिपेशलतां दर्शयन्ती, प्राकृतेव-परिजनोचिते भूतले समुपाविशत्। चन्द्रापीड़ोऽपि "कु-मार! अध्यास्यतां शिलातलमेवेति" असकृदनुबध्यमानोऽपि मदलेखया भूमिमेवाभजत। अथ सर्व्वासु चासीनासु तासु मुहूर्त्तमिव स्थित्वा वक्तुमुपचक्रमे चन्द्रापीड़:। "देवि! दृष्टिपातमात्रप्रीते दासजने सम्भाषणादिकस्यापि प्रसादस्य नास्त्यवकाश:, किमुतैतावतोऽनुग्रहस्य? न खलु चिन्तय-न्नपि निपुणं तमात्मनो गुणलवमवलोकयामि, यस्यायमनु-रूपोऽनुग्रहातिरेक:, अतिसरला तवेयमपगताभिमान-मधुरा सुजनता, यदभिनवसेवकजनेऽप्येवमनुरुध्यते। प्रायेण मामुपचारहार्य्यमदक्षिणं देवी मन्यते, धन्य: खलु परि-जनस्ते, यस्योपरि नियन्त्रणा स्यात्। आज्ञासंविभागकरणो-चिते भृत्यजने क इवादर:? परोपकारोपकरणं शरीरं तृणलवलघु च जीवितमत्र ये त्वत्प्रतिपत्तिभिरुपायनीकर्त्तु-

मागतास्ते वयमेते शरीरमिदमेतज्जीवितमेतानीन्द्रियाणि एतेषामन्यतरत् आरोपय परिग्रहेण गरीयस्त्वमिति।" अथै-वंवादिनोऽस्य वचनमाक्षिप्य मदलेखा सस्मितमवादीत्, "कुमार! भवतु अतियन्त्रणया, खिद्यते सखी खलु सव्रीड़ा कादम्बरी, किमर्थञ्चैवमुच्यते?, सर्वम् इदमन्तरेणापि वचन-मनया परिगृहीतं, किं पुनरमृनोपचारफल्गुना [१] वचसा सन्देहदोलामारोप्यत इति?" स्थित्वा च कञ्चित् कालं कृत-प्रस्तावा "कथं राजा तारापीड़ः? कथं देवी विलासवती? कथमार्य्यः शुकनासः? कीदृशी चोज्जयिनी, कियत्यध्वनि सा च? कीदृक् भारतं वर्षं? रमणीयो वा मर्त्त्यलोक?" इत्यशेषं पप्रच्छ। एवंविधाभिश्चान्याभिः कथाभिः सुचिरं स्थित्वो-त्थाय कादम्बरी केयूरकं चन्द्रापीड़समीपशायिनं समादिश्य परिजनञ्च, शयनसौधशिखरमारुरोह। तत्र च सितदुकूल-वितानतलास्तीर्णं शयनीयमलञ्चकार। चन्द्रापीड़ोऽपि-तस्मिन्नेव शिलातले निरभिमानतामभिरूपतामतिगम्भीर-ताञ्च कादम्बर्य्याः, निष्कारणवत्सलताञ्च महाश्वेतायाः, सुजनताञ्च मदलेखायाः, महानुभावताञ्च परिजनस्य, अतिसमृद्धिञ्च गन्धर्वराजलोकस्य, रम्यताञ्च किंपुरुषदेशस्य, मनसा भावयन् केयूरकेण संवाह्यमानचरणः क्षणादिव क्षणदां क्षपितवान्।

---

[१] फल्गुना निःसारेण निरर्थकेनेत्यर्थः।

अथ क्रमेण कादम्बरीदर्शनप्रजागरखिन्नः, स्वप्नुमिव तालतमालताली कदलीकन्दलिनीं, प्रविरलकल्लोलानिलशीतलां वेलावनराजिमवततार तारापतिः। अभ्यर्णविरहविधुरस्य च कामिनीजनस्य निश्वसितैरिवोष्णैर्म्लानिमनीयत चन्द्रिका। चन्द्रापीड़विलोकनारूढ़मदनेव कुमुददलोदरनीतनिशा पङ्कजेषु निपपात लक्ष्मीः। क्षणदापगमे च स्मृत्वा कामिनीकर्णोत्पलप्रहाराणामुत्कण्ठितेष्विव (क) क्षामतां व्रजत्सु पाण्डुतनुषु वासगृहप्रदीपेषु, अनवरतशरक्षेपखिन्नानङ्गनिःश्वासविभ्रमेषु वहत्सु तरुलताकुसुमपरिमलेषु प्रभातमातरिश्वसु, मन्दरगिरिलतागृहगहनानि च भियेव भजन्तीष्वरुणोदयोपप्लविनीषु तारकासु, क्रमेण च समुन्नतचक्रवाकहृदयनिवासलग्नानुरागमिवालोहितं मण्डलमुद्वहति सवितरि, चन्द्रापीड़ः शिलातलादुत्थाय प्रक्षालितमुखकमलः कृतसन्ध्यानमस्कृति(ख)र्गृहीतताम्बूलः, "केयूरक! विलोकय, देवी कादम्बरी प्रबुद्धा न वा, क्व वा तिष्ठति?„ इत्यवोचत्। गतप्रतिनिवृत्तेन च तेन, "देव! मन्दरप्रासादस्याधस्तादङ्गनसौधवेदिकायां महाश्वेतया सहावतिष्ठति।„ इत्यावेदिते गन्धर्वराजतनयामालोकयितुमाजगाम,

---

(क) प्रहारेष्वुत्कण्ठितेष्विति वा पाठः।

(ख) आबद्धशेखर इत्यधिकः क्वचित् पाठः।

ददर्श च धवलभस्मकृतललाटिकाभिरक्षमालिकापरिवर्त्तनप्रचलकरतलाभिः, पाशुपतव्रतचारिणीभिर्धातुरागारुणाम्बराभिश्च परिव्राजिकाभिः परिणततालफलवल्कललोहितवस्त्राभिश्च रक्तपटव्रतवाहिनीभिः सितवसननिविड़निबद्धस्तनपरिकराभिश्च श्वेतपटव्यञ्जनाभिर्जटाजिनमौञ्जीवल्कलाषाढ़धारिणीभिर्वर्णिचिह्नाभिस्तापसीभिः, साक्षादिव मन्त्रदेवताभिः पठन्तीभिर्भगवतः शौद्धोदने(क)स्त्र्यम्बकस्याम्बिकायाः कार्त्तिकेयस्य विष्टरश्रवसोऽर्जुनस्यार्य्यविलोकितेश्वरस्यार्हतो वैश्वदेवस्य मार्त्तण्डस्य विरिञ्चस्य (ख) पुण्याः स्तुतीरुपास्यमानाम् अन्तःपुराभ्यर्हिताश्च सादरं नमस्कारैराभाषणैरभ्युत्थानैरासन्नवेत्रासनदानैश्च दर्शनागतगन्धर्वराजबान्धववृद्धाः, सम्मानयन्तीं, महास्थेतां, पृष्ठतश्च समुपविष्टेन किन्नरमिथुनेन, मधुराभ्यां वंशाभ्यां दत्ते ताले, कलगिरा गायन्त्या नारददुहित्रा पठ्यमाने च सर्वमङ्गलमहीयसि महाभारते, दत्तावधानां, पुरोधृते च मणिदर्पणे ताम्बूलराग(ग)बद्धलक्षिकान्धकारिताभ्यन्तरं दशनज्योत्स्नासिक्तामुन्मृष्टमधूच्छिष्टपट्टपाटलमधरं विलोकयन्तीं, शैवलहरणाया च

(क) पुस्तकान्तरे शौद्धोदनेरिति नास्ति।

(ख) पुस्तकान्तरे वैश्वदेवस्य मार्त्तण्डस्येति नास्ति।

(ग) बहलेत्यधिकः पाठः।

कर्णपूरशिरीषप्रेषितोत्तानविलोचनेन बहुमण्डलं भ्रमता भवनकलहंसेन प्रभातशशिनेव क्रियमाणगमनप्रणामप्रदक्षिणो कादम्बरीञ्च। समुपसृत्य कृतनमस्कारस्तस्यामेव सुधावेदिकायां विन्यस्तमासनं भेजे, स्थित्वा च कञ्चित्कालं महाश्वेताया वदनं विलोक्य(क)स्फुरितकपोलोदरं मन्दस्मितमकरोत्। असौ तु तावतैव विदिताभिप्राया कादम्बरीमब्रवीत्। "सखि ! भवत्या गुणैश्चन्द्रापीड़श्चन्द्रकान्त इव चन्द्रमयूखैरार्द्रीकृतो न शक्नोति वक्तुं, जिगमिषति खलु कुमारः, पृष्ठतो दुःखमविदितवृत्तान्तं राजचक्रमास्ते। अपि च युवयोर्दूरस्थितयोरपि स्थितेयमिदानीं कमलिनीकमलबान्धवयोरिव कुमुदिनीकुमुदनाथयोरिव प्रीतिरा प्रलयात्, अतोऽभ्यनुजानातु भवतीति।,,

अथ कादम्बरी "सखि ! महाश्वेते ! स्वाधीनोऽयं स परिजनः कुमारस्य, स्वइवान्तरात्मा क इवात्रानुरोधः ?" इत्यभिधाय गन्धर्वकुमारानाहूय "प्रापयत कुमारं स्वां भूमिम्", इत्यादिदेश। चन्द्रापीड़ोऽप्युत्थाय प्रणम्य प्रथमं महाश्वेतां ततः कादम्बरीं, तस्याश्च प्रेमस्निग्धेन चक्षुषा मनसा च गृह्यमाणो, "देवि किं ब्रवीमि ? बहुभाषिणो न श्रद्दधाति लोकः, स्मर्त्तव्योऽस्मि परिजनकथासु,, इत्यभिधाय कन्यकान्तःपुरान्निर्ज-

(क) स्फुठमित्यधिकः पाठः।

गाम। कादम्बरीवर्जमशेषः कन्यकाजनोगुणगौरवाकृष्टः परवश इव तं ब्रजन्तमा वहिस्तोरणादनुवब्राज। निवृत्ते च कन्यकाजने केयूरकेणोपनीतं वाजिनमारुह्य गन्धर्वकुमारकैस्तैरनुगम्यमानो हेमकूटात् प्रवृत्तो गन्तुम्। गच्छतश्चास्य चित्ररथतनया न केवलमन्तर्वहिरपि, सैव सर्व्वाशा[१]निबन्धनमासीत्। तथाहि तन्मयेन मानसेनासह्यविरहदुःखानुप्रयलग्नामिव, पृष्ठतः कृतमार्गगमननिरोधामिव, पुरस्तात् वियोगाकुलहृदयोत्कलिकावेगोत्क्षिप्तामिव, नभसि सम्यगालोकयितुं वदनं विरहातुरमानसामिवावस्थितामुरःस्थले तामेव मृगलोचनां ददर्श। क्रमेण च प्राप्य महाश्वेताश्रमम् अच्छोदसरस्तीरे सन्निविष्टमिन्द्रायुधखुरपुटानुसारेणैवागतमात्मस्कन्धावारमपश्यत्। निवर्त्तिताशेषगन्धर्वकुमारश्च सानन्देन सकुतूहलेन सविस्मयेन च स्कन्धावारवर्त्तिना जनेन प्रणम्यमानः स्वभवनं विवेश। सम्मानितप्रत्यक्षीकृता(क)शेषराजलोकस्च वैशम्पायनेन पत्रलेखया च सह एवं महाश्वेता, एवं कादम्बरी, एवं मदलेखा एवं तमालिका, एव केयूरक इत्यनयैव कथया प्रायो दिवसमनैषीत्। कादम्बरीरूपदर्शनद्विष्टे व[२]नास्य पुरेव प्रीतिमकरोत् राजलक्ष्मीः तामेव

(क) प्रत्यक्षीकृतेति पुस्तकान्तरे नास्ति।

[१] आशाः प्रत्याशाः दिशश्च।

[२] द्विष्टिः द्वेषः सपत्नीरूपदर्शनेन द्वेषो हि स्त्रीणां स्वभावः

च धवलेक्षणामाबद्धरणरणकेन [१] चेतसा चिन्तयतो जाग्रत एवास्य सा जगाम रात्रिः। अपरेद्युश्च समुत्थिते भगवति रवौ आस्थानमण्डपगतः तद्गतेनैव मनसा सहसैव प्रतीहारेण सह प्रविशन्तं केयूरकं ददर्श। दूरादेव च क्षितितलस्पर्शिना मौलिना कृतपादपतनम्, एह्येहीत्युक्त्वा प्रथममपाङ्गविसर्पिणा चक्षुषा, ततो हृदयेन, ततो रोमोद्गमेन, पश्चाद्भुजाभ्यां प्रधावितः प्रसृतमालिलिङ्ग गाढ़म्, उपावेशयच्चैनमात्मनः समीप एव, पप्रच्छ च स्मितसुधाधवलीकृताक्षरं क्षरत्-प्रीतिद्रवमयमिव वचनमादृतः। "केयूरक! कथय कुशलिनी देवी ससखीजना सपरिजना कादम्बरी भगवती महाश्वेता चेति?" असौ तु तेन राजसूनोः प्रतिप्रकर्षजन्मना स्मितेनैव स्नपित इवानुलिप्त इव सद्य एवापगताध्वखेदः प्रणम्यादृततरमेवोचत्, "अद्य कुशलिनी, यामेवं देवः पृच्छति" इत्यभिधाय अपनीयार्द्र(क)कर्पटावगुण्ठितं विसस्त्रसंयतमुखमार्द्रचन्दनपङ्कन्यस्तबालमृणालवलयमुद्रं नलिनीपत्रपुटमदर्शयत्; उद्घाट्य च तत्र कादम्बरीप्रहितान्यभिज्ञाना-

---

(क) वस्त्रेत्यधिकः पाठः।

अतो न पुरेव समीपमाजगाम राजलक्ष्मीः। अत्रास्यानादरः कादम्बरीरूपमात्र एव मनो लग्नमिति भावः।

[१] आबद्धरणरणकेन आबद्धोद्वेगेन।

न्यदर्शयत्। तद्यथा,-मरकतहरिन्ति व्यपनीतत्वञ्चि चारुम-ञ्जरीभाञ्जि चीरीणि, पूगीफलानि, शुककामिनीकपोलपा-ण्डूनि ताम्बूलीदलानि, हरशिरश्चन्द्रखण्डस्थूलशकलञ्च कर्पू-रम्, अतिबहलमृगमदामोदमनोहरञ्च मलयजविलेपनम्। अब्रवीच्च चूड़ामणिचुम्बिना कोमलाङ्गुलिविवरविनिर्गतलो-हितांशुकजालेनाञ्जलिना, "देवमर्चयति देवी कादम्बरी, म हाश्वेता च, सकण्ठग्रहेण कुशलवचसा, पर्य्यस्तशिखण्डमाणि-क्यज्योत्स्नास्नपितललाटेन च नमस्कारेण मदलेखा, चितित-लघटितसीमन्तमकरिका[१]कोटिकोणेन सकलकन्यालोकस्य सचरणरजःस्पर्शेन च पादप्रणामेन तमालिका। सन्दिष्टञ्च तव महाश्वेतया, "धन्याः खलु ते, येषां न गतोऽसि चक्षुषो-र्विषयं तया न नाम समक्षं भवतस्ते तुहिनशीतलाश्चन्द्रमया इव गुणा विरहे विवस्वन्मया इव संवृत्ताः। स्पृहयन्ति खलु जनाः कथमपि देवोपपादितायामृतोत्पत्तिवासरायेवातीत-दिवसाय त्वया वियुक्तं विनिवृत्तमहोत्सवालसमिव वर्त्तते गन्धर्वराजनगरं, जानासि च मां कृतसकलपरित्यागाम्, तथाप्यकारणपक्षपातिनं भवन्तं द्रष्टुमिच्छति अनिच्छन्त्या अपि मे बलादिव हृदयम्। अपि च बलवदसुस्थशरीरा काद-म्बरी स्मरति च स्मेराननं स्मरकल्पं त्वाम्, अतःपुनरागमन-

---

[१] मकरिका मकराकारः कर्णभूषणभेदः।

गौरवेणार्हसीमां गुणवदभिमानिनीं कर्त्तुम्, उदारजनादरो हि बहुमानमारोपयति, अवश्यं सोढ़व्या चेयमस्मद्विधजन-परिचयकदर्थना कुमारेण, भवत्सुजनतैव जनयत्यनुचित-सन्देशप्रागल्भ्यम्। एष देवस्य शयनीये विस्मृतः शेषो हारः प्रहितः” इत्युत्तरीयपटान्तसंयतं सूक्ष्मसूत्र(क)विवर-निःसृतैरंशुसन्तानैः संसूच्यमानं विमुच्य चामरग्राहिण्याः करे समर्पितवान्।

अथ चन्द्रापीड़ो “महाश्वेताचरणाराधनतपःफलमिदं, यदेवं परिजनेऽप्यनुस्मरणादिकं प्रसादभारमतिमहान्तमारो-पयति देवी कादम्बरी” इत्यूक्त्वा तत्सर्वं शिरसि कृत्वा स्वयमेव जग्राह। तेन च कादम्बर्य्याः कपोललावण्येनेव, गलितेन स्मितावलोकेनेव रसतामुपनीतेन, हृदयेनेव द्रुतेन, गुणगणे-नेव निस्यन्दितेन, स्पर्शवता, ह्लादिना, सुरभिणा च विलेपनेन विलिप्य तमेव कण्ठे हारमकरोत्। आगृहीतताम्बूलश्च मुहू-र्त्तादिवोत्थाय वामबाहुना स्कन्धदेशे समवलम्ब्य केयूरकम्, ऊर्द्ध्वस्थित एव कृतयथाक्रियमाणसम्मानमुदितं प्रधानराज-लोकं विसृज्य, शनैःशनैर्गन्धमादनं करिणं द्रष्टुमयासीत्। तत्र च स्थित्वा क्षणमिव तस्मै स्वयमेव निजनखांशुजाल-जटिलं समृणालमिव शष्पकवलमवकीर्य्य, वल्लभतुरङ्गमम-

(क) वस्त्रेति वा पाठः।

न्दुरामुखः प्रतस्थे, गच्छंश्चोभयतः किञ्चित् किञ्चिदिव तिर्य्यग्वलितवदनः परिजनं विलोकयाम्बभूव। अथ चित्तज्ञैः प्रतीहारैः प्रतिषिद्धानुगमने निखिले समुत्सारिते परिजने, केयूरकद्वितीय एव मन्दुरां प्रविवेश। उत्सारणभयसम्भ्रान्तलोचनेषु प्रणम्यापसृतेषु मन्दुरापालेषु, इन्द्रायुधस्य पृष्ठावगुण्ठनपटं किञ्चिदेकपार्श्वगलितं समीकुर्वन्नुत्सारयंश्च कूणितनेत्रत्रिभागस्य दृष्टिनिरोधिनीं कुङ्कुमकपिलां केसरसटां [१] खुरधोरणी[२]विन्यस्तचरणो लीलामन्दं मन्दुरादारुदत्तदेहभरः सकुतूहलमुवाच, "केयूरक! कथय मन्निर्गमादारभ्य को वा वृत्तान्तो गन्धर्वराजकुले? केन वा व्यापारेण वासरमतिनीतवती? गन्धर्वराजपुत्री किं वाऽकरोन्महाश्वेता? किमभाषत वा मदलेखा? के वाभवन्नालापाः परिजनस्य? भवतो वा को व्यापार आसीत्? आसीद्वा काचिदस्मदाश्रयिणी कथा?" (क)। केयूरकस्तु सर्वमाचचक्षे, "देव! श्रूयताम्, "निर्गते त्वयि हृदयसहस्रप्रयाणपटहकलकलमिव नूपुरचक्रक्वणितेन कन्यकान्तःपुरे कुर्वन्ति, देवी कादम्बरी सपरिजना सौधशिखरमारुह्य तुरगधूलिरेखाधू-

---

(क) अत्र तु न वेतीत्यधिकः पाठः।

[१] केसररूपा सटा ग्रीवास्थकेशसमूहः।

[२] खुरधोरणी खुरश्रेणी।

सरं देवस्यैव गमनमार्गमालोकितवती। तिरोहितदर्शने च देवे, मदलेखास्कन्धनिक्षिप्तमुखी प्रीत्या तं दिगन्तं दुग्धदधिधवलैः प्लावयन्तीव दृष्टिपातैः, सितातपत्रापदेशेन शशिनेवेर्ष्यया निवार्य्यमाणरविकरस्पर्शा, सुचिरं तत्रैव स्थितवती। तस्माच्च कथमपि सखेदमवतीर्य्य क्षणमिवास्थानमण्डपे स्थित्वोत्थाय स्खलनभियेव निवेद्यमानोपहारकुसुमा, शब्दायमानैर्मधुकरैः जलधाराधवलनखमयूखोन्मुखानामनुगलं [१] गलद्भिर्वलयैः कण्ठबन्धानिवोपपादयन्ती, केकारवोद्विग्ना भवनशिखण्डिनां, पदे पदे च कुसुमधवलान् करेण गृहलतापल्लवान्, मनसा च देवस्य गुणगणानवलम्बमाना, तमेव क्रीड़ापर्वतकमागतवती, यत्र स्थितवान् देवः। तमुपेत्य च "देवेनात्र मरकतशिलामकरिका[२]प्रणालप्रस्रवणसिच्यमानहरितलतामण्डपे शीकरिणि

[१] जलधारेव धवलो यो नखमयूखस्तत्रोन्मुखानां तद्दर्शनाय उत्कण्ठितानां जनानामनुगलं गले विभक्त्यर्थेऽव्ययीभावः कण्ठबन्धानिव वलयैः उपपादयन्ती अनुपलमिति पाठे गलद्भिरिति क्रियाविशेषणम्। पलो दण्डयष्टिभागः।

[२] मकरीव इवार्थे कन् मकरतुल्याकारजलयन्त्रभेदः मरकतशिलमय्या मकरिकायाः प्रणालस्य जलप्रवाहस्य प्रस्रवणेन सिच्यमानं हरितलतामण्डपं यत्र।

शिलातले स्थितम्, अत्र गन्धोदकपरिमललीनालिजालज-टिलशिलाप्रदेशे स्नातम्, अत्र कुसुमधूलिसिकतिले गिरि-नदीकाननतटे भगवानर्च्चितः शूलपाणिः अत्र क्षेपितशश-धररोचिषि स्फाटिकशिलातले भुक्तम्, अत्र संक्रान्तचन्दन-रसलाञ्छने मुक्ताशैलशिलापट्टे सुप्तम्।" इति परिजनेन पुन-रुक्तं निवेद्यमानानि देवस्यैव स्थानचिह्नानि पश्यन्ती, चपि-तवती दिवसम्। दिवसावसाने च कथमपि महाश्वेताप्र-यत्नादनभिमतमपि तस्मिन्नेव स्फटिकमणिवेश्मन्याहारमक-रोत्। अस्तमुपगते च भगवति रवावुदिते चन्द्रमसि, तत्रैव कञ्चित् कालं स्थित्वा चन्द्रकान्तमयीव चन्द्रोदये प्रत्यार्द्री-क्षततनुः, चन्द्रबिम्बप्रवेशभयेनेव करौ कपोलयोः कृत्वा किमपि चिन्तयन्ती, मुकुलितेक्षणा क्षणमात्रं स्थित्वोत्थाय विमलनखनिपतितशशिप्रतिमाभरगुरूणीव कृच्छ्रादुत्क्षिपन्ती लीलामन्थरगमनपटूनि पदानि शय्यागृहमगात्। शयन-निक्षिप्तगात्रयष्टिश्च ततः प्रभृति प्रबलया शिरोवेदनया विचेष्टमाना, दारुणेन च दाहरूपिणा ज्वरेण अभिभूयमाना, केनाप्याधिना मङ्गलप्रदीपैः कुमुदाकरैश्च [१] सार्द्धमनिमीलि-

---

[१] रात्रौ प्रदीपस्य कुमुदनिचयस्य च प्रकाशमानत्वात् तत्तुल्य-प्रकाशवत्त्वेनानिमीलितलोचनत्वं तस्याः।

तलोचना, दुःखदुःखेन क्षणदामनैषीत्। उषसि च मामाहूय देवस्य वार्त्ताव्यतिकरोपालम्भाय सोपालम्भमादिष्टवती।"

चन्द्रापीड़स्तदाकर्ण्य जिगमिषुः "अश्वोऽश्व" इति वदन् भवनान्निर्ययौ आरोपितपर्य्याणञ्च [१] त्वरिततुरगपरिचारकोपनीतमिन्द्रायुधमारुह्य पश्चादारोप्य पत्रलेखां, स्कन्धावारे स्थापयित्वा वैशम्पायनम्, अशेषं परिजनं निवर्त्त्य च, अन्यतुरगारूढ़ेनैव केयूरकेणानुगम्यमानो, हेमकूटं ययौ। आसाद्य च कादम्बरीभवनद्वारमवततार तुरगात्। अवतीर्य्य च द्वारपालार्पिततुरङ्गः कादम्बरीप्रथमदर्शनकुतूहलिन्या च पत्रलेखया चानुगम्यमानः प्रविश्य, "क्व देवी कादम्बरी तिष्ठति?" इति सम्मुखागतमन्यतमं वर्षवरमप्राक्षीत्। कृतप्रणामेन च तेन "देव! मत्तमयूरस्य क्रीड़ापर्वतकस्याधस्तात् कमलवनदीर्घिकातीरे विरचितं हिमगृहमध्यास्ते" इत्यावेदिते केयूरकेणोपदिश्यमानवर्त्मा, प्रमदवनमध्येन गत्वा किञ्चिदध्वानं, मरकतहरितानां कदलीवनानां प्रभया श्यामीकृतरविकिरणं, हरितायमानं दिवसं ददर्श। तेषाञ्च मध्ये निरन्तरनलिनीदलच्छन्नं हिमगृहमपश्यत्, तस्माच्च निष्पतन्तम् आर्द्रांशुकच्छलेनाच्छोदजलेनेव संवीतं, बाहुलताविधृतैर्मृणालवलयैराभरणकैरिव धवलितावयवम्, आपाण्डुभिरेकश्रवणाश्रयैस्ता-

[१] आरोपितपर्य्याणम् आसञ्जितपल्ययनम्।

लङ्कीकृतैः केतकीगर्भदलैरुपहसितदन्तपत्त्रम्, आलिखितचन्दननललाटिकानि मुखारविन्दानि बहुसौभाग्यपदानीव दधानं, कृतचन्दनविन्दुविशेषकांश्च दिवापि स्पर्शलोभस्थितेन्दुप्रतिबिम्बानिव कपोलानुद्वहन्तम्, अपहृताशेषशिरीषसौभाग्याभिः शैवलमञ्जरीभिः कृतकर्णपूरं, कर्पूरधूलिधूसरेषु मलयजरसलवललितेषु बकुलावलीवलयिषु (क) स्तनेषु न्यस्तनलिनीपत्त्रप्रावरणम्, अनवरतचन्दनचर्चाप्रणयनपाण्डुरैः सन्तापरोषमृदित(ख)चन्द्रकरैरिव करैः कल्पितमृणालदण्डानि विसतन्तुमयानि चामराणि बिभ्राणम्, उन्नालैश्च कुमुदैः कुवलयैः कदलीदलैः कमलिनीपलाशैः कुसुमस्तवकैश्चातपत्त्रीकृतैर्निवारितातपं, जलदेवतानामिव समूहं, वरुणश्रियामिव समागमं, शरदामिव समाजं, सरसीनामिव गोष्ठीबन्धं, शिशिरोपचारनिपुणं, कादम्बर्याः शरीरपरिचारकं शरीरप्रायं परिजनमद्राक्षीत्।

तेन च प्रणम्यमानः पादतलपतनभयादिव(ग)त्वरितापसृतेन दीयमानमार्गः, चन्दनपङ्ककृतवेदिकानां, पुण्डरीककलिकाघटितघण्टिकानां, विकसितसिन्धुवारकुसुममञ्जरी-

---

(क) ललितकुवलयावलीवलयेष्विति वा पाठः।

(ख) प्रकटितेति वा पाठः।

(ग) पादनखतपनदाहभयादिवेति वा पाठः।

चामराणां, लम्बितस्थूलमल्लिकामुकुलहाराणाम्, आबद्धलवङ्गचन्दनमालिकानां, दोलायमानकुमुददामध्वजानां, मृणालवेतहस्ताभिर्गृहीतरुचिरकुसुमाभरणाभिर्मधुलक्ष्मीप्रकृतिभिरिव द्वारपालिकाभिरधिष्ठितानां कदलीतोरणानां तलेन प्रविश्य, सर्वतो निसृष्टदृष्टिर्दृष्टवान्, क्वचिदुभयतटान्तनिखातलमालपल्लवकृतवनलेखाः, कुमुद(क)धूलिवालुकापुलिनमालिनीश्चन्दनरसेन प्रवर्त्त्यमाना, गृहनदिकाः, क्वचिन्निचुल[१] मञ्जरीरचितरक्तचामराणां जलार्द्र[२]वितानकानां तलेषु ससिन्दूरकुट्टिमेषु आस्तीर्य्यमाणानि रक्तपङ्कजशयनानि, क्वचिदेलारसेन सिच्यमानानि स्पर्शानुमेय(ख)भित्तीनि स्फटिक(ग) भवनानि, क्वचिच्छिरीषपक्ष्मकृतशाद्वलानां, मृणालधारागृहाणां, शिखरमारोप्यमाणानां, धाराकदम्बधूलिधूसरितानां यन्त्रमयूरकाणां कदम्बकानि, क्वचित् सहकारतरुतलैर्जम्बूपल्लवैराच्छाद्यमानाभ्यन्तराः पर्णशालाः, क्वचित् क्रीड़ितक-

---

(क) कुमुदवनेति वा पाठः।

(ख) अत्र तु रम्येत्यधिकः पाठः।

(ग) अभ्रेति वा पाठः।

[१] निचुलोऽम्बुजइज्जल इत्यमरः (हिजोल) तस्य च जलप्रायदेशजत्वात् शीतलत्वेन तापापनोदनार्थं चामरत्वकरणम्।

[२] जलेनार्द्राणि वितानकानि चन्द्रातपास्तेषाम्।

तिमकरिकलभयूथकाकुलीक्रियमाणाः काञ्चनकमलिनीकाः, क्वचिद्गन्धोदककूपेषु बद्धकाञ्चनसुधापङ्कामपीठेषु स्थूलविसलतादण्डघटितदण्डारकाणि [१] कनककेतकदलजलद्रोणिकानि कुवलयावलीरज्जुभिर्ग्रथ्यमानानि कमलपत्रपुटघटितघटीयन्त्र[२]काणि, क्वचित् स्फटिकवलाकावलीर्वान्तवारिधारा लिखितेन्द्रायुधाः सञ्चार्यमाणा मायामेघमालाः, [३] क्वचिदुपान्तप्ररूढ़पाण्डुयवाङ्कुरासु, तरुणमालतीकुड्मलदन्तुरिततरङ्गासु हरिचन्दनद्रववापिकासु शिशिरीक्रियमाणा हारयष्टीः, क्वचिन्मुक्ताफलजलोदरचितालवालकान् अनवरत(क)-स्थूलजलविन्दुदुर्द्दिनमुत्सृजतः पल्लवचकान्, क्वचित् विधुतपक्षनिक्षिप्तशीकरानीतनीहारा भ्रमन्तीर्यन्त्रमयीः पत्रशकुनिश्रेणीः, क्वचिन्मधुकरकिङ्किणीपङ्क्तिपटुतररवा बध्यमानाः कुसुमदामदोलाः, क्वचिदुदरारूढ़निर्गतोन्नालनलिनीच्छदच्छादितमुखान् प्रवेश्यमानान् शातकुम्भ[४]कुम्भान्, क्वचित्

(क) चन्दनरसेत्यधिकः पाठः।

[१] दण्डारकं घटीयन्त्राधारस्तम्भः।

[२] घटीयुक्तं यन्त्रं घटीयन्त्रं घटीयुक्तपानीयोद्धरणयन्त्रम् पश्चिमदेशे प्रसिद्धम्।

[३] मायया कल्पनया रचिता मिथ्याभूता मेघमाला मेघपङ्क्तीः।

[४] शातकुम्भकुम्भान् सुवर्णमयकलसान् लिखितमिन्द्रायुधं ानेयत्र तथाभूत।

घटितकदलीगर्भस्तम्भदण्डानि बध्यमानचारुवंशाकृतीनि कुसुमस्तवकातपत्राणि, क्वचित् करम्रदितकर्पूरपल्लवरसेनाधिवास्यमानानि विसतन्तुमयान्यंशुकानि, क्वचिल्लवलीफलद्रवेणार्द्रीक्रियमाणांस्तृणशून्य[१]मञ्जरीकर्णपूरान्, क्वचिदम्भोजिनीदलव्यजनैर्वीज्यमानानुपलभाजनभाजः शीतौषधिरसान् अन्यांश्चैवंप्रकारान् शिशिरोपचारोपकरणपरिकल्पनाव्यापारान् परिजनेन कृतान् क्रियमाणांश्च वीक्षमाणो, हिमगृह [२] तस्य मध्यभागं [३] हृदयमिव हिमवतः जलक्रीड़ागृहमिव प्रचेतसः, जन्मभूमिमिव सर्वचन्द्रकलानाम्, कुलगृहमिव सर्वचन्दनवनदेवतानां, प्रभवमिव सर्वचन्द्रमणीनां, निवासमिव सर्वमाघमासयामिनीनां, सङ्केतसदनमिव सर्वप्रावृषां ग्रीष्मोष्मापनोदोद्देशमिव सर्वनिम्नगानां, बड़वानलसन्तापापनोदननिवासमिव सर्वसागराणां, वैद्युतदहनदाहप्रतीकारस्थानमिव सर्वजलधराणाम्, इन्दुविरहदुःसहदिवसातिवाहनस्थानमिव कुमुदिनीनां, हरहुताशननिर्व्वापण-

---

[१] तृणशून्यन्तु मल्लिकेत्यमरः। तन्मञ्जर्य्य एव कर्णपूराः कर्णाभरणभेदाः।

[२] वीक्षमाण इत्यत्र हिमगृहं तस्य मध्यभागञ्चेति कर्मति।

[३] तस्य हिमगृहस्य मध्यभागमित्यत्र क्रियमाणानिति वचनविपरिणामेणान्वेति तथा च एतादृशं क्रियमाणं तस्य मध्यभागमाससादेत्यन्वयः।

चैत्रमिव मकरध्वजस्य, दिनकरकरैरपि सर्वतो जलयन्त्रधारासहस्रसमुल्लासितैरतिशीतस्पर्शभयनिवृत्तैरिव परिहृतम्, अनिलैरपि कदम्बकेसरोत्करवाहिभिः कण्टकितैरिवानुगतं, कदलीवनैरपि पवनचलितदलैर्जाड्यजनितवेपथुभिरिव परिवारितम्(क)अलिभिरपि कुसुमामोदमदमुखरैरावद्धदन्तवीणैरिव [१] वाचालितं, लताभिरपि निरन्तरमधुकरपटलजटिलाभिर्गृहीतनीलप्रावरणकाभिरिव विराजितमाससाद। क्रमेण च तत्रान्तर्बहिश्चातिबहलेन पिष्टहार्य्येणेवोपलिप्यमानोऽतिशीतत्वेन स्पर्शेनामन्यत आत्मनो मनश्चन्द्रमयं, (ख) कुमुदमयानीन्द्रियाणि, ज्योत्स्नामयान्यङ्गानि, मृणालिकामयीं धियम् अगणयच्च नीहारमयानर्ककिरणान्, चन्दनमयमातपं, कर्पूरमयं पवनम्, उदकमयं कालं, तुषारमयं, त्रिभुवनम्।

एवंविधस्य च [२] तस्यैकदेशे सखीकदम्बपरिवृताम्, अ-

(क) परिवृतमिति वा पाठः।

(ख) हृदयमित्यधिकः पाठः।

[१] दन्तवीणा शीतस्पर्शवशात् दन्तानां परस्परघर्षणजन्मा रवः।

[२] एतंविधस्य उक्तरूपस्य तस्य हिमगृहस्य एकदेशे एकपार्श्वे कादम्बरीं व्यलोकयदिति दूरस्थेनान्वयः।

शेषसरित्परिवारामिव भगवतीं गङ्गां हिमवतो गुहातलगतां कुल्या[१]भ्रमिभ्रमितेन कर्पूररसस्रोतसा कृतपरिवेशया मृणालदण्डमण्डपिकायास्तले कुसुमशयनमधिशयानां, हाराङ्गदवलयरशनानूपुरैर्मृणालमयैर्निगडैरिव संयताम्, ईर्ष्यया मन्मथेन, चन्दनधवले स्पृष्टामिव ललाटे शशलाञ्छनेन, वाष्पवारिवाहिनि चुम्बितामिव चक्षुषि वरुणेन, वर्द्धित निश्वासमरुति दृष्टामिव मुखे मातरिश्वना, सन्तापप्रतप्तेष्वध्यासितामिवाङ्गेषु पतङ्गेन, [२] कन्दर्पदाहदीपिते गृहीतामिव हृदये हुतभुजा, स्वेदिनि परिष्वक्तामिव वपुषि जलेन, दैवतैरपि विलुप्यमानसौभाग्यामिव सर्वशः हृदयेन, सह प्रियतमसमीपमिवोपगतैरङ्गैरुपजनितदौर्बल्याम्, आश्यानचन्दनपाण्डुरञ्च रोमाञ्चमनवरतहारस्पर्शलग्नं मुक्ताफलकिरणपुञ्जमिवोद्वहन्तीं, स्वेदशीकरिणौञ्च कपोलपालीं पक्षपवनेन वीजयद्भिरनुकम्प्यमानामिवावतंसकुसुममधुकरैः, अवतंसकुसुममधुकररवदवदहनदग्धमिव श्रोत्रमपाङ्गनिर्गतेनाश्रुस्रोतसा सिञ्चन्तीम्, अतिप्रवृत्तस्य चाश्रुणो निर्वाह [३] प्रणालिकामिव कर्पूरकेतकीकलिकां कर्णे कलयन्तीम्,

---

[१] कुल्या अल्पा कृत्रिमा नदी तस्य भ्रमिः स्वतःभ्रमणम्।

[२] पतङ्गेन सूर्य्येण।

[३] निर्वाहः प्रवाहः।

आयतश्वासविधुतितरलितेन च सन्तापभयपलायमानेन देह-प्रभावितानेनेवांशुकेन विमुच्यमानकुचकलसाम्, आपतत्प्रव-लचामरप्रतिविम्बं कुचकलसयुगलं प्रियान्तिकगमनौत्सुक्य-कृतपक्ष[१]मिव करतलेन निरुन्धतीं, मुहुर्मुहुर्भुजलतया तुषारशिलाशालभञ्जिकामालिङ्गन्तीं, मुहुः कपोलफलकेन कर्पूरपुत्रिकामाश्लिष्यन्तीं, मुहुश्चरणारविन्देन चन्दनपङ्क-प्रतियातना[२]मास्पृशन्तीं स्तनसंक्रान्तेनात्ममुखेनापि कुतूह-लिनेव परिवृत्त्य विलोक्यमानां, कर्णपूरपल्लवेनापि स्वप्रति-विम्बपल्लवशायिना सोत्कण्ठेनेव चुम्ब्यमानकपोलफलकां, हारैरपि मुक्तात्मभिर्मदनपरवशैरिव प्रसारितकरैरालिङ्ग्य-मानां, मणिदर्पणमुरसि निहितं "नोदेतव्यमद्य त्वयेति" जीवितस्पर्शमयं शपथं शशिनमिव कारयन्तीं, करिणीमिव स-म्मुखागतप्रमदवनगन्धवारणप्रसारितकरां [३] प्रस्थितामिवा-नभीष्टदक्षिणवातमृगागमनां [४] मदनाभिषेकवेदिकामिव

---

[१] कृतपक्षम् कृतप्रवणत्वम् तदनुकूलमित्यर्थः।

[२] प्रतियातना प्रतिमूर्त्तिः प्रतिविम्बो वा।

[३] सम्मुखागतः प्रमदवनस्य अन्तःपुरोचितवनस्य यो गन्धः त-द्वारणे प्रसारितौ करौ यया सम्मुखागते प्रमदे प्रकृष्टमदे गन्धवारणे गन्धप्रधानगजे प्रसारितः करः शुण्डा यया च।

[४] अनभीष्टम् अशुभसूचकतया अनभिप्रेतं दक्षिणभागे वात-

कमलाहतचन्दनधवलपयोधरकलसावष्टब्धपार्श्वाम् [१] आकाशकमलिनीमिव स्वच्छाम्बरतलदृश्यमानमृणालकोमलोरुमूलां [२] कुसुमचापचापलेखामिव मदनारोपितगुणकोटिकान्ततरां [३] मधुमासदेवतामिव शिशिरहारिणीं [४] मधुकरीमिव कुसुममार्गणाकुलाम् [५] चन्दनविलेपनामनङ्गरागिणीञ्च [६] बालां मन्मथजननीञ्च मृणालिनीमभ्यर्थिततुषारस्पर्शाञ्च [७] कादम्बरीं व्यलोकयत्।

मृगस्य वातप्रमीनाममृगभेदस्य आगमनं यस्याः। अनभीष्टं दक्षिणवातस्य मलयानिलस्य मृगस्य मृगमदगन्धस्य चागमनं यस्या इति च।

[१] पयोधराः पयोयुक्ताः पूर्णाः कलसाः पयोधरौ स्तनौ च।

[२] अम्बरं वस्त्रमाकाशञ्च ऊरुमूलम् सक्थिमूलं उडुमूलं नक्षत्रमूलञ्च वृहन्मूलं वा।

[३] मदनः वृक्षभेदः (मयना) कामश्च। गुणः सौन्दर्य्यादि मौर्वी च। कोटिरग्रं संख्याभेदश्च।

[४] शिशिरहारिणीम् शीतलहारयुक्तां हिमर्त्तुनिवारिणीं।

[५] कुसुममार्गणः पुष्पेषुः स्मरः, पुष्पाणामन्वेषणञ्च।

[६] अनङ्गेन कामेन कृतरागाम् अङ्गरागरहिताञ्च तेन विरोधः।

[७] मृणालयुक्तां कमलिनीञ्च तेन तस्याः हिमस्पर्शाभ्यर्थनानुचितेत्यर्थः।

अथ सा यथादर्शनमागत्यागत्य चन्द्रापीडागमनमावेदयन्तं परिजनम्, उत्तरलतारकेण चक्षुषा "कथय किं सत्यमागतो दृष्टस्त्वया कियत्यध्वनि क्वासाविति ?" प्रतिमुखं निश्चिप्तनाम्नाचरं पप्रच्छ। वर्द्धमानधवलिम्ना चक्षुषा दृष्ट्वा च सम्मुखमापतन्तं तं, दूरादेव वरारोहा नवग्रहा करिणीवोरुस्तम्भविधृता, [१] विचेष्टमानाङ्गी कुसुमशयनपरिमलोपगतैः परवशा, मुखरैः मधुकरकुलैरिवोत्थाप्यमाना, सम्भ्रमच्युतोत्तरीयांशुका, हारकिरणानुरसि, कर्त्तुमिच्छन्ती मणिकुट्टिमनिहितेन वामकरतलेन हस्तावलम्बनं निजप्रतिमामिव याचमाना, स्रस्तकेशकलापसंयमनभ्रमितेन गलत्स्वेदसलिलेन दक्षिणकरेण अभ्युच्चेवात्मानमर्पयन्ती, वलितत्रिक [२] तामवलिवलीतरङ्गितरोमराजितया निष्पीड्यमानेव सर्वरसान् अनङ्गेन, अन्तःप्रविष्टललाटिकाचन्दनरसमिश्रानिव चक्षुषा चरन्ती, शिशिरमानन्दजलमानन्दवारिविन्दुवेणिकया [३]

---

[१] वर आरोहो यस्याः उत्तमा स्त्री च ऊरुस्तम्भः सात्विकभावभेदः उरुरं हत् बन्धनार्थकाष्ठस्तम्भस्य स विधृतो यया निष्ठान्तस्य परनिपातः तत्र विधृता च।

[२] पृष्ठवंशाधरे त्रिकमित्यमरः।

[३] आनन्दवारीणामानन्दजजलानां विन्दुभिः सञ्चिता वेणिका प्रवाहः तया कपोलफलकं चालयन्तीत्यन्वयः।

घटितावतंसधूलिधूसरं प्रियप्रतिमाप्रवेशलोभेनेव कपोलफलकं प्रक्षालयन्ती, ललाटिकाचन्दनभरेणेव किञ्चिदधोमुखी, तत्क्षणमपाङ्गभागपुञ्जिततारकया तन्मुखलग्नयेव दीर्घया दृष्ट्याकृष्यमाणा, कुसुमशयनादुत्तस्थौ। चन्द्रापीड़स्तु समुपसृत्य पूर्ववदेव तां महाश्वेतां प्रणामपुरःसरं दर्शितविनयः प्रणनाम। कृतप्रतिप्रणामायाञ्च तस्यां पुनस्तस्मिन्नेव कुसुमशयने समुपविष्टायां, प्रतीहार्या समुपनीतां जाम्बूनदमयीमासन्दिकां [१] रोचिष्णुरत्नप्रत्युप्तपादां पादेनैवोत्सार्य्य क्षितावेवोपाविशत्। अथ केयूरकः "देवि! देवस्य चन्द्रापीड़स्य प्रसादभूमिरेषा पत्त्रलेखा नाम ताम्बूलकरङ्कवाहिणी" इत्यभिधाय पत्रलेखामदर्शयत्। अथ कादम्बरी दृष्ट्वा ताम् "अहो मानुषीषु पक्षपातः प्रजापतेः" इति चिन्तयाम्बभूव। कृतप्रणामाञ्च तां सादरमेह्येहीत्यभिधायात्मनः समीपे सकुतूहलपरिजनदृश्यमानां पृष्ठतः समुपावेशयत्। दर्शनादेवोपारूढ़प्रीत्युत्पत्तिश्चया च मुहुर्मुहुरेनां सोपग्रहं करकिसलयेन पस्पर्श।

चन्द्रापीड़स्तु सपदि कृतसकलागमनोचितोपचारः तदवस्थां चिन्तयतनयाप्सालोप्याचिन्तयत्। "अतिदुर्विदग्धं हि मे हृदयम्, अद्यापि न श्रद्दधाति, भवतु पृच्छामि तावदेनां

[१] आसन्दीम् उपवेशनयोग्यं आसनभेदम् (केदेरा) प्राग्भाष्ये कन्।

निपुणालापेन" [१] इति प्रकाशमब्रवीत्। "देवि! जानामि कामरतिं [२] निमित्तीकृत्य प्रवृत्तोऽयमविरलसन्तापतीव्रो व्याधिः। सुतनु! सत्यं न तथा त्वामेष व्यथयति यथास्मान्, इच्छामि देहदानेनापि स्वस्थामत्रभवतीं कर्त्तुम्, उत्कम्पिनीम् अनुकम्पमानस्य [३] कुसुमेषुपीड़या [४] पतितामवेक्षमाणस्य पततीव मे हृदयम्, अनङ्गदेवतनूभूते[५]ते भुजलते गाढ़सन्तापया च दृष्ट्या वहसि स्थलकमलिनीमिव रक्ततामरसाम्[६]। अपि च अनवरतकृताश्रुविन्दुपातेन वर्त्तते मुक्ताभरणता, उ-

---

[१] निपुणः विदग्धः श्लेषादियुक्तश्च।

[२] काम् काञ्चित् अरतिमननुरागं अनुरज्यमानपदार्थाभावं, कामरतिं कामाधीनां रतिञ्च।

[३] उत्कम्पिनीमनु अनुलक्षीकृत्य पश्चाद्वा कम्पमानस्य, अनु-अनुकम्पमानस्य कृपयतश्च।

[४] पीड़या कुसुमेषु पुष्पेषु पतिताम्। कुसुमेषुः कामः तत्कृत-पीड़या पतितामित्यपि।

[५] अनङ्गदेवस्य कामस्य तनुभूते मूर्त्तिरूपे अनङ्गदेवेन तनु-भूते कृशभूते च तव भुजलते।

[६] रक्तानि तामरसानि यस्यां तथाभूतां स्थलकमलिनीमिव अरसां कठोरां रक्ततान्च गाढ़सन्तापया दृष्ट्या वहसि।

हाण स्वयंवरार्हाणि [१] मङ्गलप्रसाधनानि, सकुसुमशिलीमुखा [२] हि शोभते न वा लतेति।" अथ कादम्बरी बालतया स्वभावमुग्धापि कन्दर्पेणोपदिष्टयेव प्रज्ञया तमशेषमस्याव्यक्त(क)व्याहार[३]सूचितमर्थं मनसा जग्राह, मनरथानान्तु तावतीं भूमिमसम्भावयन्ती शालीनता[४]मावलम्बमाना तूष्णीमेवासीत्। केवलमुत्पादितान्यव्यपदेशा तत्क्षणं तम् आननामोदमधुकरपटलान्धकारितं द्रष्टुमिव स्मितालोकमकरोत्। ततो मदलेखा प्रत्यवादीत्[५]। "कुमार! किं कथयामि, दारुणोऽयमकथनीयः [६] खलु सन्तापः। अपि च

(क) अस्य वक्त्रेति वा पाठः।

[१] स्वयमिति च्छेदः स्वयं वरार्हाणि श्रेष्ठनारीयोग्यानि मङ्गलप्रसाधनानि शुभभूषणानि स्वयं गृहाण अथच स्वयं वरार्हाणि भूषणानि गृहाणेति।

[२] शिलीमुखः भ्रमरः कुसुमशिलीमुखः कामश्च तत्सहिता नवा नूतनलता न वा लता यस्या युवतिरिति चार्थः।

[३] अव्यक्तः श्लिष्टत्वादस्फुटो यो व्यवहारः शब्दप्रयोगः तेन सूचितं व्यञ्जनया बोधितमर्थं गूढार्थम् मनसा जग्राह ज्ञातवती।

[४] शालीनतां सलज्जतामप्रागल्भ्यमित्यर्थः।

[५] श्लेषालापेनेति शेषः।

[६] अकथनीयः कथयितुमशक्यः अतिशयितत्वात् कामजत्वेन कथनानर्हश्च।

सुकुमारभावोपेतायाः [१] किमिवास्या यन्न सन्तापाय ? तथाहि मृणालिन्याः शिशिरकिसलयमपि हुताशनायते, ज्योत्स्नाप्यातपायते, ननु किसलयतालवृन्तवातैर्मनसि जायमानं किं न पश्यसि खेदं ? धीरत्वमेव प्राणसन्धारण-हेतुरस्याः" इति कादम्बरीहृदयेन तमेव मदलेखालापमस्य प्रत्युत्तरीचकार। चन्द्रापीड़ोऽप्युभयथा [२] घटमानार्थतया सन्देहदोलारूढ़ेनेव चेतसा महाश्वेतया सह प्रीत्युपचय-चतुराभिर्मधुरालापगर्भाभिः कथाभिर्महान्तं कालञ्च स्थित्वा तथैव महता यत्नेन मोचयित्वात्मानं स्कन्धावारगमनाय कादम्बरीभवनान्निर्ययौ।

निर्गतञ्च तुरङ्गमारूढ़न्तं पश्चादागत्य केयूरकोऽभि-हितवान्, "देव ! मदलेखा विज्ञापयति, 'देवी कादम्बरी प्रथमदर्शनजनितप्रीतिः पत्रलेखां निवर्त्यमानामिच्छति, पश्चाद्यास्यतीति' श्रुत्वा देवः प्रमाणम्" इत्याकर्ण्य चन्द्रापीड़ः

---

[१] सुकुमारभावेन अतिकोमलतया उपेताया अस्याः किसल-यादिकमतिकठिनस्पर्शत्वात् सन्तापदायि। अथ च हे सुकुमार! भावोपेतायाः भवद्विषयरतिरसयुक्तायाः इति च गूढ़म्। अतिकुमारे त्वयि यो भावः रतिविशेषस्तेन उपेताया इति वा।

[२] उभयथा उभयप्रकारेण घटमानार्थतया उभयार्थे संश्लिष्ट-त्वात् तद्वाक्यस्य।

"केयूरक! धन्या स्पृहणीया च पत्रलेखा, यामेवमनुबध्नाति दुर्लभो देवीप्रसादः, प्रवेश्यताम्" इत्यभिधाय पुनः स्कन्धावारमेव जगाम। प्रविशन्नेव पितुः समीपादागतमभिजाततरमालेखहारकमद्राक्षीत्, धृततुरङ्गमश्च प्रीतिविस्फारितेन चक्षुषा दूरादेवाप्रच्छत्। "अङ्ग! कच्चित् कुशलो तातः सह सर्वेण परिजनेन? अम्बा च सर्वान्तःपुरैरिति?" अथासावुपसृत्य प्रणामानन्तरं, "देव! यथा ज्ञापयसि" [१] इत्यभिधाय लेखद्वितयमर्पयाम्बभूव, युवराजस्तु शिरसि कृत्वा स्वयमेव च तदुन्मुच्य क्रमशः पपाठ।

"स्वस्त्युज्जयिनीतः सकलराजन्यशिखण्डशेखरीकृतचरणारविन्दः परममाहेश्वरो महाराजाधिराजो देवस्तारापीड़ः सर्वसम्पदामायतनं चन्द्रापीड़मुदग्रमणिचूड़ामणिमरीचिचक्रचुम्बिन्युत्तमाङ्गे चुम्बन्नन्दयति, कुशलिन्यः प्रजाः, किन्तु कियानपि कालो भवतोऽदृष्टस्य बलवदुत्कण्ठितं नो हृदयं, देवी च सहान्तःपुरैर्ग्लानिमुपनीता, अतो लेखवाचनाविरतिरेव प्रयाणकालता नेतव्येति।" शुकनासप्रेषिते द्वितीयेऽप्यमुमेवार्थं लिखितमवाचयत्। अस्मिन्नेवावसरे समुपसृत्य वैशम्पायनोऽपि लेखद्वितयमपरमात्मीयमस्मादभिन्नार्थमेवादर्शयत्। अथ "यथा ज्ञापयति तात! इत्युक्त्वा" तथैव

[१] देव यथा आज्ञापयसि पृच्छसि तथैव तेषां कुशलमस्तीत्यर्थः।

तुरगाधिरूढ़: प्रयाणपटहमवादयत्। समीपे स्थितञ्च म-हता श्वेताश्वीयेन [१] परिवृतं महाबलाधिष्ठितं बलाहकपुत्रं मेघनादनामानमादिदेश। "भवता पत्रलेखया सहागन्तव्यं, नियतञ्च केयूरकस्तामादायैतावतीं भूमिमागमिष्यति, तन्मुखेन विज्ञाप्या प्रणम्य देवी कादम्बरी। नन्वियं सा त्रिभुवन-निन्दनीया निरनुरोधा निष्परिचया च दुर्ग्रहा प्रकृतिर्म-र्त्यानां, येषामकाण्डविसंवादिन्य: प्रीतयो न गणयन्ति निष्कारणवत्सलताम्। एवं गच्छता मयात्मनो नीत: स्नेह:, कपटकूटजालिकतां, प्रापिता भक्तिरलीककाकुकरणकुशलतां, पातितमुपचार [२] मधुरं धूर्त्ततायामात्मार्पणं, प्रकटितं, वाङ्मनसयोर्भिन्नार्थत्वम्। आस्तां तावदात्मा अस्थानस्थाना-हितप्रसादा दिव्ययोग्य। देव्यपि [३] वक्तव्यतां नीता, जनयन्ति हि पश्चादलक्ष्यभूमिपाता व्यर्था: प्रसादामृतवृ-ष्टयो महताम्, न खलु तथा देवीं प्रति प्रबललज्जाति-भारमन्थरं मे हृदयं, यथा महाश्वेतां प्रति, नियतमि-नामलीकाध्यारोपणदर्शिताऽनुरागसम्भारामस्थानपक्षपातिनी-

---

[१] अश्वानां समूह: अश्वीयं श्वेतमश्वीयमश्वसमूहसैन्यं यस्य तेन।

[२] उपचारमधुर कपटमधुरं स्वतन्तु कठोरमेवेत्यर्थ:।

[३] देवी कादम्बरी तस्या: अस्थाने अयोग्ये मद्रूपे स्थाने प्रसादकरणात् वक्तव्यतां निन्दनीयतां मया नीता।

मसकृदुपालप्स्यते देवी। तत् किं करोमि, गरीयसी गुरोराज्ञा प्रभवति हि देहमात्रकस्य, हृदयेन तु हेमकूटनिवासव्यसनिना लिखितं, जन्मान्तरसहस्रस्य दास्यपट्टं देव्याः, न दत्तमस्या[१](क)टविकगौल्मिकेनेव [२] देवीप्रसादेन गन्तुं, सर्वथा गतोऽस्मि पितुरादेशादुज्जयिनीम्। प्रसङ्गतोऽसज्जनकथाकीर्त्तनेषु स्मर्त्तव्यः खलु चन्द्रापीड़चण्डालः, मा चैवं मंस्थाः यथा जीवन् पुनर्द्देवीचरणारविन्दवन्दनानन्दमननुभूय स्थास्यति चन्द्रापीड़ इति।" महाश्वेतायाश्च सप्रदक्षिणं शिरसा पादौ वन्दनीयौ, मदलेखायाश्च कथनीयः प्रणामपूर्वमशिथिलः कण्ठग्रहः, गाढ़मालिङ्गनीया च तमालिका। अपि च अस्मद्वचनादशेषः प्रष्टव्यः कुशलं कादम्बरीपरिजनः रचिताञ्जलिना च भगवानासन्नवणीयो हेमकूट इति।"

एवमादिश्य तं, "सुहृदा सुहृदादि साधन[३]मक्लेशयता शनैः शनैर्गन्तव्यम्" इत्युक्ता वैशम्पायनं, स्कन्धावारभारे न्ययुङ्क्त। स्वयमपि च तथारूढ़ एव गमनहेलाहर्षहेषारव-

[१] अस्य हृदयस्य सम्बन्धविवक्षया षष्ठी न कर्त्तरि तुमुन्योगे तन्निषेधात् गमनायेत्यर्थः।

[२] अटव्यां भवः आटविकः गौल्मिकेन गुल्मावृतप्रदेशेन यथा गुल्मावृतस्थले झटिति पदं न प्रसरति एवं हृदयमपि त्वयि बद्धपदत्वात् गन्तुमसमर्थमिति भावः।

[३] सुहृदा भवता त्वया वैशम्पायनेनेत्यर्थः साधनं सैन्यम्।

कम्पितकैलासेन खुरपतनताण्डवखण्डितभूमण्डलेन, तुरगप्रायेणाश्वसैन्येन अनुगम्यमानः तमेव लेखहारकं पर्य्याणलग्न[१]मभिनवकादम्बरीवियोगशून्येनापि हृदयेनोज्जयिनीवार्त्तां पृच्छन् प्रतस्थे। क्रमेण चातिप्रवृद्धप्रकाण्डपादपप्रायया, मालिनीलतामण्डपैर्मण्डलिततरुषण्डया, गजपतिपातितपादपपरिहारवक्रीकृतमार्गया, जनजनिततृणपर्णकाष्ठकोटिकूट[२]प्रकटितवीरपुरुष(क)घातस्थानया, महापादपमूलोत्कीर्णकान्तारदुर्गया,[३] तृषितपथिकजनखण्डितदलोज्झितामलकीफलनिकरया, विकसितकरञ्जमञ्जरीरजोविच्छुरिततटैस्तटबद्धपटच्चर[४]कर्पटध्वजचिह्नैः इष्टकचित[५]शुष्कपल्लवविष्टरानुमितपथिकविश्रामैः, विश्रान्तकार्पटिक[६]

(क) अत्र तु हृदयेत्यधिकः पाठः।

[१] पर्य्याणे पल्ययनसमीपे लग्नं वाहनान्तरेण सन्निकृष्टमित्यर्थः।

[२] कूटं यन्त्रभेदः वन्यपश्वादिघातस्थाने पथिकजनानां तत्सूचनार्थं पाषाणादिभिः क्रियमाणः स्तूपाकारः राशिः कूटः।

[३] महापादपमूले उत्कीर्णा लिखिता कान्तारदुर्गा तन्मूर्त्तिर्यत्र।

[४] पटच्चरं जीर्णवस्त्रम् कर्पटस्तेलखण्डः।

[५] इष्टकाभिश्चिते इष्टकाशब्दस्य ह्रस्वः। इष्टकचिते देशे शुष्कपल्लवस्य विष्टरमासनम्।

[६] कार्पटिकाः कषायरक्तवस्त्रधारिणः तीर्थयात्राप्रसक्ताः।

प्रस्फुटितचरणधूलि-धूसरकिसलयलाञ्छितोपकण्ठैः, पत्रसङ्करासुरभीकृताशिशिरपङ्किलविवर्णास्वादुजलैः, व्रततिग्रन्थिग्रथितपर्णपुट[१]तृणोलुपपुलाकचिह्नानुमेयैर्जरत्कान्तारकूपैरसुलभसलिलतया, अनभिलषितोद्देशया, मधुविन्दुस्यन्दिसिन्धुवारवनराजिरजोधूसरिततीराभिश्च कुब्जकलता[२]जालकैर्जटिलीकृतसैकताभिः, अध्वगोत्खातबालुकाकूपिकोपलभ्यमानकलुषस्वल्पसलिलाभिः, शुष्कगिरिनदिकाभिर्विषमीकृतान्तरालया, कुक्कुटकौलेयक[३]रटितानुमीयमानगुल्मगहनग्रामटिकया शून्यया दिवसमटव्या गत्वा परिणते रविबिम्बे बिम्बारुणातपविसरे वासरे निःशाखीकृतकदम्बशाल्मलीपलाशबकुलैः शिखरशेषैकपल्लवविडम्बितातपत्रैः पादपैरद्धोद्धृतप्ररोहन्मूलस्थूलस्थाणुग्रन्थिजटिलैश्च हरितालकपिलपक्ववेणुविटपपटलरचितवृतिभि[४]र्मृगभयकृततृणपुरु-

---

[१] व्रततिग्रन्थीत्यादि। रज्जुपात्राद्यभावे पथिकैः कूपजलोद्धरणाय लताग्रथितपत्रपुटेन लताग्रथिततृणोलपपुलाकादिभिश्च रज्जुपात्रादि क्रियते उलपस्तृणविशेषः (उलखड़) पुलाकस्तुच्छधान्यम् (खड़)।

[२] कुब्जकलता पुष्पप्रधानलताभेदः।

[३] कौलेयकः कुक्कुरः।

[४] हरितालकपिलानां हरितालपीतानां पक्ववेणुविटपानां पक्ववंशशाखानां (कञ्चिक) पटलेन समूहेन रचितवृतिभिः रचितावरणैः।

शकैः [१] विपाकपाण्डुभिः फलितैः प्रियङ्गुप्रायैरटवीचैत्रै-र्विरलीकृतवनप्रदेशे चिरप्ररूढ़स्य रक्तचन्दनतरोरुपरि बद्ध सरसपिशितपिण्डनिभैरलक्तकैः अभिनवशोणितारुणेन रक्तचन्दनरसेन आर्द्रजिह्वालतालोहिनीभिः रक्तपताकाभिः केशकलापकान्तिना च कृष्णचामरावचूलेन प्रत्यग्रविशसितानां [२] जीवानामिवावयवैरुपरचितदण्डमण्डनं परिणद्धवराटकघटितबुद्बुदार्द्धचन्द्रखण्डखचितं [३] सुतमहिषरक्षणावतीर्णदिनकरावतारितशशिनेव [४] विराजितशिखरं दोलायितशृङ्गसङ्गिलोहशृङ्खलावलम्बमानघर्घरवघोरघण्टया च घटितकेसरिसटारुचिरचामरया काञ्चनत्रिशूलिकया लिखितनभः-

---

[१] स्तेभ्यः पशुभ्यः तत्खादनेभ्य इत्यर्थः भयेन कृतः तृणमयः पुरुषकः पुरुषाकृतिः पदार्थः येषु।

]२] प्रत्यग्रविशसितानामभिनवनाशितानाम्।

[३] परिणद्धैः ध्वजदण्डे बद्धैः वराटकैः कपर्दकैः घटितं कृतं बुद्बुदार्द्धचन्द्रखण्डं बुद्बुदाकारार्द्धचन्द्रस्य यत् खण्डं तेन खचितं युक्तं तथा च ध्वजबद्धाः कपर्दका एव अर्द्धचन्द्राकृतिबुद्बुदारैश लक्ष्यन्ते इति भावः।

[४] सुतस्य निजपुत्रयमस्य महिषरक्षणार्थमवतीर्णेन स्वयमागतेन रविणा अवतारितः शशी यत्र। कृष्णरक्तश्वेतवर्णादिदण्डपताकादि योगात् तथालङ्कृतप्रेक्षा।

स्थलम् [१] इतस्ततः पथिकपुरुषोपहारमार्गमिवालोकयन्तं महान्तं रक्तध्वजं दूरत एव ददर्श ।

तदभिमुखश्च किञ्चिदध्वानं गत्वा, पीतकौसुम्भचित्रखण्डपाण्डुरेण वनद्विरददन्तकपाटेन परिवृतां, लोहतोरणेन च रक्तचामरावलिपरिकरां, कालायसदर्पणमण्डलमालां, शबरमुखमालामिव कपिलकेशभीषणां बिभ्राणेन सनाथीकृतद्वारदेशाम्, अभिमुखप्रतिष्ठितेन च विनिहितरक्तचन्दनहस्तकतया रुधिरारुणयमकरतलास्फालितेनेव शोणितलवलोभलोलशिवालिह्यमानलोहितलोचनेन लोहमहिषेणाध्यासिताञ्जनशिलावेदिकां, क्वचिद्रक्तोत्पलैः शबरनिपातितानां वनमहिषाणामिव लोचनैः, क्वचिदगस्तिकुसुमकुड्मलैः केशरिणामिव करजैः, क्वचित् किंशुककुसुमकुड्मलैः शार्दूलानामिव सरुधिरैर्नखैः कृतपुण्यपुष्पप्रकरोपहाराम्, अन्यत्राङ्कुरितामिव, कुटिलहरिणविषाणकोटिकूटैः, पल्लवितामिव सरसजिह्वाच्छेदशतैः, कुसुमितामिव रक्तनयनसहस्रैः, फलितामिव मुण्डमण्डलैः, उपहारहिंसां दर्शयन्तीं, शाखान्तरालनिरन्तरनिलीनरक्तकुक्कुटकुलैश्च भयादकालदर्शितकुसुमस्तवकैरिव रक्ताशोकविटपैर्विभूषिताङ्गनां, वलिरुधिरपानल-

[१] लिखितनभःस्थलं अत्युच्चतया स्पृष्टगगनतलमित्यर्थः ।

च्छाया क्षमागतैश्च वेतालैरिव [१] तालैर्दीयमानफलभुण्डोपहारां, शङ्काज्वरकम्पितैरिव कदलिकाननैः भयोत्कण्टकितैरिव श्रीफलतरुषण्डैः त्रासोर्द्धकेशैरिव खर्ज्जुरवनैः समन्तात् गहनीकृतां, वनकरिकुलकुम्भविदलितमुक्ताफलानि रुधिरारुणानि बलिसिक्थलुब्धमुग्धकृकवाकुग्रस्तमुक्तानि विकिरद्भिरम्बिकापरिग्रहदुर्ललितैः क्रीड़द्भिः केशरिकिशोरकैरशून्योद्देशां, प्रभूतरुधिरदर्शनोद्भूतमूर्च्छापतितेनेव प्रतिविम्बितेनालताम्रेण सविता ताम्रतरीकृतैः क्षतजजलप्रवाहैः पिच्छिलीकृताजिराम्, अवलम्बमानदीपधूपरक्तांशुकेन ग्रथितशिखिगलवलयावलिना पिष्टपिण्डपाण्डुरितघनघण्टामाल[२]भारिणा त्रापुष [३] सिंहमुखमध्यस्थितस्थूललोहकण्टकदत्तदन्तदण्डार्गलं गलत् (क) पीतनीललोहितदर्पणस्फुरितबुद्बुदमालं कपाटपट्टद्वयं दधानेन गर्भगृहद्वारदेशेन दीप्यमानाम्, अन्तःपिण्डिकापीठपातिभिश्च सर्वपशुजीवितैरिव शरणमुपागतैरलक्तकरसरक्तपटैरविरहितचरणमूलां, पतितकृष्णचामरप्रतिविम्बानां च शिरश्छेदलग्नकेशजालकानामिव परशु-

(क) लसदिति वा पाठः।

[१] वेतालाः रुद्रगणभेदाः कृष्णत्वात् तत्सदृशैः तालवृक्षैः।

[२] मालानां भारस्तद्वता मालभारादित्वात् ह्रस्वः।

[३] त्रपुणा रङ्गेण निर्मितः अणि षुगागमः। त्रपुषा निर्मितः वा।

पद्दिशप्रभृतीनां जीवविशसनशस्त्राणां प्रभाभिर्बहुबहला-न्धकारतया पातालनिवासिनीमिवोपलक्ष्यमाणां, रक्तचन्दन-खचितस्फुरत्फलपल्लवकलितैश्च विल्वदामभिः बालकमुण्ड-प्रालम्बैरिव क्तमण्डनां, शोणितातास्रकदम्बस्तवककृतार्च्च-नैश्च पशूपहारपटहपटुरटितरसोल्लसितरोमाञ्चैरिव चाङ्गैः क्रूरतामुद्वहन्तीं, चारुचामीकरपट्टप्रावृतेन च ललाटेन शवर-सुन्दरीरचितसिन्दूरतिलकविन्दुना दाड़िमीकुसुमकर्णपूरप्रभा-सेकलोहितायमानकपोलभित्तिना रुधिरताम्बूलारुणिताधरपु-टेन भ्रुकुटिकुटिलबभ्रुनयनेन मुखेन कुसुम्भपाटलितदुकूल-कलितया च देहलतया महाकालाभिसारिकावेशविभ्रमं बिभ्रतीं, सम्पिण्डितनीलगुग्गुलुधूपधूमारुणीकृताभिश्च प्रच-लन्तीभिर्गर्भगृहदीपिकालताभिरङ्गुलीभिरिव महिषासुर-शोणितलवालोहिनीभिः स्कन्धपीठकण्डूयनचलितत्रिशूल-दण्डकृतापराधं वनमहिषमिव तर्ज्जयन्तीं, प्रलम्बकूर्च्च[१]धरै-श्छागैरपि धृतव्रतैरिव, स्फुरदधरपुटैः आखुभिरपि जपपरै-रिव [२] कृष्णाजिनप्रावृताङ्गैः, कुरङ्गैरपि [३] प्रतिशयितैरिव

---

[१] कूर्चधरैः श्मश्रुलैः।

[२] आखूनामुन्दुराणां स्फुरदधरपुटत्वात् जपपरत्वम्।

[३] कृष्णाजिनं कृष्णवर्णचर्म कृष्णसारमृगचर्म च स्वाभाव्येन व्रतस्थत्वेन च तेन प्रावृतदेहत्वम्।

ज्वलितलोहितमूर्द्धरत्नरश्मिभिः कृष्णसर्पैरपि शिरोधृतमणिदीपकैरिवाराध्यमानां, सर्वतः कठोरवायसगणेन च रुवता स्तुतिपरेणेव स्तूयमानां, स्थूलस्थूलैः शिराजालकैर्गोधारगोधिकाकृकलासकुलैरिव दग्धस्थाणुशङ्कया समारूढैर्गवाक्षितेन, अलक्ष्मीसमुत्खातलक्षणस्थानैरिव विस्फोटव्रणबिन्दुभिः कल्माषितसकलशरीरेण, कर्णावतंससंस्थापितया च चूड़या रुद्राक्षमालिकां दधानेन, अम्बिकापादपतनश्यामललाटवर्द्धमानार्बुदेन, [१] कुवादिकदत्तसिद्धाञ्जनदानस्फुटितैकलोचनतया [२] त्रिकालमितरलोचनाञ्जनदानादरक्षणीकृतदारुशलाकेन, प्रत्यहं कटुकालाबु[३]स्वेदप्रारब्धदन्तुरताप्रतीकारेण, कथञ्चिदस्थानदत्तेष्टकाप्रहारतया शुष्कैकभुजोपशान्तमर्द्दनव्यसनेन, उपर्य्यविश्रान्तकटुकवर्त्तिप्रयोगवर्द्धिततिमि[४]रेण, अश्मभेदसंगृहीतवनवराहदंष्ट्रेण, [५] इङ्गुदीकोषकृतौषधाञ्ज-

---

[१] अर्बुदं रोगभेदः (आब)।

[२] वादे रतः वादिककुत्सितेन वादिकेन न दत्तस्य सिद्धाञ्जनस्य दानेन स्फुटितमेकं लोचनं यस्य तद्भावेन।

[३] कटुकालाबुः (तितलाउ) तस्याः स्वेदेन प्रारब्धः दन्तुरतायाः उन्नतदन्ततायाः प्रतीकारो येन।

[४] कटुकवर्त्तिप्रयोगेण कटुद्रव्यघटितवर्त्तिकासेवनेन बर्द्धितं तिमिरं दृष्टिप्रतिबन्धकः नेत्ररोगभेदो येन।

[५] अश्मभेदे प्रस्तरविश्लेषे संगृहीता वनवराहदंष्ट्रा येन।

नसंग्रहेण, सूचीस्यूतशिरासङ्कोचितवामकराङ्गुलिना, कौक्षेयककोशावरणक्षतिव्रणितचरणाङ्गुष्ठकेन, असम्यक्कृतरसायनानीताकालज्वरेण [१] जरां गतेनापि दक्षिणापथाधिराज्यवरप्रार्थनाकदर्थितदुर्गेण, [२] दुःशिक्षितश्रमणादिष्टतिलकाबद्धविभवप्रत्याशेन, हरितपत्ररसाङ्गारमसीमलिनशम्बूकवाहिना, पट्टिकालिखितदुर्गास्तोत्रेण, धूमरक्तालक्तकाक्षरतालपत्रकुहकतन्त्रमन्त्रपुस्तिकासंग्राहिणा, जीर्णमहापाशुपतोपदेशलिखितमहाकालमतेन, आविर्भूतनिधिवादव्याधिना, [३] सञ्जातधातुवादवायुना, [४] लग्नासुरविवरप्रवेशपिशाचेन, [५] प्रवृत्तयक्षकन्यकाकामित्वमनोरमव्यामोहेन, वर्द्धितान्तर्धानमन्त्रसाधनसंग्रहेण, श्रीपर्वताश्चर्य्यवार्त्तासहस्राभिज्ञेन,

---

[१] असम्यक्कृतेन रसायनेन पारदरसप्रयोगेण आनीतः अकाले ज्वरो यस्य।

[२] दक्षिणापथः दक्षिणस्थदेशभेदस्तत्राधिराज्यरूपेण वरेण कदर्थिता असदुपासनेन पीडिता अनुरुद्धेत्यर्थः दुर्गा पार्वती येन।

[३] "अनेन प्रयोगेण निधिलाभो भवेदिति" वादरूपो व्याधिः स आविर्भूतो यस्य।

[४] "अनेन प्रयोगेण रङ्गमपि रजतायते इति" वादरूपो वायुः वातुलता स संजातो यस्य।

[५] असुरविवरे पाताले प्रवेशरूपः पिशाचः भूतः तदावेशो यस्य।

असकृदभिमन्त्रितसिद्धार्थक[१]ग्रहतिप्रधावितैः पिशाचगृहीतकैः करतलताड़नचिपिटीकृतश्रवणपुटेन, अनवमुक्तग्रीवाभिमानेन, दुर्गृहीतालाबुवीणावादनोद्वेजितपथिकपरिहृतेन, दिवसमिव मशककणितानुकारि किमपि कम्पितोत्तमाङ्गं गायता, स्वदेशभाषानिबद्धभागीरथीभक्तिस्तोत्रनर्त्तकेन, गृहीततुरगब्रह्मचर्य्यतया अन्यदेशागतो[२]षितासु जरत्प्रव्रजितासु बहुकृत्वः सम्प्रयुक्तस्त्रीवशीकरणचूर्णेन, अतिरोषणतया कदाचिद्दुर्न्यस्ताष्टपुष्पिका[३]पातोत्पादितक्रोधेन, चण्डिकामपि मुखभङ्गिविकारैर्भृशमुपहसता, कदाचिन्निवार्य्यमाणावासरुषिताध्वगारब्धवक्रयुद्धपातभग्नपृष्ठकेन,

---

[१] अभिमन्त्रिता मन्त्रसंस्कृताः सिद्धार्थकाः सर्षपास्तेषां ग्रहत्या प्रधावितैः पिशाचगृहीतकैः पिशाचाविष्टैः करतलताडनेन चिपिटीकृतं (चेप्टा) श्रवणपुटं यस्य।

[२] गृहीतं तुरगस्येव ब्रह्मचर्य्यं येन तस्य भावेन धृतकपाटब्रह्मचर्य्यतया अन्यदेशादागतासु उषितासु स्वावासे विश्रम्भस्थितासु जरत् प्रव्रजितासु वृद्धसंन्यासिनीषु दत्तं स्त्रीवशीकरणचूर्णं येन।

[३] अष्टानां कुमुदादीनां समाहारः अष्टपुष्पी अज्ञाता सा तस्याः याथार्थ्यज्ञानाभावात् अज्ञातत्वम् अज्ञार्थे कन्। दुर्न्यस्तायाः यथास्थाने अस्थापितायाः अष्टपुष्पिकायाः पातेन इतरजनेन दैवात् पातेन उत्पादितक्रोधम्। पुष्पाष्टकञ्च दुर्गोत्सवपद्धतौ अनुसन्धेयम्।

कदाचित्कृतापराधबालकपलायनामर्षपश्चात्प्रधावितस्खलि-ताधोमुखपातस्फुटितशिरःकपालभुग्नग्रीवेण, कदाचिज्जन पदकृतनवागतापरधार्मिकादरमत्सरोद्दहात्मना, [१] निः-संस्कारतया यत्किञ्चनकारिणा, खञ्जतया मन्दमन्दसञ्चा-रिणा, बधिरतया संज्ञाव्यवहारिणा, रात्र्यन्धतया, दिवावि-हारिणा, लम्बोदरतया प्रभूताहारिणा, अनेकशः फलपातन-कुपितवानरनखोल्लेखच्छिद्रितनासापुटेन, बहुशः कुसुमाव-चयचलितभ्रमरसहस्रदंशशीर्णीकृतशरीरेण, सहस्रशः शयनी-कृतासंस्कृतशून्यदेवकुलकालसर्पदष्टेन, शतशः श्रीफलतरुशि-खरच्युतिचूर्णितोत्तमाङ्गेन, असकृदुन्मत्तदेवमातृरटहवासिच्छ-च्छनखजर्जरितकपोलेन, सर्वदा वसन्तक्रीड़िना जनेनोत्क्षिप्त-खल्वखट्वारोपितवृद्धदासीविवाहप्राप्तविडम्बनेन, अनेकायत-नप्रतिशयित[२]निष्फलोत्थानेन, दौस्थित्यमपि विविधव्याधि-परिवृतं स्वकुटुम्बमिवोद्वहता, मूर्खतामपि, बहुव्यसनानुगतां प्रसूतानेकापत्यामिव दर्शयता क्रोधमप्यनेकदण्डाघातनिर्मित-बहुगात्रगण्डकं [३] फलितमिव प्रकाशयता, क्लेशमपि सर्व्वा-

---

[१] जनपदकृते देशवासिजनकृते नवागतस्य अपरधार्मिकस्य आदरे मत्सरोद्दहः द्वेषकारी आत्मा मनो यस्य तेन।

[२] अभीष्टशुभाशुभज्ञानार्थं स्वप्नोपलम्भाय इतरव्यापार रहिततया शयनमात्रकारी प्रतिशयितः। (इत्यादि कोषः)

[३] गण्डकः रोगभेदः।

दग्धवज्वलितदीपिकादाहव्रणविभावितं बहुसुखमिव प्रक-टयता, परिभवमपि निष्कारणाक्रुष्टजनपददत्तपदाहृष्टि-प्रतखम्प्रवाहमिव दधानेन, शुष्कवनलताविनिर्म्मितवृहत्कु-सुमकरण्डकेन, [१] वेणुलतारचितपुष्पपातनाङ्कुशिकेन, च्चण-मपि श्रासुक्तकालकम्बलखण्डलोलेन, जरद्द्रविड़धार्म्मिकेणा-धिष्ठितां चण्डिकामपश्यत्। तस्यामेव च वासमरोचयत्।

अथावतीर्य्य तुरगात् प्रविश्य भक्तिप्रवणेन चेतसा तां प्रणनाम। कृतप्रदक्षिणश्च पुनः प्रणम्य प्रशान्तोद्देशदर्शन-कुतूहलेन परिभ्रमन्नुच्चैरारटन्तमाक्रोशन्तञ्च कुपितं द्रविड़धार्म्मिकमेकदेशे ददर्श। दृष्ट्वा कादम्बरीविरहो-त्कण्ठोद्वेगदूयमानोऽपि सुचिरं जहास, न्यवारयच्च तेन सार्द्धं संरब्धकलहानुपहसतः स्वसैनिकान्। उपसान्त्वनैश्च कथमपि प्रियालापशतानुनयैः प्रशममनुनीय क्रमेण जन्म-भूमिं जातिं विद्याञ्च कलत्रमपत्यानि विभवं वयःप्रमाणं प्रव्रज्यायाश्च कारणं स्वयमेव पप्रच्छ। पृष्टस्तासावर्णवदा-ख्यानम्, अतीतस्वशौर्य्यरूपविभववर्णनवाचालेन तेन सुतरामरज्यत राजपुत्रः। विरहातुरहृदयस्य विनोदनता-मिवागात्। उपजातपरिचयश्चास्मै ताम्बूलमदापयत्। अस्तमुपगते च भगवति सप्तसप्तौ आवासितेषु यथासम्पन्न-

[१] करण्डकं पुष्पधरणार्थः पात्रभेदः।

पादपतलेषु राजसूनुषु, शाखावसक्तापनीतपर्य्याणेषु क्षिति-तललुण्ठनपांशुलसटावधूननानुमितोत्साहेषु गृहीतकतिपय-शष्पकवलेषु पीतोदकेषु स्नानार्द्रपृष्ठतया विगतश्रमेषु पुरोनिखातकुन्तयष्टिषु संयतेषु वाजिषु, वाजिसमीपविर-चितपर्णस्रस्तरे च दिवसगमनखिन्नपरिकल्पितयामिके सुषु-प्सति सैनिकजने, कृतबहुपावकप्रभापीततमसि दिवस इव विराजमाने सेनानिवेशे चन्द्रापीड़ः परिजनेनैकदेशसंय-तस्येन्द्रायुधस्य पुरः परिकल्पितं प्रतीहारनिवेदितं शयनीय-मगात्। विषसस्य चास्य तत्क्षणमेव पस्पर्श दुःखासिका [१] हृदयम्, अरतिगृहीतश्च विसर्ज्जयाम्बभूव राजलोकम्, अतिवल्लभानपि नाललाप पार्श्वस्थान्, निमीलितलोचनो मुहुर्मुहुर्मनसा जगाम किंपुरुषविषयम्, अनन्यचेताः सस्मार हेमकूटस्य रम्यतां, निष्कारणबान्धवतामचिन्तयत् महाश्वेता-पादानां, जीवितफलमभिललाष पुनःपुनः कादम्बरीदर्शनम्, अपगताभिमानपेशलाय नितरामस्पृहयत् मदलेखापरि-चयाय, तमालिकां द्रष्टुमाचकाङ्क्ष, केयूरकागमनमुत्प्रैक्षत हिमगृहकमपश्यत्, उष्णमुष्णमायतं पुनरुक्तं निशश्वास, बबन्ध चाधिकां प्रीतिं शेषहारे, पश्चात् स्थितां पुण्यभागि-नीममन्यत पत्रलेखाम्। एवञ्चानुपजातनिद्र एव ताम-

[१] दुःखेन पर्य्यायेण आसनम् पर्य्याये खुच्।

नयन्निशाम्। उषसि चोत्थाय तस्य जरद्द्रविड़धार्म्मिकस्ये-च्छया निसृष्टैर्धनविसरैः पूरयित्वा मनोरथम्, अभिमते-ष्वतिरमणीयेषु प्रदेशेषु निवसन्नल्पैरेवाहोभिरुज्जयिनी-माजगाम।

आकस्मिकागमनप्रहृष्टसंभ्रान्तानां पौराणामर्घकमला-नीव नमस्काराञ्जलिसहस्राणि प्रतीच्छन्नतर्कित एव विवेश नगरीम्। अहमहमिकया च प्रधावितात् अतिहर्षरसविक्ल-वात् परिजनात् "देव! द्वारि चन्द्रापीड़ो वर्त्तते" इत्युपलभ्य पितास्य निर्भरानन्दमन्दगमनो मन्दर इव क्षीरोदजलम् उत्तरीयांशुकममलमागलितमाकर्षन्, प्रहर्षनेत्रजलविन्दु-वर्षी मुक्ताफलासार इव कल्पपादपः प्रत्यासन्नवर्त्तिभि-र्जरापाण्डुमौलिभिश्चन्दनविलेपनैरनुपहतक्षौमधारिभिः केयू-रिभिरुष्णीषिभिः किरीटिभिः शेखरिभिः बहुकैलासामिव बहुक्षीरोदामिव क्षितिं दर्शयद्भिः, प्रतिपन्नासिवेत्रच्छत्र-केतुचामरैरनुगम्यमानो राजसहस्रैः, चरणाभ्यामेव प्रत्य-ज्जगाम। चन्द्रापीड़ोऽपि दृष्ट्वा च पितरं दूरादेवावतीर्य्य वाजिनः चूड़ामणिमरीचिमालिना मौलिना महीमगच्छत्। अथ प्रसारितभुजेन एह्येहीत्याहूय पित्रा गाढ़मुपगूढ़ः सुचिरं परिष्वज्य तत्कालसन्निहितानां च माननीयानां कृतनमस्कारः करे गृहीत्वा विलासवतीभवनमनीयत राज्ञा। तयापि तथैव सर्वान्तःपुरपरिवारया प्रत्युद्गमा-

भिनन्दितागमनः कृतागमनमङ्गलाचारो दिग्विजयसम्बद्धाभिरेव कथाभिः कञ्चित् कालं स्थित्वा शुकनासं द्रष्टुमाययौ। तत्राप्यमुनैव क्रमेण सुचिरं स्थित्वा निवेद्य वैशम्पायनं स्कन्धावारवर्त्तिनं कुशलिनम् आलोक्य च मनोरमामागत्य विलासवतीभवन एव सर्वाः स्नानादिकाः परवश इव क्रिया निरवर्त्तयत्, अपराह्णे निजमेव कुमारभवनमयासीत्। तत्र च रणरणकखिद्यमानमानसः कादम्बर्या विना न केवलमात्मनं स्वभवनमवन्तीनगरं वा सकलमेव महीमण्डलं शून्यममन्यत। ततो गन्धर्वराजपुत्रीवार्त्ताश्रवणोत्सुकस्य महोत्सवमिव ईप्सितवरप्राप्तिकालमिव अमृतोत्पत्तिसमयमिव पत्रलेखागमनं प्रत्यपालयत्।

ततः कतिपयदिवसापगमे मेघनादः पत्रलेखामादायागच्छत् उपानयच्चैनाम्। कृतनमस्काराञ्च दूरादेव स्मितेन प्रकाशितप्रीतिश्चन्द्रापीड़ः प्रकृतिवल्लभामपि कादम्बरीसकाशात् प्रसादलब्धापरसौभाग्यामिव वल्लभतरतामुपानतामुत्थायातिशयदर्शितादरमालिलिङ्ग पत्रलेखां, मेघनादञ्च प्रणतं पृष्ठे करकिसलयेन पस्पर्श। समुपविष्टाञ्च तामब्रवीत् "पत्रलेखे कथय तत्रभवत्या महाश्वेतायाः समदलेखाया देव्याः कादम्बर्याश्च कुशलं, कुशली वा वाह्यः सकलस्तमालिकाकेयूरकादिपरिजन इति।" साब्रवीत् "देव! यथाज्ञापयसि भद्रं, त्वामर्च्चयति शेखरीकृताञ्जलिना ससखीजना सपरिजना देवी

कादम्बरीति।" एवमुक्तवतीं पत्नलेखामादाय मन्दिराभ्यन्तरं विसर्जितराजलोको विवेश। तत्र चोत्ताम्यता मनसा धारयितुमपारयन् कुतूहलम् अतिप्रीत्या दूरमुत्सारितपरिजनः प्रविश्य अगारप्ररूढ़ायाः स्थलकमलिन्याः पृथुभिरुन्नलैः पलाशैरुपरचितातपत्रकृत्यस्याध्यास्य मध्यभागमन्यतरस्य मरकतपताकायमानस्य पञ्चमण्डपस्य तले चरणारविन्देन समुत्साय्य सुखप्रसुप्तहंसमिथुनमुपविश्याप्राक्षीत्। "पत्नलेखे! कथय? आगते मयि कथमसि स्थिता? कियन्ति वा दिनानि? कीदृशो वा देवीप्रसादः? का वा गोष्ठ्यः समभवन्? कीदृश्यो वा कथाः समजायन्त? को वातिशयेनास्मान् स्मरति? कस्य वा गरीयसी प्रीतिरिति?" एवं पृष्टा च व्यजिज्ञपयत्, "देव! दत्तावधानेन श्रूयतां यथा स्थितास्मि, यावन्ति वा दिनानि, यादृशो वा देवीप्रसादः, यथा वा गोष्ठ्यः समभवन्, यादृश्यश्च कथाः समजायन्त, यो वातिशयेन तव स्मरति, यस्य वा त्वयि गरीयसी प्रीतिरस्तीति।

ततः खल्वागते देवे केयूरकेण सह प्रतिनिवृत्त्याहं तथैव कुसुमशयनीयसमीपे समुपाविशम्, अतिष्ठञ्च सुखं नवनवाननुभवन्ती देवीप्रसादान्। किं बहुना, प्रायेण मम चक्षुषि चक्षुः, वपुषि वपुः, करे करपल्लवो, नामाक्षरेषु वाणी, प्रीतौ हृदयं, देव्याः सकलमेव तं दिवसमभवत्। अपराह्णे च मा-

मेवावलम्बा निष्क्रम्य हिमगृहकात् सञ्चरन्ती यदृच्छया निषिद्धपरिजना वल्लभबालोद्यानं जगाम। तत्र सुधाधवलां कालिन्दीजलतरङ्गमय्येव मरकतसोपानमालया प्रमदवनवेदिकामभ्यारोहत्। तस्याञ्च मणिस्तम्भावष्टम्भस्थिता स्थित्वा च मुहूर्त्तमिव हृदयेन सह दीर्घकालमवधार्य्य किमपि व्याहर्त्तुमिच्छन्ती निश्चलधृततारकेण निष्पन्दपक्ष्मणा चक्षुषा मुखं मे सुचिरं व्यलोकयत्, विलोकयन्त्येव च कृतसङ्कल्पा मदनाग्निं प्रवेष्टुमिच्छन्ती स्नातेव स्वेदाम्भसः स्रोतसि, स्रोतसेव तरलीकृता समकम्पत, कम्पिताङ्गी च पतनभियेवागृह्यत विषादेन।

अथ मया विदिताभिप्रायया तन्मुखविनिवेशितनिष्कम्पनयनदत्तावधानया ज्ञापयेति विज्ञापिते निजावयवैरपि वेपथुमद्भिर्निवार्य्यमाणेव रहस्यश्रवणलज्जयात्मप्रतिमामपि लिखितमणिकुट्टिमेन चरणाङ्गुष्ठेनापक्रमाय वाम्दृशन्ती भवनकलहंसान्, कुट्टिमोल्लेखमुखरनूपुरेण चरणारविन्देन विसर्जयन्ती कर्णोत्पलमधुकरानपि, खिद्यद्वदनव्यजनच्छिन्नांशुकपल्लवेनोत्सारयन्ती ताम्बूलविटिकासकलमुत्कोचमिव दन्तखण्डितं शिखण्डिने ददती, वनदेवताश्रवणशङ्किनेव मुहुर्मुहुरितस्ततो विलोकयन्ती, वक्तुकामापि न शक्नोति स्म किञ्चिदपि लज्जाकलितगद्गदा गदितुं, प्रयत्नतोऽपि चास्या निःशेषं ज्वलता मदनानलेनेव दग्धा, प्रवहता नयनोदकेन-

व्रीड़ा, प्रविशद्भिर्दुःखैरिवाक्रान्ता पतद्भिः कुसुमचापशरैरिव शकलीकृता, निष्पतद्भिर्निःश्वसितैरिव निर्वासिता, हृदयवर्त्तिभिश्चिन्ताशतैरिव विधृता, निश्वासपातिभिर्म्मधुकरकुलैरिव निपीता न प्रावर्त्तत वाणी। केवलं दुःखसहस्रगणनाय मुक्ताक्षमालिकामिव कल्पयन्ती, गलद्भिरस्पृष्टकपोलस्थलैः शुचिभिरधोमुखी, नयनजलविन्दुभिर्दुर्दिनमदर्शयत्। तदा च तस्याः सकाशादशिच्चतेव लज्जापि लज्जालीलां, विनयोऽपि विनयातिशयं, मुग्धतापि मुग्धतां, वैदग्ध्यमपि वैदग्ध्यं भयमपि भीरुतां, विभ्रमोऽपि विभ्रमितां, विषादोऽपि विषादितां, विलासोऽपि विलासम्। तथाभूता च "देवि! किमिदमिति" विज्ञापिता मया प्रमृज्य लोहितायमानोदरे लोचने दुःखप्रकर्षेणात्मनः समुद्बन्धनायेव मृणालकोमलया बाहुलतया वेदिकाकुसुमपालिकाग्रथितकुसुममालामवलम्ब्य समुन्नतैकभ्रूलता मृत्युपाशमिवावलोकयन्ती दीर्घमुष्णञ्च निश्वसितवती। तद्दुःखमुत्प्रेक्षमाणया च कथनाय पुनःपुनरनुबध्यमाना मया व्रीड़या नखमुखलिखितकेतकीदला लिखित्वेव वक्तव्यमर्पयन्ती विवक्षास्फुरिताधरा निश्वासमधुकरानिवोपांशु सन्दिशन्ती क्षितितलनिहितनिश्चलनयना सुचिरमतिष्ठत्।

क्रमेण च भूयो मन्मुखे निधाय दृष्टिं पुनःपुनरप्यापूर्य्यमाणलोचनच्युतैर्म्मदनानलधूमधूसरां वाचमिव प्रक्षालयन्ती,

वास्पजलविन्दुभिः वास्पजलविन्दुव्याजेन च विलक्षस्मित-स्फुरितैर्दशनांशुभिः साध्वसविस्मृतान् पूर्वानभिधेयवर्णानिव ग्रथ्नन्ती, कथमपि व्याहाराभिमुखमात्मानमकरोत्, अब्रवीच्च माम्। 'पत्रलेखे वल्लभतया तस्मिन् स्थाने न ततो नाम्ना न महाश्वेता न मदलेखा न जीवितं यच्च मे भवती दर्शनात् प्रभृति प्रियासि न जाने केनापि कारणेन अप्रहस्तितस-कलसखीजनं त्वयि विश्वसिति मे हृदयम्। कमपरमुपालभे, कस्य वान्यस्य कथयामि परिभवं, केन वान्येन सह साधा-रणीकरोमि दुःखं, दुःखाभारमिममसह्यमद्य निवेद्य भवत्या-स्त्यक्ष्यामि जीवितं जीवितेनैव शपामि, ते स्वहृदयेनापि विदितवृत्तान्तेनामुना जिह्रेमि किमु तापहृदयेन? कथ-मिव मादृशी रजनिकरकिरणावदातं कौलिनेन[१] कलङ्कयि-ष्यति कुलं? कुलक्रमागताञ्च लज्जां परित्यक्ष्यति? अन्यकन्य-कोचिते वा चापले चेतः प्रवर्त्तयिष्यति? साहं न सङ्कल्पिता पित्रा, न दत्ता मात्रा, नानुमोदिता गुरुभिः, न किञ्चित् सन्दिशामि, न किञ्चित् प्रेषयामि, नाकारं दर्शयामि, कात-रेव अनाथेव नीचेव बलादवलिप्तेव गुरुगर्हणीयतां नीता कुमारेण चन्द्रापीड़ेन। कथय महतां किमयमाचारः? किं परिचयस्येदं फलं? यदेवमभिनवविसकिशलयतन्तुसुकुमारं

---

[१] कालीनं दुष्टाचारः।

मे मनः परिभूयते, परिभवनीयो हि कुमारिकाजनो यूनां प्रायेण। प्रथमं मदनानलो लज्जां दहति, ततो हृदयम्, आदौ विनयादिकं कुसुमेषुशराः खण्डयन्ति, पश्चान्मर्माणि। तदामन्त्रये भवतीं पुनर्जन्मान्तरसमागमाय, न हि मे त्वत्तोऽन्या प्रियतरा, प्राणपरित्यागप्रायश्चित्ताचरणेन प्रक्षालयाम्यात्मनः कलङ्कमित्यभिधाय तूष्णीमभूत्।

अहन्तु यत्सत्यमविदितवृत्तान्ततया ह्रीतेव भीतेव विलक्षेव विसंज्ञेव सविषादं विज्ञापितवती। "देवि! श्रोतुमिच्छाम्याज्ञापय किं कृतं देवेन चन्द्रापीड़ेन? को वापराधः समजनि? केन वा खल्वविनयेन खेदितमखेदनीयं देव्याः कुमुदकोमलं मनः? श्रुत्वा प्रथममुत्सृष्टजीवितायां मयि पश्चात् समुत्स्रक्ष्यति देवी जीवितमिति।" एवमभिहिता च पुनरवदत् "आवेदयामि ते, अवहिता शृणु। स्वप्नेषु प्रतिदिनमागत्यागत्य मे रहस्यसन्देशेषु निपुणो धूर्त्तः पञ्जरशुकसारिकादूतीः करोति, सुप्तायाः श्रवणदन्तपत्रोदरेषु व्यर्थमनोरथमोहितमानसः सङ्केतस्थानानि लिखति, स्वेदप्रक्षालिताक्षरामपि निपतितसाञ्जनाश्रुबिन्दुभिःकथितात्मावस्थान् मनोहरान् सम्मोहाभ्यागुवर्त्तिनो मदनलेखान् प्रेषयति, निजानुरागेणेव बलाद्रञ्जयत्यलक्तकरसेन चरणौ, अविनयनिस्रतनो नखप्रतिबिम्बितमात्मानं बहु मन्यते, उपवनेष्वेकाकिन्या ग्रहणमयपलायमानायाः पल्लवलग्नांशुकदम्भाप्रतिहतगमनाया

गृहीत्वेव लतासखीभिरर्पिताया मिथ्याप्रगल्भः पराङ्मुखपरिष्वङ्गमाचरति, स्तनस्थले मे लिखन् पत्रलतां कुटिलतामिवानृजुप्रकृतिः प्रकृतिमुग्धं मनः शिक्षयति, हृदयोत्कलिकातरङ्गवातैरिव शीतलैर्मुखमरुद्भिः श्रमजलशीकरतारकितौ अलीकचाटुकारः कपोलौ वीजयति, स्वेदसलिलशिथिलितग्रहणगलितोत्पलशून्येनापि करेण यवाङ्कुरानिव नखकिरणान् शुद्धान् दुर्विदग्धः कर्णपूरीकरोति, वल्लभतरबालकुवलसेककालकवलीकृतान् [१] सुरागण्डूषान् सकचग्रहमसकृत् धृष्टो मां पाययति, भवनाशोकतरुताड़नोद्यतान् पादप्रहारान् दुर्बुद्धिविड़म्बितः शिरसा प्रतीच्छति, मन्मथमूढ़मानसस्य कथय हे पत्रलेखे! केन प्रकारेण निरेतनी निर्षिध्यते? प्रत्याख्यानमपीर्षां सम्भावयति, आक्रोशमपि परिहासमाकलयति असम्भाषणमपि मानं मन्यते, दोषसङ्कीर्त्तनमपि स्मरणोपायमवगच्छति, अवज्ञामपि निर्यन्त्रणप्रणयमुत्प्रेक्षते, लोकापवादमपि यशो गणयतीति।"

तामेवंवादिनीमाकर्ण्य प्रहर्षरसनिर्भरा मनस्यकरवम्, अतो चन्द्रापीड़मुद्दिश्य सुदूरमाकृष्टा खल्वियं मकरकेतुना, यदि च सत्यमेव कादम्बरीव्याजेन साक्षान्मनोभवचित्तवृत्तिः

---

[१] वल्लभतराणां मतिवल्लभानां बालबकुलानां सेककाले सेचनसमये कवलीकृतान् स्वीकृताम्।

प्रसन्ना देवस्य चन्द्रापीड़स्य, ततः सहजैः सादरं संवर्द्धितैः प्रत्युपकृतमस्य गुणैः, यशसा धवलिताः ककुभः, यौवनेन रति-रससागरतरङ्गैः पातिता रत्नवृष्टिः, यौवनविलासैर्लिखितं नाम शशिनि, सौभाग्येन प्रकाशिता निजश्रीः, लावण्येन ऐन्दवीभिरिव वृष्टममृतं कलाभिः। तथा च चिरात्लब्धः कालो मलयानिलेन समासादितोऽवसरश्चन्द्रोदयेन प्राप्त-रूपं फलं मधुमासकुसुमसमृद्ध्या गतो मदिरामददोषो गुणतां, दर्शितं सखं मन्मथयुगावतारेणेति। अथाहं प्रकाशं विहस्याब्रुवम्, "देवि! यद्येवम् उत्सृज कोपं प्रसीद नार्हसि कामापराधैर्देवं दूषयितुं, एतानि खलु खलस्य कुसुमचापस्य चापलानि, शठस्य न देवस्ये"त्येवमुक्तवतीं मां पुनः सकुतूहला सा प्रत्यभाषत, 'योऽयं कामी वा कोऽपि वा कथय कानि कान्यस्य रूपाणीति।' तामहं व्यजिज्ञपम् "देवि! कुतोऽस्य रूपम्? अतनुरेष हुताशनः तथाहि अप्रकाशयन् ज्वालावलीः सन्तापं जनयति, अप्रकटयन् धूमपटलमश्रु पातयति, अदर्श-यन् भस्मरजोनिकरं पाण्डुतामाविर्भावयति, न च तद्भूत-मेतावति त्रिभुवने अस्य शरव्यतां यन्न यातं, याति यास्यति वा को वास्य भ्रश्यति गृहीतकुसुमकार्मुको वाणैर्बलवन्त-मपि विध्यति। अपि च अनेनाधिष्ठितानां कामिनीनां पश्य-न्तीनां चिन्तया प्रियमुखचन्द्रसहस्राणि सङ्कटमम्बरतलं, लिखन्तीनां दयिताकारान् अविस्तीर्णं महीमण्डलं, गण-

यन्तीनां वल्लभगुणान् अल्पीयसी संख्या, शृखन्तीनां प्रियतमकथाम् अबहुभाषिणी सरस्वती, ध्यायन्तीनां प्राणसमसमागमसुखानि ह्रसीयान् कालो हृदयस्यापततीति।

एतदाकर्ण्य च चणं विचिन्त्य चावादीत्, "पत्रलेखे! यथा कथयसि, तथा जनोऽयं कारितः, कुमारे पक्षपातं पश्येषुणा यान्यस्यैतानि रूपाणि समधिकानि वा तानि मयि वर्त्तन्ते। हृदयादव्यतिरिक्तासीदानीं भवतीमेव पृच्छामि, उपदिश यदत्र मे साम्प्रतम् एवंविधानां वृत्तान्तानामनभिज्ञास्मि, गुरुजनवक्तव्यतां नीताया नितरां लज्जिताया जीवितान्मरणमेव श्रेयः पश्यति मे हृदयमिति।" एवंवादिनीं भूयस्तामहमेवमवोचम्, अलमलमिदानीं देवि! किमनेनाकारणमरणानुबन्धेन? अनाराधितप्रसन्नेन कुसुमशरेण भगवता ते वरो दत्तः। का चात्र गुरुजनवक्तव्यता, यदा खलु कन्यकां गुरुरिव पञ्चशरः सङ्कल्पयति, मातेवानुमोदते, भ्रातेव ददाति, सखीवोत्कण्ठां जनयति, धात्रीव तरुणतारत्युपचारं शिक्षयति, वा कथयामि, ते याः स्वयं वृतवत्यः पतीन्, यदि च नैवम् अनर्थक एव तर्हि धर्मशास्त्रोपदिष्टः स्वयम्वरविधिः। तत्प्रसीद देवि! अलं मरणानुबन्धेन, शपामि ते पादपङ्कजस्पर्शेन, सन्दिश मां, यामि आनयामि तं देवं चन्द्रापीड़ं ते हृदयदयितम्, इत्येवमुक्ते मया प्रीतिद्रवार्द्रया दृष्ट्या पिबन्तीव मां निरुध्यमानैरपि मकरकेतुशरशतजर्जरितां भित्त्वेव

लज्जां लज्जान्तरैः निपतद्भिरनुरागविभ्रमैराकुलीक्रियमाणा, प्रियवचनश्रवणप्रीत्या च स्वेदस्निष्टमुत्क्षिप्य रोमाञ्चजालकेन दधतीव उत्तरीयांशुकं, प्रेङ्खत्कुण्डलमाणिक्यपतमकरकोटि-लग्नञ्च शशिकिरणमयं, मरणपाशमिव मकरकेतुना निहितं कण्ठे हारमुन्मोचयन्ती प्रहर्षविह्वलान्तःकरणापि कन्यका-जनसहजां लज्जामिवालम्ब्य शनैरवदत्।

"जानामि ते गरीयसीं प्रीतिं केवलमकठोरशिरीषपुष्प-मृदुप्रकृतेः, कुतः प्रागल्भ्यमेतावन्नारीजनस्य? विशेषतो बाल-भावभाजः कुमारीलोकस्य साहसकारिण्यस्ता, याः स्वयं सन्दिशन्ति समुपसर्पन्ति वा। स्वयं साहसं दिशन्ती बाला जिह्रेमि किं वा सन्दिशामि। अतिप्रियोऽसीति पौन-रुक्त्यं, [१]? तवाहं प्रियास्मीति [२] जड़प्रश्नः, त्वयि गरीया-ननुराग [३ इति वेश्यालापः, त्वया विना न जीवामी-

---

[१] अतिप्रियत्वं हि चेष्टादिनैव निवेद्यं तत्र वचनप्रयोगे तस्य वचनस्य ज्ञातार्थज्ञापकत्वेन पौनरुक्त्यमिव भवति।

[२] तव किमहं? प्रितात्मा प्रियस्वरूपा? किमथवा गम्यः। इति तु जड़जनस्य अविदितपराभिप्रायत्वेनानभिज्ञस्य प्रश्नः जिज्ञासा-र्थकवाक्यम् "अहं तव प्रिया" किं नवेति प्रश्नेन विनापि चेष्टयैव विज्ञेन ज्ञातुं शक्यते जडबुद्धिना तु प्रश्नेनेति भावः।

[३] गरीयान् गुरुतरः अनुराग इति कथनं वेश्यालापः वेश्या

त्यनुभवविरोधः, [१] परिभवति मामनङ्ग इत्यात्मदोषोपालम्भः, [२] मनोभवेनाहं भवते दत्तेत्युपसर्पणोपायः, [३] बलाद्धृतोऽसि मयेति बन्धकीधार्ष्ट्यम्, [४] अवश्यमागन्तव्यमिति सौभाग्यगर्वः, [५] स्वयमागच्छामीति स्त्रीचापलम्, [६] अनन्यरक्तोऽयं परिजन इति स्वभक्तिनिवेदनलाघवं, [७]

हि वाक्येनैवानुरागं दर्शयतीति, सेन क्रिययानुरागमप्रकाश्य वाक्येन तत्प्रकाशनं वेश्याजनाचार इति भावः।

[१] अनुभवविरोधः न जीवसि चेत् कथं न मृता कथं वाक्यं प्रायुङ्क्थाः इति अनुभूयमानस्य जीवनस्य तत्कार्य्यस्य वचनादिप्रयोगस्य दर्शनात् विरोधितया तत्कथनं निरर्थकमिति भावः।

[२] आत्मनो दोषस्य उपालम्भः धिक्कारकरणं स्वचित्तविकारस्य स्वेनैव शमयितुमुचितत्वेन तदकृत्वा तस्योत्कीर्त्तनमनुचितमिति भावः।

[३] उपसर्पणस्य आत्मसर्पणार्थं निकटगमनस्यैव उपायः न ततः पूर्वं सन्देशप्रेषणस्य उपायः।

[४] बलात् बलेन मया त्वं धृतो गृहीतः। गृहीत इति भविष्यत्सामीप्ये क्तः। बन्धकी कुलटा तस्या इव धार्ष्ट्यं प्रागल्भ्यम्।

[५] सौभाग्यस्य सुप्रियत्वस्य गर्वः न च मम तादृशं सौभाग्यं येन त्वामागमनाय नियोजयामीति तथा कथनमहङ्कारमात्रमित्यर्थः। [६] स्त्रियाश्चापलं यच्च तादृशमावेदनमित्यर्थः।

[७] स्वभक्तेः तस्मिन् चन्द्रापीडे निवेदनेन आत्मनस्तदाधीनत्वकथनेन लाघवं लघुता।

प्रत्याख्यानशङ्कया न सन्दिशामीत्यप्रबुद्धबोधनम् [१] अनपेक्षितानुजीविदुःखदारुणास्यामित्यतिप्रणयिता ज्ञास्यसि मरणेन प्रीतिमित्यसम्भाव्यमेव [२]।

इति श्रीबाणभट्टविरचितः कादम्बरीपूर्वभागः समाप्तः।

---

[१] प्रबुद्धस्य अनिश्चितस्य "मया चन्द्रापीडेन प्रत्याख्यानं कर्त्तव्यं किं नवेति" तस्यादौ त्वया परचित्तवृत्तेः परेण ज्ञातुमशक्यतया निश्चेतुमशक्यत्वात् प्रत्याख्यानस्य प्रबोधनं प्रबोधनार्थं वचनोपन्यासः।

[२] असम्भाव्यम् मरणं यदि सुलभं स्यात् तदा स्वमरणेन त्वयि प्रीतिज्ञापनं स्यात् तस्यैव सुलभत्वात् कृतस्तस्य ज्ञापनमिति भावः।

एतत्पर्य्यन्तं ग्रन्थं विरचय्य तत्प्रतिपाद्यकथाशेषं पुत्राय श्रावयित्वा दिवं गते बाणभट्टे तत्पुत्रेण कथापूरणार्थमुत्तरार्द्धं कृतम्। तस्य चानतिरमणीयत्वात् श्रद्धाभाजनत्वाभावेन न विवृतिः कृता।

वात्स्यवंशावतंसस्य कालिदासविदः सुतः
श्रीतारानाथशर्म्मेमां विवृतिं कृतवान् मनाक्।

कादम्बरी

उत्तरभागः ।

श्रीवाणभट्टतनयविरचितः

कलिकाताराजकीयसंस्कृतविद्यालयाध्यापकेन

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण

संस्कृतः ।

कलिकातायाम्

वाल्मीकियन्त्रे मुद्रितः ।

शकाब्दाः १७९३ ।

कादम्बरी।

द्वितीयभागः।

मङ्गलाचरणम्।

देवद्वयार्द्धघटनारचितं शरीर
मेकं ययोरनुपलक्षितसन्धिभेदम्।
वन्दे सुदुर्घटकथापरिशेषसिद्धैर
स्रष्टेर्गुरू गिरिसुतापरमेश्वरौ तौ॥

व्याधूतकेसरसटाविकरालवक्त्रं
हस्ताग्रविस्फुरितशङ्खगदासिचक्रम्।
आविष्कृतं सपदि येन नृसिंहरूपं
नारायणं तमपि विश्वसृजं नमामि॥

आर्य्यं यमर्च्चति गृहे गृह एव लोकः।
पुण्यैः कृतस्य यत एव मयात्मलाभः।
सृष्टैव येन च कथेयमनन्यशक्या
वागीश्वरं पितरमेव तमानतोऽस्मि॥

याते दिवं पितरि तद्वचसैव सार्द्धं
विच्छेदमाप भुवि यस्तु यथाप्रबन्धः ।
दुःखं सतां तदसमाप्तिकृतं विलोक्य
प्रारब्ध एष च मया न कवित्वदर्पात् ॥
गद्ये कृतेऽपि गुरुणा तु तथाक्षराणि
यन्निर्गतानि पितुरेव स मेऽनुभावः ।
एकः स्रवाम्रुतरसास्पदचन्द्रपादैः
सम्पर्क एव हि म्रुगाङ्कमणेर्द्रवाय ॥
गङ्गां प्रविश्य भुवि तन्मयतामुपेत्य
स्फीताः समुद्रमितरा अपि यान्ति नद्यः ।
आसिन्धुगामिनि पितुर्वचनप्रवाहे
क्षिप्ता कथानुघटनाय मयापि वाणी ॥
कादम्बरीरसभरेण समस्त एव
मत्तो न किञ्चिदपि चेतयते जनोऽयम् ।
भीतोऽस्मि यन्न रसवर्णविवर्ज्जितेन
तच्छेषमात्मवचसाप्यनुसन्दधानः ॥
वीजानि गर्भितफलानि विकाशभाञ्जि
वप्त्रेव यान्युचितकर्म्मबलात् कृतानि ।
उत्कृष्टभूमिविततानि च यान्ति पोषं
तान्येव तस्य तनयेन तु संहृतानि ॥

कादम्बरी।

उत्तर भागः।

अपि च इदानीमानीतस्यापि कुमारस्य न ददाति तरलतालज्जिता लज्जैव दर्शनं, मनोभवविकारवेदनाविलक्षं वैलक्ष्यमेव न पुरस्तिष्ठति, अप्रतिपत्तिसाध्वसजड़ा जड़तैव नोपसर्पति, स्वयमुपसर्पणलघु लाघवमेव तत्प्रतिपत्तिस्थैर्य्यं नावलम्बते, बलात्तदानयनापराधभीता भीतिरेव न सम्मुखीभवति। अथ कथञ्चिद्गुरुजनत्रपया वा, राजकार्य्यानुरोधेन वा, चिरावलोकितसहृसंवर्द्धितबन्धुजनदर्शनसुखेन वा, सहृन्मुखकमलावलोकनोत्कण्ठया वा, पुनरागमनखेदपरिजिहीर्षया वा, निजगृहावस्थानरुच्या वा, जन्मभूमिस्नेहेन वा, [क] अनिच्छया वा अस्य स्वजनस्योपरि पादपतनेनापि नानुनेतुमेव पारितोयदा मयि स्नेहात् कृतप्रयत्नया प्रियसख्या तदा सुतरामेव न किञ्चित्। किञ्चाधुनाभ्यधिकमुपयातं सैवाहं कादम्बरी यानेन कुमारेण मधु[ख] मदमुखरमधुकरकुलकोलाहलाकुलितकोककामिनीकरुण-कूजिते,

---

[क] वा सुहृन्मुखमित्यारभ्य स्नेहेन वा इत्यन्तं पुस्तकान्तरे परित्यक्तं दृश्यते।

[ख] मधु इत्येतत् पुस्तकान्तरे नास्ति।

जनितविरहिजनमनोदुःखे, विकचदलारविन्दवृन्द[क] निष्यन्दानन्दितमन्दगन्धवहसुगन्धदशदिशि, विकसितविविधकुसुमामोदमुकुलितमानिनीमानग्रहोन्मोचनदक्ष[ख]कुसुमायुधे, कर्पूरक्षोदमिश्रचन्दनपङ्कपिण्डे, कुपितकामिनीविनोददक्षगेयमुखरपरिजने, पुनरुक्तदर्शनाभ्युत्थानव्रीड़ितकञ्चुकिजने, प्रदोषसमये जरठशरकाण्डविपाण्डुनिविड़कुण्डलोद्घृष्टलड़हयुवतिगण्डस्थलान्यखण्डमण्डलेमण्डयति गगनञ्च अनवरतविस्फुर[ग]द्विशदकरनिकरनिर्भरावर्ज्जितज्योत्स्नाजलासारवर्षिणि चन्द्रमसि, दूरविक्षिप्तदलनिवहकुमुदकाननामोदवासितदिगन्तायाः कुमुदिन्यास्तटे चन्द्रकरस्पर्शप्रवृत्तशशिमणिशिखरनिर्झरझाङ्कारिणि, क्रीड़ापर्वतकनितम्बे हृद्यहरिचन्दनरसकणिकाजालकच्छलेन तत्कर [घ] स्पर्शसुखसम्भवस्वेदजलनिवहमिव वहति तत्कालहारिणि मुक्ताशिलापट्टशयने कुसुमामोदसुरभितदशदिशि, तुषारकणनिकरनीहारिण्यपि वह्निरेव देहदाहमात्मकापहारिणि सर्वरमणीयानां सन्दोहभूते हिमगृहे, कुसुमस्रस्तरावल-

[क] वृन्दमिति पुस्तकान्तरे नास्ति।

[ख] उन्मोचनहस्ते इति वा पाठः।

[ग] क्षोदमिश्र इत्यारभ्य अनवरत विस्फुरत् पर्य्यन्तं पुस्तकान्तरे नास्ति।

[घ] तत्करतल इति वा पाठः।

म्बिनी वोचिता। ममापि चापुनरुक्ततद्दर्शनस्पृहे ते[क]एवैते लोचने ययोरालोकनपथमसौ यातः, तदेव चेदमप्रतिपत्तिशून्यं हतहृदयं, येनान्तःप्रविष्टोऽपि न पारितो धारयितुं तदेव चैतच्छरीरं, येन चिरं तत्समीपेऽप्युदासीनेन स्थितं, सएव चायं[ख]पाणि र्योऽलीकगुरुजनापेक्षीणात्मानं परिग्राहितवान् अनपेक्षितपरपीड़श्चन्द्रापीड़ोऽपि, सएव योऽत्र वारद्वयमागत्य गतः[ग]मध्येवोपक्षीणमार्गणतया चाकिञ्चित्करोऽन्यच्च पञ्चशरोपि सएव यस्त्वया वेदितो मे। प्रतिज्ञातञ्च मया महाश्वेतायाः, त्वयि दुःखितायां नाहमात्मनः पाणिं ग्राहयिष्यामीति, तामहं पुनरप्यवदं, देवि! मैवं स्म मनसि करोः कुमतिरियम्, अतिदारुणोऽयं पापकारी मकरकेतुः, कदाचित् अदृश्यमाने प्रियजने हृदयानुरागाज्जीवितमप्यपहरतीति। सा त्वब्रवीत् तदपि मास्त्येव मे, दैवेन वा विरहेण वा यौवनेन वा अनुरागेण वा मदेन वा हृदयेन वा अन्येन वा केनापि दत्तः सङ्कल्पमयः कुमारो जनसन्निधावपि केनचिदविभाव्यमानः सिद्ध इव सर्वदा मे ददाति दर्शनम्। अपि चासाविव नायमकाण्डपरित्यागनिष्ठूरहृदयः, अयमेवास्मद्विरहकातरः, नायं

[क] ते इति पुस्तकान्तरे नास्ति।

[ख] चाद्य इति च पाठः।

[ग] प्रतिगतः वा पाठः।

नक्तन्दिवं लक्ष्मीसमाकुलो, न पृथिव्याः पतिर्न सरस्वतीमपेक्षते न कीर्त्तिशब्दं वर्द्धयति। पश्यामि चाहर्निशमासीना उच्छ्रिता भ्राम्यन्ती शयाना जाग्रती निमीलितलोचना चलन्ती स्वप्नायमाना[क]शयने श्रीमण्डपे गृहकमलिनीषु उद्यानेषु लीलादीर्घिकासु क्रीड़ापर्वतके बालगिरिनदिकासु च यथा तमज्ञजनविड़म्बनैकहेतुं विप्रलम्भकं कुमारं तं तथा कथितमेव मया तदलमनया, तदानयनकथया इत्यभिदधाना अतर्किंतागतमूर्च्छेव निमीलिताक्षी पक्ष्माग्रसम्पिण्डितनयनजलवर्षिणी विलीयमानेवोत्पीड्यमानेव चान्तर्जातमन्युवेगेन तथैव वेदिकावितानताभिदामांशुकावलम्बिन्यां बाहुलतिकायाम् अच्छसलिलस्रोतसि प्रसूतायां मृणालिकायामिव जलाहति श्यामारुणतामरसमिवाननमवाङ्निवेश्य तूष्णीमुत्कीर्णेव तस्थौ।

अहन्तु तत् श्रुत्वा समचिन्तयं, सत्यमेव गरीयः खलु जीवितालम्बनमिदं वियोगिनीनां, यदुत सङ्कल्पमयः प्रियो नितरां [ख] कुलाङ्गनानां विशेषतः कुमारिकाणां, तथाह्यनेन सार्द्धमकृतदूतिकापादपतनदैन्यानि प्रतिक्षणं समागमशतानि, अकालरमणीयानि स्वेच्छाभिसरणसौख्यानि, अदूषितकन्याभावानि सुरतानि, अकृतस्तनव्यवधानदुःखानि आ-

[क] पुस्तकान्तरे अत्र तु च इत्यधिकः पाठो दृश्यते।

[ख] सुतरामिति वा पाठः।

लिङ्गनानि, अजनितव्रणदर्शनव्रीड़ानि नखदन्तपदानि, अनाकुलितकेशपाशाः कचग्रहमहोत्सवाः, शब्दविहीनानि चुम्बानानि, अनुत्पादितगुरुजनविभावितक्षतवैलक्ष्याण्यधरखण्डनविलसितानि, नैनमन्धकारराशिरन्तरयति, न जलधरधारापातः स्थगयति, न नीहारनिकरस्तिरोदधातीत्येवं चिन्तयन्त्या एव मे अनुरागकथारसप्लवेनेव रक्ततामगाद्दिवसः, तत्क्षणप्रकटितरागं हृदयमिव कादम्बर्य्या स्त्रपया पलायमानमदृश्यत रविमण्डलम्। पल्लवशयनमिव सन्ध्यारागमरचयद्यामिनी। परिचारक इव चन्द्रमणिशिलातलमकल्पयत् प्रदोषः। अत्रान्तरे चागत्य स्वनियोगमशून्यं कुर्वाणा दूरतो दीपिकाधारिण्यो गन्धतैलावसिक्तसुरभिगन्धोद्गारिणीभिर्दीपिकाभिर्विरचितचक्राबालिका बालिकाः पर्य्यवारयन्। अथ निर्म्मललावण्यलक्षितानि दीपिकाप्रतिबिम्बानि ज्वलितानि मदनसायकशल्यानीवाङ्गलग्नानि समुद्वहन्तीं नवनिरन्तरकलिकाचितां चम्पकलतामिव च स्थितां तां पुनर्व्यजिज्ञपं, देवि प्रसीद नार्हस्यखेदार्हा हृदयखेदकारिणं सन्तापमङ्गीकर्त्तुं, संहर मन्युवेगम्, एषाहमादाय चन्द्रापीड़मागतैवेति। अथानेन देवनामग्रहणगर्भेण मद्वचसा विषापहरणमन्त्रेण विषमूर्च्छितेव झटित्युन्मील्य नयने सस्पृहं मावलोक्य कः प्रदेशेऽस्मिन्निति परिजनमपृच्छत्।

अथ धवलवसनोल्लासितगात्रयष्टयो द्वारप्रदेशप्रवेश-

सम्मोङ्खिताङ्ग्यः परशुरामशरविवरविनिर्गता इव कलहंस- पंक्तय कलहंसकलालापमधुररवैः प्रतिवाचमिव प्रयच्छद्भि- र्नूपुरैः पतत्कर्णपूरपल्लवो[क]ल्लासितैश्चाज्ञाश्रवणाय धावद्भि- रिव श्रवणैर्मौक्तिककुण्डलांशुजालकानि स्कन्धदेशनिक्षि- प्तानि चामराणीव वहन्त्यः समाहतकपोलस्थलैः कुण्डलैर्ब- लादिव वाह्यमाना, वाचालैः कर्णोत्पलमधुकरैः समा- ज्ञापयेति व्याहरन्त्यः कन्यकाः समधावन्। आज्ञा- प्रतीचासु च मुखकमलावलोकिनीषु तासु क्रमेण दृष्टिं पातयन्ती मरकतशिलातले न्यषीदत् अब्रवीच्च। पत्रलेखे! न खलु प्रियमिति ब्रवीमि, त्वामिव पश्यन्ती सन्धारयाम्येव जीवितमहं, तथापि यद्ययं ते ग्रहस्तत्साधय समीहित- मित्यभिधाय अङ्गस्पृष्टनिवसनाभरणाताम्बूलप्रदानप्रदर्शित- प्रसादातिशयां मां व्यसर्जयत्। इत्यावेद्य च किञ्चिदिव नमितमुखी शनैः पुनर्व्यजिज्ञपत्, देव! प्रत्यग्रदेवीप्रसादा- तिशयाहितप्रागल्भ्या दुःखिता च विज्ञापयामि, देवेना- प्येतदवस्थां देवीं दूरीकुर्वता किमिदमापन्नवत्सलायाः स्वप्रकृतेरनुरूपं कृतमिति। चन्द्रापीड़स्तु तथोपालम्भगर्भं विज्ञप्तः पत्रलेखया तच्च कादम्बर्य्याः स्नेहोक्तिपुरःसरं गम्भीरञ्च सतापञ्च सपरिहासञ्च साभ्यर्थनञ्च साभिमानञ्च सावहेलञ्च सप्रसादञ्च सनिर्वेदञ्च सानुरागञ्च सनिर्विशेषञ्च

[क] कर्णपूरोल्लासितैरिति वा पाठः।

सावष्टम्भञ्च सकोपञ्च सात्मार्पणञ्च ससद्भावञ्च सोत्प्रासञ्च सोपालम्भञ्च सानुक्रोशञ्च सस्पृहञ्च सावधारणञ्चापि मधुरमपि दुःश्रवं, सरसमपि शोषहेतुं, कोमलमपि कठोरं, नम्रमप्युन्नतं, पेशलमप्यहङ्कृतं ललितमपि प्रौढ़म् आलापमाकर्ण्याकर्ण्य उत्प्रेक्ष्योत्प्रेक्ष्य च स्तिमितपक्ष्मतया दुर्विषहदुःखवाष्पोपप्लुतायताक्षं [क] तन्मुखं स्वभाव धीरप्रकृतिरपि नितरां पर्य्याकुलोऽभवत्।

अथ कादम्बरीशरीरादिवालापपदैरेव सहागत्य युगपद्गृहीतो हृदये मन्युना, कण्ठे जीवितेन, अधरपल्लवे वेपथुना, मुखे श्वसितेन, नासाग्रे स्फुरितेन, चक्षुषि वाष्पेण तुल्यवृत्तिर्भूत्वा कादम्बर्य्याः चरद्वाष्पविक्षेपपर्य्याकुलाक्षरमुच्चैः प्रत्युवाच। पत्रलेखे! किं करोमि अनेन दुरात्मना दुःशिक्षितेन ज्ञानाभिमानिना पण्डितम्मन्येन दुर्विदग्धेन दुर्बुद्धिना अलीकधीरेण स्वयंकृतमिथ्याविकल्पशतसहस्रभरितेन अश्रद्दधानेन मूढ़हृदयेन यद्यदेवानेकप्रकारं शृङ्गारनृत्याचार्य्येण भगवता मनोभवेन अन्तर्गतविकारावेदनाय मामुद्दिश्य बाला बलात्कार्य्यते तत्तदेवादृष्टपूर्वत्वाद्धि दिव्यकन्यकानां रूपानुरूपलीलासम्भावनया च तावतो मनोरथस्य आत्मन उपर्य्यसम्भावनया च सर्वं सहजमेव एतदस्या इति विकल्पसंशयदोलाधिरूढ़ं मां ग्राहयतैवमीदृशस्य देव्या दुःखस्य

[क] वाष्पोपहताक्षमिति वा पाठः।

तव चोपालम्भस्य हेतुतां नीतोऽस्मि। मन्ये च ममापि मनोव्यामोहकारी कोऽपि शाप एवायम्, अन्यथा अप्रबुद्धबुद्धेरपि येषु न सन्देह उपपद्यते, तेष्वतिस्फुटेषु मदनचिह्नेषु कथं मे धीर्व्यामुह्येत। तिष्ठन्त्वेव तावदतिसूक्ष्मतया दुर्विभाववृत्तीनि तानि स्मितानि, स्मितावलोकितकथितविहृत[क]लीलालज्जायितानि यान्यन्यथापि सम्भवन्ति। चिरानुभूतात्मकण्ठसंसर्गसुभगं हारमिमम् अकृतपुण्यस्य मे तत्क्षणमेव कण्ठे कारयन्त्या किमिव नावेदितम्। अपि च हिमगृहकवृत्तान्तस्तु तवापि प्रत्यक्ष एव, तत् किमत्र प्रणयकोपाक्षिप्तयाप्यन्यथा व्याहृतं देव्या, सर्वं एवायं विपर्ययाक्षम दोषः तदधुनाप्राणैरप्युपयुज्यमानस्तथा [ख] करोमि यथा नेदृग्गमिकान्तनिष्ठूरहृदयं जानाति मां देवी। इत्येवं वदत्येव चन्द्रापीड़े आविशेव प्रविश्य वेत्रहस्ता प्रतिहारी कृतप्रणामा व्याज्ञापयत् [ग]। युवराज एवं समादिशति देवी विलासवती, कृतजल्पात् परिजनतः श्रुतं मया यथा किल पृष्ठतः स्थिताद्य पत्रलेखाच पुनः परागतेति, न च मे त्वय्यस्याञ्च कश्चिदपि स्नेहस्य विशेषो विलसतीति मयैवेयं संवर्द्धिता अपि च कापि तवापि महती वेला वर्त्ततेऽदृष्टस्य,

---

[क] विहृत इति वा पाठः।

[ख] प्राणैरपि वियुज्यमान इति वा पाठः।

[ग] व्यजिज्ञपदिति वा पाठः।

तदनया सहैवागच्छ मनोरथशतलब्धमतिदुर्लभं त्वन्मुख-कमलावलोकनमिति।

चन्द्रापीड़स्तु तदाकर्ण्य चेतस्यकरोत्, अहो सन्देहदोलारूढ़ं मे जीवितम्, एवमम्बा निमेषमपि मामपश्यन्ती दुःखमास्ते, पत्रलेखामुखेन चैवमाज्ञापितमागमनाय मे निष्कारणवत्सलेन देवीप्रसादेन, आजन्मक्रमाहितो बलवान् जननीस्नेहः, वाञ्छानुकूलं हृदयम्, अमोच्यं तावत् तातचरणशुश्रूषासुखं प्रमाथी मन्मथहतकः, हारिणी गुरुजनलालनदुःसहान्युत्कण्ठितानि, अनुबन्धिनी बान्धवप्रीतिः, कुतूहलिन्यभिनवप्रार्थना, मुखावलोकिनः कुलक्रमागता राजानो, जीवितफलं प्रियतमामुखावलोकनम्, अनुरक्ताः प्रजाः, गरीयान् गन्धर्वराजसुतानुरागः दुस्त्यजा जन्मभूमिः, परिग्राह्या देवी कादम्बरी कालातिपातासहं मनो विप्रकृष्टमन्तरं हेमकूटविन्ध्याचलयोरिति। एवं चिन्तयन्नेव प्रतिहार्य्योपदिश्यमानवर्त्मा पत्रलेखाकरावलम्बी जननीसमीपमगात्। तत्रैव च तमनेकप्रकार जननीलालनसुखाचेतितं दुर्विषह हृदयोत्कण्ठो [क] दिवसमनयत्।

उपनतायाश्चात्मचिन्तायामिव अन्धकारितदशदिशि शर्व्व्याम् अनिवार्य्यविरहवेदनोन्मथ्यमानमानसाकुलेषु कलक-

[क] हृदयोत्कण्ठमिति वा पाठः।

रुणमुच्चैर्व्याहरत्सु चक्रवाकयुगलेषु उत्तेजितस्मरशरसमुत्सर्पमाणेषु चन्द्रमसोऽङ्कोल्लधूलिधूसरालोकेष्वग्रमयूखेषु विजृम्भमाणकुमुदिनीश्वासपरिमल [क] ग्राहिणि मन्दमन्दमावातुमारब्धे प्रदोषानिले च शयनवर्त्ती निमीलितलोचनोऽप्यप्राप्तनिद्राविनोदः हेमकूटागमनखेदान्निपत्यविश्रान्तेनेव पादपल्लवच्छायायां [ख] जङ्घानुसाराधिरोहणालग्नेनेव सुसंहतयोरूर्वोः लिखितेनेव विस्तारिणि नितम्बफलके मग्नेनेव नाभिमुद्रायाम् उल्लसितेनेव रोमराज्याम आरूढ़ेनेव त्रिवलिसोपानहारिणि मध्यभागे कृतपदेनेव उन्नतिविस्तारशालिनि स्तनतटे मुक्तात्मनेव बाह्वोः कृतावलम्बनेनेव हस्तयोः आश्लिष्टेनेव कण्ठे प्रविष्टेनेव कपोलयोः उत्कीर्णेनेवाधरपुटे ग्रथितेनेव नासिकासूत्रे समुन्मीलितेनेव लोचनयोः, स्थितेनेव ललाटशालायाम् अन्वितेनेव चिकुरभारान्धकारे प्लवमानेनेव, सर्वतो दिक्पथप्लाविनि लावण्यपयः[ग]पूरप्लवे मनसा सस्मार स्मरायतनभूतस्य कादम्बरीरूपस्य।

समुत्पन्नात्मीयबुद्धिस्र निर्भरस्नेहार्द्रचेताः ततएव वासरादारभ्य तां प्रति गृहीतरक्षापरिकरइव यतोयतएव मण्डलितकुसुमकार्मुकं मकरध्वजमस्यां प्रहरन्तमालोकितवान्,

---

[क] परिग्राहिनीति च पाठः।

[ख] जङ्घानुरोध इति वा पाठः।

[ग] लावण्य पूरप्लवे इति वा पाठः।

ततस्तत एवात्मानमन्तरेऽर्पितवान्। एवमम्लानमालतीकुसुम-कोमलतनो निर्घृणप्रहरन्न लज्जसे इत्युपालभमानइव दिवसं उत्तरलतारया स्रुतवाष्पार्द्रया दृष्ट्या कुसुमचापं पुनःस्मरशर-प्रहारमूर्च्छितां संज्ञामिव लम्भयितुं ताम् अवयवैरुवाह स्वेद-जललवम्, उत्ससर्ज्ज च दीर्घदीर्घान्निश्वासमारुतान्, तच्चेतना-लम्भमुदितइव च सर्वाङ्गीणं क्षणमपि न मुमोच रोमाञ्चं मन्यते, हृदयवेदना न वेति तद्वार्त्तां प्रष्टुमिव नियुक्तेन मनसा शून्यतामधार्षीत् तत्प्रतिवार्त्ताकर्णनायेव[क]च गृहीतमौनः स-र्वदैवातिष्ठत्, तदाननालोकनान्तरितमिव सर्वमेव नाद्राक्षीत्, चन्द्रविम्बेऽपि चास्य दृष्टिर्नारमत, तदालापपरिपूरितश्रोत्रे-न्द्रिय इव न किञ्चिदपरमन्तः कर्णे कृतवान् वीणाध्वनयोऽप्यस्य बहिरेवासन्, सुभाषितान्यपि न प्रवेशमलभन्त, सुहृद्वाचोऽपि परुषा इवाभवन्, बान्धवजनजल्पितान्यपि नासुखायन्त, भा-वावगमभीत्येव यथापूर्वं न कस्यचिद्दर्शनमदात्, अनवरतमुक्त-ज्वालेन मदनहुतभुजान्तर्दह्यमानोऽपि गुरुजनत्रपया न सद्यः समुद्धृतार्द्रारविन्दशयनमभजत,न सरसविसलताजालानि गात्रे-ष्वकरोत्, न जललवमौक्तिकक्षोदतारकितानि अजरठपद्मिनी-पत्राणि पार्श्वेष्वकारयत्,[ख]न कुसुमपल्लवस्रस्तर[ग]रचनामादि-

[क] इव इति पुस्तकान्तरे नास्ति।

[ख] प्यकरोदिति वा पाठः।

[ग] संस्तर इति च पाठः।

देश, नानवरतधारानिपातोच्छ्वसितशिशिरशीकरावद्धदुर्दिनं ददर्शापि धारागृहं, न मकरन्दसन्ततसम्पातशीतलाभ्यन्तराणि हर्म्योद्यानलताभवनान्यप्यसेवत, न मलयजजललुलितपृष्ठेषु मणिकुट्टिमेष्वप्यलुठदिच्छया न तुहिनकरनिकरसंक्रान्तिहृद्येषु ललना करकलितचन्द्रकान्तमणिदर्पणेष्वप्यसंक्रामयदात्मसन्तापम्। किं वहुना, नाश्यानहरिचन्दनरसचर्चामप्याचरणाददापयत्।

एवमेव केवलं रात्रौ दिवा चाकृतनिर्वृतिना ज्वलतापि अदहनात्मकेन, दहतापि अक्षतस्नेहेन्धनेन, दुःखानुभावनायैव भस्मसादकुर्वता, मदनदहनेनान्तर्वहिश्च क्वाथ्यमानदेहः शोषमगात्, आर्द्रतां पुनःप्रतिक्षणाधीयमानवृद्धिं नात्याक्षीत्। एवञ्च निष्प्रतिक्रियतया दुस्त्यजतया चातिविसंष्ठुलेनायास्यमानोऽपि मदनेनाकारमेव लोकलोचनेभ्योऽरक्षत् न कुसुमशरसायकेभ्यो जीवितम्। तनोरेव तानवमङ्गीचकार न लज्जायाः। शरीरस्थितावेवानादरं कृतवान् न कुलक्रमस्थितौ। प्रजा एवान्वरुध्यन्त न मन्मथोत्कलिकाः। सुखमेवावधीरयामास न धैर्य्यम्। एवञ्चास्य पुरः कादम्बरीरूपगुणावष्टम्भाहितप्राणेन बलवतानुरागेणाकृष्यमाणस्य पश्चाद्गुरुजनप्रतिबन्धदृढतरेण महीयसा स्नेहेन च वार्य्यमाणस्य गभीरप्रकृतेः सरित्पतेरिव चन्द्रमसा सुदूरमुल्लास्यमानस्यापि मर्य्यादावशादात्मानं स्तम्भयतः कथं कथमपि कतिपयेष्वपि सहस्रसंख्यायमानेष्वतिक्रान्तेषु

वासरेषु एकदा इन्द्रायुधकस्कन्धाधिरोहणानन्तरलब्धावस्थानो निर्गत्य वहिर्निर्गच्छंस्तुरङ्ग[क]सङ्गशीतशीकराकारमरुन्ति कलक्वणित-कलहंसचक्रवाकचक्रवालाक्रान्तसरससुकुमारसैकतानि-शिप्रातटान्यनुसरन् नातिदूरमिव चरणाभ्यामेव बभ्राम। भ्राम्यंश्च रुद्रसुतायतने [ख] रयेणागच्छतः सावष्टम्भया गत्या त्वरितखुरसञ्चारान् युज्यमानांश्च विरलीभवतश्च सङ्घट्टमानांश्च विश्लिष्यतश्चोत्सहमानांश्च लम्बमानांश्च परापततश्च विच्छिन्नपंक्तिव्यवस्थानान् स्खलतोऽपि पततोऽप्यवसीदतोऽपि च यथाशक्ति सादिभिरुत्पीड़िताङ्गिःसहतया दूरागमनखेदमतित्वरयाचागमनकार्य्यगौरवमावेदयतो दूरादेवातिवर्त्तमानिव तुरङ्गमानद्राक्षीत्।

दृष्ट्वा चोत्पन्नकुतूहलस्तेषां परिज्ञानायान्यतमं पुरुषं प्राहिणोत्। आजानुप्ररूढप्लेन पयसोत्तीर्य्य शिप्रां तस्मिन्नेव भगवतः कार्त्तिकेयस्यायतने तत्प्रातिवार्त्तं प्रतिपालयन्नतिष्ठत्। तत्रस्थश्च कुतूहलात्तस्मिन्नेव वाजिवृन्दे निहितदृष्टिः पार्श्वस्थितां हस्तेनाकृष्य पत्रलेखामवादीत्। पत्रलेखे! पश्य यएष पुरुषः पुर एवार्ककिरणनिवारणोल्लासितया प्रेङ्खदालोललम्बशिखया मयूरपिच्छमय्या छत्रिकया दुर्विभाव्यवदनोऽश्ववारो ज्ञायते केयूरकोऽयमिति। यावत्तया सहैवं निरूपयत्येव,

---

[क] तरङ्ग इति च पाठः।

[ख] सुतायतनम् इति वा पाठः।

तावत्तस्मात् प्रहितपुरुषादुपलब्धात्मावस्थानं दृष्टिपथ एवावतीर्य्य तुरङ्गमादापतन्तं दूरात् द्रुतागमनधूलीधूसरश्यामीकृतशरीरं परिवर्त्तितमिवेतराकारेण उज्झिताङ्गरागसंस्कारमलिनेन वपुषा विषादशून्येन मुखेनान्तर्दुःखसम्भारपिशुनया च दृष्ट्या दूरत एवापृष्टामपि कष्टां कादम्बरीसमवस्थामनक्षरमावेदयन्तं केयूरकमद्राक्षीत्। दृष्ट्वा च दर्शितप्रीतिरेह्येहीत्याहूय ससम्भ्रमप्रणयप्रणतोपसृतमतिदूरप्रसारिताभ्यां दोर्भ्यां पर्य्यष्वजत तम्। अपसृत्य पुनः कृतनमस्कारे तस्मिन्ननामयप्रश्नवचसा संवर्ध्य सर्व्वानेव, तत्सहायान् पुरस्थितं पुनः पुनः सस्पृहमालोक्य केयूरकमवादीत्, केयूरक! त्वद्दर्शनेनैव भद्रं देव्याः सपरिवारायाः कादम्बर्य्याः, इत्येतदावेदितम्। आगमनकारणमपि विश्रान्तः सुखितः कथयिष्यसीत्युक्ता सम्भ्रान्तागतारोहकढौकितां, करिणीमारुह्य कुतोऽस्य जनस्य सुखितेत्यभिदधानमेव केयूरकं पृष्ठतः कृत्वा [क] पत्रलेखाञ्चारोप्य स्वभवनमयासीत्। तत्र च निषिद्धाशेषराजलोकप्रवेशः प्रविश्य वल्लभोद्यानं सपरिवारेण केयूरकेण सहोत्ताम्यता चेतसा अचेतितमेव, दिवसकरणीयं निर्वर्त्तयास। निर्वर्त्त्य च पत्रलेखाद्वितीयः सुदूरोत्सारितपरिजनः केयूरकमाहूया-

[क] कृत्वा इति क्वचिन्नास्ति।

ब्रवीत्, केयूरक ! कथय देव्याः कादम्बर्य्याः समदलेखायाः महाश्वेतायाश्च सन्देशमित्यभिहितवति चन्द्रापीड़े पुरः सप्रश्रयमुपविश्य केयूरकोऽप्यगादीत्।

देव ! किं विज्ञापयामि, नास्ति मयि सन्देशलवोऽपि देव्याः कादम्बर्य्याः, समदलेखायाः महाश्वेताया वा, यदैव पत्रलेखां, मेघनादाय समर्प्य प्रतिनिवर्त्यमयायं देवस्योज्ज-यिनीगमनवृत्तान्तो निवेदितः तदैवोर्द्धं विलोक्य दीर्घमुष्णञ्च निश्वस्य सनिर्वेदमेवमेतदित्युक्त्वोत्थाय, [क] महाश्वेता पुन-स्तपसे स्वमेवाश्रमपदमाजगाम। देव्यपि, कादम्बरीझटिति हृदये अयोघनेनेवाभिहता ह्यतर्कितापतितशुष्काशनिनेव मूर्ध्नि ताड़िता अन्तःपीड़ाकूणननिमीलितेन चक्षुषा मूर्च्छि-तेव, मुषितेव, परिभूतेव च वञ्चितेव, चोन्मुक्तेव, चान्तःकरणे-नाविदितमहाश्वेतागमनवृत्तान्ता चिरमिव स्थित्वोन्मील्य नयने विलक्षेव लज्जितेव विस्मृतेव विस्मयस्तब्धदृष्टिर्म्महा-श्वेतायाः [ख] कथयेति सासूयमिव मामादिश्य मदलेखायां पुनर्वलितमुखी सविलक्षस्मितं, मदलेखे अस्ति केनचिदपरे-णैतत् कृतं करिष्यते वा, यत् कुमारेण चन्द्रापीड़ेनेति,

[क] दित्युक्त्वा तुष्णीमासीत् देवी इति पाठान्तरम्।

[ख] कथयेति सासूयमिवेत्यारभ्य स्वतिथीकरपर्य्यन्तं पुस्तकान्तरे न दृश्यते।

एवमभिदधती उत्थाय निवारिताशेषपरिजनप्रवेशा शयनीये निपत्योत्तरवाससोऽत्तमाङ्गमवगुण्ठ्य निर्विशेषहृदयवेदनां, मदलेखामप्यनालपन्ती, सकलमेव तं दिवसमस्थात्। परेद्युश्च प्रातरेवोपस्थितं मामेवं दृढ़तरशरीरेषु, ध्रियमाणेष्वेव भवत्सु अहमीदृशीमवस्थामनुभवामीत्युपालभमानेव न मे भवद्भिः पार्श्ववर्त्तिभिः, कार्य्यमिति निर्भर्त्सयन्तीव किं मे पुरस्तिष्ठसीत्यन्तर्मन्युवेगेन, तर्ज्जयन्तीव च वाष्पपूरोद्रेकोत्कम्पपर्य्याकुलया दृष्ट्या चिरमालोकितवती। तथा दृष्टश्च तया दुःखितया देव्या आदिष्टमेव गमनायात्मानं मन्यमानोऽहमनिवेद्यैव देव्यै देवपादमूलमुपागतोऽस्मि। तच्च देवैकशरणजनजीवितपरित्राणाकुलमतेः केयूरकस्य विज्ञापनाकर्णनावधानदानेन प्रसादं कर्त्तुमर्हति देवः।

देव! श्रूयताम् यदैव ते प्रथमागमनेनामोदिना मलयानिलेनेव चलितं समस्तमेव तत् कन्यकालतावनं तदैव सकलभुवनमनोभिरामं भवन्तमालोक्य वसन्तमिव रक्ताशोकतरुलतामिवारूढ़वान् मकरकेतनस्ताम्। इदानीन्तु महान्तमायासमनुभवति त्वदर्थे कादम्बरी। तथाहि दिनकरोदयादारभ्य दिवसकरकान्तोपलानलस्येव निःशब्दस्यापवनेरितस्याधूमस्याभस्मनः प्रज्वलतो मकरध्वजहुतभुजो न परिजनकरकमलकलितकोमलपल्लवलास्यलीलया प्रसरभङ्गः। नानुत्तालतालवृन्तवान्तजलजड़कणिकासा-

रसेकेन निवृत्तिः। न सरसहरिचन्दनपङ्कच्छटाच्छुरणेन च्छेदः। न विदलितमुक्ताफलवालुकापटलोद्धूननेन व्युपरमः। नोत्कीलितदन्तमयकलहंसपंक्ति मुक्ताम्बुधारेण धारागृहेण प्रशमः। यथा यथा चलितजलयन्त्रविगलिताभिरतिशिशिरशीकर [क] निकरतारकिताभिरम्बुधाराभिः आहन्यते तथा तथा वैद्युतानलसहोदर इव स्फुरति मदनपावकः। सुतरां च शिशिरः कुन्दकलिकाकलापमञ्जरीमिव विकासयति स्वेदजललवजालकसन्ततिमुपचारः। चित्रं चेदं मकरकेतुहुतभुजा दह्यमानमप्यग्निशौचमंशुकमिव नितरां निर्मलीभवति लावण्यम्। मन्ये च मृदुस्वभावमपि जलमिव मुक्ताफलतामुपगतं कठिनीभवति उत्कण्ठितं हृदयमबलाजनस्य, यत्तादृशेनातिसन्तापेनापि न विलीयते। बलवती खलु वल्लभजनसङ्गमाशा यत्तथाविधमप्यनुभववेदना विक्लवितप्राणमतिकष्टं प्राण्यते। किं करोमि कथय कथं कथ्यते कथा वृत्त्वा वर्ण्यते कीदृशेनोपायेन प्रदर्श्यते केन प्रकारेणावेद्यते कया युक्त्या प्रकाश्यते कतमया वेदनयोपमीयते बलवती तदुत्कण्ठा। स्वप्नेषु विकल्पितचेतनाः स्फुटं प्राणिनः प्रतिदिनं दृश्यमानोऽपि यन्न पश्यसि तादृ-

[क] कथयेतीत्यारभ्य चलितजलयन्त्रविगलिताभिरतिशिशिरशीकरपर्य्यन्तं पुस्तकान्तरे न दृश्यते ।

शीमवस्थाम्। प्रचण्डदिनकरकिरणसहस्रातपसहानि कमलानि शयनीकृतानि, म्लानिमुपनयन्त्या दिवसकरमूर्त्तिरपि निर्ज्जिता तया निर्जोष्मणा। निष्करुणेन चाकारणवामेन कामेन मथ्यमाना तास्ताश्चेष्टाः करोति तथाहि सा सोढ़मदनवेदने त्वमतिकठिने मनसि निवससीति मृदुनि कुसुमशयने कथमपि सखीजनेन पात्यते। कुसुमशयनगता च सन्तापगलितचरणतलालक्तकलवपाटलितैश्च शय्याकुसुमैः कुसुमशरेण शरतामुपनीतैः सरुधिरैरिव हृदयात्पतितैर्भयमुपजनयति सखीनां, सर्वाङ्गीणमनङ्गशरनिवारणाय कवचमिव भवदनुस्मरणरोमाञ्चमुद्वहति रोमाञ्चिनि कुचयुगले श्वासगलितमंशुकं निदधाना त्वत्पाणिग्रहणतृष्णया कण्टकशयनव्रतलीलामिव दक्षिणं करकमलमनुभावयति [क]। वामन्तु वामकपोलभरजड़ाङ्गुलिमुल्लसल्लोलपद्मरागवलयप्रभांशुरज्यमानं ज्वलितमदनहुताशनविप्लुष्यमाणमिव हस्तकमलं विधुनाति। नलिनीदलव्यजनपवनविक्षिप्यमाणकर्णकुवलयदलं वदनमजस्रस्रवदश्रुभयपलायमानलोललोचनमिव विभर्त्ति। प्रतिक्षणं क्षामतां व्रजन्ती न केवलं मङ्गलवलयं पतनभयेन दोलायमानं हृदयमपि मुहुर्मुहुः पाणिपल्लवेन रुणद्धि। शिशिरवारिक्षोदक्षारिणा लीलाकमलमालिकयेव

[क] मनुभवतीति क्वचित् पाठो दृश्यते।

वपुषि निहितया सखीजनहस्तपरम्परया परिक्लाम्यति। तथा चरणयुगलेन रसनाकलापं नितम्बविस्तारेण मध्यभागं सङ्गमाशया हृदयं हृदयेन भवन्तमुरसा विसिनीपलाशप्रावरणं कण्ठेन जीवितं करकमलेन कपोलपालीं त्वदालापेनाश्रुपातं ललाटफलकेन चन्दनलेखिकामंशेन वेणीमधुना धारयति। त्वद्दिदृक्षया विघटमानं हृदयमभिवाञ्छति। गोत्रस्खलितेनेव जीवितेन लज्जते। प्रियसख्येव मूर्च्छया मनसि मुहुर्मुहुः स्पृश्यते। परिजनेनेव च रणरणकेन परवशा कुसुमशयनादुत्थाप्यते। परिचारिकयेवार्त्या स्रस्ताङ्गी सञ्चार्यते। मुहुः पवनप्रेङ्खोलितमुत्कण्ठाव्यजनपल्लवभङ्गभयकम्पितमिव लतामण्डपमधिवसति। मुहुरुत्कोशकलिकं विसवलयसंरक्षणरचिताञ्जलिपुटमिव स्थलनलिनीवनमधिशेते। मुहुरुद्बन्धनभयादिव निरन्तरकिशलयाच्छादितलतापाशमुद्यानमासेवते। मुहुर्निष्पतदविरतरोदनाताम्रनयनप्रतिबिम्बं स्मरास्त्रत्रासनिमज्जत्कमलमिवोपवनसरोजलमवगाहते। तस्मादुत्थाय तमालवीथीमुपैति। तस्यां शाखावलम्बूर्द्धभुजलतानिहितनिमीलितलोचनवदना चम्पकदलमालीकोद्बद्धदेहा शङ्कामुत्पादयन्ती मुहूर्तं विश्रम्य सङ्गीतकगृहमाविशति। ततो मधुरमुरजरवलयललितलास्यलीलयोद्वेज्यमाना मयूरीव मुक्तवारिधारं धारागृहमभिपतति। ततोपि घनजलधारा शीकरपुलकितकाया

कदम्बकलिकेव कम्पमाना शुद्धान्तकमलिनीतीरमुपसर्पति। तस्माच्च भवनकलहंसरवमसहमाना प्रस्थिता तत्कालावतारितनूपुरयुगला निपुणप्रेच्चामिव च्चामतामभिनन्दति। वलयरचनाच्छायितमृणालकुपितैरिव भवनवापीचक्रवाकमिथुनैः कूजितेन खेद्यते। शय्याविलासमृदितकुसुमसञ्चयामर्षितैरिव प्रमदवनमधुकरकुलैर्विरुतैर्नोद्वेज्यते। [क] निर्भरोत्कर्षगीतनिर्ज्जितस्वरोषितैरिवाङ्गनसहकारपिकवृन्दैः कलकलेनाकुलिक्रियते। मदनपाण्डुगण्डपरिभ्रूतगर्भपत्रकान्तिभिर्विद्धेवोद्यानकेतकीसूचिभिरुद्गतवेदना भवति। एवंप्रायैश्च मदनदुश्चेष्टितायासैः परिणाममुपैति दिवसः।

चन्द्रोदये चास्यास्तिमिरमयीवापैति धृतिः कमलमयमिव दूयते हृदयं कुमुदमय इव विजृम्भते मकरकेतनः चन्द्रकान्तमणिमयमिव प्रचरति नयनयुगलम् उदधिजलमयानीव वर्द्धन्ते श्वसितानि चक्रवाकमया इव विघटन्ते मनोरथाः शीतज्वरातुरेव मणिकुट्टिमोदरसंक्रान्तस्य तुषारकिरणमण्डलस्योपरि वेपथुविलुलिततराङ्गुलिनिकरं करयुगलंप्रसारयन्ती भृशमःसन्तापमनक्षरं कथयति। सीत्कारेषु दशनांशुव्याजेन मन्मथशरनिर्ज्जितहृदयप्रविष्टानिन्दुकिरणानिवोद्गिरति। वेपथुषु व्यजनीकृतजलदलीदलकम्पोप-

---

[क] निर्भरोत्कण्ठेति पाठान्तरम्।

देशमिव गृह्णाति। विजृम्भिकासु कण्ठनालागतजीवितनिर्गममार्गमिवोपदिशति। गोत्र स्खलितविलक्षस्मितेषु हृदयनिपतितमदनशरकुसुमरज इव वमति। वाष्पमोक्षेषु स्थूलाश्रुसन्तानवेणिकावाहिनी विलीयत इव। शशिमणिदर्पणेषु विस्फुरितानेकप्रतिबिम्बनिभेन शतधेव विदलति। कुसुमशयनेषु परिमललालसागतालिमालाकुलिता धुमायत इव। अमलकमलसंस्तरेषु किञ्जल्करजोपुञ्जजर्ज्जरिता ज्वलतीव। स्वेदप्रतीकारेषु विशदकर्पूरक्षोदधूलिधवलिता भस्मीभवतीव न विज्ञायते किंमुग्धतया किं विलासेन किमुन्मादेन सङ्गीतकमृदङ्गध्वनितेषु केकाशङ्कया धारागृहमरकतमणिमयूरमुखानि स्थगयति। दिवसावसानेषु विश्लेषभीता मृणालसूत्रैश्चित्रभित्तिविलिखितानि चक्रवाकमिथुनानि सङ्घट्टयति। चिन्तारतारम्भेषु मणिप्रदीपानवतंसोत्पलैस्ताड़यति। उत्कण्ठालेखेषु सङ्कल्पसमागमाभिज्ञानानि लिखति। दूतीसम्प्रेषणेषु स्वप्नापराधोपालम्भान् सन्दिशति। अपि च तस्याश्चन्दनपरिमलइव दक्षिणानिलेन सह समागच्छति मोहः। चक्राङ्कशापइव निशया सहापतति प्रजागरत्रासः। प्रतिरुतानीव वलभीकपोतकूजितैः सहाविर्भवन्ति दुःखानि। मधुकरइवोपवनकुसुमामोदेन सहोपसर्पति मरणाभिलाषः। तथा च जलकणिकेव पद्मिनीपलाशस्थिता कम्पते। प्रतिच्छायेव स्फटिकोपलसलिल-

मणिदर्पणकुट्टिमतलेषु दृश्यते। नलिनीव शशिकरस्पर्शेन म्लायति। हंसीव सरसमृणालिकाहारव्यतिकरेण जीवति। शरदिव कुमुदकुवलयकमलसम्पर्कमनोहरगन्धवहा सकुसुमवाणा च विजृम्भते। चन्द्रमूर्त्तिरिव कमलप्रकरस्खलितपादपल्लवा सञ्चरन्ती निशां नयति। कुमुदिनीव रजनीकरकिरणकृतप्रजागरा दिवसमलीकनिद्रयातिवाहयति। सुररिपुजलशयनलीलेव मन्दोच्छ्वसितशेषा [क]निमीलितलोचना किमपि चिन्तयति। मलयनिम्नगेव सरसहरिचन्दनकिसलयलाञ्छितेषु शिलातलेष्वभिपतति। कुन्दकलिकेव तुषारसिक्तपल्लववर्त्तिनी वनानिलेनायास्यते। भुजङ्गीवासह्यसन्तापालिङ्गितचन्दनशाखा शिखिशकुन्तकुलकोलाहलेन ताम्यति। हरिणीव केसरिकाननं परिहरति। कुसुमघटितशिलीमुखमनोहरान्मदनचापादिव प्रमदवनात्त्रस्यति। जानकीव पीतरक्तेभ्यो रजनिचरेभ्यइव चम्पकाशोकेभ्यो बिभेति। उषेव स्वप्नसमागमेनापि कृतार्थतामेति। ग्रीष्मनिशालक्ष्मीरिवानुदिनमतिक्षामा भवति। सर्वथा तस्याः कन्दर्पवेदनया अङ्गानि दिवसैर्जीवितसन्धारणवस्तूनि वलयरचनया गृहकमलिनीमृणालानि उपदेशैः सखीवचनानि शय्यापरिकल्पनेनोपवनकुसुमानि अनवरतमोक्षेण मदनायुधानि निःशेषं

[क] गन्धोच्छ्वसितरोषा इति पाठः।

क्षीणानि। किं बहुना सम्प्रति तस्यास्त्वन्नामा सर्वतः सखीजनः त्वत्सम्बद्धानि सर्वरहस्यानि त्वत्समागमोपायान्वेषिणः सर्वे समवायाः त्वद्वार्त्तोपलम्भतत्पराः सर्वप्रश्नाः तद्वृत्तान्तमुखरः परिजनः त्वदालापनिर्म्मिताः सर्वविनोदाः त्वदाकारमयश्चित्रकलाभ्यासः त्वदुपालम्भगर्भाः मागधीमङ्गलगीतयः, त्वद्दर्शनपुनरुक्ताः स्वप्नाः त्वत्परिहासप्राया मदनज्वरदाहविप्रलापाः त्वन्नामग्रहणैकोपायगम्यप्रबोधा मोहमहावेगाः। इत्यावेदयन्तञ्च केयूरकं भवतु सम्प्रति न शक्नोम्यतःपरं श्रोतुमित्यामीलनदत्तसंज्ञेव कादम्बरीव्यथाश्रवणवेदनासम्भवानुकम्पयेव चन्द्रापीड़माक्रमन्ती मूर्च्छान्यवारयत् नतु पुनरवस्थानिवेदनपरिसमाप्तिः।

तथा मूर्च्छानिमीलितश्च तामेवानुध्यायन्निव ससम्भ्रमप्रतिपन्नशरीरेण केयूरकेन सम्भावितताल‍वृन्तया च पत्रलेखया अनुभाव्यार्धसञ्ज्ञया च नित्यया संज्ञां लम्भितश्चन्द्रापीड़ः स्वकृतपीड़ापराधेन भीतमिव लज्जितमिव विलक्षमिव निभृतस्थितं केयूरकम् अन्तर्वाष्पोपरुध्यमानकण्ठः किमपि स्खलिताक्षरं प्रत्युवाच। केयूरक, येन प्रकारेणैवमेकान्तनिष्ठुरहृदयमात्मन्यनुत्पन्नानुरागमेव मां सम्भाव्य देव्या कादम्बर्य्या पुनर्दूरीकृतमदागमनसम्भावनया न त्वमागमनायादिष्टो न सन्दिष्टं वा किञ्चिन्महाश्वेतया समुपाहृतानुबन्धया मदलेखया वा त्वन्मुखेन नोपालब्धोऽस्मि तथा मयि

पत्रलेखया सर्वमाख्यातं तदभिजाततया महानुभावत्वादुदारतया समानशीलतया दक्षिणतया चैकान्तपेशलतया च स्वभावस्यात्मानमात्मना च न कलयति देवी कादम्बरी। चन्द्रमूर्त्तेरालोकेनापि निश्चेतनस्य चन्द्रकान्ताख्यस्य पाषाणखण्डस्यार्द्रभावोपगमनमेवायत्तं न पुनस्तत्कराकर्षणं नितरां पक्षपातिनोऽपि च मधुकरस्याभिगमनमेवाधीनं मकरन्दलाभे तु कलिकाश्रयिणी जृम्भिकैव प्रभवति दिवससन्तापक्लान्तेन च उन्मुखता कुमुदाकरेण करणीया विकाशयति न पुनस्तं ज्योत्स्नाभिरामा रजन्येव निर्भर मन्तःसरसतायां सत्यामपि मधुमासलक्ष्मीपरिग्रहाद्विना पल्लवानुरागदर्शनस्य कृते किं करोतु पादपः। तत्र देव्याः कादम्बर्य्या एवाज्ञा अपराधिनी यया अधरस्पन्दितमात्रप्रतीक्ष्ये पुरःस्थायिनि दासजने निष्करुणतयात्मानमव्यापारयन्त्या सुखपरिपन्थिनी दुःखदानैकनिपुणा परहृदयपीड़ानपेक्षिणी लज्जापेक्षिता न जीवितसन्देहदायिनी देव्याः समवस्था। अथवा देव्याः परिजनस्यापि कोऽयमेवंविधो व्यामोहः यदनिच्छन्त्यपि बलादसौ न व्यापारिता। कीदृशी चरणतलप्रतिबद्धस्य दासजनस्योपरि लज्जा कीदृशं वा गौरवं कोवानुरोधोऽविश्वस्तचित्तता वा, केयमीदृशी यदेवमात्मनः शिरीषपुष्पकोमलस्येयमतिदारुणा पीड़ाङ्गीकृता न हतार्पितो मे मनोरथः। अथवा

क्रमागतमन्तर्धानं वामलोचनानां विशेषतोऽपरित्यक्तनिःशेष-बालभावानाम् अनतिप्रवृद्धमुग्धमनसिशयानां कन्यकानां लज्जा न पारिता नामास्मिन् जने परित्यक्तुं देव्या। मद-लेखा तु द्वितीयं हृदयमस्याः तया किमेवमहार्य्यसंय-मधनैर्मुनिभिरप्यसंरक्षितहृदयापहारेणानिग्राह्यचौरेण शु-चिभिरप्यपरिहार्य्यस्पर्शन[क]चण्डालेन भस्मीकृता पर्य्य-वसानप्राणिसहस्रेणानिर्व्वाप्यश्मशानाग्निना सर्व्वदोषा-श्रयेनाशरीरव्याधिना रूपापहारिणा अकाण्डव्याधेन, मर्म्मभेदिनालीकधनुर्धरेण सद्यःप्राणापहारक्षमेणाकालमृ-त्युना अनिरूपितस्थानास्थानप्रवर्त्तिना परापकारकृता-र्थेन हृदयवासिना परप्रत्ययेन स्वयोनिना कामेन दुरा-त्मना आयास्यमानं देवीशरीरमुपेक्षितम्। किमिति तत्र-स्थस्यैव मे कर्णे नावेदितम्, अधुना श्रुत्वापि दिवसक्रमगम्ये-ऽध्वनि किं करोमि मलयानिलाहतलताकुसुमपातस्याप्य-सह्यं देवीशरीरं वज्रसारकठिनहृदयैरस्मद्विधैरपि दूर्विषहाः स्मरेषवः न ज्ञायते निमेषेणैव किं वाभवतीति। प्रायेण च देव्याप्यनुभवनीयएवायमर्थः। यथाचास्य दुःखैकदान-व्यसनिनो दुर्घटघटनापण्डितस्य यत्किञ्चनकारिणो निष्का-रण कुपितस्य हतविधेः सर्व्वतोविसंष्ठुलं समारम्भं पश्यामि

[क] स्पर्शनावद्धिकार्य्य इत्यधिकः पाठः।

तथा जानामि नैतावता स्थास्यतीति। अन्यथा क्व निष्प्रयोजनाश्वमुखमिथुनानुसरणेनामानुषभूमिगमनं, क्व च तत्र तृषितस्याच्छोददर्शनं, क्व तत्तीरे विश्रान्तस्यामानुषगीतध्वनेराकर्णनं, क्व तज्जिज्ञासागतस्य महाश्वेतावलोकनं, क्व तत्र तरलिकया सह तवाभिगमनेन मन्नमन प्रस्तावः, क्व च महाश्वेतया सह हेमकूटगमनं, क्व तत्र देवीवदनदर्शनं, क्वानुरागोत्पत्तिरस्मिन् जने देव्याः, क्व वा अपरिपूर्णमनोरथस्य मे पितुरलङ्घनीयागमनाज्ञा तत्सुदूरमारोप्य पातिता वयं खल्वनेनाकार्यकारिणास्मत्कर्म्मबलनियोगदक्षेण दग्धवेधसा। तथापि देवीं सम्भावयितुं प्रयतामहे।

इत्यभिदधत्येव चन्द्रापीडे नितरामयमनेनैव कादम्बरीवृत्तान्तेन सन्तापित स्तत्किमपरमहमेनामात्मतेजसा सन्तापयामीत्युत्पन्नदय इव भगवांस्तिग्मदीधितिरुत्तप्तकनकद्रवस्फुलिङ्गपिङ्गलद्युति दिग्विकीर्णं धूर्जटिजटामण्डलानुकारि सञ्जहार करसहस्रम्। अस्तानुसारेण च रवेर्वासरोऽपि यथोच्छ्रिततरुशिखरावलम्बिनो रक्तातपच्छेदानाकर्षन्नपससार। क्रमेणैव सञ्जातकरुणानुबन्धयेव सन्ध्ययाम्बुपरिजलार्द्रपट इव प्रसार्य्यमाणे स्वरागपटले निशागमेनाप्येवमस्य शून्यता विक्लवस्य मा भूद्दर्शनमित्याशेनेव सर्वतोनीलिपरिलम्बमानायामिव भ्राम्यमाणायां तिमिरलेखायां कमलेष्वपि दुःसहत्वाच्छोषकारिणः सन्तापस्य

तल्पकल्पनाभीतेष्विव सङ्कुचत्सु कुमुदेष्वपि शुचिस्वभाव-तयार्द्रार्द्रेषु शयनसम्पादनायेवाहमहमिकयोद्दलत्सु चक्रवाकेष्वपि सहचरीविरहविधुरेषु कादम्बरीसमीपगमनोपदेशदानायेव कलकरुणमुच्चैर्मुहुर्व्याहरत्सु चन्द्रमस्यपि भगवति समस्तभुवनैकातपत्रे सुधारसकलसे पूर्वदिग्बधूवदनचन्दन तिलके गगनतललक्ष्मीलावण्यमहाह्रदे सकललोकाह्लादकारिणि सुधालिप्तैः करैरिव स्प्रष्टुम् उच्छ्वासहेतुना तं ज्योत्स्नाजलेन च सेक्तुम् उदयगिरिशिखरमारूढ़े प्रौढ़े प्रदोषसमये चन्द्रापीड़स्तस्मिन्नेव वल्लभोद्याने चन्द्रातपस्पर्शदर्शितविशदजललवोद्भेदहारिणि चन्द्रमणिशिलातले विमुच्याङ्गानि चरणसंवाहनोपसृतं केयूरकमवादीत्। केयूरक! किं मां कलयसि यावत् वयं परापतामस्तावत् प्राणान् सन्धारयिष्यति देवी कादम्बरी, पारयिष्यति वा तां विनोदयितुं मदलेखा, गमिष्यति वा पुनः तत्समाश्वासनाय महाश्वेता मत्परिचयोद्वेजिता, प्रतिपत्स्यते वा शरीरस्थितये तयोरभ्यर्थनां, द्रक्ष्यामि वा पुनस्तस्याः स्मेरस्तोकोपान्तसालोल तारकमुत्त्रस्तहरिणशावकायतेक्षणं मुखमिति।

स तु व्यज्ञपयत् देव! धैर्य्यं समवलम्ब्य गमनाय यत्नः क्रियतां, तिष्ठतु तावदासन्नवर्त्ती सखीजनः परिजनो वा, तस्याहि त्वदालोकनेच्छैव स्वेच्छया निमेषितुमपि न ददाति समागमाशयैवावष्टब्धं हृदयं श्वसितमेव मुखेऽवहितं

रोमाञ्च एव क्षणमपि शरीरं न मुञ्चति दिवानिशं वाष्प एव लोचनपथस्थायी प्रजागर एव रात्रावपि दत्तदृष्टिः अरतिरेव न एकाकिन्याः क्षाम्यत्यवस्थानं जीवितमेव कण्ठस्थानान्नापसरति। एवं वदन्नमेनमादिदेश विश्रान्तये केयूरकम्, आत्मनापि गमनचिन्तां प्राविशत्। यदि तावदकथयित्वा अनिपत्य चरणयोरनाघ्रातः शिरसि अगृहीताशीः सहसा उच्छृङ्खलित एव तातेनाम्बया वक्तव्यमप्यपक्रम्य गच्छामि ततोगतस्यापि मम कुतः सुखं किं श्रेयः कुतो वा फलावाप्तिः कीदृशी वा हृदयनिर्वृतिः। अथवा तिष्ठतु तावदियमुत्तरकालागामिनी चिन्ता अपक्रम्य गत एव कथमहं यत्तातेन दुस्तारदुःखार्णवोत्तरणमहासेतुबन्धात्, अवन्ध्यवाञ्छितफलदानकल्पद्रुमादहितविक्रान्तियशोनिष्क्रान्तिद्वारार्गलदण्डादशेषभुवनोत्तम्भनस्तम्भात्, स्वभुजादवारोप्य मय्येव राज्यभारः समारोपितः तदनाख्याय पदमपि निर्याते मय्यवश्यम् अपरिमितगजतुरगरथगमनसंक्षोभितधरातलै रालोलकदलिकाकाननाकुलीकृतभास्वद्गभस्तिभि रूर्द्धध्रियमाणधवलातपत्रमण्डलच्छायान्तरितवासरव्यतिकरैः अतिबहलरेणूद्गमाविच्छेदापूरितभुवनकुहरैः पुरःप्रसृतजवनवाजिभि रनुसन्तानलग्नवेतण्डप्रायसाधनैः श्रान्तैरपि बुभुक्षितैरपि अकृतगतिविलम्बैरापयोधिरष्टाभ्योदिग्भ्यो राजभिरवश्यसन्धावितव्यम्। तिष्ठन्तु तावत्

सेवापरा राजानः सुखपरिभुक्ताः प्रजा अपि तातस्नेहात्, परित्यक्तपुत्रदाराः पृष्ठतो लगिष्यन्तीति मे चेतसि। अपि च तातस्यापि कोऽपरोऽस्ति यस्मिन् मदीयं स्नेहं संक्रमय्य मय्यपक्रान्ते यातु किमनेन गतेन वा इत्यविनयकोपितोऽवष्टम्भं कृत्वा स्थास्यति। कस्य वापरस्य मुखमालोकयन्ती सुखायमानहृदया मत्प्रत्यानयनाय कृतार्त्तप्रलापा न तातमेवाकुलीकरोत्यम्बा। ताते च पृष्ठतो लग्ने अष्टादशद्वीपमालिनी मेदिन्येव लग्ना भवति। तदा मया क्व गतं, क्व प्रस्थितं, क्व विश्रान्तं, क्व यातं, क्व भुक्तं, क्वापसृतं, क्वात्मा मया गोपयितव्यः समासादितेन वात्र कथं मया वदनं दर्शयितव्यं पृष्टेन वा किमुत्तरं दातव्यम्। अथापि कथञ्चिद्दैवनियोगान्निःसृतोऽस्मि तथाप्यनायासनीयं तातमेवं महीयस्यायासे तातप्रसादहृष्टःदुखामम्बां वा निजापक्रमणशोकार्णवे पातयामि किं कृतं भवत्यपुण्यवता। अपि च स बहुदिवसप्रवासोपतप्तः स्कन्धावारोऽपि मे अद्यापि न परापतति तेनापरसंविधानादर्द्धपथादेव निवृत्य पुनर्द्धावितव्यम्। अथावेद्य तातस्याम्बायाश्च ताभ्याञ्च विसर्ज्जितः संविधानेनागच्छामि तत्रापि किं कथयामि मम स्नेहदुःखिता गन्धर्वराजपुत्री कादम्बरी मामुद्दिश्य मकरकेतुना आयास्यमाना दुःखं तिष्ठतीति किम्वा बलवान्मे तस्यामनुरागो न तया विनाहं प्राणान् सन्धारयामीति किं तस्या मम च द्वयोरपि

जीवितनिबन्धनहेतुभूतया महाश्वेतया तत्परिणयनाय मे सन्दिष्टमिति किं वा तद्दुःखमपारयन् सोढ़मयं केयूरक स्तन्नकृया मां नेतुमागत इत्यपरोऽपि वा कश्चिद्व्यपदेशो न शक्यत एव पुनर्गमनाय कर्त्तुं सम्प्रत्येव समधिकाहर्षत्रयात्, प्रसाध्य वसुधां प्रत्यागतोऽस्मि अद्यापि साधनमेव न परापतति। अकथयित्वा च गमनकारणं कथमात्मानं मोचयामि, कथं मां मुञ्चतु तातोऽम्बा वा तत् सुहृत्साध्येऽस्मिन्नर्थेऽनर्थः पतितः, किं करोम्येकाकी, वैशम्पायनोऽप्यसन्निहितः पार्श्वे मे, किं करोमि कं पृच्छामि, केन सह निरूपयामि, कोमे समुपदिशतु, कोवापरोमे निश्चयाधानं करोतु, कस्यापरस्य वा विवेकिनी प्रज्ञा, कस्य वान्यस्य श्रुतं श्रोतव्यं वा, कोवापरोवेत्ता वक्तुं, कस्य वापरस्य मय्यसाधारणः स्नेहः, केन वा परेण सह समानदुःखीभवामि, कोवापरोमयि दुःखिते दुःखी सुखिते सुखी वा, कोवापरो रहस्याभेदनस्थानं, कस्यापरस्योपरि कर्त्तव्यभारमवक्षिप्य निर्वृतात्मा तिष्ठामि, कस्य वापरस्य मत्कार्य्ये पर्य्याकुलता, कोवापरोमया कोपितं तातमम्बाञ्च परिबोध्य मां नेतुं समर्थं इति।

एवं चिन्तयत एवास्य सा निशा दुःखदीर्घापि क्षयमगमत्। प्रातरेव च किंवदन्तीं शुश्राव यथा किल दशपुरीं यावत् परागतः स्कन्धावार इति। ताञ्च श्रुत्वा समुच्छ्वसित-

चेताश्चकार चेतस्यहो धन्योऽस्मि अहो विधेर्भगवतोऽनुग्राह्योऽस्मि, यस्य मेऽनुध्यानानन्तरमेव परागतोद्वितीयं हृदयं वैशम्पायन इति। प्रहर्षपरवशश्च प्रविशन्तमालोक्य दूरत एव कृतप्रणामं केयूरकमवादीत्। केयूरक करतलवर्त्तिनीं सिद्धिमधुनावधारय प्राप्तोहि वैशम्पायन इति।

सतु तदाकर्ण्य गगनपरिलम्बकृतया चिन्तयान्तःशून्य एव भद्रकमापतितं महती हृदयनिर्वृतिर्देवस्य जातेत्यभिदधद्देवीपसृत्योपविश्य पार्श्वे वैशम्पायनागमनालापमेवानुबध्य मुहूर्त्तमिव संज्ञोत्सारितसमस्तपरिजनं चन्द्रापीडं व्यज्ञपयत्। देव! सर्वतोविस्फुरन्ती तड़िदिव बलाहकोन्नादम् उपारूढ़श्यामिका मेघलेखेव सलिलागमनम्, उपदर्शित पाण्डुच्छविः प्राचीव चन्द्रोदयं, परिमलग्राहिणी मलयानिलागतिरिव वसन्तमासावतारम्, अभ्युच्छ्रितमकरध्वजा मधुमासलक्ष्मीरिव पल्लवोद्भेदम्, उल्लसितराग पल्लवोन्नतिरिव कुसुमनिर्गमं, विकसितकाशकुसुममञ्जरीव शरदारम्भम्, अवश्यैवेयमावेदयति निःसंशयं देवस्य गमनम्। अवश्यञ्च देवस्य देवीप्राप्त्या भवितव्यं केन कदा वावलोकितो ज्योत्स्नारहितश्चन्द्रमाः कमलाकरोवा मृणालिकया विना उद्यानभागोवा लताशून्यः। अपि च न राजत एव सहकारकुसुममञ्जरीपरिग्रहमन्तरेण सर्वजनोसुभगोऽपि कुसुममासः असम्भावितदानलेखालक्ष्मीकं वा वदनं

यूथाधिपतेः। किन्तु यावद्वैशम्पायनः परापतति यावच्च तेन सह गमनसंविधानं निरूपयति देव स्तावत् अवश्यं कालक्षेपेन भाव्यम्। यादृशी वा कालक्षमा देव्याः शरीरावस्था तादृशी निवेदितैव मया। सर्व्वोपि प्रत्याशया धार्य्यते देव्यास्तु पुनर्द्देवदर्शनेऽद्य यावत् निष्प्रत्याशमेव हृदयं केनाश्वसनेन वर्त्ततां मद्वार्त्तोपालम्भादेतदुत्पत्स्यते चेतसि यथा अस्ति कार्य्यं मे जीवितेन दुःखान्यपि सहन्ती धारयाम्येतदिति। अतोविज्ञापयामि चेतसा त्वग्रतोगत एव देवः शरीरेणाप्यनुपदमुच्चलित एव किमपरं मयावस्थितेन साधनीयं तद्देवागमनोत्सवावेदनाय गमनानुज्ञया प्रसादं क्रियमाणमिच्छति मे प्रणयप्रसाददुर्ललितं हृदयमिदानीमेव।

इति विज्ञापिते केयूरकेण अन्तःपरितोषविकसितया विकचनीलोत्पलपुञ्जमालिकयेव दृष्ट्या दर्शितचन्द्रप्रसादश्चन्द्रापीड़ः प्रत्युवाच। किमुच्यते कस्यापरस्येदृशी देशकालज्ञता कोवापरोऽस्मास्वेव निर्व्याजभक्तिः कस्यापरस्येदृशी अस्मद्दुःखासहिष्णुता [क] अनपेक्षित स्वशरीरशक्तिरुत्साहश्च तत् साधु चिन्तितं गम्यतां देव्याः प्राणसन्धारणाय मदागमनप्रत्ययार्थञ्च पत्रलेखाप्यग्रतस्त्वयैव सह प्रयातु

[क] कस्यापरस्येदृशोऽस्मद्दुःखासहिष्णो इति वा पाठः।

देवीपादमूलं इयमपि प्रसादभूमिरेव देव्याः इमामप्यालोक्य किंयत्यपि धृतिरवश्यमुत्पत्स्यते इति मे चेतस्यपि चास्या अपि देव्यामस्त्येव स्नेहोभक्तिरित्यभिधाय पृष्ठतः समुपविष्टामेव तां पत्रलेखामद्राक्षीत्। सा तु किञ्चिदवनतमुखी निजाज्ञाक्षराणि प्रयच्छतु देव इति व्यज्ञपयत् [क]। क्षतप्रस्थितिनिश्चयायाञ्च तस्यां मेघनादाह्वानाय प्रतीहारीमादिदेश। आदेशानन्तरमेव चागतं दूरतः प्रणतमाज्ञा प्रतीक्षं स्वयमेवाहूय सोपग्रहमादिदेश मेघनादं। मेघनाद यस्यां भूमौ पत्रलेखानयनाय मया त्वं प्रस्थापितः तां भूमिमेव पत्रलेखामादाय केयूरकेण सह अग्रतोगच्छ अहमपि वैशम्पायनमालोक्य अनुपदमेव ते तुरङ्गैः परागत इत्यादिश्य यथाज्ञापयति देव इति क्षतनमस्कृतौ त्वरितगमनसंविधानाय निष्क्रान्ते मेघनादे देव किमतः परं विलम्बेनेत्यभिधाय मेघनादनिर्गमनानन्तरं गमनप्रणामोत्थितं केयूरकं सस्नेहमाहूय सवाष्पया दृष्ट्याः पुनः पुनरालोक्य परिष्वज्य च सपुलकाभ्यां दोर्भ्यां आत्मकर्णादपनीयानेकवर्णरुचिरं सन्देशमिव कर्णाभरणमस्य कर्णे कृत्वा कण्ठागतवाष्पगद्गदिकागृह्यमाणाक्षरमवादीत्। केयूरक त्वया तु मे देवीसन्देशो नानीत एव तत् किं तव हस्ते मदनुरूपं

[क] वक्तुमरोचदिति वा पाठः।

प्रतिसन्दिशाम्यपूर्वं। विज्ञापयितव्या देवी तत्रापि किमलीकलज्जाजालभारोद्वहनेन त्वामायासयामि यात्येव पत्रलेखा देवीपामूलम् इयं विज्ञापयिष्यतीत्यभिदधदेवातर्कितोपनतात्मविरहपीड़ाम् अमङ्गलशङ्कया कृतयत्नामपि वाष्पवेगमपारयन्तीं सन्धारयितुम् उत्फुल्लाबद्धलक्षशून्यदृष्टिसञ्चारणां चरणपाताभिमुखीं पत्रलेखां प्रणयेणाभिमुखीभूत्वा बद्धाञ्जलिरभाषत। पत्रलेखे साञ्जलिबन्धेन शिरसा प्रणम्य मदीयेन विज्ञाप्या देवी कादम्बरी येन सर्व्वाभिलषणीयेन तथा प्रथमदर्शनेनापि वत्सलत्वात् स्वभावस्य दर्शितप्रसादातिशयां देवीं प्रणामेनाप्यसम्भाव्यागच्छतां सर्वखलानां धुरि लिखितेन, प्रज्ञाजड़तया ज्ञानं, मौढ्येन धीरता, तारल्येन स्नेहलता, रौक्ष्येण गौरवं, लघुतया प्रियम्बदता, पारुष्येण मृदुहृदयता, नैष्ठुर्य्येण स्थैर्य्यं, चञ्चलतया धैर्य्यं, भीरुतया दयालुता, निस्त्रिंशत्वेन आर्ज्जवं, मायाजालेन सत्यवादिता, अलीककाकुसम्पादनेन दृढ़भक्तिता, अवज्ञानेन पेशलता, कौटिल्येन लज्जा, धार्ष्ट्येन औदार्य्यं, क्षुद्रतया दाक्षिण्यम्, अमहानुभावतया प्रश्रयोऽभिमानेन कृतज्ञता, कृतघ्नतया शीलं, पौरोभाग्येण सर्वगुणा, एवं दोषैः परिवर्त्तिताः स कथमिवापरं गुणमवलम्ब्य पुनः परिग्रहाय विज्ञापयतु केन वाङ्गीकरोतु देवी किमुपदर्शितालीकात्मर्पणेन न प्रतारितं देव्या हृदयमिति किं

प्रकृतिपेशलं हृदयमपहृत्य नापक्रान्तोऽस्मीति किमियं प्राणसन्देहकारिणी निष्करुणेन शरीरावस्था नोपेक्षितेति किमहमस्याः सन्दिशामि न कारणमित्येतत्, सर्वदोषाश्रयेणाप्यनुवृत्त्या चरणावाराधिताविति वा। तदेवात्मना सर्वगुणविहीनस्यापि मे देवीगुणा एवावलम्बनमियमेव ते स्वभावसरसा दूरस्थमपि मां मदनकृतभुजा दह्यमानं रक्षत्येव सरलता, मुहुर्मुहुराकृषत्येव स्नेहलता, आनयत्येव स्थिरप्रज्ञता, ढौकयत्येव दक्षिणता, अभ्युपपद्यत एव वत्सलता, चरणपतितं न निर्भर्त्सयत्येव मृदुहृदयता, उत्थाप्य सम्भावयत्येव महानुभावता, आलपत्येव प्रियवादिता, [क] ददात्येव हृदयेऽवकाशमप्युदारता। यच्च तथापि गत्वा निर्लज्जहृदयः पुनर्वदनदर्शनदानसाहसमङ्गीकरोमि अत्रापि सत्प्रकृतयो देवीप्रसादा एव कारणम् एतेहि विशदत्वाद्दुदारभावात्, सङ्गतत्वाच्च क्षणपरिचिता अपि समारोपितजीवितप्रत्याशाः न किञ्चिन्नकारयन्ति स्मारयन्ति सेव्यतां देव्याश्चरणपरिचर्य्यायै समुत्साहयन्ति शिक्षयन्ति सेवाचातुर्य्यम् उपदिशन्ति आराधनोपायान् चाटुकारोभवेति असकृदाज्ञापयन्ति एवं स्थीयतामिति स्वयमेवोपदर्शयन्ति [ख] मुखावलो-

---

[क] प्रियवेदिता इति वा पाठः।

[ख] मुखावलोकिनां स्वकालेत्यादि वा पाठः।

कितमकालोपसर्पणकोपमनुनयन्ति [क] परितोषावसरेऽनुगृह्णन्ति गुणानुवादेन लज्जापसृतं हठादाकृष्योपसर्पयन्ति नान्यत्र क्षणमपि ददत्यवस्थातुम्। अपिचैतेऽनुग्राहकत्वादेवापरित्याज्याः गुरुत्वादेव कृतावष्टम्भाः विस्तीर्णत्वादेव अलङ्घनीयाः प्रभूतत्वादेवापरिहार्य्याः तदेभिरहं विनाप्यागमनाज्ञया सुदूरमपक्रान्तोऽपि बलादेवाकृष्य देवीपादमूलमानीये इति। यया चानपेक्षितगमनाज्ञया निर्यन्त्रणत्वाद्गतोऽहमिति विज्ञप्तः सैव वाणी विज्ञापयति यथा च मे न निष्फलमागमनं भवति जगद्वा शून्यं तथा देव्यात्मसन्धारणायात्मनैव यत्नः कार्य्य इति सन्दिश्य पुनराह। पत्रलेखे त्वयापि यान्त्याध्वनि न मद्विरहपीड़ा भावनीया न शरीरसंस्कारेऽनादरः करणीयो नाहारवेलातिक्रमणीया न येन केनचिदज्ञातेन पथा यातव्यं न यत्र तत्रैवानिरूप्यावस्थातव्यम्, उषितव्यं वा न यस्य कस्यचिदपरिज्ञायमानस्यान्तरं दातव्यं सर्वदा शरीरेऽप्रमादिन्या भाव्यं किङ्करोमि त्वत्तोऽपि मे वल्लभतरा देवीप्राणाः येनैवमेकाकिनी तेषां सन्धारणाय विसर्ज्जितासि। अपि च मम जीवितमपि तवैव हस्ते वर्त्तते तदात्मा यत्नेन परिरक्षणीय इत्युक्त्वा सस्नेहं परिष्वज्य केयूरकञ्च पुनस्तदवधानदानाय संविधाय महाश्वेताश्रमं

[क] अनुतपन्ति वा पाठः।

यावत् पुनस्त्वयानयैव सह मन्नयनायागन्तव्यमित्यादिश्य व्यसर्ज्जयत्।

निर्गतायाञ्च केयूरकेन सह पत्रलेखायां किं शीघ्रमिते यास्यन्ति नेत्यन्तरा वा गच्छतां विलम्ब उत्पत्स्यते न वेति कियद्भिर्वा दिवसैः परापतिष्यन्तीत्यनयैव चिन्तया शून्यहृदयः क्षणमिव स्थित्वा, स्कन्धावारवार्त्तास्फुटीकरणाय वार्त्ताहरं विसृज्य, बहुदिवसान्तरितदर्शनस्य वैशम्पायनस्य प्रत्युद्गमनायात्मानं मोचयितुं पितुः पादमूलमगात्। तत्र चोभयतः ससम्भ्रमापसृतप्रतीहारमण्डलवितीर्णविस्तीर्णालोकनमार्गो दूरादेवापसव्यजानुकरतलावलम्बितविमलमणिकुट्टिमोदरसंक्रान्तप्रतिमो द्विगुणायमानायतकुन्तलकलापः पितुः प्रणाममकरोत्।

अथ तारापीड़स्तथा दूरत एव कृतप्रणामं चन्द्रापीड़मालोक्य निर्भरस्नेहगर्भेण सलिलभरमन्थरेण नवजलधरध्वनिगम्भीरेण स्वरेण धीरं एहि एहीत्युक्त्वा ससम्भ्रमप्रधावितमपि सम्भावितशुकनासप्रणाममुपसृज्य पार्श्वे भूमावेव समुपविशन्तमाकृष्य हठात् पादपीठे समुपवेश्यापरिसमाप्तावलोकनस्पृहेण चक्षुषा सुचिरमालोक्यास्योपारूढ़यौवनभराभिरामतराण्यङ्गप्रत्यङ्गानि पाणिना स्पृष्ट्वा दर्शयन् शुकनासमवादीत्, शुकनास ! पश्येयमायुष्मतश्चन्द्रापीड़स्योत्सर्पिणी महानीलमणिप्रभेव कनकशिखरिणो गण्डमण्ड-

लोद्भासिनी, मदलेखेव गन्धद्विपस्य, उपहितकान्तिपरभागा लक्ष्मच्छायेव चन्द्रमसो, विकाशशोभापेक्षिणी मधुकरावलीव कमलाकरस्य, रूपालेख्योन्मीलन कालाञ्जनवर्त्तिका तारुण्यभरजलधरोद्दामश्यामिकोज्ज्वलत्कन्दर्पप्रदीपकज्वलशिखा स्फुरत्प्रतापानलधूमराजी मकरध्वजोपवनतमालवल्ली मनोभवविकारदोषारम्भबालतिमिरोद्गतिरुद्दाहमङ्गलभ्रूसंज्ञा श्मश्रुराजिलेखा समन्तात् समुद्भिन्ना। विवाहमङ्गलयोग्यां दशामारूढोऽयं तद्देव्याविलासवत्या सह संमन्त्राभिजनरूपा निरूप्यतां काचित् जगतीपतिकन्यका। दृष्टं हि दुर्लभदर्शनं वत्सस्य वदनं सम्प्रति वधूमुखकमलदर्शनेनानन्दय मे आत्मानम्, इत्युक्तवति तारापीड़े शुकनासः प्रत्युवाच।

साधु चिन्तितं देवेन अनेन तु सहृदयेन हृदये समारोपिता एव सर्वविद्याः, सम्भाविता एव सर्व्वाः कलाः, स्वीकृता एव सर्व्वाः प्रजाः, गृहीता एव सर्वदिग्वधूनां कराः, स्थापितैव निश्चला कुटुम्बिनीपदे राजलक्ष्मीः, ऊढ़ैव चतुरुदधिमेखलाकलापभूषणा भूः, किमपरमवशिष्यते यदनेन न परिणीयत इत्यभिहितवति शुकनासे लज्जावनम्रवदनश्चन्द्रापीड़श्चकार चेतसि, अहो संवादो येन मे कादम्बरीसमागमोपायचिन्तासमकालमेव ईदृशी तातस्य बुद्धिरुत्पन्ना, तद्यदुच्यते अन्धकारे प्रविष्टस्यालोको, वनगहनप्रविष्टस्यादेश-

कदर्शनं, महार्णवपतितस्य यानपात्राभ्यागमो, म्रियमाणस्यो-
परि अमृतवृष्टिरिति, तदेवापतितं मयि सर्वथा वैशम्पायन-
दर्शनमात्रकान्तरिता वर्त्तते, मे कादम्बरीप्राप्तिरित्येवं
चिन्तयत्येव चन्द्रापीड़े क्षितिपतिरुत्तस्थौ। उत्थाय च तमेव
विनयावनम्रपूर्वकायं समवलम्ब्यांसदेशे सकलमेदिनीभारो-
द्वहनगुरुणा दोर्दण्डेन शनैः शनैः सञ्चरन् शुकनासेनानुगम्य-
मानो विलासवतीभवनमगमत्। गत्वा च ससम्भ्रमकृताभ्यु-
त्थानामिन्दूदयावलोकनविलोलामिव समुद्रवेलां, विलास-
वतीं ऊर्द्ध्वस्थित एवावादीत्। देवि! पश्यैषा त्वमपि च
बधूमुखावलोकन सुखस्य कृते नोत्ताम्यसीत्युपालभमानेव
देवीं वत्सस्य यौवनभारारम्भसूत्रापातरेखा आवयोस्तारुण्य-
दुर्विलसितेच्छाविनिवर्त्तनाज्ञाविजृम्भमाणा श्मश्रुराजिशोभा
विवाहमङ्गलसम्पादनायादिशति। त्वमपरं किमादिश-
सीति प्रष्टव्या तदादिशतु देवी, कथ्यमानेऽपि किमपरमद्या-
पहरसि वदनमन्यतोव्रीड़या पृष्ठा वा कर्त्तव्यं नाज्ञापयसि,
वरमातासि संवृत्ता, जानामि चन्द्रापीड़स्योपर्य्यप्रीतिरेषा
यदेवमेतत्कार्य्येष्वनादरोऽवधोरणा च इत्येवंविधैर्नर्मप्रायै-
रालापैः सुखायमान चेताश्चिरमिव स्थित्वा शरीरस्थिति-
सम्पादनाय निरगात्।

चन्द्रापीड़ोऽपि शुकनासमुखेनैव वैशम्पायनप्रत्युद्गमना-
यात्मानं मोचयित्वा जननीभवन एव निर्वर्त्तितशरीरस्थिति-

वैशम्पायनप्रत्युद्गमनसंविधानविनोदेनैव तं दिवसमनयत्। अवतीर्णायाञ्च तस्यां यामिन्यां सुहृद्दर्शनौत्सुक्येन शयनगतोऽपि जाग्रदेव समधिकमिव यामद्वयं स्थित्वा परिवर्त्तयद्भिरिव स्वकान्त्या नीलिमानमम्बरतलस्य, अपहरद्भिरिव हरिततां तरुगहनानाम्, अधस्तादपि छिद्रयित्वेव प्रविशद्भि,र्निर्वासयद्भिरिव तरुतलच्छायां, दरीगहनकुञ्जोदरेष्वपि निलीनं तिमिरमत्यान्त्येव, प्रविश्योत्पाटयद्भिर्विवरप्रवेशव्याजेन च रसातलमिव प्रवेष्टुमारब्धैरन्यथा पुनर्धवलयद्भिरिव धवलतां सौधानाम्, उद्धूलयद्भिरिव कर्पूररेणुना दिङ्मुखानि, लिम्पद्भिरिव सान्द्रचन्दनद्रवेण यामिनीम्, उन्नामयद्भिरिव मेदिनीमुपनयद्भिरिव द्यां, संक्षिपद्भिरिव तारकाग्रहनक्षत्रमण्डलानि, विस्तारयद्भिरिव सरित्पुलिनानि, पृथक् पृथक् कमलवनान्युत्पीड्येव धारयद्भिरिव, उद्दलितदलविकासानेकीकुर्वद्भिरिव कुमुदाकरान्, अपि च पर्य्यस्तैरिव शिखरिशिखरेभ्यावर्ज्जितैरिव प्रासादमूर्द्धसु, पिण्डीभूय वहद्भिरिव रथ्यामुखेषु, तरद्भिरिव जलतरङ्गेषु, प्रसारितैरिव सैकतस्थलेषु, हंससार्थैः सहैकीभूतैरिव, संविभक्तैरिव चन्द्राश्रयप्रसुप्तकामिनीकपोललावण्येन, क्षालितैरिव, चन्द्रकान्तच्युतजलधारासहस्रै,स्तथाच गर्भगृहेष्वप्यविहतप्रवेशै,र्दन्तवलभीभ्योऽपि लब्धपरभागै:, पद्मिनीपत्रखण्डेष्वपि अखण्डितधवलिमभि,रारामेष्वपि दिवस बुद्धिमु-

त्यादयद्भिः, परस्परोद्भिन्नक्रमेणोद्गिरद्भिरिव, आवर्ज्जयद्भिरिव, विक्षिपद्भिरिव, विस्तारयद्भिरिव, प्रवर्त्तयद्भिरिव, वर्षद्भिरिव, सर्वतो ज्योत्स्नाप्रवाहं कादम्बरीसमागमत्वरादानाय स्मरसर्व्वास्त्रमोचमिव कुर्वद्भिश्चन्द्रपादैर्द्विगुणीकृतगमनोत्साहो गमनसंज्ञाशङ्खनादायादिदेश ।

अथ गगनतललब्धविस्तारो विजृम्भमाण इव दिक्कुञ्जेष्वावर्त्तमान इवाभ्रंलिहनगरीप्राकारमण्डलाभ्यन्तरेषु, समारोहन्निवोत्तुङ्गगोपुराट्टालकशिखराणि, वलन्निव हर्म्यप्रान्तरालेषु, विकसन्निव चतुष्कचत्वरेषु, प्रसरन्निव राजमार्गेषु, परिभ्रमन्निव भवनसङ्कटेषु, प्रविशन्निव उद्यानगगह्वरेषु, संमूर्च्छन्निव प्रासादकुक्षिषु, तत्क्षणप्रविबोधितानां गृहसरोजिनीसारसानामनुवर्त्त्यमान इव तारतरदीर्घेण रणितेन, विच्छिद्यमान इव मुहुर्मुहुः स्वभावगद्गदेन भवनकलहंसानां कलरवेन, निर्द्धार्य्यमान इव च शीघ्रप्रवेशिना गमनवेलाप्रणामसम्भ्रान्तस्य वाराङ्गनाजनस्य चलचपलनूपुररसनागुणकलकलेन तारदीर्घतरः शङ्खध्वनिरुदतिष्ठत् । अनन्तरञ्च उत्थाप्यमानैश्चोत्थितैश्चाकृष्यमाणैश्चाकृष्टैश्चारोप्यमाणपर्य्याणैश्च पर्य्याणितैश्च नीयमानैश्चानीयमानैश्च विलम्ब्यमानैश्चाच्छिद्यमानैश्चागच्छद्भिश्चागतैश्च पूज्यमानैश्च पूजितैश्च पंक्तिस्थितैश्च, वाह्यमानैश्च, तिष्ठद्भिश्चाप्रतिपालयद्भिश्च निष्पतद्भिश्चापर्य्याप्तराजद्वाराङ्गनैरप्रभूतचत्वरैर्निस्तुच्छितसकलर-

ध्यान्तरतयान्तर्वर्त्तिभिश्च सङ्कटायमाननगरीविस्तारैस्तुरङ्गमसहस्रैस्तत्क्षणं कुन्तवनमयमिवान्तरीक्षं, खुररवमयीव मेदिनी, हेषारवमयानीव श्रोत्रविवराणि, फेनपिण्डस्तवकमयमिव युवराजभवनद्वाराङ्गनं, खलीनवरमध्य इव दशदिशोऽश्वालङ्काररत्नप्रभामया इव भवनशशाङ्करश्मयः। अचिराच्च गृहीतसमायोगोऽङ्गनगतमिन्द्रायुधमारुह्य पुरस्ताच्चलितेनालोकहेतोर्द्वितीयचन्द्रमण्डलेनेव हंसधाम्ना मङ्गलातपत्रेणावेद्यमाननिर्गमो यथादर्शनमितस्ततः समागतैरेव प्रणम्यमानो राजपुत्रसहस्रैः प्रसुप्तपुरजनतयासम्बाधेनापि राजवर्त्मना बहुत्वात्तुरङ्गमबलस्य कृच्छ्रलब्धसञ्चारः कथं कथमपि निर्जगाम नगर्य्याः। निर्गत्य चादूरत एव निर्भरत्वात् ज्योत्स्नापूरस्याच्छतया दुर्विभाव्यपानीयामप्सुपरि कलकूजितानुमीयमानोत्त्रस्तहंससार्थोत्पलव्यतिकरां पुलिनायमानामिव सर्वतो जड़तरतरङ्गानिलस्पर्शमात्रोपलक्ष्यसलिलसन्निधिम् उत्तीर्य्य शिप्राम् अतिप्रभूतत्वादसङ्कटत्वाच्च वर्द्धयतेव गमनोत्साह मतिविस्तीर्णेनापि पुनर्विस्तारितेनेव चन्द्रपादैर्दशपुरगामिना मार्गेण प्रावर्त्तत गन्तुम्।

अथोह्यमानैरिव रयवाहिना सकलदिङ्मुखप्रसृतेन ज्योत्स्नाजलस्रोतसा वैशम्पायनालोकनत्वरितस्य (क) चन्द्रापीड़-

[क] वैशम्पायनमालोकयन् त्वरितस्येति वा पाठः।

मानसस्यैव(क)तुल्यं वहतो जङ्घानिलेनेन्द्रायुधस्य आकृष्यमाणेरिव वाजिभि स्तावत्येवापररात्रवेलया योजनत्रितयमेवालङ्घ्यत्। अथाध्वश्रमापहरणायेव प्रवृत्ते वातुमाह्लादकारिणि निर्भरज्योत्स्नाजलावगाहादार्द्रार्द्रस्पर्शेऽवश्यायशीकराकर्षिणि रयलुलितविविधवनपल्लवानिलवीजिते विनिद्रकुमुदिनीपरिमिलनलग्नपरिमले परिमलाहितजड़िम्नि रजनीविरामपिशुने मातरिश्वनि क्रमेण चापरदिग्बधूवदनचुम्बिनि तदाकल्यकेनेव दुर्विषहशर्वरीविरहचिन्तयेवासन्नदिनकरोदयविषादेनेवाप्रदोषादुत्तानितमुखैः कुमुदराशिभिरापीयमानस्य धाम्नः परिक्षयेणेव सर्वाम्बरसरःपयःपायिपयोदविभ्रमाम्बरजःसङ्गातेनेव पाण्डुतामुपगतवति चन्द्रविम्बे प्रत्यग्रगगनलक्ष्मीवियोगसन्तापोज्झिते धवलोत्तरीयांशुक इव शशाङ्कलग्ने गलति चन्द्रिकालोके अपरजलधिपातिना ज्योत्स्नाजलप्रवाहेणेव सहसा फेनवुद्वुदावलीष्विव न स्पृशन्तीषु तारकापङ्क्तिषु गलदवश्यायसलिलक्षालनादिव शनैः शनैः शीलितमुक्तागौरं ज्योत्स्नानुभावमुत्सृजन्तीष्वाशासु पुनर्विभाव्यमानसहज श्यामकान्तिषु सलिलादिवोन्मज्जत्सु तरुलताविटपेषु समुल्लसति पूर्वदिग्वधूकर्णपूररक्ताशोकपल्लवे अम्बरसरस्तामरसे दिवससुखकरिकुम्भसिन्दूररेणौ

[क] मनसःस्पर्द्धयेव इति वा पाठः।

तरणिरथरक्तध्वजांशुके सन्ध्यारागे सन्ध्यातपपरिगतेष्वालग्न-दावानलेष्विव वयःसङ्घातैर्जनितारावमुत्सृज्यमानेषु निवास-पादपेषु सशेषनिद्रालसैश्चिरप्रसारणाविशदजङ्घाङ्घ्रिभिर्हठा-दाकृष्टदीर्घपदसञ्चारिभिर्मृगकदम्बकैरुन्मुच्यमानासु ऊषरश-य्यासु इच्छावखण्डितोत्खातपल्वलोपान्तप्ररूढमुस्ताग्रन्थिष्व-रण्यगह्वराभिमुखेषु वराहयूथेषु निशावसानप्रचारनिर्गतैर्गो-धनैरितस्ततोधवलायमानासु ग्रामसीमान्तारण्यस्थलीसु आ-लोक्यमानजनपदविनिर्गमेषु प्रसूयमानेष्विव ग्रामेषु यथार्क-किरणावलोकोद्गमं चोन्नम्यमान इव पूर्वदिग्भागे समुत्सार्य्य-मानास्विवाशासु अपसार्य्यमाणेष्विवारण्येषु विस्तार्य्यमाणा-स्विव ग्रामसीमासु उत्तानीभवत्स्विव सलिलाशयेषु अवच्छि-द्यमानेष्विव (क) शिखरिषु उद्ध्रियमाणायामिव मेदिन्यामट्ट-श्यतामिवोपयान्तीषु कुमुदिनीषु तिरोधानकारिणीं नील-तिरस्करिणीमिव करैरुत्सार्य्य तिमिरमालां विरहविधुरां कमलिनीमिवालोकयितुमुदयगिरिशिखरमारूढे भगवति समस्तलोकचक्षुषि सप्तवाहेविहायस्तलमुद्भास्य दिगन्तराण्यु-द्भासयन्तीषु सकलजगद्दीपिकासु दिवसकरदीधितिषु दृष्टिप्रसरक्षमायां वेलायां सहसैवाग्रतोऽर्द्धगव्यूतिमात्र इव रात्रिप्रयाणकायातम् अन्तःक्षोभभीतेन रसातलेनेवोद्गीर्य्यमा-

---

[क] अवच्छिद्येति वा क्वचित्पाठः।

णम् असोढ़सङ्घातभरया मेदिन्येव विक्षिप्यमाणं पर्य्याप्त प्रमाणाभिर्दिग्भिरिव सम्भ्रियमाणम् अपरिमाणरजोनिरोधाशङ्कितेन गीर्वाणवर्त्मनेवावकीर्य्यमाणम् अर्ककिरणालोकेनेव सह विस्तीर्णमायासितायततरदृष्टिभिरपि (क) अदृष्टपर्य्यन्तमनुजीविभूभृच्छतसहस्र कलितावष्टम्भं सञ्चारिणं द्वितीयमिव मेदिनीसन्निवेशं जलवाहिनीप्रवेशगम्भीरं प्राणिमयमपरमपारमष्टममिव महासमुद्र मुद्रिक्तरजः सन्ततिपूरतया चापरिस्फुटविभाव्यसर्वहृत्तान्तमपीतस्ततीवलितधवल कदलिकोद्भासितानेककरिघटासहस्रसङ्कुलमविरलबलबलाकावलीविभ्राजिताम्भोदसङ्घातं मूर्त्तिमन्तमिव मेघसमयारम्भमावासभूमिग्रहणसम्भ्रमाभिधाविताासंख्यकरितुरगनरपरस्परोर्म्मिसम्बाधतया अमन्दमन्दरास्फालनलुलितकल्लोलजालाकुलस्य महाजलधेर्लीलया निविशमानं स्कन्धावारमद्राक्षीत्।

दृष्ट्वा चाकरोच्चेतस्यहो भद्रकं भवति यद्यचिन्तितागमन एव प्रविश्य वैशम्पायनं पश्यामीत्येवं चिन्तयित्वा छत्रचामरादिभिः स्वचिह्नैः सह निवारिताशेषराजपुत्रलोको जवविशेषग्राहिभिस्त्रिचतुरैस्तुरङ्गैरनुगम्यमानो मूर्द्धानमावृत्योत्तरीयेण रयविशेष ग्राहिणेन्द्रायुधेन नानाव्यापार-

[क] अदृष्टपर्य्यन्तमनिर्जीव इत्यादि वा क्वचित् पाठः।

व्यग्रसकललोकमचिन्तित एव स्कन्धावारमाससाद। प्रविश्य च प्रत्यावासकं वहन्नेव कस्मिन् प्रदेशे वैशम्पायनावास इति पप्रच्छ। ततस्तत्सन्निहिताभिः स्त्रीभिरितरत्वादप्रत्यभिज्ञाय यथारब्धकर्म्मव्यग्राभिरेवोद्बाष्पशून्यवदनाभिर्भद्र किं पृच्छसि कुतोऽत्र वैशम्पायनावास इत्यावेद्यमाने श्राः पापाः किमेवमसम्बद्धं प्रलपथेति शून्यहृदय एव ताः प्रतारयन्नन्तर्भिन्नहृदयत्वान्नापराः पृच्छन्नेवोत्त्रस्त इव हरिणशावको यूथपरिभ्रंशविलोल इव करिकलभको धेनुविरहादुत्कर्ण इव तर्णको न किञ्चित् पश्यन्, न किञ्चित् वदन्, न किञ्चिदालपन्, न किञ्चिदाकर्णयन्, न किञ्चिन्निरूपयन्, न क्वचित्तिष्ठन्, न कञ्चिदाक्रयन्, क्वागतोऽस्मि, किमर्थमागतोऽस्मि, क्व चलितोऽस्मि, क्व गच्छामि, किं पश्यामि, किमारब्धं मया, का दिग्गन्तव्या मया, किं वा करोमीति सर्वमेवाचिन्तयमानोऽन्ध इव, बधिर इव, मूक इव, जड़ इवा विष्ट इव, कटकमध्यदेशं यावत्तादृशेनैव वेगेनावहत्।

अथेन्द्रायुधप्रत्यभिज्ञानाद्वार्त्तयैवानुप्रधावितराजपुत्रलोकदर्शनाच्च देवश्चन्द्रापीड़ इति समन्तात्, ससम्भ्रमप्रधावितानामचेतितोत्तरीयस्खलनानां उद्बाष्पशून्यदृष्टीनां दूरादेव लज्जया प्रणामक्रियया च सममेवापनमतां राजन्यसहस्राणां मुखान्यवलोक्य क्व वैशम्पायन इत्यपृच्छत् ततः सर्वे सममेव विचार्य्य अस्मिंस्तरुतले अवतरतु ताय् वः

ततोयथावस्थितं विज्ञापयाम इति न्यवेदयन्। चन्द्रापीड़स्य तेन तेषां स्फुटाख्यानादपि कष्टतरेण वचसान्तःशल्यगर्भं स्फुटितमिव हृदयमासीत्, केवलं तत्कालप्रणयिनी मूर्च्छा साधारणमकरोत्। तुरगादवतारितश्च कथोपविष्टश्च पितुः समवयोभिरनतिक्रमणीयैः मूर्द्धाभिषिक्तपार्थिवैर्धृतमात्मानं तदानीं न चेतितवान्, उपलब्धसंज्ञोऽपि च वैशम्पायनदर्शनादात्मनश्च दर्शनात्, किमेतत्, क्वाहं वर्त्ते, किं वा मयैतच्चरितमिति, भ्रमारूढ़ इव, मुह्यद्भिरिन्द्रियैः सर्वमेवानुत्प्रेक्ष्यमाणः केवलस्कन्धावारागमनेनैव तस्याभावादन्यदसम्भावयन् दुर्विषहपीड़ाभिहतेन चेतसा किमारटामि, किं हृदयमवष्टभ्य तूष्णीमासे, किमात्मानमाहत्य हठात् प्राणैर्वियोजयामि, किमेकाकी काञ्चिद्दिशं गृहीत्वा, प्रव्रजामि इति कर्त्तव्यतामेव नाध्यगच्छत्। अन्तर्द्रवन्निव दह्यमान इव, स्फुटन्निव सहस्रधा दुःखेन, चकार चेतस्यहो मे रम्योऽप्यरमणीयः संवृत्तो जीवलोकः, वसत्यपि शून्यीभूता पृथिवी, सचक्षुषोऽप्यन्धाः ककुभोजाताः, सुनिष्पन्नमपि हतं जन्म, सुरक्षितमपि मुषितं जीवितफलं, कं पश्यामि, कमालपामि, कस्मै विश्रम्भं कथयामि, केन सह सुखमासे, किमद्यापि मे जीवितेन, कादम्बर्य्यापि वा वैशम्पायनस्य कृते क्व गच्छामि, कं पृच्छामि, कमभ्यर्थये, को मे ददातु पुनस्तादृशं मित्ररत्नं, कथं मया तातस्य शुकनासस्य बाल्मा

वैशम्पायनेन विना दर्शयितव्यः, किमभिधाय च तनयशोक-विक्लवा मनोरमा वा संस्थापयितव्या। किं भूमिः काचिदसिद्धा तां साधयितुं पश्चात् स्थितः उत नरपतिः कश्चिदसङ्घटितस्तत्सङ्घटनाय पश्चात् परिलम्बितः क्वचिद-गृहीतां तां ग्रहीतुं मयोत्सङ्कलित इत्येतानि चान्यानि चान्तरात्मना चिरमधोमुख एव विकल्पय हृदयास्फुटना-द्विलक्षमिवापराधिनमिव महापातकिनमिव आत्मानं मन्य-मानो वदनमदर्शयन् शनैः कृच्छ्रादिव तानप्राक्षीत्।

मय्यागते किं कश्चिदेवंविधोऽन्तरे संग्राम उत्पन्नः, महाव्याधिर्वा कश्चिदाशुकारी असाध्यरूपः समुपजातो, येनैतदतर्कितमेव महावज्रपतनमुपनतमिति। ते त्वेवं पृष्टाः सर्वे सममेव करद्वयपिहितश्रुतयो व्यज्ञापयन्। देव, शान्तं पापं, देवशरीरमिव साग्रं वर्षशतं ध्रियते वैशम्पायन इत्येतदाकर्ण्य तज्जीवितद्रवानन्दवाष्पनिर्भरः सम्भाव्य तान् सर्वानेव कण्ठग्रहेणावादीत्। जीवतो वैशम्पायनस्या-न्यत्र क्षणमप्यवस्थानमसम्भावयता मयैवं पृष्टा भवन्त स्तज्जीवतीत्येतानि तु तावत् कर्णे कृतान्यक्षराणि अधुना किं वृत्तमस्य येनासौ नागत क्व वा स्थितः, केन वा प्रसङ्गेन कथं वा तमेकाकिनमुत्सृज्यायाता भवन्तः, कथं वा भव-द्भिर्बलादपि नानीतोऽसावित्येतदवगन्तुमुत्ताम्यति मे हृदय-मिति। ते चैवं पृष्टा व्यज्ञापयन् देव श्रूयतां यथा वृत्तम्।

पृष्ठतः स्कन्धावारमनुपालयद्भिः शनैः शनैर्वैशम्पायनेन सह भवद्भिरागन्तव्यमित्यादिश्यागतवति देवे; तस्मिंस्तु दिवसे सुगृहीतत्वाद्वासेन्धनादिकस्योपकरणजातस्य न दत्तमेव प्रयाणं स्कन्धावारेण। अन्यस्मिन्नहनि आहतायां प्रयाणभेर्य्यां सज्जीक्रियमाणे साधने प्रातरेवास्मान् वैशम्पायनोऽभ्यधात्। अतिपुण्यं तदच्छोद[क]सरः पुराणे श्रूयते, तदस्मिन् स्नात्वा प्रणम्य वास्यैव तीरभाजि सिद्धायतने भगवन्तं भवाभवप्रभुं महेश्वरं शशाङ्कशकलशेखरं व्रजामो दिव्यजनसेविता केन कदा पुनः स्वप्नेऽपि भूमिरियमालोकितेति अभिधाय चरणाभ्यामेवाच्छोदसरस्तीरमयासीत्। तत्र चातिरम्यतयैव सर्वतो दत्तदृष्टिः सञ्चरन्नमरकामिनीश्रोत्रशिखरारोहण-प्रणयोचितैस्तरङ्गानिलाहतिविलोलवृत्तिभिः किशलयैरविरलकुसुममकरन्दलोभगुञ्जितानाञ्च मत्तमधुलिहां मञ्जुना शिञ्जितरवेण दूरादाह्वयन्तमिव मरकतमणिश्यामया प्रभयानुलिम्पन्तमिव समं दशदिग्भागान् अदत्त दिवसकरकिरणप्रवेशतया दिवाप्यन्तर्निशीथमिव विभ्राणं चिरपरिचितैरपि मेघोद्गमाशङ्कया मुहुर्मुहुरुन्मुक्तमधुरकेकारवैर्वनशिखण्डिभिरुत्कन्धरैरवलोक्यमानं पदमिव जलदकालस्य प्रतिपक्षमिव सर्वसन्तापानां निजा-

---

[क] अच्छोदाख्यमिति वा पाठः।

वासमिव जड़िम्नो निर्गममार्गमिव सुरभिमासस्य आश्रयमिव मकरध्वजस्य उत्कण्ठाविनोदस्थानमिव रतेः आस्पदमिव सर्वरमणीयानामनवरतचलितसुरभिशीतलाच्छोदसरस्तरङ्गमारुताभिवीजिताभ्यन्तरशिलातलमन्यतमं तटलतामण्डपमद्राक्षीत्।

दृष्ट्वा च तमतिचिरान्तरितदर्शनं भ्रातरमिव तनयमिव सुहृदमिव चानन्यदृष्टिर्विस्मृतनिमेषेण चक्षुषा विलोकयन् स्तम्भित इव लिखित इव [क] सुचिरमूर्द्ध एव स्थित्वा अपारयन्निवाङ्गानि धारयितुमाक्रम्यमाण इव मूर्च्छयोन्मुच्यमान इवेन्द्रियैर्झटित्युन्मुक्ताङ्गः समुपविश्य भूमौ किमप्यन्तरात्मना स्मरन्निवानुध्यायन्निव निर्विकारहृदयो गलितलोचनपयोधारासन्तानस्तूष्णीमधोमुखस्तस्थौ। तथावस्थितं तमवलोक्यास्माकमुदपादि चेतसि चिन्ता, येन केनचिदपक्रियन्त एव रसिकहृदयाः परिणामधीरमतयोऽपि, किं पुनः कुतूहलास्पदे प्रथमे वयसि वर्त्तमानाः। तस्मान्नियतमियमस्येमामतिमनोहरां भूमिमालोक्य भावयतो हृदयविकृतिरीदृशी जातेति। न चिराच्च तमेवमवदाम वयं दृष्टा दर्शनीयानामवधिरेषा, तदुत्तिष्ठ सम्प्रति निर्वर्त्तयामः स्नानविधिम्, अतिमहती वेला जाता, सज्जीभूतं साधनं,

---

[क] अत्र तु उत्कीर्ण इवेति अधिकः पाठः।

प्रयाणाभिमुखः सकलः स्कन्धावारस्त्वां प्रतिपालयन्नास्ते, किमद्यापि विलम्बितेनेति। स त्वेवमुक्तोऽप्यस्माभिरश्रुता-स्मदालाप इव जड़ इव मूक इव अशिक्षित इव वक्तुं न किञ्चिदपि प्रत्युत्तरमदात्। तमेव केवलमनिमेषपक्ष्मणा निश्चलस्तब्धतारकेण सन्तताश्रुस्रोतसा लिखितेनेव चक्षुषा लतामण्डपमालोकितवान्।

पुनः पुनश्च अस्माभिरागमनाय अनुबध्यमानस्तङ्कथित-दृष्टिरेवास्मान् परिच्छेदनिष्ठुरमाह स्म। मया तु न यातव्यमस्मात् प्रदेशात्, गच्छन्तु भवन्तः स्कन्धावारमादाय, न युक्तं भवतां चन्द्रापीड़भुजबलपरिरक्षितं गते तस्मिन् महासाधनं गृहीत्वा अस्यां भूमौ क्षणमप्यवस्थानं कर्त्तुम्। इत्युक्तवन्तञ्च तमकस्मान्नाम किञ्चिदस्य दैवादेव वैराग्य-कारणमुत्पन्नमिति आशङ्क्य सानुनयमागमनाय पुनः पुनः प्रतिबोध्य तादृशासंबद्धानुष्ठानेन जातपीड़ाः निष्ठुरमप्य-भिहितवन्तो वयम् एवं न युक्तमस्माकं स्थातुं भवतः पुन-र्देवस्य तारपीड़स्यानन्तरादार्य्यशुकनासाल्लब्धजन्मनो देव्या विलासवत्या अङ्कलालितस्य देवेन चन्द्रापीड़ेन सहैकत्र-संवृद्धस्य तथा विद्यागृहे महता यत्नेनैवं शिक्षितस्य युक्तमिदं यज्ज्येष्ठे भ्रातरि सुहृदि वत्सले भर्त्तरि जगन्नाथे च गुणवति च भवति सर्वमर्पयित्वा गते तत्परित्यागेनात्रावस्थानम्, कस्यापरस्येदृशो युक्तायुक्तपरिच्छेदः, तिष्ठतु तावदस्माकं

तवोपरि स्नेहो भक्तिर्वा, अस्मिंस्तु शून्यारण्ये भवन्तमेकाकिनमुत्सृज्य गताः सन्तो देवेन चन्द्रशीतलप्रकृतिना चन्द्रापीड़ेनैव किं वक्तव्या वयं, किमन्यो देवश्चन्द्रापीड़ोऽन्यो वा भवान्, तदन्मुच्यतामयं सम्मोहो गमनाय धीराधीयतामित्यभिहितोऽस्माभिरीषदिव विलक्षहासेन वदनेनास्मानवादीत्। किमहमेतावदपि न वेद्मि यद्गमनाय मां भवन्तः प्रबोधयन्ति अपि च चन्द्रापीड़ेन विना क्षणमप्यहमन्यत्र न पारयामि स्थातुम्, एषैव मे गरीयसी परिबोधना, तथापि किं करोम्यनेनैव क्षणेन सर्वत्र विगलितं मे प्रभुत्वम्। तथाहि स्मरदिव किमपि मनो नान्यत्र प्रवर्त्तते, पश्यन्तीव किमपि न दृष्टिरन्यतो चलति आसक्तमिव क्वापि हृदयं किमपि न जानाति, निगड़िताविव अन्यत्र पदमपि न दातुं चरणाव्युत्सहेते, कीलितेव चास्मिन्नेव स्थाने तनुस्तदात्मना त्वहमसमर्थो यातुम्। अथ बलाद्भवन्तो मां निनीषवस्तथापि चलितस्यास्मात् प्रदेशादात्मनोजीवितधारणं न सम्भावयामि अत्र पुनस्तिष्ठतो यदेतदन्तर्हृदये किमप्यनवसीयमानं परिवर्त्तते मे येनैव विधृतोऽस्मि तेनैवावश्यं धार्य्यन्ते प्राणा इति चेतसि तदलं निर्बन्धेन, गच्छन्तु भवन्तोऽनुभवन्तु यावज्जीवमादृष्टेश्चन्द्रापीड़मुखदर्शनसुखम्। अल्पपुण्यस्य तु तन्मे प्राप्तमपि करतलादेवमाच्छिद्य देवेन नीतम्, इत्यभिदधानश्च कौतुकात् किमेतत् येनैवं भाषसे, नायासि

देवस्य चन्द्रापीडस्य समीपमित्यस्माभिः पुनः पुनः पृष्टोऽभ्यधात्। लज्जेऽहमेवं वक्तुं, तथापि शपामि वयस्य चन्द्रापीडस्यैव जीवितेन यदि किञ्चिदपि जानामि यत् केन कारणेन न शक्नोमि गन्तुमिति। अपि च भवतामपि प्रत्यक्ष एवायं वृत्तान्तस्तद्व्रजन्तु भवन्त इत्युक्त्वा तूष्णीमभवत्।

मुहूर्त्तादिव चोत्थाय तेषु तेषु रम्यतरेषु तरुतलेषु लतागृहेषु सरस्तीरेषु तस्मिंश्च देवायतने किमपि नष्टमिवान्विष्यन्ननन्यदृष्टिर्बभ्राम। भ्रान्त्वा च चिरमिव खिन्नान्तरात्मा सनिर्वेदमूर्द्ध्वं च निश्वस्यान्यतरस्मिन् लतागहने पुनरुपविश्य तस्थौ। वयमपि कृतवीरुत्सन्निधानास्तत्प्रतिबोधनाप्रत्याशया स्थिता एव गतवति समधिक इव यामद्वये शरीरस्थितिकरणायास्माभिरभ्यर्थितः प्रत्युवाच। वयस्यचन्द्रापीडस्य खल्वमी स्वजीवितादपि वल्लभतराः प्राणाः, तद्यदि बलादपि परित्यज्य मां गच्छन्ति, तथाप्येषां सन्धारणे मया प्रयत्नः कार्य्यः, किं पुनरगच्छतामेव चन्द्रापीडदर्शनेनैव चाहमर्थी न मृत्युना, तदभ्यर्थनैवात्र निष्फलेत्यभिधायोत्थाय स्नात्वा कन्दमूलफलैर्वनवासोचितां शरीरस्थितिमकरोत्, निर्वर्त्तितशरीरस्थितौ तस्मिन् वयमपि कृतवन्तः। अनेन चैव क्रमेण विस्मितान्तरात्मनो रात्रौ च दिवा च किमेतदिति तं वृत्तान्तमेवानुभावयन्तो दिनत्रयं स्थित्वा निष्प्रत्याशास्तदागमनानयनयोः सुहृत-

बलसंविधानं तत्परिकरं तत्र स्थापयित्वा चागता वयम्। यच्चाग्रतो न प्रेषितः संवादस्तदेकं तावदन्तरागच्छतो देवस्यासौ न परापतत्येव अपरमपि चिरात् प्रविष्टकायमानस्यैव देवस्य मा पुनरागमनक्लेशोऽभूदिति।

चन्द्रापीड़स्य तु तं स्वप्नेऽप्यनुत्प्रेक्षणीयं वैशम्पायनवृत्तान्तमाकर्ण्य युगपदुद्वेगविस्मयाभ्यामाक्रान्तहृदयस्योदपादि चेतसि किं पुनरीदृशस्य सर्वपरित्यागकारिणो वनवासैकशरणस्य वैराग्यस्य कारणं भवेत्? स्वोयच्च न पश्यामि किञ्चित् स्खलितं, तातप्रसादात्तु मामिव तमपि चरणतललुठितचूड़ामणयोऽर्चयन्त्येव राजानो, ममेव तस्यापि वाञ्छाधिकेषु सर्वोपभोगेषु न किञ्चिदपि हीयते, ममेव तस्याप्याज्ञा न विहन्यत एव, अहमपि सोऽपि प्रसादान् करोत्येव, मत्त इव तस्मादपि बिभेत्येवापराधिजनो, मयीव तस्मिन्नपि सर्वाः सम्पदः, तमप्यालोक्य मामिवोत्पद्यते स्पृहा लोकस्य। अथागच्छंस्तातेनाम्बया चार्य्यशुकनासेन मनोरमया च तनयस्नेहोचितेन सौहार्द्देन न सम्भावितः विनयाधिक्येच्छुना तातेन शुकनासेन वा किञ्चित् पीड़ाकरमभिहितं, ताड़ितो वा तत्रापि नैवासावेव वञ्चन[क]पिशुनस्वभावो वा गुरुजनाभक्तो वा गुणोपादानविमुखो वा तरलचित्तो वा यत्कि-

---

[क] मम स्नेहस्य इति वा पाठः।

ष्वनकारी यः कश्चिदिव क्षुद्रप्रकृतिराद्यपुत्रतागर्वितो दुःशिक्षितो दुर्विनीतो वा पुत्रैकतादुर्ललितो वा यो जन्मनः प्रभृति सर्वप्रकारोपकारिणो गुरुजनस्योपरि खेदमेवं कुर्य्यादनुबन्धात् विरमेत् वा। प्रथमस्यापीष्टशस्य नैष कालः अद्याप्यसौ विद्वज्जनोचिते गार्हस्थ्य एव न निवेशितो देवपितृमनुष्याणामानृण्यमेव नोपगतोऽगत्वा चानृण्यमृणत्रयेण बद्धः क्व गतः। न तेन पुत्रपौत्रसन्तत्या वंशः प्रतिष्ठां नीतो नानन्तदक्षिणैर्महाक्रतुभिरिष्टं न सत्रकूपप्रासादतड़ागारामादिभिः आपूर्त्तैः कीर्त्तनैरलङ्कृता मेदिनी, नाकल्पस्थायि दिशोयायि यशो विप्रकीर्णं, न गुरवोऽनुवृत्त्या सुखं स्थापिताः, न स्निग्धबन्धूनामुपकृतं, न प्रणयिनो विशेषविभवतां नीताः, न साधवः परिवर्द्धिताः नानुजीविनः संविभक्ताः, नाभ्यागताः कृता निस्तृषः, न दृष्टाः श्रुता वा अङ्गनाः, न ज्ञातेन जीवलोकसुखान्यनुभूतानि, न तेन पुरुषार्थसाधनानां धर्म्मार्थकाममोक्षाणामेकोऽपि हि प्राप्तः। किमेतत्तेन कृतमित्याक्षिप्तचेताश्चिन्तयं[क]स्तस्मिन्नेव तरुतले स्थित्वा शून्यहृदयोऽपि यथाक्रियमाणप्रसादसन्मानसम्भावनासम्भावितं विसर्ज्य सकलमेव राजकमुत्थाय तत्क्षणकृतसमुत्तम्भिततुङ्गतरतोरणाबद्धचन्दनमालमुभयपार्श्वस्थापितो-

---

[क] चिरमिव तस्मिन्निति वा पाठः।

त्पल्लवमुखपूर्णहेमकलशं द्वारात् प्रभृति सिक्तसम्मृष्टभूमिभागमन्तर्वहिश्च प्रकीर्णसुरभिकुसुमप्रकरमितस्ततः सञ्चरता कर्म्मान्तिकलोकेन गृहीतविविधभृङ्गारं मणिचामरतालवृन्तरत्नपादुकाद्युपकरणपाणिभिर्वारवनिताभिश्चाकीर्णं वितानतलवर्त्तिना मदामोदाधिवासितदिङ्मण्डलेन राजहस्तिना गन्धमादनेन सनाथीकृतैकपार्श्वम् अपरपार्श्वेऽपि कल्पितेन्द्रायुधावस्थानम् उपवाह्यकरेणुकाक्रान्तवाह्याङ्गनम् अशेषद्वारावस्थितबहुवेत्रिलोकं महत्त्वाद्गम्भीरतयानेकसत्वशरणतया च महाजलनिधिमनुकुर्वाणं तथाहि सवेलावनमिव यामिकस्थितानेककरिघटापरिकरेणान्तःप्रविष्टमहाशैलमिव गन्धमादनेन सकल्लोलमिव सञ्चरदभ्रान्तकर्म्मान्तिकलोकोर्म्मिपरम्पराभिः सावर्त्तमिव प्राहरिकजनमण्डलावस्थानैः सलक्ष्मीकमिव वराङ्गनाभिः सरत्नमिव महापुरुषैः सहंसमालमिव सितपताकाभिः सफेनपटलमिव कुसुमप्रकरैः हरिमिवानन्तभोगपरिकरं कायमानमविशत्।

प्रविश्य चागृहीतप्रतिकर्म्मतया मलिनवेषाभिरुद्विग्नदीनमुखीभिरितस्ततोवराङ्गनाभिर्यामिकलोकेन कर्म्मान्तिकैश्च प्रणम्यमान स्तूष्णीमिवालोककारकेणेव मदामोदेनावेदिते निस्पृष्टशून्यदृष्टिर्गन्धमादने शनैःशनैर्वासभवनमयासीत्। तत्र चापनीतसमायोगो विमुच्याङ्गानि शयनीये तनुतालवृन्तानिलेन वीज्यमानोऽङ्गसम्बाहकारिभिः

शनैःशनैरपनीयमानागमनखेदः सकलरजनीप्रजागरखिन्नोपि चाप्राप्तनिद्रासुखो दुःखासिकया पुनरपि दुःखान्तरहेतुं चिन्तामेवाविशत्। यदि तावदप्रतिमुक्तस्तातेनाम्बया वा महति शोकार्णवे निःक्षिप्य तौ तनयविरहशोकविक्लवं तातं शुकनासमम्बाञ्च मनोरमामनाश्वास्यास्मादेव प्रदेशाद्गच्छामि तदा मयापि वैशम्पायनस्यानुकृतं भवति, निवृत्य पुनर्गमने चामुक्तिपक्षमाशङ्कते मे हृदयं, तत् किं करोमि ? अथवा अस्थानप्रति[क]मुक्तिशङ्का मे प्रियसुहृदा आत्मानं माञ्च परित्यजताप्यपरेण प्रकारेण गमनमप्युत्पादयता कादम्बरीसमीपगमनोपायचिन्तापर्य्याकुलमतेरुपकृतमिव। तदधुना वैशम्पायनप्रत्यानयनाय यान्तं न तातो नाम्बापि नार्य्यशुकनासोऽपि निवारयितुं शक्नोति माम्। गतश्च वैशम्पायनसहितः तेनैव पार्श्वेनाश्यतो गमिष्यामि।

इति निश्चित्य तत्कालकृतं वैशम्पायनवियोगदुःखं परिणामसुखमौषधमिव बहु मन्यमानो मुहूर्त्तमिव स्थित्वा विश्रान्तसुखितैरङ्गैरापूरिते तृतीयार्द्धयामशङ्खे शरीरस्थितिकरणायोदतिष्ठत्। उत्थाय च यत्रैव मे कादम्बरी तत्रैव वैशम्पायन इति स्वधैर्य्यावष्टम्भेनैव संस्तभ्य हृदयं शून्यान्तरात्मा पुनरेव संवर्ज्जितराजलोकः शरीरस्थिति-

---

[क] एवाप्रमुक्तिरिति वा पाठः।

अकरोत्। कृताहारश्च अन्तर्ज्वलतो मदनानलस्य वैशम्पायनविरहशोकाग्नेश्च वहिरपि सन्तापदानाय साहायकमिव कर्त्तुमुपरिस्थितश्चातिकष्टमष्टाष्वपि दिक्षु युगपत् प्रसारितकरः करोम्ययत्नेनैव सन्तापमित्याकलय्येव गगनतलमध्यमारूढे सवितरि आतपव्याजेन रजतद्रवमिवोत्तप्तमुद्गिरति रश्मिजाले निर्भिद्य विशन्तीष्विव शरीरमातपकणिकासु पुञ्जमानप्राणिसङ्गतासु तलप्रवेशात् सङ्कटायमानासु पादपच्छायासु वहिरालोकयितुञ्चाप्यपारयन्तीषु दृष्टिषु आलोकेषु [क] ज्वलत्स्विव दिङ्मुखेषु दुःस्पर्शासु भूमिषु निःसञ्चारेषु पथिषु सङ्कटप्रपाकुटीरोदरोदपीतिपुञ्जितेष्वध्वन्येषु नाड़ीन्धमश्वासातुरेषु स्वनीड़ावस्थायिषु पतत्रेषु पल्वलान्तर्ज्जलप्रवेशितेषु महिषवृन्देषु अरविन्ददलशकलकिञ्जल्कविच्छुरितमिच्छाविलोड़ितत्रुटितविसकाण्डच्छेददन्तुरं निपानसरःपङ्कमारोहत्सु करियूथेषु रक्ततामरसकान्तिषु ललनाकपलोपान्तेषु दलितमुक्ताक्षोदानुकारिणीषु विराजमानासु घर्मजलकणिकावलीषु स्मर्य्यमाणायाञ्च ज्योत्स्नायां गृह्यमाणेषु तुषारगुणेषु आवाञ्छ्यमाने पयोदकालाभ्यागमे अभ्यर्थ्यमाने दिवसपरिणामे प्रदोषदर्शनाकाङ्क्षिषु हृदयेषु उत्थाय सरस्तीरकल्पितमनवरतापत [ख]

[क] दुरालोकेर्ष्विति वा पाठः।

[ख] स्रुत इति वा पाठः।

जलासारसेकनिवारितोष्णकरकिरणसन्तापमेकसन्तानाव-लीधारावेगवाहिन्या निर्झरिणेव कुल्यया परिच्छिन्नमन्तरालम्बितजलजम्बूप्रवालाहितान्धकारमामुक्तकुसुमपल्लवलतावृताखिलस्तम्भसञ्चयमतनुहरिचन्दनचर्च्चार्द्रं मरकतश्यामपद्मिनीपलाशास्तीर्णसमस्तभूतलमामोदमानसरसस्फुटितारविन्दराशिदत्तप्रकरमाकीर्णसरसविसकाण्डसकाण्डकल्पितप्रावृट्कालमितस्ततो वर्षन्तीभिः शैवलप्रवालमञ्जरीभिर्जलदेवताभिरिव सद्यःस्नानार्द्रचिकुरहस्ताभिरुपगृहीतसुरभिकोमलजलार्द्रिकाभिरनाश्यानचन्दनाङ्गरागहारिणीभिर्हारवलयमात्राभरणाभिरवतंसितबालशैवलप्रवालाभिर्मृणाललतालवृन्तकर्पूरपटवासहरिचन्दनचन्द्रकान्तमणिदर्पणाद्युपकरणपाणिभिरबलाभिर्वाराङ्गनाभिरुपेतं परिभवस्थानमिव निदाघसमयस्य निदानमिव शीतकालस्य, निवेशनमिव वारिवाहानां, तिरस्कारमिव रविकिरणानां, हृदयमिव सरसः, सहोदरमिव हिमगिरेः, प्रकृतिमिव तुषारस्य, स्वरूपमिव जड़िम्नः, आवासमिव विभावरीणां, प्रत्याख्यातमिव दिवसस्य जलमण्डपमथासीत्।

तत्र चातिरम्यतया क्षुभितमकरध्वजोत्कलिकासहस्रविषमं जलासारशिशिरतया सन्धुक्षितसुहृद्वियोगोर्वानलं महासमुद्रमिव गम्भीरं तं दिवसमेकाकी कथमपि स्वधैर्य्ययानपात्रेणालङ्घयत्। लोहितायमानातपे च सायाह्ने निर्गत्य

बकुलगोमयोपलेपहरिते मन्दमन्दमारुताहतोत्तरलायमान-धवलकुसुमप्रकरशोभिनि वासभवनाङ्गने क्षणमिवास्थाने समासन्नपार्थिवैः सह वैशम्पायनालापेनैव स्थित्वा द्वितीय एव यामे चलितव्यं सज्जीकुरुत साधनमिति आदिश्य बलाध्यक्षं चन्द्रोदय एव विसर्जिताशेषराजलोको वासभव-नमध्यवसत्। अथातिचिरात्त्वरितोज्जयिनीदर्शनोत्सुको विनापि प्रयाणनान्द्या सकल एव कटकलोकः सञ्जीभूय प्रा-वर्त्तत गन्तुम्। सद्योऽवतरन्नेव [क]तृतीये यामे तुरगकरिणी-प्रायवाहनेनानतिबहुना राजलोकेन सह विरलकटकसम्म-र्देन वर्त्मना अवहत्। अथाध्वनैव सह क्षीणायां यामवत्यां रसातलादिवोन्मज्जत्सु सर्वभावेषु उन्मीलन्तीष्विव दृष्टिषु पुनरिवान्यथा सृज्यमाने जीवलोके विभज्यमानेषु निम्नोन्न-तेषु विरलायमानेष्विव वनगहनेषु सङ्कुचत्स्विव तरुलतागु-ल्मेषु गगनतलमारोहन्त्याः पदे इव [ख] लाक्षारसालोहिते दिवसश्रियोऽवश्यायसेकान्नवपल्लव इवोद्भिद्यमाने पूर्वाशाल-तायाः कमलिनीरागदायिनि दिवसकरबिम्बे विस्पष्टे प्रभातसमये कटकलोकेनैव सह परापतितवानुज्जयिनीम्।

अथ दूरत एव प्रभृति इन्द्रस्थितैश्च पुञ्जितैश्च पुञ्जमा-नैश्चाबद्धमण्डलैश्चोर्द्ध्वीप्रविष्टैश्चलितैश्च वलितैश्च दत्तकौतु-

[क] आत्मनाप्यलब्धनिद्राविनोदोऽवतरन्नेव इति वा पाठः।

[ख] वकुल इत्यधिकः पाठः।

पथशून्यप्रदेशे निवर्त्तमानैश्चागच्छद्भिश्चोन्मुखैश्चाधोमुखैश्चो-द्वाष्पदृष्टिभिश्च विवर्णदीनवदनैश्च महाकष्टशब्दमुखरैश्च दुःखाधिका[क]हितमौनैश्च मुनिभिरपि मुमुक्षुभिरपि वीत-रागैरपि निःसङ्गैरपि निस्पृहैरपि उदासीनैरपि दुर्ज्जनैरपि स्नेहपरवशैः पितृभिरिव सुहृद्भिरिव स्निग्धबन्धुभिरिव च नगरीनिर्गतैरार्त्त्या पृच्छमानं कथ्यमानञ्च आकर्ण्यमा-नञ्च विचार्य्यमाणञ्चानुभाव्यमानञ्चानुवर्ण्यमानञ्च वैशम्पा-यनवृत्तान्तमेव समन्तात् शुश्राव। शृण्वंश्च चकार चेतसि वाह्यस्य तावज्जनस्येयमीदृशी समवस्था किं पुनर्या-नासावङ्केन लालित संवर्द्धितो वा बालचाटवोऽस्यानुभूताः तदतिकष्टं मे वैशम्पायनेन विना तातस्य शुकनासस्य अम्बाया मनोरमाया वा दर्शनमित्येवं चिन्तयन्नासाग्रनि-हितोद्वाष्पदृष्टिरदृष्टसर्ववृत्तान्त एव विवेशोज्जयिनीम्। अव-तीर्य्य च स राजकुलद्वारि विशन्नेवार्य्यशुकनासभवनं सह देव्या विलासवत्या गतो राजेति शुश्राव। श्रुत्वा च निवृत्य तत्रैव जगाम। गच्छंश्च समीपवर्त्तौ हा वत्स वैशम्पायन! अद्यापि मदङ्कलालनोचितो बाल एवासि कथं त्वमेकाकी व्यालशतसहस्रभीषणे निर्म्मानुषे तस्मिन् शून्यारण्ये स्थितः। केन ते तत्रापि सर्वसत्वव्याघातकारिणी शरीररक्षा कृता।

[क] आधिक्य इति वा पाठः।

केन वा वैषम्यप्रतिपन्थिनी शरीरस्थितिः सम्पादिता। केन निद्रासुखदायि शयनीयमुपकल्पितम्। कस्त्वयि बुभुक्षिते तृषिते सुषुप्सति वा दुःखितः। ममोत्सङ्गमुत्सृज्य समानसुखदुःखा बधूरपि न पुत्रक त्वयोपात्ता आगतमात्रस्यैव ते पितरमभ्यर्थ्य बधूमुखमवलोकयिष्यामीति यन्मया चिन्तितं न केवलं तन्मे मन्दपुण्यायाः न सम्पन्नम् अपरं तवापि वदनदर्शनं दुर्लभीभूतम्। वत्स! यत्र तेऽवस्थातुमभिरुचितं, नयस्व मामपि तत्रैव पितरं विज्ञाप्य, त्वामपश्यन्ती न जीवामि, तात! त्वयाहं शैशवेऽपि नावमानिता, कुतस्तवेयमेकपद एवेदृशी निष्ठुरता जाता, जन्मनः प्रभृति न दृष्टमेव यस्य कुपितमाननं तस्य ते कुतोऽयमेवंविधो मय्यकस्मादेव कोपः, यदेवं परित्यज्य स्थितोऽसि, गतोप्यागच्छ, शिरसा प्रसादयामि त्वां, कोऽपरोऽस्ति मे देशान्तरपरिचयान्मुक्तो नामास्मासु स्नेहः, क्षणमप्यनन्तरितदर्शनस्य [क] चन्द्रापीड़स्योपरि कथं तवेदृशो निःस्नेहता जाता? तात! न भद्रकं ते समापतितं, सर्व एव सुखं स्थापनीयो गुरुजनो दुःखं स्थापितो न जानाम्येवं किं त्वया प्राप्तव्यम्। एतानि चान्यानि चान्तर्भवनगतां प्रत्यग्रतनयविरहशोकविक्लवां

[क] वत्सस्येति अधिकः पाठः।

स्वयं देव्या विलासवत्या संस्थाप्यमानामपि मनोरमां विप्रलपन्तीमश्रौषीत्।

तेन चातिकरुणेन तत्प्रलापविशेषेण विक्लव इव निद्रागमेनेव घूर्णमानो निश्चेतनतामनीयत कथं कथमपि सहजसत्वावष्टम्भेनैव संस्तम्भितात्मा प्रविश्य पितुरपि लज्जमानो वदनमुपदर्शयितुमधोमुख एव निस्पन्दसर्वाङ्गेण मन्दराद्रिणेव शुकनासेन सह मथनावसानस्तिमितमिव महार्णवं प्रणम्य पितरं दूरत एवोपाविशत्। उपविष्टञ्च तं क्षणमिव दृष्ट्वा राजान्तर्वाष्पभरगद्गदध्वनिनाभ्यर्णवर्ष इव जलधरोऽभ्यधात्। वत्स चन्द्रापीड़! जानामि ते स्वजीवितादपि समभ्यधिका भ्रातुरुपरि प्रीतिः। पीड़ा च सुखैकहेतोर्वल्लभजनादेवासम्भाव्या या सम्भवति तथैव हि न किञ्चिन्न क्रियते तज्जन्मनः स्नेहस्य वयसः शीलस्य श्रुतस्य गुरुजनानुशासनस्य विनयाधानस्य च सर्वस्यैवानुचितमिमं भ्रातुः सुहृदश्च ते वृत्तान्तमाकर्ण्य त्वद्दोषमाशङ्कते मे हृदयम्। इत्येवंवादिनो नरपतेर्युगपदाक्षिप्य वचनं शोकामर्षाभ्यामन्धकारिताननः प्रावृड़ारम्भ इव तड़िल्लतादुष्प्रेक्ष्यो विस्फूर्ज्जितेनेव स्फुरिताधरेण शुकनासोऽब्रवीत्।

देव! यदि चन्द्रमस्युष्मा दहने वा शीतलत्वम् अंशुमालिनि वा तमस्तमस्विन्यां वा दिवसो महोदन्वति वा शोषः क्षितेरधारणं वा शेषे परार्थानुद्यमो वा साधोरप्रियवचन-

निर्गमो वा सज्जनमुखात् सम्भाव्यते ततो युवराजेऽपि दोषः। तत् किमेवमेवानिरूप्य तस्यानात्मज्ञस्य मूढ़प्रकृतेर्दुर्जातस्य राजापथ्यकारिणो मातृपितृघातिनो मित्रद्रुहः कृतघ्नस्य कर्मचाण्डालस्य महापातकिनः कृते कृतयुगावतारयोग्यमात्मनोपि गुणवन्तमत्युदारचरितं चन्द्रापीड़मेवं सम्भावयति देवः। नह्यतः परमपरं कष्टतरं किञ्चिदपि पीड़ाकारणं यद्गुणेषु वर्त्तमानो दोषेषु सम्भाव्यत इतरजनेनापि किं पुनर्गुरुजनेन यो गुणी गुणैरेवावबोधनीयः कस्यापरस्यात्मा गुणवाननेन ज्ञापनीयः। अपि च जन्मनः प्रभृति देवस्य विलासवत्यादेव्याश्चाङ्कलालनया यो न गृहीतस्तस्य मरुत इव दुर्ग्रहप्रकृतेश्चन्द्रापीड़ोऽपि किं करोतु। स्वयमेवोत्पद्यन्त एवंविधाः शरीरसम्भवा महाकृमयः सर्वदोषाश्रया महाव्याधयोऽन्तर्विषा महाव्यालाः विनाशहेतवो महोत्पाताः भुजङ्गवृत्तयो महावातिकाः वक्रचारिणो महाग्रहाः तमोमयाः प्रदोषाः मलिनात्मकाः कुलपांशवो निस्नेहाः खलाः निर्लज्जाः क्षपणकाः निःसंज्ञाः पशवः। अपि च अकाष्ठादहनाः निर्गुणाजालिनोऽतीर्था जयाशयाः निर्गौरवाः खरप्रकृतयोऽशिवमूर्त्तयो महाविनायकाधिष्ठिताः। ये सकलङ्काः कृपाणा इव स्नेहेनैव पारुष्यं भजन्ते मलिनस्वभावाः करिकपोला इव दानेनैव मलिनतरतामापद्यन्ते निर्वर्त्तयो मणिप्रदीपा इव प्रसादेनैव ज्वलन्ति अङ्गलग्ना भुजा इव

दाक्षिण्यपरिग्रहेणेवेतरे वामाः सञ्जायन्ते गुणमुक्ताः सायका इव सपक्षाश्रयेण फलेनैव दूरं क्षिप्यन्ते सरागाः पल्लवा इव दिवसारूढ़ैरव अपरज्यन्ते भूतिपरामृष्टादर्पणा इव आभिमुख्येन सर्वं प्रतीपं गृह्णन्ति अन्तरस्वच्छवृत्तयः सलिलाशया इव गाढ़ावगाहनेनैव कालुष्यमुपयान्ति। ये च स्निग्धेष्वपि रूक्षाः ऋजुष्वपि वक्राः साधुष्वप्यसाधवो गुणवत्स्वपि दुष्टप्रकृतयः भर्त्तृष्वप्यभृत्यात्मानो [क]रागिष्वपि क्रुद्धाः निरीहादप्यादित्सवो मित्रेष्वपि द्रोहिणो विश्वस्ताना-मपि घातकाः भीतेष्वपि प्रहारिणः प्रीतिपरेष्वपि द्वेषिणो विनीतेष्वप्युद्धताः दयापरेष्वपि निर्द्दयाः, स्त्रीष्वपि शूराः भृत्येष्वपि क्रूराः दीनेष्वपि दारुणाः। येषाञ्च विपरीतानां गुरव एव लघवो नीचा एवोच्चैः अगम्या एव गम्याः कुदृष्टि-रेव सद्दर्शनम् अकार्य्यमेव कार्य्यम् अन्याय एव न्यायोऽस्थि-तिरेव स्थितिः अनाचार एवाचारोऽयुक्तमेव युक्तम् अविद्यैव विद्या अविनय एव विनयः दौःशील्यमेव सुशीलता अधर्म्म एव धर्म्मोऽनृतमेव सत्यम् [ख]। येषाञ्च क्षुद्राणां प्रज्ञा पराभि-सन्धानाय न ज्ञानाय श्रुतमालजालाय [ग] नोपशमाय परा-

---

[क] वीत इति वा पाठः।

[ख] ऋतमिति वा पाठः।

[ग] मायाजालायेति वा पाठः।

क्रमः प्राणिनामुपघाताय नोपकाराय उत्साहो धनार्ज्जनाय न यशसे स्थैर्य्यं व्यसनासङ्गाय न चिरसङ्गताय धनपरित्यागः कामाय न धर्म्माय किं बहुना सर्वमेव येषां दोषाय न न गुणाय। तदसावपि ईदृश एव कोप्यपुण्य एवानुत्पन्नो यस्यैवं कुर्वतो मित्रमहं चन्द्रापीड़स्य कथं तस्य द्रोहमाचरामीति नोत्पन्नं [क] चेतसि। एवं कृते चलितवृत्तानां शासितावश्यं तारापीड़ो देवः पीड़ितान्तरात्मा मयि कोपं करिष्यतीत्येवमपि नाशङ्कितं मनसा। मातुरहमेवैको जीवितनिबन्धनं कथं मया विना वर्त्तिष्यत इत्येतस्य नृशंसस्य हृदये नापतितम्। पिण्डप्रदो वंशसन्तानार्थमहमुत्पादितः पित्रा कथमहमननुज्ञातस्तेन सर्वपरित्यागं करोमीत्येतदपि यथाजातस्य न बुद्धौ सञ्जातम्। तदेवमसत्पथप्रवृत्तेन नष्टात्मना सुदूरमुद्भ्रान्तेन दुर्द्दर्शमदृष्टं तावन्न नाम कुदृष्टिना दृष्टं दृष्टमपि येन न दृष्टं तस्याज्ञानतिमिरान्धस्य किं क्रियतामपरम् असौ तिर्य्यङ्महता यत्नेन शुक इव पाठितः पुष्टश्च देवेन अथवा विनोददानात्तिरश्चामपि सफल एव शिक्षणायासोभवति तेऽपि पोषिताः पोषितरि स्नेहमाबध्नन्ति तेपि कृतं जानन्ति तेपि परिचयमनुवर्त्तन्ते तेषामपि सहजन्मस्नेहोमातापित्रोरुपरि दृश्यत

[क] इत्येतन्नोत्पन्नमिति वा पाठः।

एवं न पुनरस्य नष्टोभयलोकस्य पापकारिणो दुर्ज्ञातस्य यस्य सर्वमेवाधस्तान्नतम्। अपि चेदृशाचरितेन तेनाप्यवश्य-मेव कस्याञ्चित्तिर्य्यग्योनौ पतितव्यं येन तावत् दुरात्मजा-तेन केवलं दुःखं न स्थापिता सर्व एव वयम् अपि त्वेवं[क]-विधेदुःखार्णवे निपातिताः। सर्व एव ह्यनात्मिमचेताः प्रव-र्त्तमानः स्वहिताय परहिताय वा प्रवर्त्तते तस्य तु पुनरस्मा-नेवं दुःखे स्थापयतो न स्वहितं न परिहितमपि। किमनेनैव मात्मद्रुहा कृतमिति मतिरेव तावन्न बोधपदवीमवतरति सर्वथा दुःखायैवास्माकं तस्य पापकर्म्मणो ग्रहोपसृष्टस्य जन्म इत्युक्त्वा हेमन्तकालोत्पलिनीमिवोद्वाष्पां दृष्टिमुदव-हत्। उद्वेपिताधरश्च वहिरलब्धनिर्गमेण स्फुटन्निवान्तर्म-न्युपूरेण निश्वसन्नेवावतस्थे।

तदवस्थञ्च तं तारापीड़ः प्रत्युवाच। एतत् खलु प्रदीपि-नाग्नेः प्रकाशनं वासरालोकेन भास्वतः समुद्भासनम् अव-श्यायलेशैराह्लादनमम्तांशोर्मेघाम्बुविन्दुभिरापूरणं पयोधेः व्यजनानिलैरभिवर्द्धनं प्रभञ्जनस्य यदस्मद्विधैः परिबोधन मार्य्यस्य। तथापि प्राज्ञस्यापि बहुश्रुतस्यापि विवेकिनोऽपि धीरस्यापि सत्ववतोऽपि अवश्यं दुःखातिपातेन विशुद्धमपि वर्षसलिलेन सर इव मानसं कलुषीक्रियते सर्वस्य। कलुषी-

---

[क] अपरमेवमिति वा पाठः।

कृते च मानसे किमिदमिति सर्वमेव दर्शनं नश्यति न चित्तमालोचयति न बुद्धिर्बुध्यते न विवेकोऽपि विविनक्ति येन ब्रवीम्यन्यदा तु लोकवृत्तमार्य्य एव सुतरां वेत्ति। किमस्ति कश्चिदसावियति जीवलोके यस्य निर्विकारं यौवनमतिक्रान्तं यौवनावतारे हि शैशवेनैव सह गलति गुरुजनस्नेहो वयसैव सहारोहत्यभिनवा प्रीतिः वक्षसैव सह विस्तीर्य्यते वाञ्छा बलेनैव सह उपचीयते मदो दोर्द्वयेनैव सह स्थूलतामापद्यते धीः मध्येनैव सह कार्श्यमुपयाति श्रुतम् ऊरुयुगलेनैव सहापचीयते विनयः [क] श्मश्रुभिरेव सह उज्जृम्भते मलिनताहेतुर्मोहः आकारेणैव सहाविर्भवन्ति हृदयाद्विकाराः। तद्यथा धवलमपि सरागं सर्वथा दीर्घीभवदपि न दीर्घं पश्यति चक्षुः अनुपहतेऽपि न प्रविशति गुरूपदेशः श्रोत्रे स्त्रीरागिण्यपि न विद्यान्तरं विन्दति हृदये स्थैर्य्यमस्थिरप्रकृतौ तरलतायां परित्याज्येषु व्यसनेष्वासङ्गः विकाराणाञ्च कारणानां प्रायः [ख] सरसता साच सर्व्वमेव जलप्रायं कुर्व्वाणा वर्षति वृद्धैरेवोपजायते। अपि च दिवसोदोषागमाय दोषागमोऽनालोकाय अनालोकोऽसद्दर्शनार्थमसद्दर्शनमविवेकाय अविवेकोऽसन्मार्गप्रवृत्तयेऽसन्मा-

[क] हृदयमिति वा पाठः।

[ख] पुस्तकान्तरे कारणानामित्यत्र कारणम् प्रायः इति नास्ति।

गं प्रवृत्तञ्च मोहान्धं चेतोभ्राम्यदवश्यमेव स्खलति स्खलिते च चेतसि तल्लग्ना पतत्येव लज्जा त्रपावरणशून्ये च हृदि प्रविश्य पदं कुर्वन् केन वा निवारितो दुर्निवारः सर्व्वाविनयहेतुर्मकरकेतुः[क] विलसति च कुसुममार्गणे केन कार्य्येण छिद्रसहस्राणि न भवन्ति यैः सत्वमेवाधस्ताद्व्रजति सत्वे चाधोगते किमाश्रित्य न गलति शीलं गलिते च शीले किमवलम्बनं विनयस्य [ख] किं करोत्वनाधारं धैर्य्यं क्व पदमाधत्तां धीः क्व समाधानमाबध्नात्ववष्टम्भः केनावष्टभ्य बलान्निश्चलीकृतं मनो विप्रतिपद्यमानानि केन नियन्त्रितानीन्द्रियाणि जगन्निन्द्यानि केन निवारितानि दुश्चरितानि केन वालोकभूतेन[ग] तमोभिवृद्धिहेतुरुत्सातितो [घ] दोषाभिषङ्गो दृष्टेरुपहन्ता किं वा दृश्यतामसति बहुदर्शित्वे बहुदर्शित्वञ्च तावतः कालस्यैवासम्भवात् कुतो भवतु प्रथमे वयसि येनान्वयव्यतिरेकाभ्यां निश्चित्य वर्ज्यतां मलिनता। अपि च परिणामेऽतिपुण्यवतां केषाञ्चिदेव हि केशैः सह धवलिमानमापद्यन्ते चरितानि तन्मोहविषमविषयविषमहाहो मदविकारगन्धमातङ्गदुर्विल-

---

[क] कुसुमधन्वा इति वा पाठः।

[ख] हृदयस्येति वा पाठः।

[ग] स्यूतेनेति वा पाठः।

[घ] उत्सारित इति वा पाठः।

सितैकराज्ये रतिनिद्राविलासवेश्मनि नवरागपल्लवोद्गमलीलान्तरविशेषदुश्चरितचक्रवर्त्तिनि तारुण्यावतारे सर्वस्यैव विषमतरविषयमार्गपतितस्य स्खलितमापतति किमेवमार्य्येण लालनीयस्य शिशुजनस्योपर्य्यांवेशोगरीयान् गृहीतो यदनुचितमपत्यस्नेहस्याक्रोशगर्भमेव सुक्तं स्वप्नायमानानामपि यद्गुरूणां मुखेभ्यो निष्क्रामति शुभमशुभं [क] वा तदवश्यं फलति गुरवो हि दैवतं बालानां यथैवाशिषो गुरुजनवितीर्णा वरतामापद्यन्ते तथैवाक्रोशाः शापताम्। तद्वैशम्पायनमुद्दिश्य कोपावेशादेव मतिपरुषमभिदधत्यार्य्ये [ख] महती मे चेतसः पीड़ा समुत्पन्ना स्वयं रोपितेषु तरुषु तावदुत्पद्यते स्नेहः, किं पुनरङ्गसम्भवेष्वपत्येषु। तदुत्सृज्यतामयममर्षावेगो वैशम्पायनस्योपरि विरूपकन्तु तेन न किञ्चिदप्याचरितं सर्वपरित्यागं कृत्वा स्थित इत्येतदपि कारणमविज्ञाय किमेवं दोषपक्षे निक्षिप्तः [ग]। कदाचित् गुणो भवत्येवमयमविनयनिष्पन्नो दोष एव। आनीयतां तावदसौ बुध्यामहे किमर्थमयमेवंविधः तस्य वयसोऽनुचितोऽपि संवेग उत्पन्नस्ततो यथा युक्तं विधास्यामः।

[क] अत्र तु शिशुषु इत्यधिकः पाठः।

[ख] अभिहितवतीति वा पाठः।

[ग] निक्षिपाम इति वा पाठः।

इत्युक्तवति तारापीड़े पुनः शुकनासोऽभ्यधात्। अत्युदारतया वत्सलत्वाच्च एवमादिशति देवेऽन्यदितःपरं किमिवास्य विरूपकं भवेत्, यदद्य युवराजमुत्सृज्य क्षणमपि अन्यत्रावस्थानमात्मेच्छया चेष्टितम् इत्युक्तवति शुकनासे कशयेवान्तस्ताड़ितो दोषसम्भावनयानया पितुरुद्दाष्पदृष्टिरुपविष्ट एवोपसृत्य चन्द्रापीड़ः शनैः शनैः शुकनासमवादीत्। आर्य्य! यद्यपि निरुक्तो वेद्मि न मदीयेन दोषेण नागतो वैशम्पायन इति तथापि तातेन सम्भावितमेव कस्य वापरस्य सम्भावना नोत्पन्ना। मिथ्यापि तत्तथा यथा [क] गृहीतं लोकेन विशेषतो गुरुणा। प्रसिद्धिरन्यायशसे वा दोषगुणाश्रया फलति [ख] परत्र फलदायी कुलोपयुज्यते परमार्थः। तदस्याद्दोषसम्भावनायाः प्रायश्चित्तमार्य्यो दापयतु मे वैशम्पायनानयनाय गमनाभ्यनुज्ञां तातेन नान्यथा मे दोषशुद्धिर्भवति किं कारणमनागते वैशम्पायने तातस्यानया सम्भावनया नापगन्तव्यं अगते च मयि वैशम्पायनेन नागन्तव्यं यद्यसावन्येनानेतुमेव पार्य्येत तदा तातस्याप्युल्लङ्घनीयवचनैरेभिरवनिपतिसहस्रैरानीत एव स्यात्। तदा आर्य्यः कारयतु मे गमनाभ्यनुज्ञया प्रसादं नच तुरङ्गमैर्ग-

[क] पुस्तकान्तरे यथा इति नास्ति।

[ख] फलवतामिति वा पाठः।

च्छतो मे कष्टायां [क] भूमौ स्वप्नेऽपि [ख] गमनपरिक्लेशो वैशम्पायनमादायागतमेव मामवधारयत्वार्य्यः। अपि च वाह्यखेदादसह्योऽन्तःखेदः एवमेतद्द्वितीयो[ग]ऽङ्गजन्मा अनुपदमेव स्कन्धावारमादाय गच्छतीत्यमुना हेतुना विना तेनागतोऽहम् अन्यथा जन्मनः प्रभृति कदा मया गतं स्थितं क्रीड़ितं हसितं पीतमशितं सुप्तं प्रबुद्धं उच्छ्वसितं वा विना वैशम्पायनेन यश्च श्रुत्वा तस्मादेव प्रदेशान्न गतोऽस्मि तस्मात्तेनैव तुल्योऽभूवमिति तदप्रतिगमनदोषाद्रक्षतु मामार्य्यः।

इत्यभिहितवति चन्द्रापीड़ेऽपि रागरक्ते रक्ततामरसानुकारिणि मुखे सपक्षपाताम्बुदावलीमिव दृष्टिं निवेश्यैव गमनाय विज्ञापयति युवराजः किमाज्ञापयति देव इति शनैः शुकनासो राजानमप्राक्षीत्। तथापृष्टश्च शुकनासेन किञ्चिदिव ध्यात्वा तारापीड़ः प्रत्यवादीत्। आर्य्य! मया ज्ञातमेतेष्वेव दिवसेषु सम्पूर्णमण्डलस्येन्दोः ज्योत्स्नामिव करावलम्बिनीं वत्सस्य बधूं द्रक्ष्यामीति यावदयमपरोऽन्तर्हिताशापथो जलदकाल इव प्रत्यूहकारी वैशम्पायनवृत्तान्तो मे दुष्प्रकृतिना विधात्रा अन्तरापातितो यथा

[क] दुष्टायामिति वा पाठः।

[ख] स्वल्पेऽपि इति वा पाठः।

[ग] वियोग इति वा पाठः।

चायुष्मता अभिहितमेवैतत्, न तमन्यः शक्नोत्यानेतुं नच तेन विनायमत्र स्थातुं तदवश्यमेव तावन्निस्तरितव्यो व्यसनार्णवोऽमुना पोतेन वैशम्पायनप्रत्यानयनाय चावश्यं देव्यपि विलासवती विसर्ज्जयिष्यत्येवैनमिति निश्चयो मे। तद्यातु किन्त्वतिदूरं वत्सेन गन्तव्यं तद्गणकैः सहादरादार्य्यो दिवसं लग्नञ्च गमनायास्य निरूपयतु सन्निधानञ्च कारयत्वित्येतदभिधाय शुकनासमुदाश्रुलोचनं चिरमिव चन्द्रापीड़मालोक्याहूय च विनयावनम्रमंसदेशे शिरसि वाक्रोश्य पाणिना स्पृशन्नादिशत्। वत्स! गच्छ त्वमेव प्रविश्याभ्यन्तरं मनोरमासहितायाः मातुरावेदयात्मगमनवृत्तान्तमित्यादिश्य चन्द्रापीड़मात्मना शुकनासमादाय स्वभवनमयासीत्। चन्द्रापीड़स्तु तामक्लिष्टवर्णां कादम्बरीवरणस्रजमिव गमनाभ्यनुज्ञां हृदयेनोद्वहन् प्रहृष्टान्तरात्माप्यपहर्षदृष्टिः प्रविश्य कृतनमस्कारो मातुः समीपे समुपविश्यात्मदर्शन द्विगुणीभूतवैशम्पायनविरहशोकविक्लवां मनोरमामाश्वास्यावादीत्।

अम्ब! समाश्वसिहि वैशम्पायनानयनाय तातेन मे गमनमादिष्टं तत् कतिपयदिवसान्तरितं वैशम्पायनाननदर्शनोत्सुकं मामविकल्पं विसर्ज्जय त्वम्। सा त्वेवमभिहिता प्रत्युवाच। तात! किमात्मगमनवचसा मां समाश्वासयसि कः खलु मे त्वयि तस्मिंश्च विशेषस्तदेकधा तमेकं न पश्यामि

कठिनहृदयं [क] त्वयि पुनर्गते यदपि तस्यादर्शने जीवितप्रतिबन्धहेतुभूतं त्वद्दर्शनं तदपि दूरीभवति तन्न गन्तव्यं वत्सेन एकेनापि हि पुत्रेणावां पुत्रवत्यो अपि नागतो नामासौ निष्ठुरात्मेत्युक्तवत्यां मनोरमायां विलासवती धीरमुवाच। प्रियसखि ! तव मम चैवमेतद्यथा त्वयोक्तम् अयं पुनर्वैशम्पायनेन विना कं पश्यतु तदास्तां किमेनं वारयसि वारितेनाप्यनेन नैव स्थातव्यम्। मन्ये च पित्राप्ययमेतदेवाकलय्य गमनायानुमोदितस्तद्यातु वरमावाभ्यां कतिपयदिवसाननयोरप्यदर्शनकृताः क्लेशाः अनुभूताः, न पुनरस्य वैशम्पायनानवलोकनदुःखदीनं दिने दिने मुखमीक्षितं, तदुत्तिष्ठ गच्छावो गमनसम्बिधानाय वत्सस्य चन्द्रापीड़स्य।

इत्येवमभिदधत्येव मनोरमां हस्ते गृहीत्वोत्थाय चन्द्रापीड़ेनानुगम्यमाना निजावासमयासीत्। चन्द्रापीड़ोऽपि मातुः समीपे गमनालापेनैव क्षणमिव स्थित्वा स्वगृहमगात्। तत्रापनीतसमायोगो गमनायोत्ताम्यता हृदयेन गणकानाहूय रहस्याज्ञापितवान् यथा विना विलम्बेन मे गमनं भवति, तथा भवद्भिरार्य्यशुकनाशाय पृच्छते तताय वा दिनमावेदनीयमित्येवमादिष्टास्ते व्यज्ञपयन्। देव ! यथा सर्व एव ग्रहाः स्थिताः, तथासम्प्रतेन देवस्य गमनमेव वर्त्तमाने न

[क] हृदयेति वा पाठः।

शस्यते अपरमपि कर्मानुरोधाद्राजेच्छैव कालस्तत्र न कार्य्य-मेवाहर्निरूपणया राजा कालस्य कारणं यस्यामेव वेलायां चित्तनिर्वृतिः, सैव वेला सर्वकार्य्येष्विति, विज्ञापिते मौहूर्त्तिकैः पुनस्तानब्रवीत्। तातेनैवमादिष्टमिति ब्रवीमि अन्यदात्ययिकेषु कार्य्येषु कार्य्यपराणां प्रतीक्षणोत्पादिषु च दिवसनिरूपणैव कीदृशी तत्तथा कथयिष्यथ यथाश्व एव, गमनं भवेदिति। देवः प्रमाणमित्यभिधाय गतेषु च तेषु शरीरस्थितिकरणायोदतिष्ठत्। निर्वर्त्तितशरीरस्थितिश्च मौहूर्त्तिकास्ते प्रविश्य शनैर्न्यवेदयन्, कृतोऽस्माभिर्देवादेशः सिद्धश्च, तनयविरहविक्लवतयार्य्यशुकनासस्य तदतिक्रान्ते श्वस्तनेऽहनि रात्रावितः प्रस्थातव्यं देवेनेत्यावेदिते तैः साधु कृतमिति तानभिष्टुत्य दृष्टिविषयवर्त्तिनीं कादम्बरीञ्च वैशम्पायनञ्च मन्यमानोऽप्रविष्टायामेव पत्रलेखायां परापतामीत्यग्रतः प्रधाविते नावधारयन् चेतसा चतुःसमुद्रसारभूतानिन्द्रायुधरयानुगामिनस्तुरङ्गमानगणेयानवगणिततुरगगमनखेदा-त्तुत्साहिनो राजपुत्रांश्च निरूपयन्ननन्यकर्मा तं दिवसम् एकाञ्च यामिनीं कथं कथमप्यस्थात्।

अथानुरक्तकमलिनीसमागमाप्राप्तिसन्तापादिव समं दिवसेनास्तमुपगतवति तेजसां पत्यौ तेजःपतिपतनाच्चितानलमिव सन्ध्यारागमपराशया सह बिभ्रति पश्चिमे दिग्गगनभागे सन्ध्यानलस्फुलिङ्गनिकर इव स्फुरति तारागणे दिवस-

विरामान्मूर्च्छागमेनेव तमसा निमील्यमानेषु दिङ्मुखेषु निवासाभिमुखमुखरेषु वियद्वियोगदुःखादिवार्त्तप्रलापेषु वयःसमूहेषु जनितप्रकाशं जन्मैव समालोक्य दोषागमं निरालोकं गर्भमिव तमःप्रविष्टे पुनर्जीवलोके निजालोकाद्विकाशितपूर्वदिग्वधूवदने जन्मान्तरागत इव उदयगिरिवर्त्तिनि नक्षत्रसमागमसुखमनुभवति भगवति भूयोभूयः स्वकान्तिनिर्भरान्निष्कलङ्क इव नक्षत्रनाथे विस्पष्टायां निशीथिन्यां प्रस्थानमङ्गले प्रणामायोपगतं चन्द्रापीड़ं पीड़यान्तर्विलीयमानेव वाष्पोत्पीड़मपारयन्ती वारयितुमल्पायताभ्यामपि नेत्राभ्यां कृतप्रयत्नाप्यमङ्गलशङ्कया विलासवती तं मन्यूद्गमावेगगद्गदिकोपरुध्यमानाक्षरमवादीत्। तात! युज्यते ह्यङ्कलालितस्य गर्भरूपस्य प्रथमगमने गरीयसी हृदयपीड़ा यस्मिन् मम पुनर्नेदृशी प्रथमगमनेऽपि ते पीड़ा समुत्पन्ना, यादृशी तव गमनेनाधुना यतो दीर्य्यत इव मे हृदयं समुत्पाद्यन्त इव मर्माणि उत्क्वथ्यत इव शरीरम् उच्चटत इव चेतो विघटन्त इव सन्धिबन्धनानि उन्मथ्यत इव मनः निर्यान्तीव प्राणाः न किञ्चित् समादधाति धीः सर्वमेव शून्यं पश्यामि न पारयाम्यात्मानमिव हृदयं धारयितुं धृतोऽपि बलादागच्छति मे वाष्पोत्पीड़ः मुहुः समाहितापि मङ्गलसम्पादनाय चलति मतिर्न जानाम्येव किमुत्पश्यामीति किं निमित्तं चेयमीदृशी हृदयपीड़ेत्येतदपि न वेद्मि किं बहु-

भ्यो दिवसेभ्यः कथमप्यागतो मे वत्सो झटित्येव पुनर्गच्छतीति वैशम्पायनवियोगादुद्विग्नस्य गमनमेकाकिनस्ते समुत्प्रेक्ष्येति [क] उत वैशम्पायनवृत्तान्तादात्मन एव दुःखितयेति न चैवंविधया पीड़या वैशम्पायनानयनाय गच्छतस्ते गमनं निवारयितुं पारयति वाणी, हृदयं पुनर्नेच्छत्येव त्वदीयं गमनं तदीदृशीं मे पीड़ां विज्ञाय यथा पुरा स्थितं न तथा क्वचिदासङ्गमाबध्य दीर्घकालमायुष्मता स्थातव्यम्। अस्य चार्थस्य कृते साञ्जलिबन्धेन शिरसाभ्यर्थये वत्समित्यादिशन्तीं स्वमातरं सुदूरं प्रसारितावनम्रमूर्त्तिश्चन्द्रापीड़ो व्यज्ञपयत्[ख]। मातस्तदा दिग्विजयप्रसङ्गात् स्थितोऽस्मि अधुना पुनरियानेव मे कालक्षेपो यावत्तमुद्देशं परापतामि तत् पुनश्चिरागमनकृता मनागपि न हृदये भावनीया त्वया [ग] पीड़ा, इत्येवं विज्ञप्ता चन्द्रापीड़ेन सन्निरुध्य वाष्पवेगान् कथं कथमपि संस्तभ्यात्मानं निर्वर्त्तितगमनमङ्गल[घ]प्रस्रवेन सिञ्चन्ती शिरसि चोपाघ्राय गाढ़गाढ़ं सुचिरमालिङ्ग्य गच्छद्भिरिव प्राणैः कृच्छ्रान्मुमोच तं माता।

मुक्तश्च माता पितुः प्रणतये वासभवनमगमत्। तत्र च

[क] पुनःपुन इति वा पाठः।

[ख] व्यजिज्ञपत् अहञ्च इति वा पाठः।

[ग] अम्बया इति वा पाठः।

[घ] मङ्गलाङ्गलता इति वा पाठः।

देव! गमनाय नमस्करोति युवराज इत्यावेदिते द्वाररक्षिणा प्रविश्य क्षौणीतलनिवेशितशिराः शयनवर्त्तिनो ननाम दूरस्थित एव पितुः पादौ। अथ तथाप्रणतमालोक्य किञ्चिदुन्नामितपूर्वकायः शयनगत एवाहूय तं पिता चक्षुषा पिबन्निव प्रेम्णा परिष्वज्य गाढ़मप्रौढ़ इव सहसोद्भूताविरलवाष्पपर्य्याकुलाक्षोऽन्तःक्षोभविच्छिन्नाक्षरमवादीत्, वत्स! पित्रा अनर्हदोषेषु सम्भावित इत्येषा मनागपि मनसि वत्सेन दुःखासिका न कार्य्या, विनयाधानात् प्रभृति सम्यक् परीक्षितोऽस्माभिः परीक्ष्य च गुणगणैरेवाधिगम्यो राज्यभारस्त्वय्यारोपितो न तनयस्नेहादेव। राज्यं हि नामैतत् पृथिवीभारेणैवातिदुरुद्वहं महीभृत्सम्बाधतयैवातिसङ्कटं कुटिलनीतिप्रचारेणैवातिदुःसञ्चरं चतुःसमुद्रपर्य्यन्तभुवनव्याप्त्यैवातिमहत् महासाधनप्रसाध्यतयैवातिदुःसाधनम् अपर्य्यवसानकार्य्यतन्त्रजालेनैवातिगहनम् उत्तुङ्गवंशप्रतिष्ठिततयैवातिदुरारोहम् अहितसहस्रोद्धरणेनैवातिदुद्धरम् अपि च समवृत्तितयैवातिविषमम् अनेकतीर्थकल्पनयैव दुरवतारं कटक[क]शोधनेनैव दुर्ग्रहम् अखिलप्रजापालनव्यापारेणैव दुष्पाल्यं सर्व्वाशाप्राप्त्यैव च दुष्प्रापम्। नामहासत्वे नास्थिरप्रकृतौ नादातरि नास्थूललक्ष्ये नाशुचौ नाविक्रान्ते नामहोत्साहे नाप्रियवादिनि

[क] कण्टक इति वा पाठः।

नासत्यसन्धे नाप्रज्ञे नाविवेकिनि नाकृतज्ञे नापुरुषान्तरज्ञे नानुदारव्यवहृतौ नासंविभागशीले नान्यायवर्तिनि नाधर्मरुचौ नाशास्त्रव्यवहारिणि नाशरण्ये नाब्रह्मण्ये नाकृपालौ नामित्रवत्सले नावश्यात्मनि नानियतेन्द्रिये नासेवके वा पदमेवादधाति। यः खलु समग्रैर्गुणैराकृष्य बलात् प्रतिबन्धमस्य चञ्चलप्रकृतेः कर्तुं समर्थः तत्रास्ते गुरवोऽप्यपगतस्खलितभीतयस्तत्रैव समारोपयन्त्येतदालोचितपरावराः। तदनेनैव बोद्धव्यमिदं वत्सेन नास्ति मयि दोष इति। अपि च सम्प्रति कस्मिन् भारमवक्षिप्याणुमपि दोषमाचरसि त्वयैव सकललोकानुरञ्जने यतितव्यं गतः खलु कालोऽस्माकं मया अस्खलितेनैव चिरं पदे [क] स्थितं न पीड़िताः प्रजाः लोभेन नोद्वेजिता गुरवोऽवमानेन न विमुखिताः सन्तो मदेन नोत्त्रासिताः प्राणिनः क्रोधेन न ह्रासित आत्मा हर्षेण न हृतः परलोकः कामेन राजधर्मो[ख]ऽनुरुद्धो न स्वरुचिः वृद्धाः समासेविताः न व्यसनानि, सतां चरितान्यनुवर्तितानि नेन्द्रियाणि, धनुरुन्नामितं न मनः वृत्तं रक्षितं न शरीरं, वाच्याद्भीतं न मरणात्, उपभुक्तानि च सुरलोकेऽपि दुर्लभानि सर्वविषयोपभोगसुखानि यौवनेन इच्छया पर्य्याप्तम्, अकार्य-

---

[क] अस्माकमस्माभिरस्खलितैः पादैरिति वा पाठः।

[ख] कामेनानुरुद्धो धर्म इति वा पाठः।

परिहारात् कार्य्यानुष्ठानाच्चोपार्जितः पारम्परोऽपि लोक [क] इति चेतसि मे त्वज्जन्मना च तावत् कृतार्थ एवास्मि तदयमेव मे मनोरथः दारपरिग्रहात् प्रतिष्ठिते त्वयि सकलमेवेमं राज्यभारमारोप्य जन्मनिर्वाहलघुना हृदयेन पूर्वराजर्षिगतं [ख] पन्थानमनुयास्यामीत्यस्य च मेऽतर्कित एवायमग्रतः प्रतिरोधको वैशम्पायनवृत्तान्तः स्थितः मन्ये च न सम्पत्तव्यमेवानेन अन्यथा क्व वैशम्पायनः क्वचैवंविधमस्य स्वप्नेऽप्यसम्भवनीयं समाचेष्टितं तद्गतेनापि तथा कर्तव्यं वत्सेन यथा न चिरकालमेष मे मनोरथोऽन्तर्हृदय एव विपरिवर्तत इत्यभिधाय किञ्चिदुन्नामिते मुखे मुखेनैव सम्पिण्डितं [ग] हृदयमिव ताम्बूलमर्पयित्वा व्यसर्जयत्।

चन्द्रापीड़स्तु तया पितुः सम्भावनया सुदूरमुन्नमितोऽप्यवनम्रतरमूर्तिरपसृत्य पुनः प्रणामेनोत्तंसितात्मा [घ] निर्ययौ। निर्गत्य च शुकनासभवनमयासीत्। तत्र च तनयचिन्तापरीतमुन्मुक्तमिवेन्द्रियैः शून्यशरीरं शुकनासमविरताश्रुपातोपहतमुखीञ्च मनोरमां प्रणम्य तादृशाभ्यामेव ताभ्यां सम्भाव्याशिषा समारोपयद्भ्यामिव च स्वदुःखभारमनुगतो निवर्त्त-

[क] परलोक इति वा पाठः।

[ख] सेवितमिति वा पाठः।

[ग] संपीड़ितमिति वा पाठः।

[घ] उन्नमितात्मा इति वा पाठः।

नाय तयोर्निवर्त्तितानना मुहुराद्वारनिर्गतैर्गत्वाग्रतो ढौकितमपि कृतापसर्पणम् अकृतहेषारवमनुत्कर्णकोषमसुखमुखस्वरमसमनस्कमनाविष्कृतगमनोत्साहं दीनमिन्द्रायुधमालोक्यापि पुनर्निवारणाशङ्कया वैशम्पायनावलोकनत्वरया कादम्बरीसमागमौत्सुक्येन [क] चाकृतपरिलम्बो मनागप्यारुह्य रयेणैव निरगान्नगर्य्याः।

निर्गत्य शिप्रातटे तत्प्रस्थानमङ्गलावस्थानायोपकल्पितं कायमानमप्रविश्य वहिरेव गतो युवराज इति जनितलोककलकलेनातर्किततत्कालगमनसम्भ्रान्तेन परिजनेन राजपुत्रलोकेन चेतस्ततो धावताऽनुगम्यमानो गव्यूतित्रितयमिव गत्वा सुलभपयोयवसे प्रदेशे निवासमकल्पयत्। उत्ताम्यता हृदयेनाप्रभातायामेव यामिन्यामुत्थाय पुनरवहत्। वहंश्च तस्मादेव वासरादारभ्यैवमचेतित [ख] एव परापत्य कृतापक्रान्तेस्त्वपया पृष्ठतोऽनुगम्य बलाद्दत्तकण्ठग्रहः क्व परं पलाय्यत इति वैशम्पायनस्य वैलक्ष्यमपनयामि एवं तत्समागमसुखमनुभूय निष्कारण-प्रसन्नामनघामतर्कितोपनतमदवलोकनोपजातहर्षविशेषां पुरस्ताद्गमनसिद्धये पुनर्महाश्वेतां पश्यामि एवं महाश्वेताश्रमसमीपे पुनःस्थापिताशेषतुरगसैन्यस्तया सहैव

[क] गमनौत्सुक्येन इति वा पाठः।

[ख] आरभ्यैतान्यन्यानि चिन्तयन्नचेतित इति वा पाठः।

हेमकूटं गच्छामि एवं तत्र मत्प्रत्यभिज्ञानसम्भ्रमधावितेन इतस्ततः कादम्बरीपरिजनेन प्रणम्यमानः प्रविश्य मदागमनवेदनोत्फुल्लनयनसखीजनेनापक्रियमाणपूर्णपात्रां क्वासौ केन कथितं कियद्दूरे वर्त्तत इति तत्प्रश्नोन्मुखीं तत्क्षणोत्पन्नया तापोपशान्त्या त्रपया च युगपदुरसि निहितपद्मिनीपत्रमपनीयोत्तरीयांशुकाञ्चलं कुचावरणतामुपनयन्तीम् आभरणतामुपनीतानि कमलिनीमृणालान्यपास्य भूषणेभ्योऽधिकां स्वशरीरशोभामेव सर्व्वाभरणस्थानेषु धारयन्तीं तापोपशमायार्पिताहारमात्राभरणाम् अत्युल्वणहरिचन्दनचर्च्चान्तरितलावण्यशोभान्यङ्गानि करपरामर्शप्रयत्नेन दर्शनीयतरतां नयन्तीम् अङ्गलग्नानि शयनीकृतकमलकुमुदकिञ्जल्ककुवलयदलशकलानि पुलकोद्गमेनैवापास्यन्तीं [क] कपोलासङ्गिनीश्च मणिदर्पणेनालोक्यायथास्थितां करेण कवरीमंसदेशे विनिवेशयन्तीम् आनन्दजन्मना नेत्रपुटावर्जितेन वाष्पसलिलेनैव मकरध्वजानलसन्तापाय जलाञ्जलिमिव प्रयच्छन्तीम्। उत्सृष्टशेषेणाप्यानमलयजरसेनैवाङ्गलग्नेन भस्मनेव मदनकृतभुजोनिवृत्तिमावेदयन्तीम् अभ्युत्थानप्रसङ्गेनैव कुसुमशय्यां दूरीकुर्व्वन्तीं कादम्बरीमालोकयन् दर्शनीयावलोकनफलेन चक्षुषी कृतार्थतां नयामि एवं मदलेखां साञ्जलि-

---

[क] अपश्यन्तीमिति वा पाठः।

प्रणामेन कण्ठग्रहेण च सम्भावयामि चरणपतितां पत्रलेखां सम्भाव्य केयूरकञ्च पुनः परिष्वज्य निर्भरमेवमहाश्वेतोपपादितोद्वाहमङ्गलस्वरितसखोवृन्दनिर्वर्त्तितवैवाहिकस्नानमङ्गलविधेर्भुव इव वर्षाभिषिक्तायाः [क] करग्रहणं निर्वर्त्तयामि एवमतिबहलकुङ्कुमकुसुमधूपभूषानुलेपनामोदोद्दीपितहृदयजन्मनिवासभवने शयनवर्त्ती मत्समीपे समुपविश्य क्षणमिव कृतनर्मालापायां निर्गतायां मदलेखायां त्रपावनम्रमुखीमनिच्छन्तीं किल बलाद्दोर्भ्यामादाय शयनीयं शयनीयादङ्कम् अङ्काच्च हृदयं देवीं कादम्बरीमारोपयामि एवमुद्गाढ़नीवीग्रन्थिदृढ़तरार्पितपाणिद्वयां त्रपानिमीलितलोचने चुम्बन्नवञ्चितात्मा चिराज्जीवामि एवं सुरैरपि दुर्लभं तदधरामृतमाकण्ठं निपीय सुजीवित[ख]मात्मानं करोमि एवमतिकोमलतयान्तर्विलीय विशन्त्या इवाङ्गमङ्गं गाढ़ालिङ्गनसुखरसभरेण मकरध्वजानलदग्धशेषं निर्वापयामि शरीरम् एवं परवत्यापि स्वेच्छाप्रवृत्तयेव निष्प्रयत्नयाप्यभियुञ्जानयेवापसर्पन्त्यापि कृतोपसर्पणयेव सङ्गोपितसर्वाङ्ग्याप्युद्दर्शितभावयेव देव्या कादम्बर्य्या सह तत् किमपि सर्वजनसुलभमपि योगैकगम्यं स्पर्शविषमपि हृदयग्राहि मोहनमपि प्रसादनमिन्द्रियाणा-

---

[क] अत्र तु देव्या इत्यधिकः पाठः।

[ख] अत्र तु मृतमित्यधिकः पाठः।

मुद्दीपनमपि मदनहुतभुजोनिर्वृतिकरम् उपाहितसर्वाङ्ग-खेदमपि आह्लादकरमुपाजनितविषमोच्छ्वासश्रमखेदमपि स-सीत्कारपुलकजननमनुभूयमानमप्युत्पादितानुभवनस्पृहं सहस्रवारानुभूतमप्यपुनरुक्तमतिस्पष्टमप्यनिर्देश्यस्वरूपमचिन्त्यसमागममतुलस्पर्शमनुपमरसमनाख्येयप्रीतिकरं परमध्यान-सहस्राधिगतं निर्वाणसुखमिवापरप्रकारं सुरताख्यं सुखा-न्तरमनुभूय निमेषमप्यकृतविरहस्तयैव सह तेषु तेषु रम्येषु देशेषु रममाणः स्वमेव रम्यमपि रमणीयतरतां यौवनमुप-नयामि एवमुत्पन्नसहस्रविश्रम्भां देवीमेवाभ्यर्थ्य वैशम्पायन-स्यापि मदलेखया सह घटनां कारयामीत्येतानि चान्यानि च चिन्तयन्नचेतितक्षुत्पिपासातपश्रमजागरव्यथो दिवारात्रौ चावहत्।

एवञ्च वहतोऽप्यस्य दवीयस्तयाध्वनोऽर्द्धपथ एव काल-सर्पो वर्त्मनः प्रज्वलकम्पो ग्रीष्मस्य शिशागमो गभस्तिमतः स्वर्भानुरमृतदीधितेः धूमोद्गमो वज्रानलस्फुरितानां मदागमो मकरध्वजकुञ्जरस्य अरण्यान्धतमसप्रवेशो विरहातुराणाम् अमोघकालपाशवागुरोत्कण्ठितहरिणानाम् अभेद्यलोहार्गल-दण्डो दिग्वारणानाम् अच्छेद्यहिञ्जीरशृङ्खलाबन्धनानाम् अनु-न्मोच्यनिगडबन्धोऽध्वगानाम् अलङ्घ्यकान्तारलेखा प्रोषितानां कालायसपञ्जरोपरोधो जीवलोकस्य उद्भ्रान्तलिगवय [क]

[क] गवयमहिषशृङ्ग इत्यधिको वा पाठः।

मलिनघनघटाभोगभीषणो विस्फुर्ज्जितध्वनिर्विषमतरतड़िद्गुणाकर्षी मण्डलितविकटशक्रकार्मुकोऽनवरतधारासारवर्षप्रहारी पुरोमार्गमुपरुन्धन् विरुद्ध इवान्धकारितमुखो निस्त्रिंशशतसहस्रसम्पातदुष्प्रेच्योऽचिरेणी प्रतिघ्नन्निवाभ्युगमनविघ्नकारी बभूव जलदकालः।

तत्र च प्रथममस्य चेतनाहारिभिर्मूर्च्छावेगैरन्धकारमनीयन्त दश दिशस्ततोजलधरैः अग्रतः समुत्प्लुतेन चेतसा क्वाप्यगम्यत पृष्ठतो हंसैः पुरस्तात् परिमलिनोऽस्य निश्वासमरुतः प्रावर्त्तन्त पश्चात् कदम्बवाताः पूर्वं तुलितनीलोत्पलवनकान्ति नयनयुगलमस्य सलिलं समुत्ससर्ज चरममम्भोमुचां वृन्दम् आदावपूर्वमापूर्य्यमाणमुद्वेगोत्कलिकासहस्रपर्य्याकुलं मनोऽस्याभवत् अवसाने स्रोतस्विनीनाम्यालम् अपिच दुस्तरैर्नदीपूरैरेव सहावर्द्धन्त मन्मथोन्माथाः वर्षजललुलितैः कमलाकरैरेव सह ममज्ज कादम्बरीसमागमप्रत्याशाधारारयासहैः कन्दलैरेव सह ताम्रतामधत्त नयनयुगम्, अम्भोदवाताहतैः कदम्बकुड्मलैरेव सहोदकन्दलोत्कण्टकिता तनुः [क] उत्कूलस-

[क] धारया सह कन्दलैरेवाभिहत हृदयम् नवाम्भोद वाताहतैः कदम्बकुड्मलैरेव सहोदकम्पोत्कण्टकिता तनुः अनवरतजलपतनजर्ज्जरितैः पद्मभिः शिलीन्ध्रैरेव सह ताम्रता मधत्त नयनयुगलम् इति वा पाठः।

खिलात् खन्यमानमूलैः सरित्तटैरेव सहापतन् प्राणाः, परिमलमयैर्मालतीकुसुमैरेव सहाजृम्भत रणरणकः, तथा गुरुभिर्घनैरेवाभज्यन्त मनोरथाः, तीक्ष्णान्तरकोटिभिः केतकीसूचिभिरेवातुद्यन्त मर्माणि, उच्छिखैः शिखिभिरेवादह्यन्त गात्राणि अन्धकारितदिशा[क]तमसैवावर्द्धत मोहान्धकारः, तिरस्कृतध्वान्तेन तड़िदातपेनैवातन्यत सन्तापः, गम्भीरगर्जितैकसन्तानोत्कम्पितधरापीठबन्धैर्नभसि नवघनैर्घनजलधरधारानिपातरभसवाचालितचञ्चुभिरन्तराले चातकैः उद्दाममहावाररराविभिरवनिमूले दर्दुरैः अनवरतझङ्काररवजर्ज्जरितधाराम्बुभिराशासु जलदानिलैः उन्मुक्तमदकलकेकाकोलाहलैः काननेषु कलापिभिः असमशिखरोपलस्खलनकलकलमुखरैर्गिरिषु निर्झरैः उल्लोलकल्लोलास्फालविस्फुरित [ख] विषमनिर्घोषझात्कारिभिः सरित्पूरैः सर्वतश्च विततेन स्थलीषु सम्भृतेन कन्दरेषूच्चण्डेन शिखरिषु कलेन अम्बुषु पटुना पर्वततटेषु मृदुना शाद्वलेषु चारुणा पल्वलेषु सान्द्रेण शाखिषु तनुना तमालपेषु [ग] उल्वणेन तालीवनेषु यथा धारासम्पतनमाकर्णमानेन सर्वप्रकारमधुरेण हृदयप्रवे-

---

[क] निशासेव इति वा पाठः।

[ख] विस्फारित इति वा पाठः।

[ग] तमालपेषु इति वा पाठः।

शिनाधारारवेणोत्कलिकाकलितो न रात्रौ न दिवा न ग्रामे नारण्ये नान्तर्नवह्निर्न वने नोपवने न वर्त्मनि मावासे न वहन् न तिष्ठन् न वैशम्पायनस्मरणे न कादम्बरीसमागमा-नुध्याने न कथञ्चिदपि न क्वचिदपि निर्वृतिमेवाध्यगच्छत्।

अनधिगतनिर्वृतिश्चातिकष्टतया वज्रानलस्येव जलद-समयेन्धनस्य मदनहुतभूजो भस्मसात्कर्त्तुमिवोद्यतस्य धीरस्वभावोऽपि प्रकृतिमिवोत्ससर्ज्जाशावितसकलधरातलैर्धा-राजलैरप्याशोष्यत द्योतितदशदिशा शतक्रदालोकेनापि मूर्च्छान्धकारेऽक्षिप्यत आह्लादितजीवलोकैर्जलदानिलैरप्य-दह्यत पयोभारमेदुरै[क]र्घनैरपि तनुतामनीयत, पाटलित-शाद्वलैः शक्रगोपकैरपि पाण्डुतां प्रत्यपद्यत, कुसुमधवलैः कुटजैरपि रागपरवशोऽक्रियत, तथापि सकलजगज्जीवन-हेतुनापि जीवतसन्देहदोलामारोपितो जलदकालेन उत्-कूलगामिषु विधिविलसितेषु सरित्पूरेषु चोत्प्लवमानोऽ-नवरतवर्षाजलजनितेषु मूर्च्छागमेषु पङ्कपटलेषु च निमज्जन् जलभरस्थगिते वर्त्मनि लोचने च स्खलन् विकासिनीषु कादम्बरीप्राप्तिचिन्तासु धाराकदम्बरजोवृष्टिषु चामीलन् अनुबन्धिषु गमनविघ्नेषु जलधरध्वनितेषु च मुह्यन् सुदुर्ल-ङ्घ्य[ख]वेगान्युत्कण्ठितानि सहस्रशः स्रोतांसि चोल्लङ्घयन्

[क] भारमन्थरैरिति वा पाठः।

[ख] दुर्लङ्घ्य इति वा पाठः।

घनोपाहितवृद्धिना कादम्बरीसमागमौत्सुक्येन पयःप्लवरयेण चोह्यमानो जीवतप्रत्याशामनिर्वहतस्तुरङ्गमांश्च परित्यजन् तर्ज्यमान इव तड़िद्भिरवष्टभ्यमान इव जलधरैः निर्भर्त्स्यमान इव विस्फुर्जितैः शकलीक्रियमाण इव शतशोनिस्त्रिंशवृत्तिभिर्धारासारैः निरुद्धास्वपि जलदकालेनैव आशुगमनविघ्नहेतुभूतासु आशासु कादम्बरीसमागमाशा सुतरां नारुध्यतास्य यथा तादृशेऽपि यथास्थाननिगड़ितसमस्तप्राणिनि प्रावृट्काले कलामप्यकृतविलम्बोऽसारतधाराहतिविकूणिताक्षेण च मुहुर्मुहुर्विवलितानमितानमेन स्रोतदासन्निपिण्डितकेसराग्रेणैकसन्तानकर्दमसग्नोन्मग्नखुरेणादृश्यनिम्नोन्नतस्खलद्गतिना विशीर्य्यमाणपर्य्याणसमायोगेन उपर्य्युपरिवाहिनीपूरोत्तारसन्तानावानपृष्ठेन अपचीयमानबलजवोत्साहेन वाजिसैन्येन विशीर्य्यतानुगम्यमानो जीवितसन्धारणाय यथा तथा निर्वर्त्तिताशनमात्रकोऽभ्यर्हितराजलोकवचसाप्यप्रतिपन्नशरीरसंस्कारो दिवसमवहदेव केवलम्।

वहंश्च त्रिभागमात्रावशिष्टेऽध्वनि वर्त्तमानं मेघनादमद्राक्षीत्। दृष्ट्वा च दूरत एव कृतनमस्कारं तमप्राक्षीत्। तिष्ठतु तावत् परस्तात् पत्रलेखागमनवृत्तान्तप्रश्नो, वैशम्पायनवृत्तान्तमेव तावत् पृच्छामि, अपि दृष्टस्त्वयाच्छोदसरसि वैशम्पायनः, पृष्टश्चावस्थानकारणं, पृष्टेन किञ्चित्कथितं न वा

पश्चात्तापो वास्मत्परित्यागेन स्मरति वास्माकं पृष्टोऽसि, वानेन किञ्चिन्मदीयम् उत्पन्नो वालापो युवयोरुपलब्धो वाभिप्रायो मातापित्रोर्वा सन्दिष्टं किञ्चित्, परिबोधितो वा त्वया गमनाय, आवेदितं वास्मदीयमागमनम्, उपलक्षितो वाभिप्रायो त्वया, नापयास्यति वा तस्मात् प्रदेशात्, दास्यति वा दर्शनं ग्रहीष्यति वास्मदनुनयम् आगमिष्यति वा पुनर्मया सह, किं कुर्वन् दिवसमास्ते, को वा विनोदोऽस्य तिष्ठतोति ? स त्वेवमादिष्टोव्यजिज्ञपत्। देव ! देवेन तु वैशम्पायनमालोक्यानुपदमेव तुरङ्गमैरागत एवाहमित्यादिश्य विसर्ज्जितोऽहम्, अथाच्छोदसरसः प्रतीपं वैशम्पायनो गत इत्येषान्तरा वार्त्तैव नोपजाता, चिरयति च देवे जलदसमयारम्भमालोक्य कदाचिदेषु दिवसेषु देवेन तारापोड़ेन देव्या विलासवत्यार्य्यशुकनासेन च कृतप्रयत्नोऽपि न मुच्यत एवागन्तुं देवश्चन्द्रापोड़स्त्वया चैकाकिना न स्थातव्यमेवास्यां भूमौ परागतप्रायाश्च वयं तन्निवर्त्तस्वास्मादेव प्रदेशादित्यभिधाय पत्रलेखया केयूरकेण च त्रिचतुरैः प्रयाणकैरप्राप्त एवाच्छोदं यावत् बलान्निवर्त्तितोऽस्मीत्येवमावेद्य विरराम। विरतवचनञ्च तं [क]पुनरपृच्छत् किमाकलयस्यद्य तेन यावत् परापतिता पत्रलेखा नेति। स तु व्यजिज्ञपत्, देव ! यदि

[क] विरतवचनं चरमिति वा पाठः।

कश्चिदन्तरान्तरायो न भविष्यति विलम्बकारी तदा विना सन्देहेन परापतत्येवमवगच्छति मे हृदयम्।

इत्युक्तवति मेघनादे घनसमयवर्द्धिताभोगमकरध्वजार्णवमध्यपातिनी स्वानुमानात् कादम्बरीमुत्प्रेक्ष्य विक्लवीभवतः परिवर्त्तन्त इवास्य [क] जलधराः कालपुरुषैः तड़ितो [ख] मदनानलशिखाभिरवस्फूर्ज्जितं [ग] प्रेतपतिपटहस्वनेन [घ] आसारधाराः [ङ] स्मरेषुभिः आमन्द्रं [च] गर्ज्जितं मकरध्वजधनुर्ज्यागुञ्जिताभोगेन [छ] कलापिकेकाः कालदूतालापैः केतकामादो विषपरिमलेन खद्योताः प्रलयानलस्फुलिङ्गरश्मिभिः अलिवलयानि कालपाशैः बलाकाश्रेण्यः प्रेतपतिपताकाभिः आपगाः सर्वक्षयमहापूरप्रवेदुर्द्दिमानि कालरात्र्या कुटजतरवः [ज] कृतान्तहासैः

[क] इवास्य पर्य्यागता इति वा पाठः।

[ख] पुरुषैरिव घनैर्बिलसितमास्य इति वा पाठः।

[ग] शिखाभिरिव तड़िद्भिर्विजृम्भितमिति वा पाठः।

[घ] पटहस्वनैरिव स्तनितैर्विस्फूर्ज्जितमिति वा पाठः।

[ङ] धाराभिः स्मरेषुभिरिव आविर्भूतमिति।

[च] आमन्द्रमिति नास्ति, गर्ज्जितं यमेनेवेति वा पाठः।

[छ] मकरध्वजेनोत्पुञ्जिताभोगेन संभाविताखानेक इति वा पाठः।

[ज] कुटजतरुकुसुमानि इति वा पाठः।

अपि च शरीरेऽपि सत्वं कातरतया बलं चामतया कान्तिर्वैवर्ण्येन मतिर्मोहेन धैर्य्यं विषादेन हसितं शुचा नयनमश्रुणा आलपनं मौनेन [क] अङ्गान्यसहनतया करणान्यपाटवेन सर्वञ्च अरत्या [ख] उल्लिख्यमानमिवानवरतरयवाहिनाश्रुधाराप्रवाहेणापभज्यमानमिव सन्ततैर्निश्वासप्रभञ्जनैरुत्खन्यमानमिव मदन [ग]दुःखोत्कलिकासहस्रैरजस्रपातिभिरितस्ततो जर्ज्जरीक्रियमाणमिव मकरध्वजशरासारैर्वपुषैव सह चीयमाणमिव स्वल्पावशेषसङ्कल्पलिखितेन निर्विशेषवृत्तिना कादम्बरीशरीरेणेव सह कण्ठलग्नं कथंकथमपि जीवितं धारयन्[घ]धाराधरजलक्लिन्नतरुतलमाप्लावितोपान्तं हरितशाद्वलम् [ङ] आसेव्यतटलतावनम् अनवरतरोधोजलप्रवेशं कलुषितप्रान्तम् अवशोष्यमाणोद्दण्डकुमुददलगहनमामग्नकमलषण्डम् उत्प्लवमानाश्यानकिञ्जल्कदलशकलम् आजर्ज्जरितकह्लारकुवलयमुद्भ्रान्तालिवलयमुड्डीनहं--

---

[क] शुचा वदनं नयनमश्रुणामौख्र्येन इति वा पाठः।

[ख] सर्वमेव अरत्या दिवसैः इति वा पाठः।

[ग] प्रभञ्जनैरनवलम्बनमिव वदनमिति वा पाठः।

[घ] पुस्तकान्तरे निर्विशेषादारभ्य धारयन्नित्यन्तं नास्ति।

[ङ] निपतद्धाराधरजलक्लिन्नतरुतलमाचितोपान्तशाद्वलमिति वा पाठः।

समालम् [क] अनवस्थानसारसितकरुणमवशिष्ट[ख]दलतल-निलीयमानोच्चकित-चक्रवाकयुगलमुत्कम्पितकादम्बककदम्ब-काश्रियमाणोपकूलनड्वलम् उत्ककलविङ्ककलापिवकबलाका-ध्यासितोपान्तपादपम् [ग] अन्यदिवादृष्टपूर्व्वमिवादत्तदृष्टि-सुखम् अनुत्पादितहृदयाह्लादम् अनुपजनितमानस प्रीति तदेवाच्छोदमुपाहितद्विगुणदुःखमाससाद।

आसाद्य चोपसर्पन्नेव सर्व्वानश्ववारानादिदेश कदाचि-दसौ वैलक्ष्यादस्मानालोक्यापसर्पत्येव तच्चतुर्ष्वपि पार्श्वेषु अवहिता भवन्तु भवन्त इति आत्मनापि तुरगगत एव खिन्नोऽप्यखिन्न इव विचिन्वन् लतागहनानि तरुमूलानि शिलातलानि लतामण्डपांश्च समन्ताद्बभ्राम भ्राम्यंश्च यदा न क्वचित् किञ्चिदवस्थानचिह्नमद्राक्षीत्, तदा चकार चेतसि नियतमसौ पत्रलेखासकाशात् मदागमनमुपलभ्य प्रथममेवा-पक्रान्तो येनावस्थानचिह्नमात्रकमपि नोपलक्ष्यते निरुद्देशं गतश्च क्वापि अस्माभिरेवमन्विष्टोऽपि न दृष्टः तत् कष्टतममा-पतितं वैशम्पायनमदृष्ट्वास्मात् प्रदेशात् पदमपि गन्तुं पादा-

---

[क] हंससार्थमिति वा पाठः।

[ख] सारसारस रसित तत्क्षणमवशिष्ट इति वा पाठः।

[ग] कादम्बक कदम्बकमुपरीयमाणोपकूलनड्वलम्। विरुतकलापि कलापोपाध्यासितोपान्तपादपमुपहतमिति वा पाठः।

वेव नोत्सहेते मे मन्मथशरविच्छिन्नाश्च कादम्बरीदर्शनमात्र-कावलम्बना: क्षणमपि विलम्बमन्तरीकर्त्तुमक्षमा: क्षामतयामी[क]प्राणा: सर्वथा विनष्टोऽस्मि, न दृष्टा देवी कादम्बरी नापि वैशम्पायन इत्येवमुत्पन्ननिश्चयोऽप्यपरिच्छेद्यस्वभावत्वात् प्रत्याशाया: कदाचिदस्य वृत्तान्तस्याभिज्ञा महाश्वेतापि भवत्येव तत् तान्तु तावत् पश्यामि, ततो यथायुक्तं प्रतिपत्स्य इत्यारोप्य हृदये तदाश्रमस्यैव नातिदूरे निवेशिततुरगसैन्य: स्नायोगमपनीय निर्मोकपरिलघुनी धनोज्झितज्योत्स्नाभिरामे परिधाय वाससी तत्रास्थितपर्य्याणमेवेन्द्रायुधमारुह्य महाश्वेताश्रममुपजगाम। तत्राप्रविश्यन्नेवावतीर्य्य महाश्वेतावलोकनकूतूहलात् पश्चादाकृष्टेन इन्द्रायुधेन परिजनेन राजपुत्रैश्चानुगम्यमानो विवेश। प्रविश्य च गुहाद्वार एव शिलातले समुपविष्टामधोमुखीमसह्यमन्युवेगोत्कम्पितसर्वावयवामनवरतनयनजलवर्षिणी--मुद्दण्डवर्षवाताहतलतामिवोद्वाष्पदीनदृष्ट्या कथं कथमपि तरलिकया विधृतशरीरां महाश्वेतामपश्यत्। दृष्टा च तां नताचो[ख]मस्योदपादि हृदये मा नाम देव्या: कादम्बर्य्या एव किमप्यनिष्टमुत्पन्नं भवेत्, येनेयमीदृशी समवस्था हर्षहे-

---

[क] क्षोभमयप्राणा इति वा पाठः।

[ख] तादृशीमिति वा पाठः।

तावपि मदागमनेऽनुभूयते महाश्वेतया, इत्याशङ्काभिन्नहृदयः उड्डीनैरेव प्राणैः पदे स्खलन्निव पतन्निव मुह्यन्निव उपसृत्योपविश्य च तस्यैव शिलातलस्यैकदेशे प्रोद्वाष्पविषस्सवदनः किमेतदिति तरलिकामपृच्छत्। सा तु तदवस्थाया अपि महाश्वेतायामुखमवलोकितवती।

अथानुपसंहृतमनुप्रवेगापि गद्गदिकावगृह्यमाणकण्ठा महाश्वेतैव प्रत्यवादीत्। महाभाग! किमपि नाबेदयते [क] वराकी, यया दुःखाभिघातैककठिनहृदयया पुनरप्यदुःखश्रवणार्होऽप्यात्मीयदुःखं श्रावितः सैवाहं मन्दभाग्या महाभागजीवितव्यसनिनी निर्लज्जा निर्घृणा निष्करुणा च दुःखमिदं श्रूयतामस्मादहं केयूरकाद्भवदागमनमाकर्ण्य विदीर्णमानसा न मया चित्ररथस्य मनोरथः पूरितो न मदिरायाः प्रार्थना कृतार्थिता नात्मनः समीहितं सम्पादितं न गृहात् प्रत्यागतस्य चन्द्रापीड़स्य प्रियमनुष्ठितं न चापि हृदयवल्लभसमागमनिर्वृता प्रियसखी कादम्बरी वीक्षितेत्युत्पन्नानेकगुणवैराग्या गाढबन्धान् कादम्बरीस्नेहपाशानपि भित्वा पुनः कष्टतरतपश्चरणायात्रैवायाता यावदत्र महाभागस्यैव तुल्यवयसमाकृतिमन्तमुन्मुक्तमिवान्तःकरणेन शून्यशरीरमुत्तरलमुखमुत्प्लुताबद्धलक्ष्यशून्यया दृष्ट्या प्रनष्ट-

---

[क] किमियमावेदयतीति वा पाठः।

मिव किमपीतस्ततो विलोकयन्तं ब्राह्मणयुवानमपश्यम् स तु मामुपसृत्यामन्यदृष्टिरदृष्टपूर्वोऽपि प्रत्यभिजानन्निवासंस्तुतोऽपि परिचित इवासम्भावितोऽप्युपारूढ़प्रौढ़प्रणय इवास्निग्धोऽपि परवानिव प्रेम्णा शून्योऽपि किमपि स्मरन्निव दुःखिताकारोऽपि सुखायमान इव तूष्णीं स्थितोऽपि प्रार्थयमान इव अपृष्टोऽप्यावेदयन्निवात्मीयामवस्थामभिनिन्दन्निव अनुशोचन्निव हृष्यन्निव विषीदन्निव बिभ्यदिव अभिभवन्निव भीत इव आकाङ्क्षन्निवानुस्मरन्निव किमपि विस्मृतनिमेषेण निश्चलस्तब्धपक्ष्मणा चरद्धास्यपूराद्ध्रेण कर्णान्तचुम्बिना विकसितेनेवासुकुलिततारकेण चक्षुषा मत्त इवाविष्ट इव नियुक्त इवापिबन्निवार्पयन्निवान्तर्विशन्निव आकर्षन्निव सुचिरमालोक्याब्रवीत्। सुतनु ! [क] सर्व एव हि जगति जन्मनो वयसा आकृतेर्वा सदृशमाचरन्न वचनीयतामेति तव पुनरेकान्तवामप्रकृतेर्विधी[ख]रिव विसदृशानुष्ठाने कोऽयं प्रयत्नः ? यदियमक्लिष्टमालतीकुसुमसुकुमारामालेव कण्ठप्रणयैकयोग्या तनुरनुचितेनासुना कष्टतमेन तपश्चरणपरिक्लेशेन ग्लानिमुपनीयते, किन्न रूपवयसोरनुरूपेण सुमनोहारिणी लतेव रसाश्रयिणा फलेन संयोज्यते। जातस्य हि रूपगुणविहीन-

---

[क] वरतनु इति वा पाठः।

[ख] विधेरिति वा पाठः।

स्यापि जन्मोपनतानि जीवलोकसुखानि अनुभूय शोभते घरव फलसम्बन्धी तपश्चरणपरिक्लेशः, किं पुनराकृतिमतो जनस्य, तद्दुःखयति मामस्याः स्वभावसरसायास्तनोर्मृणालिन्या इव तुहिनपातः परिक्लेशो यदिवा त्वादृशो जीवलोकसुखेभ्यः पराङ्मुखो तपसा क्लेशयत्यात्मानं, तदा वृथा वहति धनुरधिज्यं कुसुमकार्मुकः निष्कारणमुदेति चन्द्रमाः, व्यर्थो वसन्तमासस्यागमो निष्फलानि कुमुदकुवलयकह्लारकमलाकरविकसितानि, निष्प्रयोजनो जलदसमयारम्भाडम्बरो निरर्थकान्युपवनानि, किं वा ज्योत्स्नया, किं वा लीलासरित्पुलिनैर्मलयानिलेन वेति।

अहन्तु देवस्य पुण्डरीकस्यैव वृत्तान्तादपेतकौतुका सर्वं तथा वदन्तमपि कस्त्वं कुतो वा समायातः किमर्थं वा मामेवमभिदधासि इत्यपृष्ट्वैवान्यतोऽगच्छम्, गत्वा च देवतार्चनकुसुमान्युच्चिन्वन्ती तरलिकामाहूयाब्रुवं तरलिके! कोऽयं युवा ब्राह्मणाकृतिः? कोऽप्यस्य विलोकयतो वदतश्चान्यादृश एवाभिप्रायो मयोपलक्षितः। तन्निवार्य्यतामयं यथा न पुनरत्रागच्छति अथ निवारितो यद्यागमिष्यति, तदावश्यमस्यैवाभद्रकं भविष्यतीति, स तु निवार्य्यमाणोऽपि दुर्निवार्य्यवृत्तेर्मदनहतकस्य दोषैर्भवितव्यतया चानर्थस्य नात्याक्षीदेवानुबन्धम्, अतीतेषु केषुचिद्दिवसेष्वेकदा गाढ़ायां रजन्यामुद्गिरत्स्विव भरेणोद्दीपितं स्मरानलं ज्योत्स्नापूरमिन्दु मयूखेषु लब्ध-

निद्रायां तरलिकायाम् अनवाप्तनिद्रासुखा सन्तापान्निर्गत्यास्मिन्नेव शिलातले विमुक्ताङ्गी कह्लारसुगन्धिना मन्दन्देनाच्छोदानिलेनावीज्यमाना वर्णसुधाकूर्चकैरिव करैर्धवलितदशाशामुखे चन्द्रमसि निहितदृष्टिः अपि, "नामायमेभिरमृतवर्षिभिरखिलजगदाह्लादकारिकरैश्चन्द्रमास्तमपि हृदयवल्लभं मे वर्षेदि,, त्वाशंसाप्रसङ्गेन देवस्य सुगृहीतनाम्नः पुण्डरीकस्य स्मरन्ती कथमभाग्यैर्मे मन्दभाग्यायाः तादृशस्यापि दिव्याकृतेर्महापुरुषस्य नभसोऽवतीर्णस्य भाषितमलीकमुपजातं जातानुकम्पेन वा यथाकथञ्चिज्जीवतु जीवितप्रिया तपस्विनीत्येवमेव समाश्वासितास्मि येन पुनर्दर्शनमेवानेन मे न दत्तं किं करोतु देवः सुगृहीतनामा पुण्डरीको यः परासुरेवोत्क्षिप्य नीतः कपिञ्जलस्तु जीवन्मृतः [क] कथमियता कालेन गतेनापि निष्करुणेन वार्त्तापि मे न सम्पादितेत्येतानि चान्यानि आलापजालानि [ख] यद्दुर्जीवितगृहीता जाग्रत्येवातिष्ठम्।

अथ निभृतपदसञ्चरणमा चरणा[ग]दुत्कण्टकितम् [घ] अनवरतपतितमदनशरशल्यनिकरनिचितमिव शरीरमुद्व-

---

[क] न् गतः इति वा पाठः।

[ख] आलापजातानि यद्दुर्जीविका गृहीता चिन्तयन्तीति वा पाठः।

[ग] चरणसञ्चारमिति वा पाठः।

[घ] उत्कण्टकिततनुमिति वा पाठः।

हन्तम् उद्दिकाग्नि[क]केतकीरजःपटलधवलं प्रथमतरमेव भस्मसात्कृतमिव मदनकृतभुजाग्रेण [ख] कुण्डलीकृतं मृणालिकावलयम् अपर्य्युषितं शासनवलयमिवावश्यं मरणाय सकलजगदप्रतिहतशासनेन कुसुमधन्वना विसर्जितम् उद्भ्रान्तसाध्वसोत्कम्पतरलितया केतकीगर्भसूच्या क्वापरं गम्यते रे हतोऽसि मयेति मन्मथप्रथमसहायस्य चन्द्रमसः करशाखयेव कर्णान्तलग्नया तर्ज्यमानमुद्वेगावर्जितेन नयनसलिलस्रोतसात्मने जलाञ्जलिमिव प्रयच्छन्तम् आश्लेच्छयैव मकरग्रहणाय निर्वर्त्तितस्नानमिव स्वेदाम्भसा न युक्तमेव ते परहृदयमविज्ञायोपगन्तुमिति पदे पदे निवार्य्यमाणमिव गुरुणोरुस्तम्भेनादूरत एव मदालिङ्गनालोकाशया प्रसारितभुजयुगलम् उत्कलिकासहस्रविषमं रागसागरमिव प्रतरन्तम् अनवरप्रवृत्तैराकृष्यमाणमिव पुरस्ताद्दीर्घैर्निश्वासैरुत्क्षिप्यमाणमिव दिङ्मुखप्लावितज्योत्स्नापूरेण रसकशून्यमुच्छुष्काननं मोन्मुक्तं सत्वेन, प्रतिपन्नं कृपणतया, अवधीरितं धैर्य्येण, संगृहीतं तरलतया, विसर्जितं लज्जया, धिक्कृतं धार्ष्ट्येन, दूरीकृतं परलोकभीषया, [ग] अङ्गीकृतं स्वरुच्या, विमुक्तं युक्तायुक्तविवेकेन, सङ्कल्पजन्मन एव केवलस्य

[क] उद्दिकाग्र इति वा पाठः।

[ख] कृतभुजाभुजाग्रेण इति वा पाठः।

[ग] भीत्या इति वा पाठः।

वशे स्थितम्, आविष्टमिव मत्तमिव उन्मादादापतन्तं दूर-तोऽपि दिवसनिर्विशेषेण चन्द्रातपेन विभाव्यमानं तमेव युवानमद्राक्षम्।

दृष्ट्वा च तं तादृशं निस्पृहाप्यात्मनि परं भयमुपगतवती चेतस्यकरवम्, अहो! कष्टतरमापतितं यद्ययमेवमुन्मादादागत्य पाणिनापि स्पृशति मां, तदा मयेदमपुण्यहतकं शरीरमुत्-स्रष्टव्यम्, तच्चिराद्देवस्य पुण्डरीकस्य पुनर्दर्शनप्रत्याशया दुः-खोत्तरमप्यङ्गीकृत्य व्यर्थतामेव यातं प्राणसन्धारणमिति। स त्वेवं चिन्तयन्तीमेव मामुपसृत्याब्रवीत्। "चन्द्रमुखि! हन्तु-मुद्यतो मामयं कुसुमशरसहायश्चन्द्रमाः तच्छरणमागतोऽस्मि रक्ष मामशरणमनाथमार्त्तमप्रतीकाराक्षममात्मना, त्वदायत्तं मे जीवितम्। शरणागतपरित्राणं हि तपस्विनामपि धर्म एव तद्यदि न मामात्मप्रसादेन सम्भावयसि, तदा हतोऽह-माभ्यां कुसुमशरशिशिरकिरणाभ्यामिति।" अहन्तु तदा तदाकर्ण्य झटित्युत्तमाङ्गनिर्गतज्वालेव रोषानलेन निर्द्दह-न्तीव तमुन्मिषद्दाष्पस्फुलिङ्गया दृष्ट्या तदा तर्ज्जनायै-वापादतलादुत्कम्पितगात्रयष्टिराविष्टेवात्मानमप्यचेतयमाना क्रोधावेगरूक्षाक्षरमवदम्। "आः पाप! कथमेवं गदतो मा-मुत्तमाङ्गे न ते निपतितं वज्रं, अवशीर्णा वा सहस्रधा न जिह्वा, विक्लवतां गता वा न वाणी, नष्टानि वा नाक्षराणि। मन्ये च न सन्त्येव तेऽस्मिन् शरीरे सकललोकशुभाशुभ-

साक्षिभूतानि पञ्च महाभूतानि येनैवं, वदन्नाग्निना भस्मीकृतोऽसि, न वायुनापहृतोऽसि, न पयसा प्लावितोऽसि, न धात्र्या रसातले प्रवेशितोऽसि, नापि तत्क्षणमेव आकाशेनात्मनिर्विशेषतां नीतोऽसि, व्यवस्थितेऽस्मिन् लोकत्रये कुतस्त्वमुत्पन्न एवंविधोयस्तिर्य्यग्जातिरिव कामचारी न किञ्चिदपि वेत्सि येनैव खलु हतविधिना समुपदर्शितवदनरागः स्वपक्षपातमात्रप्रवृत्तिरनिरूपितस्थानास्थानवादी शुक इव वक्तुमेवं शिक्षितस्तेनैव किमिति तस्यामेव जातौ न क्षिप्तोऽसि, येनैकान्तहासहेतु वदन् क्रोधमपि नोत्पादितवानसि, तद्दुरुक्ते तेऽहम् संविभागमिमं करोमि येनात्मवचनानुरूपां जातिमापन्नो नैवास्मद्विधां कामयसे" इत्युक्त्वा चन्द्राभिमुखी भूत्वा कृताञ्जलिः पुनरवदम्, "भगवन् ! परमेश्वर ! सकलभुवनचूड़ामणे ! लोकपाल ! यदि मया देवस्य पुण्डरीकस्य दर्शनात् प्रभृति मनसाप्यपरः पुमान् न चिन्तितस्तदानेन सत्यवचनेनायमलीककामी मदुदीरितायामेव जातौ पतत्विति।,, स तु मद्वचनानन्तरमेव न वेद्मि किमसह्यवृत्तेर्मदनज्वरस्य वेगात्, उत सद्योविपाकस्यात्मनोदुष्कृतस्य गौरवात्, आहोस्विन्मद्वचस एव सामर्थ्याद्वा, च्छिन्नमूलस्तरुरिवाचेतनः क्षितावपतत्। अतिक्रान्तजीविते च तस्मिन् कृताक्रन्दात्तत्परिजनतः श्रुतं यथासौ महाभागस्यैव मित्रमित्युक्त्वा त्रपावनम्रमुखी महीं महीयसाश्रुप्लावितेन तूष्णीमेवाप्लावितवती।

चन्द्रापीड़स्तु तत्तदाकर्ण्य कर्णान्तायतलोचनद्वयामील-नमग्नदृष्टेर्भ्रष्टवचनसौष्ठवस्य "भगवति कृतप्रयत्नायामपि भगवत्यामपुण्यभाजास्मिन् जन्मनि न मया प्राप्तं देव्याः कादम्बर्याश्चरणपरिचर्य्यासुखम्, तज्जन्मान्तरेऽपि भगवती सम्पादयित्री भूयादिति,, गदत एव कादम्बरीसमागमाप्राप्तिदुःखेनैव भेदोन्मुखं मुकुलमिव शिलीमुखाघातात् स्वभावसरसं हृदयमस्फुटत्। अथ महाश्वेतायाः शरीरमुत्सृज्य ससम्भ्रमप्रतिपन्नचन्द्रापीड़शरीरायां "भर्त्तृदारिके किं लज्जया पश्य तावदन्यथैव कथमप्यास्ते देवश्चन्द्रापीड़ोऽयं भग्नेवास्य ग्रीवा न मूर्द्धानं धारयति विचालितोऽपि न किञ्चिदपि चेतयते, नान्तःप्रविष्टतारके लोचने समुन्मीलयति, नायं यथा स्थितानां गात्राणामीष्टे, [क] न मनागप्युच्छ्वसित्येव [ख]। हा देव! [ग] चन्द्राकृते! कादम्बरीप्रिय! क्वेदानीं त्वया तया; विना गम्यत इत्युन्मुक्तार्त्तवचसि तरलिकायां, तिर्य्यगाभुग्नचन्द्रापीड़मुखनिहितनिश्चलस्तब्धदृष्टिनिश्चेष्टायामेव महाश्वेतायां, "आः पापे! दुष्टतापसि! किमिदं त्वया कृतम्? अपाकृताखिलजगत्पीड़स्य देवस्य तारापीड़स्य कुलमुत्सादितम्,, अनाथीकृताः प्रजाः,

---

[क] आवरणं करोतीति वा पाठः।

[ख] मनागपि नोच्छ्वसिति हृदयेन; किमचिन्तित एव वज्रपाताभिघात इति वा पाठः।

[ग] चन्द्रापीड! इत्यधिकः पाठः।

सहास्माभिः भग्नाः पन्थानो गुणानाम्, अर्गलिताः ककुभोऽर्थिलोकस्य, इदानीं कस्य वदनमुद्वीचतां लक्ष्मीः ? कोऽवलम्बनं भवतु भूमेः ? कं सेवन्तां सेवकाः ? त्वया विना सम्प्रति व्यसनमेव सेवा वृत्ता, वृत्तं समानशीलत्वम्, अस्तमिताश्रान्तपरिजनश्लाघा, लघूकृतोऽभृत्यादरो, दूरङ्गतानि प्रियालपितानि, समाप्ता[क]परित्यागकथा, कथं कथावशेषीभूतोऽसि ? भूतपूर्व्वाः, कमुपयान्तु साम्प्रतं प्रजाः ? किं सम्प्रति समाधानं साधूनाम् ? अधुना धुर्धरे त्वयि विपन्ने कः समुद्वहतु देवेन तारापीड़ेनोढ़ां धुरम्? धीरस्यापि ते कथं कातरस्येव शुचा भिन्नं शरीरं ? [ख] दयालोरपि केयमद्येदृशी निर्द्दयता ? जातास्मासु ते, देव ! प्रसीद, सकृदप्याज्ञापय, अवधेहि भक्तजनाभ्यर्थनां, प्रतिपद्यस्व प्राणान्, न त्वया विना क्षणमपि प्राणिति पुत्रवत्सलो देवस्तारापीड़ो, न देवी विलासवती, नार्य्यशुकनासो, न मनोरमा, न राजानो, नापि प्रजाः, परित्यज्य च सर्वानेकाकी क्व प्रस्थितोऽसि ? कुतस्तवेयमेकपद एवेदृशी निष्ठुरता जाता? क्व सा ? गुरुजनस्योपरि भक्तिर्यदेवमनवेक्ष्य प्रयासीत्युक्तवत्यवनितलविमुक्तात्मन्यारटति परिजने तदाकर्ण्योत्कर्ण "हाहा किमेत,,दित्य द्भ्रान्ते[ग]राजपुत्रलोके समुल्ललितोत्पक्ष्मनयनद-

---

[क] पर्य्याप्ता परित्यागवार्त्तेति वा पाठः ।

[ख] हृदयमिति वा पाठः ।

[ग] उद्भ्रान्तमनसि समापततीति वा पाठः ।

शिनि चन्द्रापीड़वदननिवेशितदृशि दीनतरहेषारवकृताक्रन्दे शुचेव पर्य्यायोत्क्षिप्तखुरचतुष्काहतक्ष्मातले मुहुर्मुहुरात्ममोन्मोचनायेवाच्छोटित[क]खरखलीनकनकशृङ्खलयोगे तुरङ्गतां मुमुञ्चतीवेन्द्रायुधे, पत्रलेखानिवेदितचन्द्रापीड़ागमना चन्द्रोदयोल्लासिनी वेलेव महोदधेः समकरध्वजा व्याजीकृत्य कादम्बरीदर्शनं, मातापित्रोः पुरः, प्रतिपन्नशृङ्गारवशाभरणारणन्नूपुरेण मुखरमेखलादाम्ना रम्योज्वलवाससा कल्पितानङ्गबलविभ्रमेण गृहीतसुरभिमाल्यानुलेपनपटवासाद्युपकरणेन नातिबहुना परिजनेनानुगम्यमाना पुरःकेयूरकेणापदिश्यमानमार्गा पत्रलेखाहस्तावलम्बिनी मदलेखया सह कृतालापा "मदलेखे! पत्रलेखा कथयत्यन्यत् अहं पुनस्तस्यैकान्तनिष्ठुरहृदयस्य शठमतेर्नृशंसस्यागमनमेव न श्रद्दधे किं न स्मरसि? तत्तस्य मदवस्थामश्रद्दधानस्य हिमगृहके महिमर्शाय दुर्विदग्धबुद्धेर्वक्रभाषितम्, यत्र सस्मितमालोकितया त्वयैवास्मै सुतरामेव संशयकारि प्रत्युत्तरं दत्तम्, तदसौ मरणेऽपि मे न श्रद्दधात्येवेमामवस्थाम्। अन्यच्च यदि मदर्थे दुःखमेवमियमनुभवतीत्येतदस्य चेतस्यभविष्यत् तदा तथा गमनमेव नाकरिष्यत्। तत्र गतोऽप्यसौ यत् किमपि वक्तव्यस्त्वयैव मया पुनर्दृष्टो नालपितव्यो, नोपा-

---

[क] उत्पाटितेति वा पाठः।

लब्धव्यो, न चरणपतितस्याप्यनुनयो ग्राह्यो, नाहं प्रियसख्या प्रसादनीयेति" अभिदधानैवाचेतितागमनखेदा[क]चन्द्रापीडदर्शनायोत्ताम्यन्ती तत्रैवाजगाम।

आगत्य चोद्धृतामृतमिव रत्नाकरम्, इन्दुविरहितमिव निशाप्रबन्धम्, अस्तमिततारागणमिव गगनम्, अवचितफलकुसुमशोभमिवोपवनम्, उत्खातकर्णिकमिव कमलम्, उत्खण्डिताङ्कुरमिव मृणालम्, अवलुप्ततरलमणिमिव हारम्, उन्मुक्तजीवितं चन्द्रापीडमद्राक्षीत्। दृष्ट्वा च तं सहसा किमिदमित्यधोमुखी धरातलमुपयान्ती कथं कथमपि मुक्ताक्रन्दया मदलेखयाधार्यत कादम्बरी, पत्रलेखा पुनरुन्मुच्य कादम्बरीकरतलमचेतना क्षितिमुपागमत्। चिराच्च लब्धसंज्ञा कादम्बरी, तथैव मूढ़ेव, निश्चलस्तब्धदृष्टिराविष्टेव, स्तम्भितेव, निष्प्रयत्ना निश्वसितुमपि विस्मृता विस्मितेवान्तर्मन्युभरनिस्पन्देव, चन्द्रापीड़वदनसन्दानिताक्षी, श्यामारुणानना, ग्रहोपरक्तेन्दुविम्बेव पौर्णमासी निशा, निशितपरशुपातोत्कम्पिनी लतेव वेपिताधरकिसलया, लिखितेव स्त्रीस्वभावविरुद्धेन चेतसा तस्थौ। तथा स्थितान्तु ताम् उन्मुक्तार्त्तनादा सपादपतनं मदलेखाब्रवीत्। "प्रियसखि! प्रसीदोत्सृजैनं मन्युसम्भारम्, अनारटन्ती वास्पमोक्षेणामुच्यमानेऽ-

---

[क] अत्र तु कादम्बरीत्यधिकः पाठः।

स्मिन्नियतमपि अतिजलभरभारोत्पीड़ितं तड़ागमिव मृदु-सरसं सहस्रधा स्फुटति ते हृदयमिदमिति अपेक्षस्व देवीं मदिरां देवं चित्ररथञ्च त्वया विना कुलद्वयमपि नास्तीति” उक्तवतीं मदलेखां कादम्बरी विहस्य प्रत्यवादीत्।

अय्युन्मत्तिके, कुतोऽस्य मे वज्रसारकठिनस्य हृदयस्य स्फुटनम्? आलोक्यैव यन्न सहस्रधा स्फुटितम्। अपि च या जीवति तस्याः सर्वमिदं माता पिता बन्धुरात्मा सख्यः परि-जन इति मया पुनर्म्रियमाणया जीवितभूतं कथमपि समा-सादितमिदं प्रियतमशरीरं यज्जीवदजीवद्वा सम्भोगेनानु-मरणेन वा द्विधापि सर्वदुःखानामेवोपशान्तये, तत् कि-मिति? देवेनागच्छता मदर्थं प्राणांश्चोत्सृजता सुदूरमारो-पितं, गुरुताञ्च नीतम्, आत्मानमश्रुपातमात्रकेण लघूकृत्य पातयामि, कथञ्च स्वर्गगमनोन्मुखस्य देवस्य रुदितेनामङ्गलं करोमि कथं वा पादधूलिरिव पादावनुगन्तुमुद्यता हर्षस्थाने रोदिमि? किं मे दुःखम्? अधुना तु मे सर्वदुःखान्येव दूरी-भूतानि किमद्यापि रुद्यते यदर्थं कुलक्रमो न गणितो, गुरवो नापेक्षिताः, धर्मो नानुरुद्धो, जनापवादान्नभीतं, लज्जा परि-त्यक्ता, मदनोपचारैः सखीजनः खेदितो, दुःखिता मे प्रिय-सखी महाश्वेता, तस्याः कृते प्रतिज्ञातमप्यन्यथा जातं, ममे-त्येतदपि चेतसि न कृतम्, तस्मिन् मदर्थमेवोज्झितप्राणे प्राणे-श्वरे प्राणान् प्रतिपालयन्ती, त्वयैवं किमुक्ताहम्, अस्मिंस्तु

समये मरणमेव श्रेयो, न जीवितं मे, सर्वप्रकारलज्जाकरन्तु जीवितं न पुनर्मरणम्। तद्यदि ममोपरि स्नेहः करोषि, वा मत्प्रियहितं तन्मदीयमप्यात्मनि स्नेहमारोप्य तथा कर्त्तव्यं यथा न तातो नाम्बा वा मच्छोकादात्मानं परित्यजतः। यथा च मयि वाञ्छितं मनोरथं त्वयि पूरयतः येन परलोकगताया अपि मे जलाञ्जलिदायी पुत्रको भविष्यति। यथा वापि सखीजनः परिजनो वा न स्मरति शून्यं वा मद्भवनमालोक्य न दिशो गृह्णाति तथा करिष्यसि। पुत्रकस्य मे भवनाङ्गने सहकारपोतकस्य त्वया मच्चितयैव माधवीलतया सहोद्वाहमङ्गलं स्वयमेव निर्वर्त्तनीयम्, मच्चरणतललालितस्य बालाशोकविटपस्य कर्णपूरार्थमपि न पल्लवलवः खण्डनीयो, मत्स्वर्द्धितायामाल्लत्याः कुसुमानि देवार्चनायैवोच्चेयानि। वासभवने मे शिरोभागनिहितः कामदेवपटः पाटनीयः। स्वयं रोपिताश्चूतवृक्षका मे यथा फलं गृह्णन्ति, तथा संवर्द्धनीयाः। पञ्जरबन्धदुःखाद्वराको कालिन्दी सारिका शुकश्च परिहासो द्वावपि मोक्तव्यौ, मदङ्कशायिनी नकुलिका स्वाङ्क एव शाययितव्या, पुत्रको मे बालहरिणस्तरलकः क्वचित्तपोवने समर्पणीयः। पाणितलसंवर्द्धितं जीवञ्जीवकमिथुनं यथाक्रीड़ापर्वतके न विपद्यते तथा कार्य्यम्। पादसहचारी हंसको यथा न हन्यते केनचित्तथा विधेयम्। अपरिचितगृहवसतिस्तपस्विनी बलाद्धृता वनमानुषिका वन एवोत्-

स्रष्टव्या। क्रीड़ापर्वतकः कस्मैचिदुपशान्ताय तपस्विने प्रतिपादयितव्यः। शरीरोपकरणानि मे सर्व्वाण्येव ब्राह्मणसात् कर्त्तव्यानि वीणापि पुनरात्मन एवाङ्कप्रणयिनी कर्त्तव्या अपरमपि यत्ते रोचते तत् स्वीकर्त्तव्यम्। अहं पुनरिममसृतकिरणरश्मिभिरनाश्यानचन्दनचर्चाभिरनवरतधारागृहासारसेकैरनेकसन्तानतान [क] तुहिनकरकिरणनिकरतारकिततारहारार्पणैर्मणिदर्पणप्रणयेन मलयजजलार्द्रपद्मिनीपत्रास्तरणेन सरसविसकिसलयस्रस्तरैरकठोरमृणालिनीतल्प[ख]कल्पनवीथिकाशकमलकुमुदकुवलयशयनैश्च दग्धशेषम् उज्ज्वलितचितानले ज्वालामालिनि देवस्य चन्द्रापीड़स्य कण्ठलग्ना निर्व्वापयाम्यात्मानम्। इत्यभिदधाना कृतमरणानुबन्धा कृतविधारणानुबन्धां मदलेखामवधिव्यापसृत्य च महाश्वेतां कण्ठे गृहीत्वा निर्व्विकारवदनैव पुनरवादीत्।

प्रियसखि! तवास्ति कीदृश्यपि प्रत्याशा ययानुरागपरवशा पुनः समागमाकाङ्क्षिणी क्षणे क्षणे मरणादधिकानि दुःखानि अनुभवन्ती जीवितमलज्जाकरमनुशोच्यमनुपहसनीयमवाच्यं धारयसि। मम पुनः सर्वतो हताशायाः सापि नास्ति तदामन्त्रये प्रियसखीं पुनर्जन्मान्तरे समागमायेत्यभिधाय उत्सुज्य-

---

[क] अनन्तसन्तानतुहिनकरेति वा पाठः।

[ख] प्रस्तरैरकरयेन मृणाललतातल्पेति वा पाठः।

नानुकूलककेसरोद्भासिन्यसमसाध्वसानिलाहतोत्कम्पोत्तरङ्ग-मानानन्दवाष्पवेगोर्म्मितरलसङ्गलत्स्वेदमकरन्दविन्दुनिस्यन्दिनी मुकुलायमाननयनकुमुदा कुमुदिनीव चन्द्रापीड़चन्द्रास्तमयविधुरा तदवस्थेऽपि हृदयवल्लभे समागमसुखमिवानुभवन्ती सरभसमुपरि पर्य्यस्तचिकुरहस्तोद्वान्तकुसुमनिवहेन मूर्द्ध्नी अर्च्चयित्वा चन्द्रापीड़चरणौ स्रवत्स्वेदामृतार्द्राभ्यां हस्ताभ्यामुत्क्षिप्याङ्केन धृतवती। अथ तत्करस्पर्शेन समुच्छ्वसत इव चन्द्रापीड़देहात् झटिति तुहिनमयमिव तं सकलमेव प्रदेशं कुर्वदव्यक्तरूपं किमपि चन्द्रधवलं ज्योतिरिवोज्जगाम। अनन्तरञ्चान्तरीक्षे क्षरन्तीवामृतशरीरिणी वागश्रूयत वत्से! "महाश्वेते! पुनरपि त्वं मयैव समाश्वासिता वर्त्तसे पुण्डरीकशरीरं मल्लोके मत्तेजसाप्याय्यमानम्, अविनाशि भूयस्त्वत्समागमाय तिष्ठत्येव इदमपरं मत्तेजोमयं स्वतएवाविनाशि विशेषतोऽमुना कादम्बरीकरस्पर्शेनाप्याय्यमानं चन्द्रापीड़स्य शरीरं शापदोषादिमुक्तमपि आत्मना क्वतशरीरसंक्रान्तेर्योगिन इव शरीरमत्रैव भवत्योः सम्प्रत्ययार्थमाशापक्षयादास्तां नैतदपि संस्कार्य्यम् उदके वा क्षेप्तव्यमुत्स्रष्टव्यं वा प्रयत्नतः परिपालनीयमासमागमप्राप्तेरिति"।

तान्तु श्रुत्वा किमेतदिति विस्मयाक्षिप्तहृदयाः सर्वा एव गगनतलनिवेशितनिर्निमेषदृष्टयो लिखिता इव पत्रलेखावर्ज्जमतिष्ठन्। पत्रलेखा तु तेन तस्य ज्योतिषस्तुषार-

शीतलेनाह्लादहेतुना स्पर्शेन लब्धसंज्ञोत्थायाविष्टेव वेगाद्धाविला परिवर्द्धकहस्तादाच्छिद्येन्द्रायुधमस्मद्विधा तु यथा त्वं पुनरेवमेकाकी विना वाहनं दूरं प्रस्थिते देवे क्षणमपि न तिष्ठन् शोभसे इत्यभिदधाना तेनैवेन्द्रायुधेन सहात्मानमच्छोदसरस्यक्षिपत्। अथ तयोर्निमज्जनसमयानन्तरमेव तस्मात् सरःसलिलात् शैवलोत्करमिव शिरसि लग्नं गलज्जलबिन्दुसन्दोहम्, [क] अयथातथालम्बिदीर्घशिखं मुखोपरि परस्परासक्तैरसंस्कारमलिनतया चोपसूचितचिरोर्द्ध्वबन्धं जटाकलापमुद्वहन् जलार्द्रदेहासक्तेन बिसतन्तुमयेनेव ब्रह्मसूत्रेण समुद्भासमानोऽम्लानारविन्दिनीपलाशपृष्ठपाण्डुना जीर्णमन्दारवल्कलेनाबद्धपरिकरः करेणाननावरोधिनीर्जटाः समुत्सारयन् अश्रुजलच्छलेनाच्छोदसरःसलिलमिवान्तःप्रविष्टमाताम्रायताभ्यां लोचनाभ्यामुद्वमन् उद्विग्नाकृतिस्तापसकुमारः सहसैवोदतिष्ठत्। उत्थाय च दूरत एवोद्दामवाष्पजलनिरोधपर्य्याकुलयाप्यावद्धलक्षया दृष्ट्या विलोकयन्तीं महाश्वेतामुपसृत्य शोकगद्गदमवादीत्। गन्धर्वराजपुत्रि! जन्मान्तरगतः प्रत्यभिज्ञायतेऽयं जनो न वेति?

सा त्वेवं दृष्ट्वा शोकानन्दमध्यवर्त्तिनी ससम्भ्रमाकुलमुत्थाय कृतप्रणामा प्रत्यवादीत्। भगवन् कपिञ्जल! एवंविधाहमपु-

---

[क] मयमिव इति वा पाठः।

खवती, या त्वयाप्यात्मनः कारणादेवं सम्भाविता [क] अथवा सुक्तैवेदृशी मय्यनात्मज्ञायां सम्भावना, याहमेकान्त एव व्यामोहहता स्वर्गं गतेऽपि देवे पुण्डरीके जीवामि, तत् कथय केनासावुत्क्षिप्य नीतः? किमर्थं वा नीतः? किंवास्य वृत्तं? क्व वा वर्त्तते? किं वा तवोपजातं? येनैतावता कालेन वार्त्तामपि न दत्तवानसि, कुतो वा त्वमेकाकी देवेन विनैवागतोऽसीति? स त्वेवं पृष्टो महाश्वेतया विस्मयोन्मुखेन कादम्बरीपरिजनेन चन्द्रापीड़ानुगामिना च राजपुत्रलोकेन उपर्य्युपरि पातिना वीक्ष्यमाणः प्रत्यवादीत्।

श्रूयतां गन्धर्वराजपुत्रि! तथा कृतार्त्तप्रलापामपि त्वामहमेकाकिनीमुत्सृज्य वयस्यस्नेहादाबद्धपरिकरः "क्व मे प्रियसुहृदमपहृत्य गच्छसि" इत्यभिधाय पुरुषं तमनुबध्नन् जवेन: उदपतम्, स तु मे प्रतिवचनमदत्त्वैव गीर्वाणवर्त्मनि विस्मयोत्फुल्लनयनैरालोक्यमानो वैमानिकैरवगुण्ठितमुखीभिरुन्मुच्यमानगगनमार्गो दिव्याङ्गनाभिरभिसारिकाभिरालोलतारकेक्षणाभिरितस्ततः प्रणम्यमानः तारकाभिरम्बरसरः-कुमुदाकरं तारकागणमतिक्रम्य चन्द्राभिराममसकललोकं चन्द्रलोकमागमत्। तत्र च महोदयाख्यायां सभाया-

---

[क] त्वयेत्यादि सम्भावितपर्य्यन्त पाठ परिवर्त्तेन भवन्तमपि न प्रत्यभिजानामीति पुस्तकान्तरे धृतः पाठः।

मिन्दुकान्तमये महति पर्य्यङ्के तत् पुण्डरीकशरीरं स्थापयित्वा मामवादीत्। कपिञ्जल! जानीहि मां चन्द्रमसम्, अहं खलूदयगतो जगदनुग्रहाय स्वव्यापारमनुतिष्ठन्ननेन ते प्रियवयस्येन कामापराधाज्जीवितं समुत्सृजता निरपराधः संशप्तः, "दुरात्मन्निन्दुहतक! यथाहं त्वया करैः सन्तापितः, उत्पन्नानुरागोऽप्राप्तहृदयवल्लभासमागमसुखः प्राणैर्वियोजितस्तथा त्वमपि कर्म्मभूमिभूतेऽस्मिन् भारते वर्षे जन्मनि जन्मन्येवमेव प्राप्तानुरागोऽप्राप्तसमागमसुखः तीव्रतमां हृदयवेदनामनुभूय जीवितमुत्स्रक्ष्यसीति"। अहन्तु तेनास्य शापहुतभुजा धगित्युद्दीपित इव निरागाः "किमनेनात्मदोषानुबन्धेन निर्विवेकबुद्धिना शप्तोऽस्मीत्युत्पन्नकोप स्त्वमपि मत्तुल्यसुखदुःख एव भविष्यसीति" प्रतिशापमस्मै प्रायच्छम्। अपगतामर्षश्च विवेकमागतया बुद्ध्या विमृशन्महाश्वेताव्यतिकरमस्याधिगतवानस्मि। वत्सा तु महाश्वेता मन्मयूखसम्भवादप्सरसः कुलाल्लब्धजन्मनि गौर्य्यामुत्पन्ना तया चायं भर्त्ता स्वयं वृतोऽनेन च [क] सम्प्रति स्वयंकृतादेव शापदोषान्मया सह मर्त्यलोके वारद्वयमवश्यमुत्पत्तव्यम्, अन्यथा जन्मनि जन्मनीत्येषा वीप्सैव न चरितार्था भवति। तद्यावदयं शापदोषोव्यपैति तावदस्या-

[क] चायं वृतो भर्त्तानेनेति वा पाठः।

त्मना विरहितस्य शरीरस्य मा विनाशोऽभूदिति मयेदमुत्क्षिप्यानीतम्। वत्सा च महाश्वेता समाश्वासिता। तदिदमत्र मत्तेजसाप्यायितमाशापत्त्रयात् स्थितम्, अधुना त्वं गत्वा वृत्तान्तमिमं, श्वेतकेतवे निवेदय, महाप्रभावोऽसौ कदाचिदत्र प्रतिक्रियामपि काञ्चित् करोतीत्युक्त्वा मां व्यसर्ज्जयत्।

अहन्तु विनाकृतो वयस्येन शोकावेशान्धो गीर्व्वाणवर्त्मना धावन्नन्यतममतिक्रोधनं वैमानिकमलङ्घ्यं, स तु मां दहन्निव रोषहुतभुजा भ्रुकुटीविकरालेन चक्षुषा निरीक्ष्याब्रवीत्। दुरात्मन्! मिथ्यातपोबलगर्व्वित! यदेवमतिविस्तीर्णे गगनमार्गे त्वयाहम् उद्दामप्रचारिणा तुरङ्गमेणेवोल्लङ्घितस्तस्मात् तुरङ्गम एव भूत्वा मर्त्यलोकेऽवतर। अहन्तु तमुद्बाष्पपक्ष्मा कृताञ्जलिरवदम्। भगवन्! वयस्यशोकान्धेन त्वं मयोल्लङ्घितो नावज्ञानात् तत् प्रसीद इमं शापमपसंहरेति। सतु मां पुनरवादीत्। दत्त एव शापः सम्प्रति मया नान्यथा भवितुमर्हति तदेतत्ते करोमि कियन्तमपि कालं यस्यैव वाह्यतामुपयास्यसि तस्यैवावसाने स्नात्वा विगतशापो भविष्यसि एवमुक्तस्तु पुनरहमवदं भगवन् यद्येवं ततो विज्ञापयामि तेनापि मे प्रियवयस्येन [क] चन्द्रमसा सह शापदोषान्मर्त्यलोक एवोत्पत्तव्यं तदेतावन्तमपि भगवान् प्रसादं

[क] पुण्डरीकेनेत्यधिकः पाठः।

करोतु मे दिव्येन चक्षुषावलोक्य यथा तुरङ्गमत्वेऽपि मे तेनैव सहावियोगेन कालो यायादिति। सत्वेव मुक्ती मुहूर्त्त-मिव ध्यात्वा पुनर्मामवादीत्। अन्यया स्नेहलतया वै ममार्द्रिवं हृदयं तदालोकितं मयोज्ज्वयिन्यामपत्यस्य हेतो-स्तपस्यतः तारापीड़नाम्नो राज्ञः सनिदर्शनं चन्द्रमसा तनय-त्वमुपगन्तव्यं वयस्येनापि ते पुण्डरीकेण तन्मन्त्रिण एव शुकनासनाम्न स्त्वमपि तस्यैव परमोपकारिणश्चन्द्रात्मनो राजपुत्रस्य वाहनतामुपयास्यसीति। अहन्तु तद्वचनानन्तर-मेवाधःस्थिते महोदधौ न्यपतम्। तस्माच्च तुरङ्गीभूयो-दतिष्ठम्। संज्ञा तु मे तुरङ्गमत्वेऽपि नैवापयाता येनायं मयास्यैवार्थस्य कृते किन्नरमिथुनानुसारी भूमिमेतामानीत-स्तदेष चन्द्रमसोऽवतारश्चन्द्रापीड़ः योऽप्यसौ प्राक्तनादेवानुराग संस्कारादभिलषंस्त्वया अजानन्त्या शापाग्निना निर्दग्धः सोऽपि मे वयस्यस्य पुण्डरीकस्यावतार इति।

तत् श्रुत्वा महाश्वेता, हा देव! पुण्डरीक! जन्मान्तरे-ष्वविस्मृतमदनुराग! मत्प्रतिबद्धजीवित! मच्छरण! मन्मुखा-वलोकिन्! मन्मयसकलजीवलोक! कथं लोकान्तरगतस्यापि तेऽहमेव राक्षसी विनाशायोपजाता, दग्धप्रजापतेरियदेव मन्निर्माणे दीर्घजीवितप्रदाने च प्रयोजनं निष्पन्नं यत् पुनः पुनस्ते व्यापादनं स्वयं हत्वा पापकारिणी कमुपालभे, कं ब्रवीमि, कस्मै कथयामि, कमाक्रन्दामि, कमुपयामि, शरणं

कोवा करोतु मयि दयां, याचेऽहमात्मनैवापराद्धाधुना, देव ! प्रसीद, कुरु दयां, देहि मे प्रतिवचनम्, इत्येतान्यक्षराणि उच्चारयन्त्यपि लज्जे, मन्ये च तवाप्युत्पन्नमेव मयि मन्दभाग्यायां वैराग्यं, येनैवमपि विलपन्त्या न प्रतिवचनं मे ददासि। हा हतास्मि ! अनेनैवात्मनो जीवितस्योपर्य्यनिर्वेदना इत्युन्मुक्तार्त्तनादा सोरस्ताड़नमवनावात्मानमपातयत्।

कपिञ्जलस्तु तथा कृतार्त्तप्रलापां तां सानुकम्पमवादीत्, गन्धर्व्वराजपुत्रि कस्तवात्र दोषो ? येनैवमनिन्दनीयमपि आत्मानं निन्दापदैर्योजयसि, को वाधुना सुखमात्रकेऽनुभवनीये दुःखस्यावसरः यदेवं शुचात्मानं व्यापादयसि यदसह्यतरं तत्तु त्वया निर्व्यूढ़ं दृढ़ीकृतं हृदयम्। यथा वयस्यस्यास्यैव [क] समागमप्रत्याशया यथा वा शापदोषादिदमुपनतं भवत्योर्द्वयोरपि दुःखं, मया तथा कथितम्। अपि च चन्द्रमसोऽपि भारती भवतीभ्यां श्रुतैव तन्मुच्यतामयमात्मनो वयस्यस्य वा श्रेयस्करः शोकानुबन्धावेगो द्वयोरपि श्रेयसे यदेव भवत्याङ्गीकृतं, तदेवानुबध्यतां व्रतपरिग्रहोचितं तपः। तपसोहि सम्यक्कृतस्य नास्त्यसाध्यं नाम किञ्चित्। देव्या हि गौर्य्या तपसः प्रभावादतिदुरासदं स्मरारेरपि यावदासादितं देहार्द्धपदम्। एवं त्वमपि अचिरात्तथैव मे वयस्यस्याङ्के

[क] दृढ़ीकृत हृदयास्यैव इति वा पाठः।

निजतपःप्रभावात् पदसवाप्स्यसीति महाश्वेतां पर्य्यबोधयत्।

उपशान्तमन्युवेगायाञ्च महाश्वेतायां विषसदीनमुखी कादम्बरी कपिञ्जलमप्राक्षीत्। भगवन्! कपिञ्जल! पत्रलेखया त्वया चास्मिन् सरसि जलप्रवेशः कृतस्तत् किं तस्याः वृत्तम्? इत्यावेदनेन प्रसादं करोतु भगवानिति। स तु प्रत्यवादीत्। भगवति! सलिलपातानन्तरं न कश्चिदपि वृत्तान्तो मया ज्ञातः तदधुना क्व चन्द्रात्मकस्य चन्द्रापीड़स्यात्मा पुण्डरीकात्मकस्य वैशम्पायनस्य जन्म, किं वास्याः पत्रलेखायाः वृत्तमिति सर्व्वस्यैवास्य वृत्तान्तस्यावगमाय गतोऽहं प्रत्यक्षलोकत्रयस्य तातस्य श्वेतकेतोः पादमूलमित्यभिदधान एव गगनमुदपतत्।

अथ गते तस्मिन् विस्मयान्तरितशोकवृत्तान्ते चन्द्रापीड़मालोक्यालोक्य गलितनयनपयसि यथास्थानमपसृत्यापसृत्य स्थितवति सपरिजने राजपुत्रलोके कादम्बरी महाश्वेतामवादीत्। प्रियसखि! तुल्यदुःखतां कुर्वता तेन चिरात् खल्वद्य सुखं स्थापितास्मि भगवता विधात्रा, अद्य मे शिरः समुद्घाटितम् अद्य वदनं ते दर्शयन्ती प्रियसखीति चाभाषमाणा न लज्जे, तवाप्यहमद्यैव प्रियसखी जाता, सम्प्रति मरणं जीवितं वा न दुःखाय मे, तत् कोऽपरः प्रष्टव्यो मया केन वापरेणोपदेष्टव्यम्। तदेवं गते यत् करणीयं, तदुप-

दिशतु मे प्रियसखी, नाहमात्मना किञ्चिदपि वेद्मि किं कृत्वा श्रेयः इत्युक्तवतीं कादम्बरीं महाश्वेता प्रत्यवादीत्। प्रियसखि! किमत्र प्रश्नेनोपदेशेन वा यदेवेयमनतिक्रमणीया प्रियतमसमागमप्रत्याशा कारयति तदेव करणीयं पुण्डरीकवृत्तान्तस्त्वद्य कपिञ्जलहस्तात् स्फुटीभूतः, तदा तु वाङ्मात्रकेणैव समाश्वासितया मया न पारितमन्यत् किञ्चिदपि कर्त्तुं तत् त्वमन्यत् किं करोषि, यस्याः प्रत्ययस्थानमिदं चन्द्रापीड़शरीरमङ्क एवास्ते तदन्यथात्वेऽस्य करणीया चिन्ता यावत् पुनरिदमविनाशि तावदस्यानुवृत्तिं मुक्त्वा किमन्यत् करणीयम् अप्रत्यक्षाणां हि देवतानां मृदश्मकाष्ठमयाः प्रतिमाः श्रेयसे पूजानमस्कारेणोपचर्य्यन्ते किं पुनः प्रत्यक्षदेवस्य चन्द्रस्य चन्द्रापीड़नामान्तरितस्य चन्द्रमसो मूर्त्तिरनाराधितप्रपन्ना।

इत्युक्तवत्यां महाश्वेतायां तूष्णीमेवोत्थाय तरलिकया मदलेखया च सहोत्थाप्य तामखेदार्हां चन्द्रापीड़तनुमन्यतरस्मिन् शीतवातातपवर्षादिद्वन्द्वदोषरहिते शिलातले शनैः शनैरखेदयन्ती स्थापयित्वा अपनीतशृङ्गारवेशग्रहणा मङ्गलमात्रकावस्थापितैककरभूषणा स्नाता शुचिर्भूत्वा परिधाय धौतशुचिनी दुकूले प्रक्षाल्य पुनः पुनर्गाढ़लग्नमधरकिसलये ताम्बूलरागमुपर्य्युपरि निमीलितागतवाष्पवेगोत्तरललोचना अन्यदेव किञ्चिदप्यचिन्तितमनुत्प्रेक्षितमशिक्षित-

मभ्यस्तमनुचितमपूर्वं बलाद्विलोभप्रकृतिनाकार्य्यपण्डितेन दग्धवेधसा कार्य्यमाणा यान्येव सुरभिकुसुमधूपानुलेपनादीनि सुरतोपभोगायानीतानि, तैरेव देवतोचितामपचितिं सम्पाद्य चन्द्रापीड़मूर्त्तौ मूर्त्तिमतीव शोकवृत्तिरार्त्तरूपा रूपान्तरमिव तत्क्षणेनैवोपगता गतजीवितेव शून्यमुखी सुखावलोकिनी चन्द्रापीड़स्य पीड़ोत्पीड़ितहृदयापि रक्षन्ती वाष्पमोक्षमुद्दामवृत्तैः शोकादपि मरणादपि च कष्टतमामवस्थामनुभवन्ती तथैवाङ्के समारोपितचन्द्रापीड़चरणद्वया दूरागमनखिन्नेनापि बुभुक्षितेनाप्यप्रतिपन्नस्नानपानभोजनेन मुक्तात्मना राजपुत्रलोकेन स्वपरिजनेन च सह निराहारा तं दिवसमक्षपयत्।

यथैव च दिवसमशेषं तथैव तां गम्भीरमेघोपरोधभीमामनवरतगर्ज्जितध्वानकम्पितहृदयबन्धामाबद्धकलकलापिकेकाकोलाहलाकुलितचेतोवृत्तिमुद्दामदर्दुरारटितवधिरितश्रोत्रेन्द्रियां दुर्द्दर्शतड़ित्सम्पातपीड़ितदृशमशनिनिर्ह्रादतर्ज्जनापादितभुवनज्वरां ज्वलत् खद्योतनिवहजर्ज्जरिततरुगहनतलतमःप्रसरभीषणतमां तपस्विनीमपि दूरीकृत्यावलासहभुवं भीतिम् अपरित्यक्तचन्द्रापीड़चरणा अचेतितशरीरखेदा जाग्रती समुपविष्टेव क्षपां क्षणमिव क्षपितवती। प्रातश्च तदुन्मीलितं चित्रमिव चन्द्रापीड़शरीरमालोक्य शनैः शनैः पाणिना स्पृशन्ती पार्श्वस्थितां मदलेखाम् आभाष्य इदमब्र-

वीत्। मदलेखे! न वेद्मि किं रुचेर्वशात् उत निर्विकारतयैवेति अहन्तु तादृशीमेव इमां तनुम् आलोकयामि तत् त्वमपि तावत् आदरतो निरूपयेति। एवमुक्ता मदलेखा तां प्रत्यवादीत् प्रियसखि! किमत्र निरूपणीयमन्तरात्मनो विरहाद्व्यापारमात्रमस्योपरतमन्यत्तादृशमेवेदं सकोशशतपत्राकारं मनागप्यनुन्मुक्तं श्रिया वदनं तथैवायं संवेल्लिताग्रभागः स्निग्धः कुन्तलकलापस्तथैवेयमिन्दुशकलानुकारिणः कान्तिर्ललाटस्य तादृशमेवेदमामुकुलितनीलोत्पलद्युतिहारि कर्णान्तायतं लोचनयुगलं तथैव चेमावहसतोपि विहसिताविवोद्भासितकपोलमूलौ सृक्कोपान्तौ तादृश एव चायमम्लानकिशलयच्छविरधरस्तथैव चेदं विद्रुमालोहितनखाङ्गुलीतलं पाणिपादं तदेवेदमविगलितसहजलावण्यसौकुमार्य्याणां सौष्ठवमङ्गानां लावण्यम्, तत् सत्यासौ भारती कपिञ्जलावेदितस्य शापवृत्तान्त इति सम्भावयामीत्युक्तवत्यां मदलेखायामानन्दनिर्भरा महाश्वेतायै दर्शयित्वा चन्द्रापीड़चरणतलनिबद्धजीविताय राजपुत्रलोकायापि दर्शितवती।

स तु विस्मयोत्फुल्ललोचनः सर्व एवावनितलनिवेशितशिराः प्रणम्य चन्द्रापीड़चरणौ रचिताञ्जलिर्जानुद्वयेनावनौ स्थित्वा कादम्बरीं व्यजिज्ञपत्। देवि! त्वत्प्रभावोऽयं, यदेवमस्मानपुण्यवतः परित्यज्य दूरं गतस्यापि देवस्य तथैवेदं प्रसन्नप्रभमिन्दुमण्डलद्युतिहारि वीक्ष्यते वदनम् तथैव चेदं

चरणमविकारि पुरेव प्रोत्फुल्लतामरसच्छायम् तथैव च पुनः प्रसादानुभवप्रत्याशालालसं हृदयम्। अन्यच्चैतन्मनुष्येषु केन कदा दृष्टं श्रुतम् अनुभूतं वा यदस्माभिरित्यभिहितवति राजलोके ससखीजना सपरिवारा चोत्थाय स्वयमेवोच्चित-देवतार्च्चनकुसुमा [क]स्नात्वा निर्वर्त्तितचन्द्रापीड़शरीरपूजासंस्कारा शरीरस्थितिकरणायादिदेश राजलोकम्। निर्वर्त्तितस्नानाशने च तस्मिन् राजलोके आत्मनापि महाश्वेतयोपनीतानि तथैव सह सपरिवारा फलान्युपयुक्तवती। कृताहारा च तथैव चन्द्रापीड़चरणावङ्के कृत्वोद्वहन्ती तमपि दिवसमनयत्। अन्येद्युरुपजातदृढ़तरप्रत्यया चन्द्रापीड़शरीराविनाशं प्रतिपद्य मदलेखामवादीत्; प्रियसखि! देवस्य शरीरमिदमुपचरन्तीभिरवश्यमाशापचया-दस्माभिरत्र स्थातव्यं तदिममद्भुतरूपं वृत्तान्तं तातस्याम्बायाश्च गत्वा निवेदय येन नान्यथा मां सम्भावयतः दुःखेन वा मदीयेन न तिष्ठतः। यथा च मामेवंविधां दुःखभागिनीमागत्य न पश्यतस्तथा करिष्यसि। न शक्नोम्यहं तातमम्बाञ्च दृष्ट्वा दुःखावेगं धारयितुम्। यथा चोपरतमपि देवमालोक्य न रुदितं सा किमपरमधुना निःसंशयितजीविते देवे रोदिमीत्यभिधाय तां व्यसर्ज्जयत्।

[क] स्वयमेवावचित्य देवतार्च्चनकुसुमानीति वा पाठः।

गतागतया च तया प्रियसखि ! सिद्धं तेऽभिवाञ्छितम् एवं सन्दिष्टं ते तातेन चित्ररथेनाम्बया च मदिरया गाढ़तरमालिङ्ग्य शिरस्युपाघ्राय च वक्तव्यावयोर्वचनात् वत्सा कालमेतावन्तं नैतदावयोरासीत् यथा जामातृसहिता वत्सा द्रष्टव्येति तदयमावयोः परमानन्दो यद्वत्सयैव स्वयं जामाता वृतः तत्राप्यपरं भगवतो लोकपालस्य चन्द्रमसोऽवतारः। तत् कतिपयैरेव कालेन कल्याणैः शापावसाने जामात्रा सहैवानन्दवाष्पनिर्भरमाननारविन्दं ते द्रक्ष्याव इति आवेदिते निर्वृतेनान्तरात्मना दैवतवदुपचरन्ती तच्चन्द्रापीड़शरीरमतिष्ठत्।

अथापगतवर्षति जलदसमये घननिरोधाद्बन्धादिवोन्मुक्ते जीवलोके प्रसरन्तीष्विवाशासु कणिशभरावनम्रकलमवनापिञ्जरासु ग्रामसीमासु काशकुसुमधवलास्वरण्यस्थलीषु सेव्यतामुपागतेषु पादपतलेषु कह्लारहारिषु पल्वलेषु कुसुमामोदशीतलासु यामवतीषु शेफालिकापरिमलग्राहिषु निशावसानमातरिश्वसु चन्द्रप्रभाभिरामेषु प्रदोषेषु उद्दामफुल्लेन्दीवररजोवाससुरभिषु सलिलाशयेषु सलिलापसरणक्रमतरङ्गमाणपाण्डु सुकुमारतीरसैकतरेखासु सुखोत्तारतामापन्नासु आपगासु पङ्कपरिहरणशुष्केषु अप्रहतरूढ़ोलपच्छन्नेषु मन्दास्यानकर्दमोज्झ्यमानाभिनवपदवीकेषु पुनरपि पान्थलोकेन प्रवर्त्तितेषु प्राप्तवर्त्मसु जम्बाल-

विगमात् सर्वतस्तुरगखुरसहासु सञ्जातासु भूमिषु एकदा चन्द्रापीड़चरणमूलोपविष्टां कादम्बरीमुपसृत्य मेघनादो व्यज्ञपयत्। देवि! देवो युवराजश्चिरयतीत्युत्काम्यता देवेन तारापीड़ेन देव्या विलासवत्या आर्य्यशुकनासेन च वार्त्ता-हराः, प्रहिताः ते च देव्या एव शोकशल्यघटनां परिहरद्भि-रस्माभिर्यथावृत्तं समाख्याय भवतान्तु इत्थेन देवेन चन्द्रा-पीड़ेन किञ्चित् प्रतिसन्देष्टव्यं, मापि देव्या कादम्बर्य्या तदकृतविलम्बा गत्वैनं वृत्तान्तमखिललोकार्त्तिहराथाव-नितलहरये देवाय तारापीड़ाय आवेदयेत्यभिहितास्त्व-येऽस्मान्मन्युनिर्भराः प्रत्यबोचन्। यथा भवद्भिः कथितं तत्तथा तिष्ठतु तावत् क्रमागतस्नेहो भक्तिरनुवृत्तिर्वा कार्य्य-गौरवकृतं कौतूहलमेव देवावलोकनं प्रति बलात्कारय-त्यस्मान्, यदि भवतां वार्त्तामात्रकोपलभ्य एवायमर्थः ततो युज्यत एवास्माकं भवद्भिः समुपलभ्य प्रतिगन्तुम्। अपिच वयमपि नेदृशा एव केऽप्यगुणा अपुण्यकर्म्माणो ये न पश्यन्ति देवम्, अस्माभिरपि चिरतरं देवचरणपरिचर्य्यया पवित्रित एवात्मा ह्यस्माकमपि सर्वदा दर्शनगोचरावस्थानेन प्रसादी-कृतवानेव देवः। किमद्य जातं येन देवस्य पादारविन्दवन्द-नाप्रसादेन न संविभज्य विसर्ज्यामहे त एव वयं पादसञ्चा-चरणरेणवः तद्विज्ञाप्य देवीं देवस्य युवराजस्य पादप्रणामे-नास्माकं सफलयतु भवानागमनश्रमम्, अन्यथा भूमिनेताव-

तीमागत्य सम्भवे सत्यप्यप्रत्यक्षीकृत[क]शरीरा गताः सन्तः किं देवेन तारापीड़ेन वक्तव्या वयं किं वाप्यस्माभिर्देवी विज्ञापनीय इति आवेदिते देवी प्रयाणमिति विज्ञाप्य तूष्णीं स्थितवति मेघनादे तत्कालसमुत्प्रेक्षितानाश्वास्य श्वशुर-कुलवैक्लव्याहिलीयमानेव शुचान्तःसञ्चितं वाष्पमाकुलित-तरलतारकाभ्यामापिबन्ती लोचनाभ्यामुद्गद्गदिकयावरुद्ध्य-माणकण्ठी कथं कथमपि चिरात् कादम्बरी प्रत्युवाच। स्थान एव हि तैरगमनमङ्गीकृतम् अनालोक्यैव देवम् एव-मेव याताः सन्तः किमुच्यन्तां त एव अपि चायमेवंविधो लोकातीतो वृत्तान्तो यत्नावलोकनेनापि न सम्प्रत्ययः समुत्पद्यते किं पुनरालोकनेनापि। कैतवमात्रोपदर्शितप्रेम-फला वल्लभतमजीविता वयमपि यावत् पश्यामस्तं तावदन-पेक्षितप्राणवृत्तयः स्नेहसद्भावनीयाः सद्भृत्या न पश्यन्तीति अघटमानमिदं तदविलम्बितं प्रवेश्यतां पश्यन्तु देवं सफलय-न्त्वागमनपरिश्रमेण सार्द्धं लोचने ततो यास्यन्तीत्याज्ञान-न्तरञ्च मेघनादेन प्रवेशितानदूरत एव समं वाष्पपातेन पञ्चाङ्गालिङ्गितमहीतलांश्चन्द्रापीड़चरणारविन्दवन्दनसद्भा-वनिहितोत्पक्ष्मनिभृतदृष्टींस्ताननन्यदृष्टिश्चिरमवलोक्य काद-म्बरी स्वयमेवालपत्।

[क] युवराज इत्यधिकः पाठः।

भद्रमुखाः परित्यज्यतामयं कुलक्रमागतस्नेहसद्भावसुलभः शोकावेगो, यत् खल्वनालोचितावधि दुःखावसानमेव दुःखं तन्मरणभीरोर्भवतु नाम शोकावेगाय यत् पुनः सुखोदर्कं तत् पुरःस्थितया सुखप्रत्याशयैवान्तरितं नापतति हृदये। तदेष वृत्तान्त एवंविधो येन न केवलमत्र निरवकाशता शोकस्य प्रत्युत सुदूरवृत्तेर्विस्मयस्याप्यवसरः किमत्र परिबोधनेन अन्यत्रादृष्टपूर्वो मनुष्येषु प्रत्यक्षत एवायं वृत्तान्तो भवद्भिरपि दृष्टो दृष्टश्च पुरेवाविकृततनोर्देवस्य वदनं सम्भावनापि या जीवाद्विना न सम्भवति सापि सम्भावितैव तद्गम्यतामधुना वार्त्तोत्सुकमतेर्देवस्य पादमूलम्। नचायं प्रत्यक्षदृष्टोऽप्युपरतशरीराविनाशवृत्तान्तः प्रकाशनीयो, दृष्टोऽस्माभिः अच्छोदसरसि तिष्ठत्येतदेवावेदनीयम्। किं कारणम् उपरतिः खल्ववश्यम्भाविनी प्राणिनां न कथञ्चित् प्रत्ययमुत्पादयति शरीराविनाशः पुनः प्राणैर्विनाकृतानां दृश्यमानोऽप्यश्रद्धेय एव। तस्यावेदनेन सुदूरस्थितमपि गुरुजनं मरणसंशये निक्षिप्य वर्त्तमाने प्रयोजनमेव नास्ति। प्रत्यागत जीविते जीवितेश्वरे स्वयमेवायमङ्कितभूतोऽर्थो गुरुजने जने वा प्रकटीभविष्यतीत्येवमादिष्टास्तु ते व्यज्ञपयन्, देवि किं विज्ञापयामो द्वाभ्यामेवापरिज्ञान[क]मस्य वस्तुनः सम्भवेदगम-

[क] ज्ञातमिति वा पाठः।

नेन वास्मदीयेनाकथनेन वा तदस्माकन्तु हस्ताद्भ्रमप्येतन्नास्ति-युवराजवैशम्पायनयोर्व्वार्त्तया विना दुःखं तिष्ठता देवेन तारापीड़ेन देव्या विलासवत्यार्य्यशुकनासेन च सम्भाष्य प्रेषितानामप्रेषितजीवितानामगमनं [क] दूरतएव [ख] गत्वापि दयिततनयवार्त्ताश्रवणलालसस्य राज्ञो देव्या आर्य्यशुकनासस्य च दुःखप्लुताचीणि मुखान्युद्वीच्य निर्विकारवदनानामस्माकमवस्थानमनुचितमशक्यमेवेति विज्ञापिता तैः एवमेतदित्युक्का कादम्बरी मेघनादमवादीत्। मेघनाद वेद्मि संस्तुतजनस्यैतदनुचितमिति तथापि गुरूणां चेतःपीड़ामपेच्चमाणया मया एवमभिहितमितरदपि दुःखमतः कीदृशं भवति [ग] किं पुनरिदं महावज्रपतनसदृशं तदपि [घ] भवद्भिः सहापरः कश्चित् श्रद्धेयवाक्यः प्रत्यच्चितसकलवृत्तान्तो व्रजतु सम्प्रत्ययाय, इत्येवमादिष्टस्तु मेदनादो व्यज्ञपयत्। देवि! राजलोके तु का कथा भृत्यवर्गेऽपि सकलएवायं कन्दमूलफलाशी निश्चयं कृत्वा स्थितो यथास्माकं मध्यादेकेनापि देवपादान् विना न प्रतीपं गन्तव्यं भृत्या अपि तएव ये [ङ]

[क] आत्मगमनमिति वा पाठः।

[ख] दूरापेतमेवेति वा पाठः।

[ग] दुःखमयाले किं भविष्यतीति वा पाठः।

[घ] तदेतदपीति वा पाठः।

[ङ] अधिकमिति वा पाठः।

सम्पत्तेर्विपत्तौ सविशेषं सेवन्ते, समुन्नम्यमानाः सुतरामवनमन्ति आलप्यमाना न समानालापा जायन्ते स्तूयमाना नोत्सिच्यन्ते क्षिप्यमाणा नापराधं गृह्णन्ति [क] उच्यमाना न प्रतीपं भाषन्ते पृष्टाः प्रियहितं विज्ञापयन्ति अनादिष्टाः कुर्वन्ति कृत्वा न जल्पन्ति पराक्रम्य न विकत्थन्ते कथ्यमाना अपि लज्जामुद्वहन्ति महाहवेष्वग्रतो ध्वजभूता लक्ष्यन्ते दानकाले पलायमानाः पृष्ठतो निलीयन्ते नापि [ख] स्नेहं बहु मन्यन्ते जीवितात् पुरो मरणमभिवाञ्छन्ति गृहादपि स्वामिपादमूले सुखं तिष्ठन्ति येषाञ्च तृष्णा चरणपरिचर्य्यायाम् असन्तोषो हृदयाराधने व्यसनमाननावलोकने वाचालता गुणग्रहणे कार्पण्यम[ग]परित्यागे भर्त्तुः ये च विद्यमानेप्यात्मनि न स्वाधीनसकलेन्द्रियवृत्तयः पश्यन्तोऽप्यन्धा इव शृण्वन्तोपि वधिराइव वाग्मिनोपि मूका इव जानन्तोपि जड़ाइव अनुपहतकरचरणा [घ] अपि कुणयइव पङ्गवइव क्लीवा इव अकिञ्चित्कराः स्वात्मना स्वामिचित्तादर्शे प्रतिविम्बवद्वर्त्तन्ते तत् सर्वएवायमेवं स्थितो भृत्यजनः देवस्य च

[क] नापरज्यन्ते इति वा पाठः।

[ख] धना इति वा पाठः।

[ग] वाञ्छा न इति वा पाठः।

[घ] अत्र तु परुषा इत्यधिकः पाठः।

स्थाने देवी वर्त्तते तदाज्ञापितं क्ततमवधारयतु देवीत्युक्ता मेघनादस्त्वरितकनामानं कुमार[क]सेवकमाहूय तैः सह व्यसर्ज्जयत्।

अथ सुबहुदिवसापगमे च वार्त्तया विनोत्ताम्यतो चन्द्रापीड़स्यैवागमनायोपयाचितं कर्तुमवन्तिनगरीदेवताना-मवन्तिमातृणामायतनं निर्गता विलासवती देवि दिष्ट्या वर्द्धसे प्रसन्नास्तेऽवन्तिमातरः परागता युवराजवार्त्तेति सहसैव ससम्भ्रमप्रतिधाविताात् परिजनात् उपश्रुत्यानन्द-वाष्पजलप्लुलितया जलार्द्रेन्दीवरदलस्रजेव विक्षेपदीर्घया दृष्ट्यार्च्चयन्तीव चिरं दृष्ट्वा ककुभो मृगाङ्गनेव परिभ्रष्ट-बालपोतका फूत्कृत्य प्राकृतेवार्त्ता केनेदमस्तृतं मे वाक्छला-दृष्टं कस्यानुकम्पास्मिन् जने जाता केन वा दृष्टः कियद्दूरे वर्त्तत किंवानेन कथितं कुशलं मे वत्सस्येति पृच्छन्त्येवाद्रा-क्षीत् इतस्ततो यथादर्शनं सङ्घशः प्रधावितेन नरपतिप्रति-बद्धेनाप्रतिबद्धेन चोज्जयिनीनिवासिना जनेनायातो युव-राजः कियद्दूरे भवद्भिः परित्यक्तो दिवसेष्वेतेषु वा क्व वर्त्तते क्व वा भवद्भिर्गत्वा दृष्टः क्व वातिकष्टस्तेनातिवाहितो वाहन-मात्रसाधनेन धाराधरागम स्तुरगपृष्ठगतस्य मन्ये वहत स्त्वापक्रान्तः। त्वरितक एतद्वेत्ति किमनेन विदितेनापि

[क] वाल इति वा पाठः।

एतत् कथय यदर्थमयं कृतः क्लेशो युवराजेन स दृष्टो वैशम्पायनः प्रत्यानीतो वा मिलितो वा तस्य पत्रलेखासहितो मेघनादः न दत्तः कश्चिदपि सन्देशो वा देववर्द्धनेन मे मित्रमेवासौ अद्यारभ्य राभसिकतयैवात्मना बलाद्गतस्य बालधर्म्मणो वत्सस्य बिभेम्येव वार्त्तां प्रष्टुमपि जीवत्यसौ अस्य वाजीवीयुवराजेन प्रसादीकृतः प्रसीदत सादिनां प्रथमस्य पृथुवर्म्मनो मातुलस्य मे कथयत वार्त्ताम् उत्प्रेक्षामहे महानश्ववारैरपि अनुभूतः क्लेशः [क] कुशलं महाश्वपतेरश्वसेनस्य श्वशुरोऽसावस्माकं विस्मयः कृतोऽस्मत्पित्रा यच्चिह्नकमपि भवतां हस्ते न किञ्चिदपि प्रहितम्। आहितभर एवासौ युवराजभवने दृष्टो भवद्भिर्मे भ्राता भरतसेनः सपरिजनस्य सेनापतेर्भद्रं भद्रसेनस्य सेवाव्यसनी सूनुर्मे कलापवर्म्मा तत्रावलगतिबलाधिकृतस्तस्य का वार्त्तावन्तिसेनस्य रोषितस्तेनासीन्नाशीरार्थं युवराजो राजकुले कः प्रसादवित्तो वर्त्तमाने मान्यते वा केन वा किं लब्धम् एतावद्भिर्दिवसैराजीवनिका बहवः खल्वभिनवसेवकाः जाता यातु तावत् सर्वमेवान्यत् येन दृष्टः स कथयतु सर्वसेनसूनोर्वीरसेनस्य वार्त्तां पितर्य्युपरते प्रथममेवासौ प्रविष्टो याता मातास्य दुःखान्तरितप्रत्यग्रपतिमरणशोकादशनक्रियैव परित्यक्ता न

[क] अत्र तु इतीत्यधिकः पाठः।

विद्म एव कथं सा जीवतीत्येतानि चान्यानि च प्रतिपदं पृच्छमाना नाप्यदत्तप्रतिवचसो नासाग्रस्थितमन्युगर्भदृष्टी-नाविष्टानिवाध्वश्रमनिःसहानपि पदाक्रष्टिसम्भावितोद्यमायासितया गत्या गच्छतश्चातिमलिनतरपटच्चराच्छादितान-संस्कारमलिनकायाननेकधैवोद्बद्धाध्वधूलिपरुषमूर्द्धजान् ध्वजानिवाध्वक्लेशस्याश्रमानिव श्रमस्यावासानिव प्रवासस्य पदन्यासानिव दौर्म्मनस्यस्य सन्दर्भानिव सर्वदुःखानाम् अदूरतस्त्वरितकसमेतांस्तान् लेखहारकान् आलोक्य च तस्मिन्नेव मातङ्गहाङ्गने स्थित्वा तेषामाह्वानायादिदेश।

अनन्तरञ्चातर्किंतापतिततद्दर्शनेनोत्पादितद्विगुणदुःखावेगान् मुषितानिवोन्मत्तानिवेन्द्रियैर्दारुमयानिव शून्यशरीरान्निर्जीवितानि वोपसर्पतः पुरस्तात् पतन्तौ वाष्पान्धा साध्वसस्खलितचरणानि कतिचिद्गत्वा पदानि सगद्गदस्वरमुच्चैरकृतप्रणामानेवा[क]वादीत्। भद्राः कथयताशु वत्सस्य मे वार्त्ताम् इदन्त्वन्यथैव कथमपि करोति मे हृदयम् भ्रियते मे वत्सो दृष्टो वा भवद्भिरित्येवं पृष्टास्तु ते सहसागतवाष्पवेगमवनितलनिवेशितोत्तमाङ्गाः प्रणामापदेशेनोत्सृज्य कृच्छ्रादिवाभिमुखमुन्नमितवदना व्यज्ञपयन्, देवि! दृष्टोऽस्माभिरच्छोदसरस्तीरे युवराजः शेषमेष त्वरितको निवे-

[क] अत्र तु तानित्यधिकः पाठः॥

दयिष्यति। इत्येवमभिदधत एव तानुद्बाष्पमुखी विलासवती प्रत्युवाच किं पक्षरमयं तपस्वी निवेदयिष्यति दूरतः प्रभृत्यनुद्गतप्रहर्षेणैवोपसर्पणेन प्रतिलेखमालिकाशून्यैः शिरोभिराविषसद्गनैराननैः प्रयत्नसंरच्छिताश्रुमोक्षदुःस्थिताभ्यां लोचनाभ्यामन्यु खेदसमवधारणेन च दृष्टैर्यदावेदितव्यं तद्भवद्भिरेवावेदितं हा वत्स! जगदेकचन्द्र! चन्द्रापीड़! चन्द्रानन! चन्द्रशीतलप्रकृते! चन्द्राभिरामगुण! लोचनानन्दभूत! किं भूतं ते येन नायातोऽसि? तात चन्द्रापीड़! पीड़िता ब्रवीमि न कोपादुपालभमाना न युक्तमेतत्तव अम्ब न विलम्बं मनागपि करोमीति तथा मे पुरः प्रतिज्ञाय क्षणमप्यन्यत्र क्वाप्यवस्थातुं वत्स गच्छतएव ते मयास्य हतहृदयस्य शङ्कयैव ज्ञातं दुर्लभं मे वत्सस्य पुनर्मुखावलोकनमिति बलाद्गतोसि किं करोमि कोवात्र दोषो वत्सस्य मन्दभाग्याया ममैवैतान्यपुण्यानां विलसितानि भवन्त्यपुण्यवत्योऽपि लोके न पुनर्मया सदृशी पापकारिणी यस्यास्त्वमेकएवमकाण्डएवावच्छिद्य क्वापि नीतोऽसि विप्रलब्धास्मि दग्धवेधसा वत्स दूरं गतस्यापि ते प्रपतामि पादयोर्निवर्त्तस्वैकवारम् अम्बेत्यालपतस्ते वदनमालोकयितुमुत्कण्ठितं मे हृदयं जातदुर्लभक न जानास्येव किमाजन्मनः शैशवं ते स्मृत्वा शोचामि [क] किमात्मानमनु-

---

[क] स्मृत्वात्मानमनुशोचामीति वा पाठः।

शोचामि उत यौवनाभोगहारिणीं वर्त्तमानां रूपशोभामाहोस्विदवष्टम्भधीरामुत्प्रेक्ष्योत्प्रेक्ष्यागामिनीं प्रभुतामित्येवं विलपन्तीं मामवलोक्य हृदयस्थितोऽपि मैवं कथा इति असि पुत्र यथा विनापि मया जीवत्येव विलासवती जात त्वया विना जीवन्त्या पितुरेव ते कथं मया वदनं दर्शितं न वेद्मि किमिति प्रियतया ते किमाकृतेः प्रत्ययादुत स्त्रीजनसहभुवो मूढभावादेवेत्यद्यापि न श्रद्दधाति मे हृदयम् अनिष्टं ते येन न सहस्रधा स्फुटति स्फुटीकर्तुञ्च वार्त्तां ते त्वरितकाङ्क्षीतेव नेच्छामि वरमनाकर्ण्यैवाश्रवणीयमुपरतास्मीति तात! किं ब्रवीमि तथापि किमनेन स्नेहानुचितेन लज्जाकरेण वैक्लव्येनेत्येषा स्थितास्मि ते वत्स वचनात् तूष्णीं न रोदिमीत्यभिदधानैवासन्नसखीजनावलम्बितशरीरा मोहमगात्।

अथैकदा त्वनेकसहस्रसंख्येन प्रधावता विलासवतीपरिजनेनावेदिते तस्मिन् वृत्तान्ते मन्दरास्फालनेनेवोच्छलितो [क] महाम्भोधिरुद्भ्रान्तचेताः ससम्भ्रममुत्थायार्य्यशुकनासद्वितीयो यामावस्थितां प्रजविनीं करेणुकामारुह्य रयादापिबन्निव पुरोराजमार्गं किमेतदित्युन्मुक्तनादकलकलेन सर्वतः प्रधावता जनपदौघेनाकर्षन्निवावर्जयन्निव उद्वासयन्निव विपर्य्यासयन्निव

[क] इवेत्यधिकः पाठः।

पृष्ठतः सगोपुराट्टालकप्राकारभवनतोरणामुज्जयिनीं निर्जगाम नरपतिः। उपेत्य च अवन्तिमातृकागृहमवतीर्य्य तिर्य्यग्विषसोद्वाष्पवदनेन मलयजजलैश्च सिञ्चता कदलीदलैश्च वीजयता जलार्द्रैश्च पाणिपल्लवैः सम्बाहनं कुर्वता कथंकथमपि चेतनां प्रतिपद्यमानां परिजनेनोद्वीन्मीलितलोचनयुगलाम् उष्णकालकमलिनीमिव विलासवतीमपश्यत्। दृष्ट्वा च सहसा प्रवृत्तेन नेत्राम्भसा मूर्च्छाविशेषापनयनायेवासिञ्चन् समुपविश्य पार्श्वे स्पर्शामृतवर्षिणा करेण ललाटे चक्षुषि कपोलयोरुरसि बाह्वोश्च स्पृशन् शनैः शनैः वाष्पगद्गदमवादीत्। देवि! यदि सत्यमेवान्यादृशं किमपि वत्सस्य चन्द्रापीड़स्य ततो न जीव्यत एव किमर्थमयमात्मा वत्सस्य कृते सकललोकसाधारणेनामुना वैक्लव्योपगमेन तुच्छतां नीयते कृतान्ति शुभान्युपात्तानि कर्म्माणि किमपरं क्रियते नातोभिकस्य सुखस्य भाजनं वयमुपात्तं हि हृदयस्य ताड़नमपि कुर्वद्भिर्न लभ्यत एवातात्मेच्छया विधिर्नामापरः कोप्यत्रास्ते यत् तस्मै रोचते तत् करोति नासौ कस्यचिदप्यायत्तः एवञ्च पराधीनवृत्तौ सर्वस्मिन्न किं वास्माभिर्लब्धं वत्सस्यातिदुर्लभो जन्मोत्सवः सम्भावितोऽङ्कगतस्य मुखमवलोकितमुत्तानशयस्योचुम्बत्र चरणावुत्तमाङ्गे कृतौ जानुसञ्चारिणो रेणुधूसरशरीरकस्याङ्कलगतः स्पर्शसुखमनुभूतम् अव्यक्तमनोहराणि प्रथमजल्पितानि श्रोत्रे

कृतानि विचेष्टमानस्य बालचाटवो दृष्टाः गृहीतविद्यस्य गुणवत्तयानन्दितं हृदयम् उपारूढ़यौवनस्यामानुषी रूपशोभा शक्तिश्च प्रत्यक्षीकृता अभिषिक्तस्य च यौवराज्ये शिरः समाघ्रातं दिग्विजयागतस्य प्रणमतः परिष्वक्तान्यङ्गानि एतावदेव मनोरथशतवाञ्छितस्य वस्तुनो न सम्पन्नं यद्वधूसमेतस्य निजपदे प्रतिष्ठां कृत्वा तपोवने गन्तव्यं सर्व्वाभिवाञ्छितप्राप्तिस्तु महतः पुण्यराशेः फलम्। अपरमपि किं वृत्तं वत्सस्येत्येतदद्यापि न परिस्फुटं केनचिदत्र कथितम् एतावत्तु मयाव्यक्तमेव तत् परिजनात् कथयतः श्रुतं यथास्मत्प्रहितैर्लेखहारकैः सह अपरो वत्सस्य मे बालसेवकः त्वरितक आयातः स तु वेत्ति सर्वं वृत्तान्तं सोऽपि त्वया न पृष्ट एवेति तन्तु तावत् पृच्छामः ततो जीवितमरणयोरन्यतरदङ्गीकरिष्याम इत्यभिदधत्येव राजनि परिजनान्तरितं त्वरितं त्वरितकमाहूय प्रतीहारस्त्वरितकमाराज्ञो महीतलनिवेशितोत्तमाङ्गमालोकयतु देव इति दर्शितवान्।

राजा तु तथा तमालोक्य चन्द्रापीडस्ते हार्देऽग्रहीत्याहूय हस्तेनोत्तमाङ्गे स्पृष्ट्वादिष्टवान् भद्र! कथय किं वृत्तं वत्सस्य केनागमनाय मया तन्त्राचा मात्येन च लिखितेऽपि स नायातः अनागमनकारणं वा न किञ्चिल्लिखितवान् इति। स त्वेवमादिष्टो राज्ञा नमन्तः प्रभृति यथावृत्तं कथयितुमारेभे राजा तु चन्द्रापीड़हृदयस्फुटनवृत्तान्तं यावदाकर्ण्या-

क्षुभितशोकार्णवाक्रान्तिर्विक्लवः प्रसार्य्य करमार्त्तस्वरस्वरित-क्रमवादीत्। भद्र विरम त्वया कथितं सम्प्रति कथनीयं तन्म-यापि श्रुतं यत् श्रोतव्यं पूर्णो मे प्रश्नदोहदः, निवृत्तं श्रवण-कौतुकं कृतार्थीभूता श्रुतिरानन्दितं हृदयं समुत्पन्ना प्रीतिः सुखं स्थितोऽस्मि। हा वत्स! त्वयैकाकिना स्फुटतो हृदय-स्यानुभूता वेदना निर्व्यूढ़ा त्वया वैशम्पायनस्योपरि प्रीतिः वयं दुःखभागिनो निस्त्रिंशाः कर्मचाण्डालाः येषां तवापि हृदयस्फुटने निर्विकारमेवेदं, देवि! वज्रसारतोऽपि कठिन-तरमावयोर्हृदयं यत् श्रुत्वाप्येवं न स्वयं स्फुटति सहस्रधा नचापि मरणदुःखभीरवोऽमी वत्समनुगच्छन्ति स्वयं प्राणाः तदुत्तिष्ठ यावदेवातिदूरं न प्रयात्येकाकी वत्सस्तावदे-वानुगमनाय प्रयतावहे। आः शुकनास! किमद्यापि तिष्ठसि अयं स कालः स्नेहस्य महाकालायतनसमीपे समादिश सुपरिचारकान् चितारचनायोपनयत झटिति काष्ठानि काष्ठिकाः किं तिष्ठत एव सङ्कुचिताः कञ्चुकिनो गत्वा निष्क्रामयत हुतवहाशनप्रवेशोपकरणानि निष्कारण-रुदितेन किमधुना पुरोधः परिलम्बादिना प्रविश्य दापया-शेषं द्विजेभ्यः कोषं कस्य कृतेऽद्यापि पाल्यते पालनादिकं कर-णीयमेवाधुना चीणं चीणपुण्यस्य मे यात यथाभूमिं भूमि-पतयो दृष्टाः स्थ यथा च नाद्यैवानाथतादुःखं जानन्ति, प्रजास्तथा करिष्यथ, कथावशेषीभूतो मे वत्सः कमपरं सम्भि-

धापयाम्येवमार्त्तं प्रलपन्तञ्च तारापीड़मचेतितात्मपीड़या च विलासवत्या विधृतशरीरमार्त्तस्त्वरितको व्यज्ञपयत्। देव! यथा त्वं हृदये सम्भावयसि, न तथा स्फुटितेऽपि हृदये भ्रियते शरीरेण युवराजः शापदोषाद्वैशम्पायनस्य च यथा जन्म तथा निरवशेषं शृणोतु, तावद्देव इति।

तारापीड़स्तु तदद्भुतमाकर्ण्य कौतुकान्तरितशोकावेगो-विगतनिमेषेण चक्षुषाविष्ट इव दत्तावधानस्तेन कथ्यमानं यथादृष्टं यथाश्रुतं यथानुभूतञ्च निरवशेषं तत् सर्वमश्रौषीत्। श्रुत्वा च तमनेकचित्तोत्पादितप्रत्ययमश्रद्धेयञ्च निरतिशयशोककारकञ्च विस्मयास्पदभूतञ्च दुःश्रवञ्च कौतुककरञ्च युवराजवैशम्पायनयोर्वृत्तान्तमीषदिव निवर्त्तितानन्दोऽमर्षस्तिमिततारकां दृशं [क] निर्विशेषावस्थे शुकनासमुखे न्यपातयत्। सुहृदस्तु स्वयं दुःखिता अपि विस्मृत्यात्मदुःखं सुहृद्दुःखापनोदायैव वर्त्तन्ते यतः शुकनासस्तदवस्थोऽपि स्वस्थवदवनिपतिमुवाच। देव! विचित्रेऽस्मिन् संसारे चरत्सु सुखदुःखमोहमयेषु देवतिर्य्यग्योनिमानुषेषु त्रिगुणात्मणः प्रधानस्य परिणामात् [ख] परमाण्वादेर्ब्रह्माण्डपर्य्यन्तस्योत्पत्तिस्थितिप्रलयकारणस्येश्वरस्येच्छया वा धर्म्माधर्म्मसाधनाना-

[क] दृष्टिमिति वा पाठः।

[ख] आत्मनः इति अधिकः पाठः।

मिष्टानिष्टकर्त्तृफलसम्बन्धकारिणां कर्म्मणां वा शुभाशुभानां विपाकात् स्वभावाद्वाश्रयमेवानेकप्रकारमुत्पद्यमानस्य तिष्ठतो विनश्यतो वा नियतवृत्तेः स्थावरजङ्गमस्य न कदाचिदवस्था सा या न सम्भवति तत् किं कृतोऽयं [क] देवस्यात्र वस्तुनि विमर्षो यदि युक्ते[ख]र्विचारात् कियन्त्यत्र युक्तिरहितानि आगमप्रामाण्यादेवाभ्युपगतानि अविसंवादीनि [ग] दृश्यन्ते मुद्राबन्धाद्ध्यानाद्वा विषप्रसुप्तस्योत्थापने कीदृशी युक्तिरयस्कान्तस्य चायसः समाकर्षणे वा मन्त्राणां वा वैदिकानामवैदिकानां वानेकप्रकारेषु कर्म्मसु सिद्धौ वा नानाविधसंयोगद्रव्याणां वा मरणमदमान्द्योत्पादनापहरणवशीकरणादिषु शक्तेः समुत्पादादन्येषाञ्च बहुतराणामेवं विधानाञ्च तत्र तत्र सर्वस्मिन्नेवागमाः प्रमाणमागमेषु [घ] च सर्वेष्वेव पुराणेषु रामायणमहाभारतादिषु सन्त्यनेकप्रकाराः शापवार्त्ताः तद्यथा महेन्द्रपदवर्त्तिनो नहुषस्य राजर्षेरगस्त्यशापदोषादजगरता सौदासस्य च वशिष्ठसुतशापान्मानुषादत्त्वम् असुरगुरुशापाच्च ययातेस्तारुण्य एव जरसा भङ्गः त्रिशङ्कोश्च पितृ-

---

[क] कुतः इति वा पाठः ।

[ख] युक्तेरिति वा पाठः ।

[ग] विसंवादरहितानीति वा पाठः ।

[घ] प्रयागमामेषु इति वा पाठः ।

शापाच्चण्डालभावः। श्रूयते च स्वर्गवासी महाभिषो नाम राजास्मिन् लोके शान्तनु[क]पत्नीत्वमुपगतायां गङ्गायां शापदोषादष्टानामपि वसूनामुत्पत्तिः तिष्ठतुः तावदन्यत् अयमादिदेवो भगवानजन्मैव जमदग्नेरात्मजतामुपगतः श्रूयते च पुनश्चतुर्द्धात्मानं विभज्य राजर्षेर्दशरथस्य तथैव च पुनर्मथुरायां वसुदेवस्य। तन्मनुष्येषु देवतानामुत्पत्तिर्नैवासम्भाविता नच पूर्वमनुष्येभ्यो गुणैः परिहीयते देवो नचैवं भगवतः कमलनाभादतिरिच्यते चन्द्रमाः किमत्र सम्भावनीयम्। अपि च गर्भारम्भसम्भवे [ख] देवेन देव्या वदने विशंश्चन्द्रमा एव दृष्टः तथा ममापि स्वप्ने पुण्डरीकस्यैव दर्शनमुपजातं तदुत्पत्तिं प्रति तयोर्नास्त्येव सन्देहो विनष्टयोः शरीरस्याविनाशः कथं कथं वा पुनर्जीवितप्रलम्भ इत्यत्राखिल लोकप्रख्यातप्रभावमम्हतमेव कारणमावेदितं तच्चन्द्रमसि वर्त्तते इत्येषाप्यस्त्येव वार्त्ता तत्सत्यमित्य[ग]मेवावगच्छतु देवः। अन्यच्चेदृशाकारकान्तेरखिललोकाह्लादकारिणोऽन्यत्र सम्भव एव तस्य नास्ति तत् कल्याणैरचिराच्छापावसाने निर्वर्त्तितगन्धर्वसुतोद्वाहमङ्गलस्य गलन्नयनपयसो बध्वा सह पादयोः पततः

[क] पुस्तकान्तरे उत्पन्नः तत् इति अधिकः पाठः।

[ख] समये इति वा पाठः।

[ग] तत्सर्वमेतदिति वा पाठः।

पुत्रत्वमुपगतस्य चन्द्रापीड़नामान्तरितस्य लोकपालस्यैव चन्द्रमसो दर्शनेन जन्मकृतमेव सन्तापं परित्यक्ष्यति देवः। तत्तयोरयं शापः अस्माकं पुनर्वरएव तदस्मिन् वस्तुनि मनागपि न देवेन देव्या वा शोकः कार्य्यो मङ्गलान्नभिध्यायन्तामभिमतदेवताराधनेन धनातिसर्ज्जनेन चान्यजन्मोपार्ज्जितं कुशलमभिवध्यताम्। अकुशलमप्युपार्जितम् अतिकष्टतमेन उपवासादियमनियमेन तपःपरिक्लेशेन क्षयमुपनीयताम् अपरमपि यद्यदवगतं श्रेयस्करं श्रूयते ज्ञायते वा तत्तदद्यैवारभ्य क्रियतां कार्य्यताञ्च कर्म्मणां खलु वैदिकानाम् अवैदिकानां वा असाध्यं नाम किञ्चिदपि नास्ति उत्पत्तिरपि तयोः कृच्छ्रलब्धयोरीदृशेनैव प्रकारेणोपजाता।

इत्युक्तवति शुकनासे सशोक एव राजा प्रत्यवादीत् सर्व्वमेतद्यथार्थेणाभिहितं कोऽन्यो बुध्यते केन वापरेण वयं परिबोधनीयाः कस्य वापरस्य अस्माभिर्वचनं करणीयं किन्तु तत् वत्सस्य मे वैशम्पायनदुःखात् स्फुटनं हृदयस्य अग्रतोदृष्टिलग्नं सर्व्वमेवान्यदन्तरपतितं तदेव पश्यामि तदेव शृणोमि तदेवोत्प्रेक्ष्ये तदेवमप्रत्यक्षिते वत्सस्य वदने संस्तम्भमेवात्मनो न शक्नोमि कर्त्तुं यत्र च ममाप्ययमीदृशः प्रकारस्तत्र देव्याः परिबोधनं दूरापेतमेव तद्गमनादृतेऽन्य उपाय एव नास्ति जीवितसन्धारणाय इत्येवमवधारयत्वार्य्य इत्युक्तवति तारापीड़े चिरात्तनयपीड़या पत्युः पुरः परित्यज्य लज्जां विलासवती कृता-

ञ्जलिरुच्चैर्जगाद आर्य्यपुत्र ! यद्येवं तथापि किमपरं विलम्बितेन निर्गता एव वयं दीयतां प्रयाणम् उत्ताम्यति मे हृदयं वत्सस्य दर्शनाय यदपि दुःखापनोदनार्थं स्फुटितमस्याशंसितं हृदयस्यासीत् तदपि सम्प्रति दर्शनाकाङ्क्षया न रोचत एव जानामि वरं दीर्घकालमपि दुःखान्यनुभवन्ती सकृदपि वत्सस्य दर्शनाय जीवितास्मि न पुनरसह्यदुःखोपशान्तये सम्प्रत्येव मृतास्मीति तदस्य दुराशानिबन्धनस्य सर्व्वात्ययनिवारणोपायस्य वत्साननावलोकनोन्मुखस्य गमनमपि हृदयस्य तावद्विनोदतां व्रजतु। इति वदन्तीमेव विलासवतीमागत्यान्यतमः शुकनासस्याप्ततमः परिणतवयाः षट्कर्मवान् समुपसृत्य स्वस्तीत्युक्त्वा व्यज्ञपयत् देवि ! सर्वत्रैवापरिस्फुटेनामुना वार्त्ताकलकलेनाकुलीक्रियमाणहृदया मनोरमा स्वयमेवागता राज्ञीलज्जमाना नोपगता स्थानमिदं तदेषा मातृगृहस्य पृष्ठतस्तिष्ठति पृच्छति च देवीं किमेभिः कथितं जीवति मे वत्सो वैशम्पायनः स्वस्थशरीरो वा ढौकते वा पुनर्युवराजस्य का वार्त्ता क्व वा वर्त्तते तावागमिष्यतो वा कियद्भिर्दिवसैरिति। राजा तु तदुपरतिवार्त्तीया अपि कष्टतममाकर्ण्य दीर्ण इव शुचा शतगुणीभूतशोकोत्प्लुताक्षीं विलासवतीमवादीत् देवि! न श्रुतं वत्सयोः कृते किञ्चिदपि प्रियसख्या ते अन्यतश्च श्रुत्वा कदाचिज्जीवितेनैव वियुज्यते तदुत्तिष्ठ स्वयमेव धैर्य्यमालम्ब्य सर्ववृत्ता-

न्तानुकथनेन संस्तम्भय प्रियसखीं तयाप्यार्य्यशुकनासेन सह यातव्यमेवेत्युत्थाप्य सपरिजनां विलासवतीं व्यसर्ज्जयत् आत्मनापि शुकनासेन सह गमनसंविधानमकरोत्।

अथ तथा प्रस्थिते राजनि राजानुरागाच्चन्द्रापीड़स्नेहेन चाश्चर्य्यदर्शनकुतूहलाच्च प्रथमगतपितृपुत्रभ्रातृमित्रस्वजनदर्शनाय च गृहरक्षकवर्ज्जमुज्जयिन्याः सर्व्व एव लोको गन्तुमुदचलत्। राजा तु शीघ्रगमनविघातहेतून् सर्व्वानेव निवर्त्य प्रलघुपरिकरः पिबन्निव पन्थानमेकदिवसेनैव परापतितुमीहमानः स्तोकत एवाध्वनः प्रभृत्युत्ताम्यता हृदयेन कियत्यध्वन्यद्यापि वर्त्तामहे कतिपयैर्द्दिवसैः परापताम इति च मुहुर्मुहुस्तुरङ्गमारोपितं त्वरितकमाहूय पृच्छन् अविच्छिन्नैश्च प्रयाणकैर्व्वहन्नातिबहुभिरेव दिवसैरासमादाच्छोदम्। आसाद्य च विकल्पशतदोलाधिरोहणदुःखितेनान्तरात्मना दूरस्थित एव प्रथममासन्नमानश्ववारान् [क] वार्त्तान्वेषणाय त्वरितकेन सह प्रहितवान्।

अथ तैः सहागच्छन्तमुज्झितात्मसंस्कारमलिनीकृतशरीरमवनितलमिव प्रवेष्टुमीहमानमहमहमिकया परस्परावरणेनैवात्मवदनदर्शनमभिरक्षन्तमक्षतमपि हतमिव सपरिच्छदमपि मुषितमिव जीवन्तमपि मृतमिव ससम्भ्रमकृतागमनमपि प्रतीपमाकृष्यमाणचरणमिव अङ्गैरेव सह गलितोत्साहं

(क) प्रथमं तपोवने अश्ववारान् इति वा पाठः।

वाष्पेणैव सह मुक्तात्मानं वैक्लव्येनैव सहोपसर्पन्तं मेघनाद-पुरःसरं सकलमेव चन्द्रापीड़चरणतल निबद्धजीवितं राजपुत्र-लोकमालोक्य उल्लसित[क]तनयशोकोर्म्मिवेगाक्रान्तोऽपि उ-च्छ्वसित इव दृढ़ीभूतचन्द्रापीड़देहाविनाशप्रत्ययेनान्तरात्मना निवृत्य सावरणपर्य्यायणवर्त्तिनीं विलासवतीमवादीत्। देवि! दिष्ट्या वर्द्धसे ध्रियते सत्यमेव शरीरेण वत्सो येन सकल एवायं तच्चरणकमलानुजीवी राजपुत्रलोकस्तत्पादमूलादागत इति। सा तु तदाकर्ण्य किञ्चिदात्मपाणिनैवोत्सारितावरणसिचया-ञ्चला निश्चलया दृष्ट्या चिरमिव विलोक्य तनयनिर्विशेषं राजपुत्रलोकम् अविच्छिन्नास्रुधारापि धैर्य्यमुत्सृज्योच्चैरा-रटितवती हा वत्स! कथं सहपांशुक्रीड़ितस्यैतावतो राज-पुत्रलोकस्य मध्ये त्वमेवैको न दृश्यसे इति। तथा रटन्तीन्तु तां दूरत एव समाश्वास्य राजा समं सर्वलोकेनावनितल-निवेशितोत्तमाङ्गं मेघनादमितोढौकस्वेत्यादिश्याप्राक्षीत्। मेघनाद! कथय को वृत्तान्तो वर्त्तते मे वत्सस्येति। स तु व्यज्ञपयत् देव! चेतनाविरहात् चेष्टामात्रकमेवापगतं शरीरे पुनर्ज्ञायते दिवसेऽभ्यधिका कान्तिः समुपजायत इति। राजा तु तत् श्रुत्वा जीवितप्रतिलम्भे समुपजातप्रत्याशः श्रुतं देव्या मेघनादस्य वचनं तदेहि चिरात् पुनः कृतार्थ-

(क) नवीन इति वा पाठः।

यामो दर्शनेनात्मानं पश्यामो वत्सस्य वदनमित्यभिदधान एवाभिवर्द्धितगतिविशेषया करेण्वा महाश्वेताश्रममगमत्।

अथ सहसैव चन्द्रापीड़गुरुजनागमनमाकर्ण्य पुनः प्रकीर्णतार मुक्तानुकारिनयनजलविन्दुसन्दोहं हा हतास्मि! मन्दपुण्या दुःखैक भागिनी न जानास्येव विस्मृतमरणा कियद्यावदहमनेनानेकप्रकार खलीकारदानैकपण्डितेन दग्धवेधसा परं दग्धव्येत्यभिदधाना एव धावित्वा क्रिया महाश्वेता गृहाभ्यन्तरमविशत् चित्ररथतनयापि सत्वरोपसृतसखीकदम्बकावलम्बितशरीरा तूष्णीमेव मोहान्धकारम्। तदवस्थयोश्च तयोः शुकनासावलम्बितशरीरो राजा विवेश आश्रमपदं तदनु च मनोरमानुलम्बितशरीरा पुरःप्रधावितोत्प्लुतायततर दृष्टिः क्व वत्स इति वदन्ती विलासवती। प्रविश्य च सहजया कान्त्यैव अविरहितसुपरतसर्व्वप्रयत्नं प्रस्तरमयमिव तं पुत्रवत्सलः पुत्रमालोक्य यावन्न परापतत्येव तारापीड़स्तावद्विलासवती विधारयन्तीं मनोरमामप्याक्षिप्य दूरत एव प्रसारितबाहुलताद्वया रयोन्मुक्तजर्जराभिर्नयनजलधाराभिः प्रस्रवेन सिञ्चन्ती महीतलम् एहि जात दुर्लभक चिराद्दृष्टोऽसि देहि मे प्रतिवचनमालोकय सकृदपिमामनुचितं तात! तवैतदवस्थानम् उत्यायाङ्कोपगमनेन मे सम्पादय तनयोचितं स्नेहम् अनवकर्णितपूर्वं बाल्येऽपि त्वया मद्वचनमद्य किमिवं प्रलपन्त्या

अपि न शृणोषि जात ! केन रोषितोऽसि एषा तोषयामि वत्स ! पादयोर्निपत्य पुत्र चन्द्रापीड़ ! प्रणम तावत् प्रत्युद्गम्य त्वत्स्नेहादेव अतिदूरमागतस्यापि पितुः पादौ क्व सा गता ते गुरुजनभक्तिः ? क्व ते गुणाः ? क्व स स्नेहः ? क्व सा धर्म्मज्ञता ? क्व तत् पितृपक्षपातित्वं ? क्व सा बन्धुप्रीतिः ? क्व सा परिजनवत्सलता ? कथमभाग्यैर्मे सर्वमेकपद एवोत्सृज्यै-वमौदासीन्यमवलम्ब्यावस्थितोऽसि। अथवा यथा ते सुखं तथा तिष्ठ वयममुदासीनहृदयास्त्वयीति कृतार्त्तप्रलापा स-मुपसृत्य पुनर्गाढ़गाढ़मालिङ्ग्याङ्गानि शिरःसमाघ्राय कपोलौ चुम्बयित्वा चन्द्रापीड़स्य चरणावुत्तमाङ्गे कृत्वा मुक्त-कण्ठमरोदीत्। ततस्तथा रुदन्तीन्तु तामन्तरितनिजपीड़स्तारापीड़श्चन्द्रापीड़मपि अपरिष्वज्जैव सर्वप्रजापीड़ापह-रणक्षमाभ्यां दोर्भ्यामवलम्ब्याब्रवीत् देवि ! यद्यप्यावयोः सुकृतैरपत्यतामुपगतस्तथापि देवतामूर्त्तिरयमशोचनीयः तदुन्मुच्यतामयमिदानीं मनुष्यलोकोचितः परिशोचितव्य-वृत्तान्तः अस्मिन् शोके कृते किञ्चिदपि न भवति, केवलं गल एव स्फुटति रटतो न हृदयं निरर्थकं प्रलपितमेव निर्याति परं वदनान्न जीवितं निरासङ्गं नयनजलमेव पतति न शरीरम्। अपि च वत्सस्यादर्शनमात्रमेवावयोः पीड़ाकरं तच्चैवमालोक्यमाने मुखेऽस्य दूरापेतम् अपर-मस्यामवस्थायामावाभ्यां द्वाभ्यामपि तावत् परमवष्टम्भं

कृत्वा मनोरमा शुकनासश्च सन्धारणीयौ ययोर्लोकान्तरितो वैशम्पायनः तिष्ठेतां तावदेतावपि यस्याः प्रभावात् पुनरनुभवनीयोऽस्य जीवितलम्भाभ्युदयमहोत्सवः सेयं गन्धर्वराजतनया बधूस्तेऽस्मदागमन शोकोर्म्मिसंक्रान्तिमूढ़ा स्ननामग्रहणमुन्मुक्ताक्रन्दाभिः प्रियसखीभिर्गृह्यमाणाप्यद्यापि संज्ञां न लभते तदेनां तावदङ्के कृत्वा उत्थाप्य चेतनां लम्भय ततो यथेच्छं रोदिष्यसीति।

विलासवती तु तत् श्रुत्वा ससम्भ्रमोन्मुक्तचन्द्रापीड़चरणा तत् क्व सा मे जीवितप्रतिलम्भहेतुर्वत्सस्य बधूरपि धावमाना चोपसृत्य तदवस्थान्तु तामुत्थाप्याङ्के कृत्वा मूर्च्छानिमीलनाहितद्विगुणतरनयन शोभं वदनमालोक्यानवरतनयनसलिलस्नानार्द्रमिन्दु शकलशीतलं स्वकपोलं कपोलयोर्ललाटे लोचनयोश्च निवेशयन्ती चन्द्रापीड़स्पर्श शीतलेन च पाणिना हृदयं स्पृशन्ती समाश्वसिहि मे मातस्त्वया विनाद्यैव प्रभृति केन सन्धारितं वत्सस्य मे चन्द्रापीड़स्य शरीरं मातस्त्वममृतमयी जातासि येन वत्सस्य पुनर्वदनमालोकितमित्यवादीत्। कादम्बरी तु तेन चन्द्रापीड़नामग्रहणेन तेन च निर्विशेषवृत्तिना विलासवतीशरीरस्पर्शेन लब्धसंज्ञा लज्जावनम्रमुखी प्रतिपत्तिमूढ़ा मदलेखायाङ्कादवतार्य्य परवत्येव यथाक्रममकार्य्यत वन्दनां गुरूणाम् आयुष्मति ! दीर्घकालमविधवा भवेति

कृताशीर्व्वादा शनैरुत्थाप्यमानातिनिकटे विलासवत्याः पृष्ठतः समुपविश्याधाय्यत। अथ प्रत्यापन्नचेतनायां चित्ररथतनयायां चन्द्रापीड़मेवोज्जीवितं मन्यमानो राजा चिरमिवास्य गाढ़मङ्क मालिङ्ग्यञ्चुम्बंश्च पश्यंश्च स्पृशंश्च स्थित्वा मनलेखामाहूयादिदेश दर्शनसुखमात्रकमस्माकं विधीयमानं त्वयास्माभिरासादितं तयाद्यश्वैनैवोपचारेणैतावतो दिवसानुपचरितवती बधूर्वत्सस्य शरीरं स एवोपचारो नास्मदुपरोधाल्लज्जया वा मनागपि परिहापणीयः निष्प्रयोजना द्रष्टार एव केवलं किमस्माभिरत्र स्थितैर्गतैर्वा यस्याः करस्य सङ्गेनाप्यायितमेतदविनाशि शरीरं सैव बधू पार्श्वेऽस्य तिष्ठत्वित्यादिश्य निर्ज्जगाम। निर्गत्यचोपकल्पितं निजावासमगत्वैव तपस्विवासोचितेऽन्यतमस्मिन्नासन्न एवा श्रमस्य शुचिशिलातलसनाथे तरुलतामण्डपे समुपविश्य निर्विशेष दुःखं सकलमेव राजचक्रमाहूय सबहुमानमबादीत्। न भवद्भिरवगन्तव्यं यथाद्य शोकावेशादेतदहमङ्गीकरोमि पूर्व्वचिन्तित एवायमर्थो यथा बधूसमेतस्य चन्द्रापीड़स्य वदनमालोक्य संक्रामितनिजभरेण मया क्वापि गत्वाश्रमपदे पश्चिमं वयः क्षपितव्यमिति। सचायं मे भगवता कृतान्तेन पुराकृतैः कर्म्मभिर्वा विरूपैरेवं समुपनमितः किमपरं क्रियतेऽनतिक्रमणीया नियतिरप्रापणीयं नानुभूतमात्मचेष्टाकृतं वत्सस्य सुखं प्रजापरिपालनफलं बलं पुनर्भवद्भुजेष्वेवमत्ततेष्वविहतमस्त्ये-

वान्यथापि हि चेष्टमानेष्वस्मासु सर्वमेवावस्थितं तदिच्छामि चिरकाङ्क्षितं मनोरथं पूरयितुं धन्याश्च जरापीतसार-तनवस्तनये भ्रातरि वात्मभरमासज्य लघुशरीराः पर-लोकगमनं साधयन्ति, तच्च बलाद्गले पादमाधाय यदा तदानिच्छतोऽप्याच्छिद्यत एव कृतान्तेन, तद्यदि पात्रे क्वापि स्थापयित्वा निजपदं जरापरिभुक्तशेषेण निष्प्रयोजनस्थितिना सर्वसुखबाह्येन मांसपिण्डेन शरीरकेण परलोकसुखान्युपा-र्ज्यन्ते लाभ एवायं तस्य वस्तुनः कृते भवन्तो मया प्रार्थनीया इत्युक्त्वा सन्निहितान्यपि परित्यज्योचितान्युपभोगसुखान्यनु-चितान्यङ्गीकृत्य च वन्यानि तपोवनदुःखानि च तथाहि हर्म्य-बुद्धिं वृक्षमूलेषु अन्तःपुरस्त्रीप्रीतिं लतासु संस्तुतजनस्नेहं हरिणकेषु निवसनरुचिं चीरवल्कलेषु कुन्तलरचनाभियोगं ज-टासु आहारहार्दं कन्दमूलफलेषु शस्त्रधारणव्यसनमक्षसूत्रे प्रजाप्रतिपालनशक्तिं समित्कुशकुसुमेषु नर्मालापं धर्मसं-कथासु समररसमुपशमे जयेच्छां परत्र कोशस्पृहां तपसि आज्ञां मौने सर्वोपभोगरागञ्च वैराग्ये तरुषु तनयस्नेहं संक्रमय्य तथा तपस्विजनोचिताः क्रियाः कुर्वन् गन्धर्वलोको-चितानहरहरुपचारान् कादम्बर्य्या कथमपि समुत्सृष्टल-ज्जया महाश्वेतया च क्रियमाणाननिच्छन्नविच्छेदात् साय-म्प्रातस्त्वानुभूतचन्द्रापीड़दर्शनसुखो दुःखान्यविगणयन् नर-पतिः सपरिवारः समं देव्या शुकनासेन च तत्रैवातिष्ठत्।

एवञ्च कथयित्वा जावालिर्जराभिभवविच्छायं स्मितं कृत्वा हारीतप्रमुखान् सर्वानेव तान् श्रावकानवादीत्। दृष्टमायुष्मद्भिरिदमन्तःकरणापहारिणः कथारसस्याक्षेपसामर्थ्यं यत्कथयितुं प्रवृत्तोऽस्मि तत् परित्यज्यैव कथारसात् कथयन्नतिदूरमतिक्रान्तोऽस्मि तदयं स कामप्रहृतचेताः स्वयं कृतादेवाविनयाद्दिव्यलोकतः परिभ्रश्य मर्त्यलोके वैशम्पायन नामा शुकनासतनयः उत्पन्नः स एष पुनः स्वयंकृतेनाविनयेन कोपितस्य पितुराक्रोशात् महाश्वेताकृताच्च सत्याभिध्यानात् अस्यां शुकयोनौ पतितः।

इत्येवं वदत्येव भगवति जावालौ बाल्येऽपि मे सुप्तप्रबुद्धस्येव पूर्वजन्मान्तरोपात्ताः समस्ता एव विद्याः जिह्वाग्रेऽभवन्। सकलासु च कलासु उपदेशकौशलमुपजातं, मनुजस्येव विस्पष्टवर्णाभिधाना भारती संवृत्ता, विज्ञानञ्च सर्ववस्तुविषयं स्मरणञ्च। किं बहुना मनुष्यशरीराद्दते तत् सर्वमन्यत्तत्क्षण एव संवृत्तं स एव चन्द्रापीड़स्योपरि स्नेहः, सैव कामपरता, स एव महाश्वेतायामनुरागः, सैव तदवाप्तिं प्रत्युत्सुकता केवलमसञ्जातपक्षतया मे तस्मिन् समये पूर्वजन्मोपात्ता चेष्टा नासीत्, तथापि चाविर्भूतसकलान्यजन्मवृत्तान्तः समुत्सुकान्तरात्मा किं मातापित्रोः किं तातस्य तारापीड़स्य किमम्बाया विलासवत्याः किं वयस्यस्य चन्द्रापीड़स्य उत प्रथमसुहृदः कपिञ्जलस्य आहोस्विन्महाश्वेताया

इति नाज्ञासिषमेव कस्य कस्य कथं कथं चास्मृतवानस्मीति। तथा चोत्सुकान्तरात्मा महीतलन्यस्तशिराश्चिरमिव स्थित्वा भगवन्तं जावालिं निजाविनयश्रवणलज्जया विलीयमान इव विशन्निव च पातालं कथमपि शनैः शनैर्व्यज्ञपयम्। भगवं-स्त्वत्प्रसादादाविर्भूतज्ञानोऽस्मि संवृत्तः, स्मृता मया सर्व एव पूर्वबान्धवाः, मूढतायाञ्च मे यथैवमेतेषां स्मरणं नासीत्, तथैव विरहपीड़ाभिः अधुना पुनस्तान् स्मृत्वा स्मृत्वा स्फुट-तीव मे हृदयं, नच तथान्यान् यथा चन्द्रापीड़ं यस्य मदुप-रतिश्रवणमात्रकात् स्फुटितं हृदयं, दयां करोतु भगवां-स्तस्यापि जन्माख्यानप्रसादप्रदानेन येनायं तिर्य्यग्योनिवा-सोऽपि मे तेन सहैव वसतो न पीड़ाकरः सञ्जायते इति।

एवञ्च विज्ञापितो मया सासूयमिव मामालोक्य भग-वान् जावालिः सस्नेहकोपगर्भं प्रत्यवादीत्। दुरात्मन्! यथैतावतीं हृदयतरलदशामुपगतोऽसि कथं तामेव तरल-हृदयतामनुवध्नास्यद्यापि पक्षावेव नोद्भिद्येते, तत् सञ्चरण-क्षमस्तु तावत् भव ततो मां प्रच्छसीति। एवमुक्ते भगवता समुत्पन्नकुतूहलो हारीतः पप्रच्छ। तात! महानयं विस्मयो मे कथय कथमस्य मुनिजातौ वर्त्तमानस्य तादृशी कामपरता जाता, यया जीवितमपि न सन्धारयितुं पारितं कथञ्च दिव्यलोकसम्भूतस्य तथाल्पत्वमायुः संवृत्तम्। एवञ्च पृष्टः सूनुना भगवान् जावालिरमलाभिः पापमलमिव प्रक्षा-

त्वयन्मे दशनदीधितिसलिलधाराभिः प्रत्यवादीत्। वत्स! विस्पष्टमेवात्र कारणम् अयं हि कामरागमोहमयादल्पसारात् स्त्रीवीर्य्यादेव केवलात् उत्पन्नः, श्रुतौ च पठ्यते "यादृशाद्वै जायते तादृगेव भवतीति।" लोकेऽपि च प्रायः कारणगुणभाञ्ज्येव कार्य्याणि दृश्यन्ते। तथा चैतदायुर्व्वेदेऽपि श्रूयते, यः किलाल्पसारात् स्त्रीवीर्य्यादेव केवलात् जन्तुरुत्पद्यते, स खल्वभावात् सारभूतस्य स्थैर्य्यहेतोः पुरुषवीर्य्यस्य [क] गर्भे वा विलयमापद्यते मृतो वा जायते जातो वा दीर्घकालं न जीवतीति। तदयमुत्पन्न एवेदृशो येनास्य तादृशी कामपरता जाता, मरणञ्च मदनज्वरवेगसंज्वरासहिष्णोस्तथोपगतम्, अधुनापि तादृश एवायमल्पायुः शापावसानोत्तरकालमस्याक्षयेणायुषा योगो भविष्यति।

इत्येतत् श्रुत्वा पुनर्प्यवनितलनिवेशितशिराः प्रणम्य भगवन्तं व्यज्ञपयं भगवन्नहमपुण्यवानस्यां तिर्य्यग्योनौ वर्त्तमानः स्वयं सर्वस्याक्षमः वागपि मे भगवत्प्रसादात् सम्प्रत्येवानने सम्भूता भूतपूर्वञ्च ज्ञानमन्तरात्मनि शरीरं पुनरायुःसम्बद्धैककर्म्मयोग्यं भगवतः प्रसादादस्मिन् जन्मनि भवेत् केन प्रकारेणाक्षयं तन्मे महाकर्म्म साध्यमायुर्भविष्यतीत्येतदाज्ञापयतु भगवान् इत्येवं विज्ञापितस्तु मया दिव्य

[क] यथा सारमिति अधिकः पाठः।

विक्षिप्य चक्षुर्भगवानाज्ञापितवान्। एतदपि यथा तथा ज्ञास्यस्येव आस्तां तावदियं कथा रसाक्षेपादचेतितैवास्माभिः प्रभातप्राया रजनी, प्रभाविरहादुन्मृष्टरजतदर्पणाभमिदमपराम्बरान्तावलम्बि वर्त्तते रजनिकरविम्बम् एषा यथोद्गमनविस्तारिणी जरत्तामरसपत्रारुणा पाण्डुच्छविरुल्लसति सीमन्तयन्ती तमःकेशसङ्घातमिव पूर्वस्याः ककुभोऽरुणाग्रकरालोकवर्त्तिः इमाः सशेषतिमिरतयाम्बरैककाण्डपटकलुषं भास्वत्प्रभालोकमारब्धाः क्रमेण यथास्वच्छं तारकाः प्रवेष्टुम् एष पम्पासरःशायिनां प्रबोधाशंसी समुच्चरति कोलाहलः श्रोत्रहारी विहङ्गमानाम् एते च निशीथिनीपरिमलशीतलास्खलितवनकुसुमपरिमलग्राहिणो वातुं प्रवृत्ताः प्रभातपिशुना वायवः प्रत्यासन्ना चाग्निविहरणवेला इत्यभिदधान एव गोष्ठीं भंक्त्वोदतिष्ठत्।

अथोत्थिते भगवति जाबालौ वीतरागापि निष्कामुकापि मोक्षमार्गावस्थानापि समस्तैव सा तपस्विपरिषत् कथारसाद्विस्मृतगुरूचितप्रतिपत्तिः शृण्वतीवोत्कण्टकितकाया विस्मयोत्फुल्लमुखी युगपदागलितशोकानन्दजन्मनयनसलिला हाकष्टशब्दानुबन्धिनी पराधीनेव स्तम्भितेव चिरमिव स्थित्वा यथास्थानं जगाम। हारीतस्तु सन्निहितेऽपि मुनिकुमारकजने मां निजकरेणैवोत्क्षिप्यात्मपर्णशालायां नीत्वा शनैर्वेदीदेशे स्थापयित्वा प्राभातिकक्रिया-

करणाय निर्ययौ। निर्गते च तस्मिंस्तेन सर्वकार्य्याक्षमेण तिर्य्यग्जातिपतितेन देहेन पीड़िताम्तरात्मा चिन्तां प्राविशम् अत्र तावदनेकभवसुकृतशतसहस्राधिगम्यं मानुष्यमेव दुर्लभं तत्रापि परं सकलजातिविशिष्टं ब्राह्मण्यं तत्रापि विशिष्टतरमासन्नामृतपदं मुनित्वं तस्यापि विशेषान्तरं किमपि दिव्यलोकनिवासित्वं तद्येनैतावतः स्थानात् स्वदोषेणैवात्मा पातितः तेन कथमधुना सर्वक्रियाविहीनेनास्यास्तिर्य्यग्जातेः समुद्धृतः स्यात् कथं वा पूर्वजन्माहितस्नेहैः सह समागमसुखमनुभूतम् अननुभवतश्च तन्निष्प्रयोजनेनामुना जीवनेनैव किं मे परिरक्षितेन पततु यत्र तत्रापरत्र क्वापि यातु शरीरं सुखन्तु नानुभवितव्यमेवामुना दुःखैकभाजनेन तत्परित्यजाम्येनां तनुं पूर्य्यतामस्मद्व्यसनदानैकचिन्तादुःस्थितस्य विधेर्म्मनोरथ इति। एवञ्च जीवितपरित्यागचिन्तामीलितं समुच्छ्वासयन्निव विकासहासिना मुखेन सहसा प्रविश्य हारीतोऽभ्यधात्। भ्रातर्वैशम्पायन! दिष्ट्या वर्द्धसे पितुस्ते भगवतः श्वेतकेतोः पादमूलात् कपिञ्जलकस्त्वामेवान्विष्यन्नागत इति।

अहन्तु तत् श्रुत्वा तत्क्षणोत्पन्नपक्ष इवोत्पत्य समीपं विहायसैव प्राप्तुमभिवाञ्छन्नुद्ग्रीवावलोकी क्वासाविति तमप्राक्षं सत्वकथयदेष तातपादमूले वर्त्तत इति। एवंवादिनं तमहं पुनरवदं यद्येवं ततः प्रापयतु मां तत्रैव

भगवान्, उत्ताम्यति मे हृदयं तद्दर्शनाय इत्येवं वदन्नेवाग्रतो गगनागमनवेगादयथास्थितजटाकलापम् अनिलपथसञ्चरणवेगचलितैकाञ्चलयोत्तरीयतरुत्वचा दृढ़ाबद्धपरिकरम् अर्द्धत्रुटितयज्ञोपवीतसनाथास्थिशेषोरस्कं निःशेषसुरपथावतरणश्रमायासितशरीरं समीरणापहृतमपि मरुत्पथोत्पतनखेदसम्भृतमुदकप्रवेशान्निष्यन्दमानं स्वेदमाननेन मदवलोकनदुःखागतञ्च वाष्पजललवविसरमोक्षणाभ्यां युगपदुत्सृजन्तं मुमुक्षुमपि मत्स्नेहेनामुक्तं वीतरागमपि मत्प्रियहितरतं निःसङ्गमपि मत्समागमोत्सुकं निस्पृहमपि मदर्थसम्पादनपर्य्याकुलं निर्म्ममम‌प्युपारूढ़स्नेहं निरहङ्कारमपि अहमेवायमिति मां मन्यमानं समुज्झितक्लेशमपि मदर्थे क्लिश्यमानं समलोष्टाश्मकाञ्चनसुखमपि दुःखितं कृतज्ञमकृतज्ञः स्नेहलप्रकृतिं रूक्षचेताः सुकृतिनमपुण्यवान् अनुगतं वामस्वभावः भावार्द्रहृदयमेकान्तनिष्ठुरः मित्रं वैरी वचनकरमनाश्रवो महात्मानं दुरात्माहं कपिञ्जलमद्राक्षम्। दृष्ट्वा च निर्भरगलितनयनपयास्तादृशोपि कृताभ्युद्गमनप्रयत्नः फूत्कृत्य तमवदं, सखे कपिञ्जल! एवं जन्मद्वयान्तरितदर्शनमपि त्वां दृष्ट्वा किं सरभसमुत्थाय दूरत एव प्रसारितभुजद्वयो गाढ़ालिङ्गनसुखमनुभविष्यामि किं करेणावलम्ब्यासनपरिग्रहं कारयिष्यामि किं सुखासीनस्य गात्रसंवाहनं कुर्वन् श्रममपनेष्यामि इत्येवमात्मानमनु-

शोचन्तमेव मां कपिञ्जलः करद्वयेनोत्क्षिप्य मद्विरहदुःख-दुर्बले वक्षसि निवेश्य चिरमिवान्तःप्रवेशयन्निवालिङ्गनसुखं किल तथा मेऽनुभूय भूयसा मन्युवेगेनोत्तमाङ्गे कृत्वा मच्चरणावितरवदरोदीत्।

तथा रुदन्तं तं वाञ्छातप्रतीकारः पुनरवदं, सखे कपिञ्जल! सकलक्लेशपरिभूतस्य मन्दात्मनो ममेदं युज्यते यत् त्वया प्रारब्धं त्वं पुनर्बालोपि न स्पृष्टएवामीभिः रागादिभिः संसारबन्धात्मकैर्निर्व्वाणमार्गपरिपन्थिभिर्दोषैस्तत्किममुना मूढ़जनगतेन वर्त्मना। समुपविश्य कथय अपि कुशलं तातस्य? स्मरति वा मां दुःखितो वा मदीयेन दुःखेन महृत्तान्तमाकर्ण्य किमुक्तवान् कुपितो न वेति। सत्वेवमुक्तो मया हारीतशिष्योपनीते पल्लवासने समुपविश्याङ्के मां कृत्वा हारीतोपनीतेनाम्भसा प्रक्षाल्य मुखमाख्यातवान्, सखे! कुशलं तातस्य अयं चास्मद्वृत्तान्तः प्रथमतरमेव तातेन दिव्येन चक्षुषा दृष्टो दृष्ट्वा च प्रतिक्रियायै कर्म्म प्रारब्धं समारब्धएव कर्म्मणि तुरगभावाद्विमुक्तः सन् गतोस्मि तातस्य पादमूलं गतञ्च मां दूरतएवोद्वाष्पदृष्टिर्विषसदीनवदनं भयादनुपसर्पन्तमालोक्याहूयाज्ञापितवान् वत्स कपिञ्जल! परित्यज्यतां स्वदोषशङ्का ममैवायं खलु शठमतेः सर्व एव दोषः येन जानताप्युत्पत्तिसमय एव वत्सस्य कृते नेदमायुष्करं कर्म निर्व्वर्त्तितम् अधुना सिद्धप्रायमेवेदं

न दुःखासिका भावनीया मत्पादमूले तावत् स्थीयतामित्येवमाज्ञापितस्तु तातेन विगतभीर्व्यज्ञपयं, तात! यदि प्रसादोऽस्ति ततोयत्रैवासावुत्पन्नस्तत्रैव गमनायाज्ञापयतु मां तात! इत्येवं विज्ञापितो मया तातः पुनराज्ञापितवान्, वत्स! शुकजातावसौ पतितः, तद्गत्वापि तमद्य नैव वेत्सि नाप्यसौ त्वां वेत्तीति तत्तिष्ठ तावदिति। अद्य च प्रातरेवाहूय मामाज्ञापितवान् वत्स कपिञ्जल! महामुनेर्जाबालेराश्रमपदं सुहृत्ते प्राप्तो जन्मान्तर स्मरणं चास्योपजातं तद्गच्छ सम्प्रति तं द्रष्टुं मदीयया चाशिषानुगृह्य वक्तव्यः वत्स! यावदिदं कर्म्म परिसमाप्यते, तावत् त्वयास्मिन्नेव जाबालेराश्रमे स्थातव्यमिति। अपि च त्वद्दुःखदुःखिताम्बा ते श्रीरप्यस्मिन्नेव कर्म्मणि परिचारिका वर्त्तते तयापि शिरस्युपाघ्रायैतदेव पुनःपुनः समादिष्टम्। इत्येवमुक्त्वा अकठोरशिरीषकुसुमशिखासूक्ष्मोद्भेदपक्ष्मलानि गात्राणि मे पुनःपुनः पाणिना परामृश्यान्तर्हृदयेनादूयत तथा दूयमानहृदयश्च तमवदं, सखे कपिञ्जल! किं दूयसे, त्वयापि मन्दपुण्यस्य मम कृते तुरगतामापन्नेन पराधीनवृत्तिना बहुतराण्येव दुःखान्यनुभूतानि कथं सोमपानोचितेनामुनास्येन समुत्पादितसृक्कणरक्तस्रवाः खरखलीनक्षतयो विसोढ़ाः कथमयमकठोरकिशलयशयनैकसुखसेवासुकुमारः सदा पर्य्याणितस्य न शीर्णः पृष्ठवंशः कथमेषु कुसुमोच्चयपतित-

बालवनलतास्पर्शमात्रक्षमेषु गात्रेषु कशाभिघाता निपतिताः कथञ्च ब्रह्मस्तवोद्वाहिनि देहेऽस्मिन् बद्धोत्पीड़नकृताः पीड़ाः समुपजाता इत्येभिरन्यैश्च पूर्ववृत्तान्तालापैस्तत्कालविस्मृततिर्य्यग्जातिदुःखः सुखमतिष्ठम्।

उपरोहति च मध्यमह्नः सवितरि हारीतः सह कपिञ्जलेन मां यथोचितमाहारमकारयत्। कृताहारश्च कपिञ्जलः क्षणमिव स्थित्वा मामब्रवीत् अहं हि तातेन त्वां समाश्वासयितुं जाबालिपादमूलादाकर्म्मपरिसमाप्तेर्न त्वया चलितव्यमित्येतच्चादेष्टुं विसर्ज्जितः, अहमपि तत्रैव कर्म्मणि व्यग्रतर एव तद्व्रजामि सम्प्रति। अहन्तु तत् श्रुत्वा विषस्रवदनस्तु प्रत्यवदं, सखे कपिञ्जल! एवंगते किं ब्रवीमि किञ्च तातस्याम्बाया वा सन्दिशामि सर्वं त्वमेव वेत्सीति। सत्वेवमुक्तो मया पुनः पुनस्तत्रावस्थानाय मां सम्बिधाय हारीतञ्चानुभूतास्मदालिङ्गनसुखो विस्मयोन्मुखेन मुनिकुमारकजनेनेक्ष्यमाणोऽन्तरीक्षमतिक्रम्य क्वाप्यदर्शनमगात्। गते च तस्मिन् हारीतः समाश्वास्य मां शरीरस्थितिकरणायोदतिष्ठत् उत्थाय चान्यतमं मुनिकुमारकं मत्पार्श्वे स्थापयित्वा निरगात् निर्गत्य च निर्वर्त्तितस्नानादिक्रियाकलापश्चात्मनैव सह सायाह्नसमये पुनर्मामाहारमकारयत्।

एवञ्चाहितचेतसा हारीतेन संवर्द्धमानः कतिपयैरेव दिवसैः सञ्जातपक्षोऽभवम्। उत्पन्नोत्पतनसामर्थ्यश्च

चेतस्यकरवं गमनक्षमस्तु संवृत्तोऽस्मि तत्र नाम तावत् चन्द्रापीड़ोत्पत्तिपरिज्ञानं महाश्वेता पुनः सैवास्ते तत् किमुत्पन्नज्ञानोऽपि तद्दर्शनेन विनात्मानं निमेषमपि दुःखे स्थापयामि भवतु तत्रैव गत्वा तिष्ठामीति निश्चित्य एकदा प्रातर्विहारनिर्गत एवोत्तरां ककुभं गृहीत्वा अव-हम्। अबहुदिवसाभ्यस्तगमनतया स्तोकमेव गत्वा अव-शीर्य्यन्त इव मेऽङ्गानि श्रमेण अशुष्यत चञ्चुपुटं पिपासया नाड़िन्धमेनाध्मायत कण्ठः श्वासेन लदवस्थस्य शिथिलाय-मानपक्षतिः अत्र पताम्यत्र पतामीति पतन्नेवाहितगमन-प्रयत्नोऽन्यतमस्य तमस्विनीतिमिरसङ्घातस्येव[क]दृष्टिहारिणा हरितघननिविड़पल्लवभरावनम्रस्यासन्नतरस्य सरस्तीरजम्बू-निकुञ्जस्योपरि आत्मानममुञ्चम्। चिरादिवोन्मुक्ताध्वश्रम-क्लमोऽवतीर्य्य शीतलतरुतलच्छायास्थितो दलगहनसंरोध-शिशिरमरविन्द-किञ्जल्करजोवाससुरभिनिविड़रसकषायमधु-रमापीयमानमेवोत्पादितापुनरुक्तपानस्पृहमात्तैः पयोनि-पीय यथा प्राप्तैरकठोरकमलकर्णिकाबीजैस्तीरतरुपर्णा-ङ्कुरैः फलैश्च कृत्वा क्षुधः प्रतीकारम् अपराह्णसमये पुनः कियन्तमप्यध्वानं यास्यामीति मनसि कृत्वाध्वश्रम-निःसहान्यङ्गानि विश्रमयितुमन्यतमामविच्छिन्नच्छायां

[क] अर्ककार तिरस्कारिणीत्यधिकः पाठः।

शाखामारुह्य च तरोर्मूलभाग एवावतिष्ठम्। तथास्थित-श्चाध्वश्रमसुलभां निद्रामगच्छम् चिरादिव लब्धप्रबोधो बद्ध-मात्मानमनुन्मोचनीयैस्तन्तुपाशैरपश्यम्। अग्रतश्च पार्श्वविर-हितमिव कालपुरुषम् अतिकठिनतया कालिम्ना च वपुषः कालायसपरमाणुभिरिव निर्मितं प्रेतपतिमिवापरं प्रति-पक्षमिव पुण्यराशेः आश्रयमिव पाप्मनो विनापि क्रोधका-रणाद्दृढभीषणभ्रुकुटीरौद्रतरेणाननेन रक्ततरकनीनिकेन चक्षुषा च सकलजनभयङ्करस्य भगवतः कृतान्तस्यापि भयमिवोपजनयन्तम् आशये केशेषु चास्निग्धम् आनने ज्ञाने चान्धकारितं वर्णे चरिते च कृष्णं निवसने कर्म्मणि च मलिनं वपुषि वचसि च परुषम् अदृष्टश्रुतानुभूतमप्याशये-प्रत्ययादेवानुमीयमानक्रौर्य्यदोषं पुरुषमद्राक्षम्। आलोक्य च तं तादृशमात्मन उपरि निष्प्रत्याश एवापृच्छं भद्र! कस्त्वं किमर्थञ्च त्वया बद्धोऽस्मि यद्यामिषतृष्णया तत्किमिति सुप्त एव न व्यापादितोऽस्मि किं मया निरागसा बन्धः-दुःखमनुभावितेन? अथ कौतूकात्ततः कृतं कौतुकं मुञ्चतु मामिदानीं भद्रमुखो, मया खलु वल्लभजनदर्शनोत्कण्ठितेन दूरं गन्तव्यम् अकालक्षेपक्षमञ्च वर्त्तते मे हृदयं भवानपि प्राणिधर्म्मेषु वर्त्ततएवेति। सत्वेवमुक्तो मां प्रत्यवादीत्, महा-त्मन्! अहं खलु क्रूरकर्म्मा जात्या चत्या चाण्डालो न च मया त्वमामिषलब्धेन कुतूहलिना वा बद्धो, मम खलु स्वामी

पक्कणाधिपतिरितो नातिदूरे मातङ्गप्रतिबद्धायां भूमौ कृतावस्थानस्तस्य दुहिता कौतुकमये प्रथमे वयसि वर्त्तते, तस्यास्त्वं केनापि दुरात्मना कथितो, "यथा किल जावालेराश्रमे एवं गुणविशिष्टः शुकस्तिष्ठतीति" तया च श्रुत्वोत्पन्नकौतुकया त्वद्ग्रहणाय बहव एवापरेऽपि मादृशाः समादिष्टाः तदद्य पुण्यैर्मयासादितोऽसि। त्वां तत्पादमूलं नयाम्यद्याहं, बन्धे मोक्षे चाधुना सा ते प्रभवतीति।"

अहन्तु तत् श्रुत्वा शुष्काशनिनेव ताड़ितः शिरसि संविग्नान्तरात्मा चेतस्यकरवम्, (क) "अहो मन्दभाग्यस्य दारुणतरः कर्म्मणां विपाको, येन मया सुरासुरशिरःशेखराभ्यर्च्चितचरणसरसिजायाः श्रियो जातेन जगत्त्रयनमस्यस्य महामुनेः श्वेतकेतोः स्वहस्तसंवर्द्धितेन दिव्यलोकाश्रमनिवासिना भूत्वा म्लेच्छजातिभिरपि दूरतः परिहृतप्रवेशमधुना पक्कणं द्रष्टव्यं, चण्डालैः सहैकत्र स्थातव्यं, जनङ्ग(ख)माङ्गनयोपनीतैः कवलैः आत्मा पोषणीयः चण्डालबालकजनस्य क्रीड़नीयेन भवितव्यं, दुरात्मन्! पुण्डरीकहृतक! धिक् जन्मलाभं ते, यस्य कर्म्मणोऽयमीदृशः परिणामः, किमर्थं प्रथमगर्भे एव न सहस्रधा विशीर्णोऽसि। मातः!

[क] अयमधुना स्वल्पायुरेवेति सत्यमुक्तं भगवता जावालिनेति वा पाठः।

[ख] जरन् इति वा पाठः।

श्रीरशरणजनशरणचरणपङ्कजोऽतिगहन-भीषणाद्‌च्च मामस्मा-न्महानरकपातात्, तात! भुवनत्रयरक्षणक्षम! त्रायस्व कुलतन्तु-मेकं, त्वयैव सम्बर्द्धितोऽस्मि, वयस्य कपिञ्जल! यदि परापत्य त्वया अस्मात् पापात् न मोचितोऽस्मि, तदा जन्मान्तरेऽपि पुनर्मोक्षया मत्समागमप्रत्याशाम्” इत्येतानि चेतसा विलप्य तं पुनरभ्यर्थनादीनमवदं, भद्रमुख! जातिस्मरो मुनिरस्मि ज्ञात्वा तत्त्वापि मामस्मान्महतः पापसङ्कटादुद्धृत्य धर्म्मो भवेदेवादृष्टसुखहेतुः दृष्टेऽपि च ते केनचिदपरेणादृष्टस्य मन्मुक्तिकृतःप्रत्यवायो नास्त्येव, तन्मुञ्चतु भवान्मामित्य-भिदधानश्च पुनःपुनः पादयोरपतम्। स तु मां विहस्या-ब्रवीत्, अरे मोहान्ध! यस्य शुभाशुभकर्म्मसाक्षिभूताः पञ्च लोकपालाः तवैवात्मशरीरे स्थिताः, न पश्यन्ति सोऽन्यस्य कस्य भयादकार्य्यं नाचरति तन्नीतोऽसि मया स्वाम्याज्ञये-त्येवमभिदधान एव मामादाय पक्कणाभिमुखमगमत्।

अहन्तु तेन तद्वचसाभिहत इव मूर्च्छिं मूकतामापन्नः केषां पुनः कर्म्मणां मे फलमिदमित्यन्तरात्मनाभिध्यायन्, प्राणपरित्यागं प्रति कृतनिश्चयोऽभवम्। नीयमानश्च तथा तेनाऽत्मनो मोचनप्रत्याशयैवाग्रतोदत्तदृष्टिराविष्टैरिव बीभ-त्सविन्यासैर्व्याहृतैश्च वर्त्तकानामुपरिभ्रमणनिभृतैश्च मृगाव-पाटितजीर्णवागुरासंग्रथनव्यग्रैश्चोत्त्रुटितकूटपाशग्रथनायस्तैश्च हस्तस्थितसकाण्डकोदण्डैश्च पाशप्रचण्डदण्डपाणिभिश्च

भल्लग्राहिभिश्च लगुडिभिश्च लासकग्राहिभिश्च नानाविधग्राहकविहङ्गवाचालनाकुशलैश्च कौलेयकमुक्तिसञ्चारणचतुरैश्च चण्डालशिशुभिर्वृन्दशो दिशि दिशि मृगयया क्रीडद्भिर्दूरत एवावेद्यमानम् इतस्ततो विस्रगन्धिधूमोद्गमानुमीयमानसान्द्रवंशवनान्तरितवेश्मसन्निवेशं सर्वतःकरङ्कप्रायवृतिवाटम्, अस्थिप्रायरथ्यावकरकूटम् उत्कृत्तमांसमेदोवसाकर्दमप्रायकुटीराजिरम् आखेटकप्रायाजीवं पिशितप्रायाशनं वसाप्रायस्नेहं कौशेयप्रायपरिधानं चर्म्मप्रायास्तरणं सारमेयप्रायपरिवारं धवलीप्रायवाहनं स्त्रीमद्यप्रायपुरुषार्थम् असृक्प्रायदेवताबलिपूजनं पशूपहारप्रायधर्म्मक्रियम् आकरमिव सर्वनरकाणां कारणमिव सर्वकुशलानां सन्निवेशमिव सर्वश्मशानानां पत्तनमिव सर्व्वापापानाम् आयातनमिव सर्वयातनानां स्मर्य्यमाणमपि भयङ्करं श्रूयमाणमप्युद्वेगकरं दृश्यमानमपि पापजननं जन्मकर्म्मतो मलिनतरजनं जनतो निःस्पर्शतरलोकहृदयं लोकहृदयेभ्यो निर्घृणतरसर्वसंव्यवहारं समस्तपुरुषविशेषाचारबालयुवस्थविरम् अव्यवस्थितगम्यागम्याङ्गनोपभोगम् अपुण्यकर्म्मैकापणं पक्कणमपश्यम्।

दृष्ट्वा च तं तादृशं नरकवासिनामप्युद्वेगकरं समुत्पन्नघृणोऽन्तरात्मन्यकरवम् अपि नाम सा चण्डालदारिका दूरत एव मामालोक्योत्पन्नकरुणा मोचयेन्न जातिसदृशमाचरिष्यति, भविष्यन्त्येवंविधानि मे पुण्यानि; निमिषमप्यत्र पदं न

कुर्य्यामित्येवं कृतायंसमेव मां नीत्वा स चण्डालस्तदानुद्ध-ततरवेशायै दूरत एवावस्थितः प्रणम्यैष स मया प्राप्त इति तस्यै चण्डालदारिकायै दर्शितवान्। सा तु प्रहृष्टवदना शोभनं कृतमिति तमभिधाय तत्करात् स्वकरयुगलेनादाय माम् आः पुत्रक प्राप्तोऽसि साम्प्रतं क्वापरं गम्यते, व्यपनयामि ते सर्वमिदं कामचारित्वमित्यभिदधानैव धावमानचण्डालबा-लकापनीतेऽङ्घ्रीश्वान-लोमशदुर्गन्धिगोचर्म्मवर्द्धिकावनद्धेऽन्त-दृढ़ावबद्धदारुमयभोजनपानपात्रे मनागुद्घाटितद्वारे दारुप-ञ्जरे समं महाश्वेतावलोकनमनोरथैराक्षिप्यार्गलितद्वार-पिधाना समावेदयत् यथात्र निर्वृतः सम्प्रति तिष्ठेत्यभि-धाय तूष्णीमस्थात्। अहन्तु तथा पञ्जरे संरुद्धस्तस्य-करवम् अहो सङ्कटे पतितोऽस्मि, यदि तावदावेदितात्मावस्थः शिरसा प्रणिपत्य मुक्तये विज्ञापयाम्येनां, तदा य एव मे गुणो दोषतामापद्य बन्धनायोपजातः स एव संवर्द्धितो भवति साधु जल्पतीत्येवाहमनया ग्राहितः। कस्याश्च मदीयया बन्धनपीड़या पीड़ा नाहमस्यास्तनयो न भ्राता न च बन्धुः अथ मौनमालम्ब्य तिष्ठामि तत्रापि शाठ्य-प्रकोपिता कदाचिदतोऽप्यधिककष्टतरामवस्थां प्रापयति मां नृशंसतमाहि जातिरियम् अथवा वरमितोप्यधिकमुपनतं न पुनश्चाण्डालैः सह वागपि मिश्रिता। अपि च गृहीत-मौनं कदाचिन्निर्वेदान्मुञ्चत्येव वदंस्तु पुनर्न मोक्तव्य एवाह-

मनया। अपि च यत् दिव्यलोकतो भ्रंशो यन्मर्त्यलोके जन्म यत्तिर्य्यग्योनौ पतनं यच्चाण्डालहस्तोपगमनं यच्चैवंविधं पञ्जरबन्धदुःखं सर्वं एवायमनियतेन्द्रियत्वस्यैव दोषः। तत् किं ममैकया वाचा सर्वेन्द्रियाण्येव नियमयामीति निश्चित्य मौनग्रहण मकरवम्। आलप्यमानोऽप्यातर्ज्यमानोप्याहन्यमानोपि च तुद्यमानोपि च बलान्न किञ्चिदप्यवदं केवलमुच्चैश्चीत्कारमेवामुञ्चम् उपनीतेऽपि पानाशने तं दिवसमनशनेनैवात्यवाहयम्। अपरेद्युश्चातिक्रमत्यशनकाले मे दूयमानहृदयेव सा स्वपाणिनोपनीय नानाविधान्यपक्वानि पक्वानि च फलानि सुरभिशीतलञ्च पानीयमप्रतिपन्नतदुपयोगं मां आरोधितलोचना स्निह्यन्तीवावोचत्, क्षुत्पिपासाचितानां हि पशुपक्षिणां निर्विकारचित्तवृत्तीनाम् उपनतेष्वाहारेष्वनुपयोगो न सम्भवत्येव तत् यद्येवंविधस्त्वं कोऽपि भोज्याभोज्यविवेककारी पूर्वजातिस्मरोऽस्मदीयमाहारं परिहासि तथापि तावद्भक्ष्याभक्ष्यविवेकरहितायां तिर्य्यग्जातौ वर्त्तमानस्य ते किं वा अभक्ष्यं यन्न भक्षयसि येन चोत्कृष्टतमां जातिं प्राप्यात्मनैवेदृशं कर्म्म कृतं येन तिर्य्यग्योनौ पतितः स त्वं किमपरं विचारयसि प्रथममेवात्मा विवेकेन स्थापितः अधुना स्वकर्म्मोपात्तजातिसदृशमाचरतस्ते नास्त्येव दोषः। अपि च येषामपि भक्ष्याभक्ष्यनियमोऽस्ति तेषामपि आपत्काले

प्राणानां सन्धारणमभोज्योपयोगेनापि तावद्विहितं किं पुनस्त्वादृशस्य। नचेदृशं किञ्चिदप्याहाराय [क] ते मयोपनीतं यादृशेन चण्डालाशनाशङ्का समुत्पद्यते फलानि तु ततोऽपि प्रतिगृह्यन्त एव पानीयमपि चण्डालभाण्डादपि भुवि पतितं पवित्रमेवेत्येवं जनाः कथयन्ति तत् किमर्थमात्मानं क्षुधा पिपासया वायासयसि यन्न भक्षयसि अमूनि मुनिजनोचितानि वनफलानि न पिबसि पानीयम्। अहन्तु तेन तस्याश्चण्डालजात्यनुचितेन वचसा विवेकेन च विस्मितान्तरात्मा तथेति प्रतिपद्य शापनिघ्नो घृणां परित्यज्य जीविततृष्णया क्षुत्पिपासोपशमायाशनक्रियामङ्गीकृतवानस्मि मौनन्तु पुनर्नात्याक्षमेव।

एवमतिक्रामति च काले क्रमेण च तरुणतामापन्ने मय्येकदा प्रभातायाञ्च यामिन्याम् उन्मीलितलोचनोऽद्राक्षम्, अस्मिन् कनकपञ्जरे स्थितिमापन्नमात्मनं चाण्डालदारिकामीदृशीम्। सापि चाण्डालकन्यका यादृशी तादृशी देवेन दृष्टैव, सकलमेव तत् पक्कणममरपुरसदृशमालोक्यापगतचण्डालसंवसतिसंवेगो विस्मितान्तरात्मा किमेतदिति कुतूहलात् प्रष्टुकामो यावन्न परित्यजाम्येव मौनं, तावदेषामामादाय देवपादमूलमायाता। तत् केयं

[क] अपरिहारायेति वा पाठः।

किमर्थमनया चाण्डालतात्मनः ख्यापिता किमर्थं वाहं बद्धो बद्धा वा किमर्थमिहानीत इत्यत्र वस्तुन्यहमपि देव! इवानपगतकौतुक एवेति।

राजा तु तत् श्रुत्वा समुपजाताभ्यधिककुतूहलस्तदाक्षानाय पुरःस्थितां प्रतीहारीमादिशत्। अचिरादेव तयोपदिश्यमानमार्गा प्रविश्य सा पुरस्तात् ऊर्द्ध्वस्थितैव राजानमभिभवन्तीव स्वधाम्ना प्रागल्भ्येन चावभाषे भुवनभूषण! रोहिणीपते! ताराराम! कादम्बरीलोचनानन्द! चन्द्र! सर्वं त्वयास्य दुर्म्मतेरात्मनश्च पूर्वजन्मवृत्तान्तः श्रुत एव। अत्रापि जन्मनि यथायं निषिद्धोऽपि पित्रा कामरागान्धः पितुराज्ञामुल्लङ्घ्य वधूसमीपं प्रस्थितः तदप्यनेन स्वयमेव कथितम् तदहमस्य दुरात्मनो जननी श्रीः तथाप्रस्थितमेनं दिव्येन चक्षुषा दृष्ट्वास्य पित्राहं समादिष्टास्मि सर्व एव ह्यविनयप्रवृत्तोऽनुतापादिना न निवर्त्तते तदयं ते तनयः कदाचिदस्या अपि तिर्य्यग्जातेरधस्तात् पतति तद्यावदिदं कर्म्म न परिसमाप्यते तावदेनं मर्त्त्यलोक एव बद्धा धारय यथाचानुतापोऽस्य भवति तथा प्रतिविधेयमिति तदस्य विनयायेदं मया सर्वं कृतम् अधुना तु तत् कर्म्म समाप्तं, शापावसानसमयो वर्त्तते शापावसाने च युवयोः सममेव सुखेन भवितव्यमिति त्वत्समीपमानीतो मयायम्, अत्रापि यच्चाण्डालजातिः ख्यापिता तल्लोकसम्पर्कपरीहाराय तदनुभवेतां

सम्प्रति द्वावपि सममेव जन्मजराव्याधिमरणादिदुःखबहुले तनू परित्यज्य यथेष्टजनसमागमसुखम् इत्यभिदधानैव सा झणितिरणद्भूषणारवरोधितान्तरीचमुत्फुल्ललोकलोचनोद्वीचिता चितेर्गगनमुदपतत्।

अथ राज्ञस्तद्वचनमाकर्णयतस्तदैवाकृष्टकार्मुको मकरकेतुरग्रतः परमास्त्रं कादम्बरीं कृत्वा जीवितापहरणाय प्रतिरोधक इव निरुद्धसर्व्वाशोऽन्तःपदं चकार तत्पदाक्रान्तिनिर्वासितमिव च कादम्बरीं शरणमुपजगाम करणं तन्मार्गणाभिहतिभीता इव देहमुत्सृज्य निर्जग्मुरजड़ाः श्वासमरुतः तद्बाणपचवाताहतमिवाकम्पत तरलं शरीरं तच्छरशल्यनिकरकीलितेवोत्कण्टकिनी तनुरजायत तद्विशिखरजो रूषितमिव नयनयुगलमश्रुजलमुत्ससर्ज्ज आपाण्डुताश्च सद्यो वदनलावण्यमयासीत्, तद्धनुर्गुणध्वानाकर्णनोद्वेजितमिव हृदयवेदनाविकूणितविभागं नयनयुगलमभवत् अन्तर्ज्वलिष्यतो मदनदहनस्य धूमोपहतमिव वेपमानमधरकिसलयं शोषमगात्, तत्तापविरसमाननान्निष्पीड़ितं सरागं हृदयमिव ताम्बूलमपतत् आर्द्रस्य दारुणो द्रव इव दह्यमानस्याङ्गेभ्यो निरगमत् स्वेदः, मदनशरशल्यनिकरकीलितानीव तावतैव चणेनाङ्गानि परवशान्यजायन्त। तथा च कादम्बरीं पुरस्कृत्य कुसुमधन्वनो यास्यमानस्य तदवयवरूपशोभाविनिर्ज्जितानि तापापहरणचमान्यप्यस्याकिञ्चित्क-

राण्यभवन्। तथाहि कमलकिसलयानि पाणिपादेन कुवलयस्रजो दृष्ट्या मणिदर्पणाः स्तनकपोलेन मृणालानि वाहुलतिकया शशाङ्करश्मयो नखमयूखैः घनसारधूलिः स्मितप्रभया मुक्तादामानि दशनकिरणैः अमृतकरविम्बं मुखेन ज्योत्स्ना लावण्येन मणिकुट्टिमवेदिका नितम्बेन। एवञ्च विहतसर्वबाह्यप्रक्रियस्य हृदयेऽप्यसुखायमानसकलान्यविनोदस्य तामेवाभिध्यायतस्तामेवोत्प्रेक्षमाणस्य तामेव लिखतः तामेव पश्यतः तामालपतः तामालिङ्गतः तया सह तिष्ठतः तां प्रकोपयतः तामनुनयतः तस्याः पादयोः पततः तया सह केलिं कुर्वतः तां रममाणस्य मुक्तसर्वान्यक्रियस्य दिवाप्यनुन्मीलितलोचनस्य निश्यप्यनुपजातनिद्रस्य सुहृज्जनमप्यसम्भाषयतः गुरूनप्यनमस्यतो धर्मक्रियामप्यकुर्वाणस्य सुखादप्यनर्थिनो दुःखादप्यनुद्विजमानस्य मरणादप्यबिभ्यतो गुरुभ्योऽप्यपेतलज्जस्य आत्मन्यप्यस्नेहस्य किं बहुना कादम्बरीसमागमेऽप्यनुद्यमस्य केवलमेव मुहुर्मुहुर्मूर्च्छोपगमनच्छलेन जीवितोत्सर्गयोग्यामिव तनुं कुर्वतो विहस्तेनापि प्रतिपन्नविविधोपकरणेन गलितनयनसलिलेनाप्युच्छुष्काननेन मुषितवचनावकाशेनापि वैशम्पायनाक्रोशपरेण अनवरतमाचरणाद्वितीर्णचन्दनचर्चेण चरणतलनिवेशितार्द्रारविन्दिनीदलेन करार्पितकर्पूरचोददन्तुरतुषारखण्डेन हृदयविनिहितार्द्रहारदण्डेन कपोलतलस्थापितस्फाटिकम-

णिदर्पणे ललाटतटघटितचन्द्रमणिना अंसदेशावस्थापितमृणालेन कदलीदलव्यजनवाहिना आनर्त्तिततालवृन्तेन जलार्द्रानिलसञ्चारिणा सकुसुमतल्पकल्पनाकुलेन धारागृहजलयन्त्रप्रवर्तनाक्रतार्त्तिनामणि कुट्टिमक्षालनायत्तेन सजलपङ्कजकिञ्जल्ककह्लारप्रकरप्रचारणसम्भ्रान्तेन अन्धकारशिशिरभूगृहाभ्यन्तरप्रत्यवेक्षणदक्षेण उद्यानदीर्घिकातटलतागहनमण्डपसेकसन्तानकारिणा मलयजजलार्द्रचन्द्राश्रयावधानदानोद्यतेन चाप्तपरिजनेनोपचर्य्यमाणस्यापि काष्ठीभूतदेहस्य दाहहेतुर्झटित्येवारुरोह परां कोटिं कामानलो वैशम्पायनस्य च महाश्वेतोत्कण्ठया।

तस्मिन्नेव चान्तराले तत्सन्धुक्षणायेव प्रवर्त्तयन्, सरसकिशलयलतालास्योपदेशदक्षं दक्षिणानिलम्, आलोकरक्तपल्लवप्रलम्बांस्तवकयन् अशोकशाखिनो विकसितमुकुलमञ्जरीभरेणानमयन् बालसहकारान् उत्कोरकयन् कुरवकैः सह वकुलतिलकचम्पकनीपान् आपीतयन् किंकिरातैः ककुभो विकिरन्नतिमुक्तकामोदं, उद्दामयन् किंशुकवनानि निरङ्कुशयन् कामिजनमनांसि निर्मूलयन् मानम्, अपमार्ज्जयन् लज्जाम् अपाकुर्वन् कोपम् उपनयन्ननयव्यवस्थाम्, उपस्थापयन् दृढ़चुम्बनालिङ्गनरतस्थितिम्, उल्लासयन् मकरध्वजरक्तांशुकानि सकलमेव महारजनमयमिव रागमयमिव रतिमयमिव उत्सवमयमिव

दानमयमिव प्रेममयमिव कलिमयमिव औत्सुक्यमयमिव जनयन् जीवलोकं किसलयितसकलकान्तारकाननोपवनतरुरुत्फुल्लचूतद्रुमकुसुमामोदवासितदशाशान्तरो मधुमदमधुरकोकिलालापदुःखिताध्वगजनश्रुति अनवरतमकरन्दशीकरासारदुर्द्दिनोन्मादित-सकलजीवलोकहृदयः मदाकुलभ्रमद्भ्रमरझङ्कारचकित विरहातुरजनमनोवृत्तिः आत्मसम्भवैकोल्लासकारी भरात् प्रावर्त्तत सुरभिमासः।

तेन च कुसुमधन्वनः परमास्त्रेण मधुना पर्य्याकुलितहृदया कादम्बरी सम्प्राप्ते भगवतः कामदेवस्य महोत्सवे महता प्रयत्नेन कथं कथमपि अतिवाहितदिवसा श्यामायमानदशदिशि सायाह्ने स्नात्वा निर्वर्त्तितकामदेवपूजा तस्य पुरश्चन्द्रापीड़मतिसुरभिशीतलैः स्नापयित्वाम्भोभिः आचरणाद्विलिप्य मृगमदामोदिना हरिचन्दनेन सुरभिकुसुमस्रग्भिरुद्ग्रथितं कुन्तलकलापं कृत्वेव कर्णारोपितसकिसलयाशोकस्तवककर्णपूरं कर्पूरकुसुमप्रायैः प्रसाध्याभरणविशेषैर्विस्मृतनिमेषा पिवन्तीव भावार्द्रया दृष्ट्या सुचिरमालक्ष्योत्कण्ठानिर्भरा पुनःपुनर्निश्वस्योत्कम्पमाना साध्वसेन स्विन्नसर्व्वाङ्गी समुत्कण्टकिततनुरुच्छुष्यदधरवदना महाश्वेतावलोकनभयान्मुहुर्मुहुर्दिक्षु विक्षिप्तोच्चकितदृष्टिरतिचिरमिवोपसृत्य पुनःपुनः स्थित्वा आविष्टेव परवतीव परित्याजिता बलाल्लज्जया सहावलाजनसहजां भीतिं भगवता

भुवनत्रयोन्मादकारिणा मन्मथेन आत्मानमप्यपारयन्ती सन्धारयितुमेकान्ते निःसहा सहसाभिपत्य मुकुलितलोचनपङ्कजा जीवन्तमिव निर्भरं कण्ठे जग्राह।

चन्द्रापीड़स्य तु तेनामृतसेकाह्लादिना कादम्बरीकण्ठग्रहेण सद्यः सुदूरगतमपि कण्ठस्थानं पुनर्जीवितं प्रत्यपद्यत, दिवसक्रमामीलितं कुमुदमिव शरज्ज्योत्स्नाभिपातादुच्छ्वसितमाबबन्ध हृदयम्, उषःपरामृष्टेन्दीवरमुकुललीलया उदमीलत्कर्णान्तायतं चक्षुः, अम्भोरुहविभ्रमेण चाजृम्भत वदनम्, एवञ्च सुप्तप्रतिबुद्ध इव प्रत्यापन्न सर्वाङ्गचेष्टश्चन्द्रापीड़ः तया कण्ठलग्नां कादम्बरीं चिरविरहदुर्बलाभ्यां लोचनाभ्यां पिबन्निव कण्ठे गृहीत्वा वाताहतां बालकदलीमिव भयेनोत्कम्पमानाङ्गयष्टिमुद्गाढ़तरमामीलिताक्षीं वक्षस्येव प्रवेष्टुमीहमानां न मोक्तुं न ग्रहीतुमात्मना पारयन्तीं श्रोत्रहृदयग्राहिणानुभूतपूर्वेण स्वरेणानन्दयन्नवादीत्। भीरु त्यज्यतां भयं प्रत्युज्जीवितोऽस्मि तवैवामुना कण्ठग्रहेण, त्वं खल्वमृतसम्भवादप्सरसां कुलादुत्पन्ना किं न स्मरसि तन्महावचनम् इदं तत्तेजोमयं वपुः स्वत एवाविनाशि विशेषतोऽमुना कादम्बरीकरस्पर्शेनाप्यायितमिति तदेतावन्त्येव दिनानि पाणिना ते स्पृश्यमानो न यत् प्रत्युज्जीवितोऽस्मि तच्छापदोषात्। अद्य तु स मे व्यपगतः शापः परित्यक्ता सा मया त्वद्विरहदुःखदायिनी मानुषी शूद्रकाख्या तनुः,

एषापि च तवास्यां रुचिरुत्पन्नेति त्वत्प्रीत्या प्रतिपालिता च तदयं लोकश्चन्द्रलोकश्च ते द्वावप्यधुना चरणतलप्रतिबद्धौ। अपि च प्रियसख्या अपि ते महाश्वेतायाः प्रियतमो मयैव सह विगतशापः सञ्जात इत्यभिदधत्येव चन्द्रापीड़शरीरान्तरितवपुषि चन्द्रमसि चन्द्रलोकावस्थानलग्नममृतपरिमलमेव केवलमुद्वहन्नङ्गैरन्यतमस्मात्पूर्वदृष्टेनैव वेशेन यादृशेन महाश्वेतोत्कण्ठयोपरतस्तथैव कण्ठेनैकावलीं धारयंस्तथैवाकल्पनिःसहैरङ्गैः तथैवापाण्डुक्षामकपोलवाहिना मुखेनाम्बरतलादवतरन्नदृश्यत कपिञ्जलकरावलम्बी समुत्सृष्टशुकशरीरः पुण्डरीकः।

दृष्ट्वा च दूरत एव उन्मुक्तश्चन्द्रापीड़वक्षःस्थला कादम्बरी स्वयमेव धावित्वा दत्तकण्ठग्रहा महाश्वेतां तेन पुण्डरीकागमनमहोत्सवेन यावन्न वर्द्धयत्येव तावत् पुण्डरीकोऽवतीर्य्य परमोपकारिणे चन्द्रापीड़वपुषे शशाङ्कायाढौकत। चन्द्रापीड़स्तु तं कण्ठे गृहीत्वाब्रवीत् सखे! पुण्डरीक! यद्यपि प्राग्जन्मसम्बन्धाज्जामातासि तथाप्यनन्तरजन्माहितसुहृत्स्नेहसद्भावेनैव मया सह वर्त्तितव्यं भवता इत्येवंवदत्येव चन्द्रापीड़े चित्ररथहंसौ दिष्ट्या वर्द्धयितुं केयूरको हेमकूटमगमत्। मदलेखापि धावमाना निर्गत्य मृत्युञ्जयजपव्यग्रस्य तारापीड़स्य विलासवत्याश्च पादयोः पतित्वा देव! देव्या सह दिष्ट्या वर्द्धसे, प्रत्युज्जीवितो युवराजः समं वैशम्पायनेन इत्यानन्दनिर्भरम् उच्चैर्जगाद।

राजा तु तत् श्रुत्वा शरीरसंस्कारविरहोन्नताविरलदीर्घ-परुषपलितलोमशप्रकोष्ठाभ्यां दोर्भ्यां गाढ़ं गाढ़ं परिष्वज्य तां तदनु हर्षपरवशो विलासवतीं कण्ठेऽवलम्ब्य जराभङ्ग-वलीशिथिलितमूलेन बाहुनोत्क्षिप्तोत्तरीयायाञ्चलः स्वय-मेवाशिक्षितलयविसंष्ठुलैः पदैर्नृत्यन्निर्वोत्फुल्लनयननरपति-सहस्रपरिवृतोऽम्भोजाकर इव मलयमरुत्प्रेङ्खोलनाविव-र्त्तितो मदलेखां पुनः पुनः क्वासौ क्वासौ इति पृच्छन् पुनः पुनर्निर्विशेषवृत्तिं शुकनासं कण्ठे सम्भावयंस्तत्रैवागच्छत्। दृष्ट्वा च तथा पुण्डरीककण्ठे लग्नं चन्द्रापीड़मानन्दनिर्भरः शुकनासमवादीत्, दिष्ट्या नैकाकिना मया तनयप्रत्युज्जीव-नोत्सवसुखमनुभूतमिति। चन्द्रापीड़स्तु तथा हर्षपरवशं पितरमालोक्य ससम्भ्रमोन्मुक्तपुण्डरीकः पुरेव पृथ्वीतल-निवेशितशिराः: चरणयोरपतत्। अथ सत्वरोपसृतस्तं तथाप्रणतमुन्नमय्य तारापीड़ोऽभ्यधात् पुत्र! यद्यपि पिताहं तव शापदोषात् स्वपुण्यैर्वा सञ्जातः तथापि जगद्वन्दनीयो लोकपालस्त्वम् अपि च मय्यपि यो नमस्योऽंशः सोऽपि मया त्वय्येव संक्रामितः तदुभयथापि त्वमेव नमस्कार्य्य इत्यभि-दधदेव समं राजपुत्रलोकसहस्रैः प्रतीपमस्य पादयोरपतत्। विलासवती तु तं पुनः पुनः शिरसि पुनर्ललाटे पुनश्च कपोलयोश्चुम्बित्वा गाढ़गाढ़ं सुचिरमालिलिङ्ग उन्मुक्तश्च मात्रा उपसृत्य शुकनासं प्रणनाम। आशीःसहस्राभि-

वर्द्धितश्च तेनात्मनापसृत्य यथाक्रमं पित्रोः शुकनासस्य मनोरमायाश्चैष वो वैशम्पायन इति पुण्डरीकं विलज्जावनम्रवदनमदर्शयत्। अस्मिन्नेव प्रस्तावे समुपसृत्य कपिञ्जलः शुकनासमवादीत्। एवं सन्दिष्टमार्य्यस्य भगवता श्वेतकेतुना अयं खलु पुण्डरीकः संवर्द्धित एव केवलं मया आत्मजः पुनस्तव अस्यापि भवत्स्वेव लग्नः स्नेहः तद्वैशम्पायन एवायमित्यवगत्याविनयेभ्यो निवारणीयः परोऽयमिति कृत्वा नोपेक्षणीय यच्चापगतशापोऽप्यात्मसमीपं नानीत' तत्तवैवायमिति। अन्यच्च आत्मानमस्मिन्नाचन्द्रसमकालीनायुषि स्थापयित्वा कृतार्थः सम्प्रति अस्मद्दिव्यलोकादप्युपरिष्टाद्गन्तुमुद्यतं मे सत्त्वाख्यं ज्योतिरिति। शुकनासस्तु विनयावनम्रं पुण्डरीकं पाणिनांसेऽवलम्ब्य कपिञ्जलं प्रत्यवादीत् कपिञ्जल! सकल जगदाश्रयत्वेन सता भगवता किमित्येवमादिष्टं सर्वथा स्नेहस्यायमसन्तोष इत्येवंविधैरन्यैश्च पूर्वजन्मसंस्मरणालापैश्च परस्परावलोकनसुखोत्फुल्ललोचनानां सर्वेषामेव तेषामचेतितैव सा क्षणदा प्रभाता, प्रातरेव च सकलगन्धर्वलोकानुगतौ समं मदिरागौरीभ्यां चित्ररथहंसौ गन्धर्वराजावपि तत्रैवाजग्मतुः आगतयोश्च तयोः लज्जितात्मजोपगमनमुदित हृदययोर्ज्जामातृदर्शनसमुत्सुकनयनयोस्तारापीड़शुकनासाभ्यां सहानुभूतसम्बन्धकोचितसंवादकथयोः सहस्रगुण इव महोत्सवामोदः प्रावर्त्तत।

अथ वर्त्तमान एव तस्मिंश्चित्ररथस्तारापीड़मवादीत् विद्यमाने स्वभवने किमर्थमरण्ये महोत्सवः क्रियते ? अपि च यद्यस्माकमेवं परस्पराभिरुचिनिष्पन्नो धर्म्म्यो विवाहः, तथापि लोकसंव्यवहारोऽनुवर्त्तनीय एव तद्गम्यतां ताव-दस्मदीयमवस्थानं ततः स्वभूमिं चन्द्रलोकं वा गमिष्यथ। तारापीड़स्तु तं प्रत्युवाच गन्धर्वराज! यत्रैव निरतिशयं सम्पत्सुखं तदेव भवनं तदीदृशं क्वापरत्र सम्पत्सुखं मया प्राप्तम् अन्यच्च सर्वगृहसुखान्येव मया जामातरि ते संक्रामितानि तद्वयस्य वधूसमेतं तमेवादाय गम्यतां गृह-सुखानुभवायेति। चित्ररथस्तथाभिहितो राजर्षिणा यथा ते रोचत इत्युक्त्वा चन्द्रापीड़मादाय हेमकूटमगात् गत्वा च चित्ररथः कादम्बर्य्या सह समग्रमेव स्वराज्यं चन्द्रापीड़ाय न्यवेदयत् पुण्डरीकायापि समं महाश्वेतया निजपदं हंसः। तौ तु हृदयरुचितवधूलम्भमात्रकेणैव कृतार्थौ न किञ्चिदप्य-परं प्रत्यपद्येताम् अन्यदा जन्माभिवाञ्छितहृदयवल्लभलाभ-मुदिता सर्वस्वजनमध्योपगमननिर्वृतापि च कादम्बरी वाष्पो-त्तरललोचना विषसमुखी वासभवनगतं चन्द्रापीड़मूर्त्तिं चन्द्रमसमप्राक्षीत्, आर्य्यपुत्र! सर्वे खलु वयं मृताः सन्तः प्रत्युज्जीविताः परस्परं सङ्घटिताश्च सा पुनर्वराकी पत्र-लेखास्माकं मध्ये न दृश्यते न विद्मः किं तस्याः केवलायाः वृत्तमिति। चन्द्रापीड़मूर्त्तिश्चन्द्रमाः तत् श्रुत्वा अर्द्दितान्त-

रात्मा प्रत्यवादीत्, प्रिये ! कुतोऽत्र सा खलु मद्दुःखदुःखिता रोहिणी श्रुतं मामुपश्रुत्य कथं त्वमेवैकाकी मर्त्त्यलोकनिवासदुःखमनुभवसि इत्यभिधाय निवार्य्यमाणापि मया प्रथममेव मच्चरणपरिचर्य्यार्थे मर्त्त्यलोके जन्माग्रहीत्। इतश्च जन्मान्तरं गच्छता मया मदुपरमसमुन्मुक्तशरीरा पुनरपि मर्त्त्यलोकमवतरन्ती बलादातर्ज्यामरलोकं विसर्ज्जिता तत्र पुनस्तां द्रक्ष्यसीति। कादम्बरी तु तत् श्रुत्वा रोहिण्यास्तयोदारतया महानुभावतया स्नेहलतया पतिव्रततया पेशलतया च विस्मितहृदया परं लज्जिता न किञ्चिदपि वक्तुं शशाक।

अत्रान्तरे जन्मद्वयाकाङ्क्षितं कामप्रभोश्चन्द्रमसः कादम्बरीसम्भोगसुखमिवोपपादयितुमपससार वासरः। अनुरागकवोष्णतया परसन्ध्यावधूत्प्रावरणायेव वितस्तार तमोवासो वासवी। चन्द्रोदयाभिरामञ्च समग्रमेव जगदभवत्। एवञ्च भरेणावतीर्णायां रजन्यां चन्द्रापीडश्चिराभिलषितमुन्मीलितनयनकुवलयमुत्स्रस्तनीवीप्रसृतकरनिवारणानुबन्धमनुभूतप्रत्यालिङ्गनसुखमप्रार्थितसुरतपरिसमाप्तिचपासुभगं कादम्बरीप्रथमसुरतसुखमनुभूयैकदिवसमिव दशरात्रं स्थित्वा परितुष्टहृदयाभ्यां श्वशुराभ्यां विसर्ज्जितः पितुः पादमूलमाजगाम।

आगत्य च समकालमेवानुभूतक्लेशं राजलोकमात्मसमं

कृत्वा समारोपितराज्यभारः पुण्डरीके पित्रोः पादावनुचरन् कदाचिदत्यद्भुतोत्फुल्लनयननैगमजनावलोकिता जन्मभूमिस्नेहादुज्जयिन्यां कदाचिद्गन्धर्वराजगौरवेणानुपरमणीयतरमहिम्नि हेमकूटे कदाचिदमृतपरिमलाधिवाससुरभिशिशिरसर्वप्रदेशहारिणि रोहिणीबहुमानेन चन्द्रलोके कदाचिदहर्निशोत्फुल्लसहस्रपत्रनिवहौघवाहिनि पुण्डरीकप्रीत्या लक्ष्मीनिवाससरसि कादम्बरीरुच्या च सर्वत्रैवापरेष्वपि रम्यवनेषु तेषु तेषु रम्यतरेषु स्थानेषु तया सह जन्मद्वयाकाङ्क्षयैवापरिसमाप्तान्यपुनरुक्तानि च तानि तानि न केवलं चन्द्रमाः कादम्बर्या सह कादम्बरी महाश्वेतया सह महाश्वेता तु पुण्डरीकेण सह पुण्डरीकोऽपि चन्द्रमसा सह परस्परावियोगेन सर्वएव सर्वकालं सर्वसुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन् ।

इति सकलकविललामभूतवाणभट्टतनयविरचितः कादम्बर्याः समाप्तोऽयमुद्वाहरूपः उत्तरभागः ।

सम्पूर्णम् ।